श्री सिद्धि-भुवन-मनोहर-जैनग्रन्थमाला ग्रन्थाङ्कः ३

आचार्यश्रीशीलाचार्यविरचितविवरणविभूषितं

# श्री आचाराङ्गसूत्रम्

(ŚRĪ ĀCĀRĀṄGASŪTRAM)

[ प्रथमश्रुतस्कन्धस्याद्याध्ययनचतुष्टयात्मको विभागः ]

संशोधकः

पण्डित अमृतलाल मोहनलाल गिरधरलाल भोजकः

सम्पादकः

पूज्यपादसद्गुरुदेवमुनिराजश्रीभुवनविजयान्तेवासी

मुनि जम्बूविजयः

— : प्रकाशक :—

श्री सिद्धि-भुवन-मनोहर जैन ट्रस्ट - अहमदाबाद

तथा

श्री जैन आत्मानन्दसभा - भावनगर

पीन ३६४००१

श्री सिद्धि-भुवन-मनोहर-जैनग्रन्थमाला ग्रन्थाङ्कः ३

आचार्यप्रवरश्रीशीलाचार्यविरचितविवरणविभूषितं
पञ्चमगणधरभगवच्छ्री सुधर्मस्वामिसन्दृब्धं परम्परायातं

# श्री आचाराङ्गसूत्रम् ।

[ प्रथमश्रुतस्कन्धस्याऽऽद्याध्ययनचतुष्टयात्मको विभागः ]

संशोधकः
पण्डित अमृतलाल मोहनलाल गिरधरलाल भोजकः

सम्पादकः
पूज्यपादाचार्यदेवश्रीमद्विजयसिद्धिसूरीश्वरपट्टालङ्कार-
पूज्यपादाचार्यदेवश्रीमद्विजयमेघसूरीश्वरशिष्य-
पूज्यपादसद्गुरुदेवमुनिराजश्रीभुवनविजयान्तेवासी
मुनि जम्बूविजयः

–: प्रकाशक :–
श्री सिद्धिभुवनमनोहर जैन ट्रस्ट - अहमदाबाद
तथा
श्री जैन आत्मानन्दसभा - भावनगर
पीन ३६४००१

ग्रन्थनाम :

श्री आचाराङ्गसूत्रम्

●

संशोधक :

पण्डित अमृतलाल मोहनलाल गिरधरलाल भोजकः

●

वि. सं. २०६४

ई० सन् २००८

●

प्रकाशक :

श्री सिद्धिभुवनमनोहर जैन ट्रस्ट - अहमदाबाद

तथा

श्री जैन आत्मानन्दसभा - भावनगर

पीन ३६४००१

●

प्राप्तिस्थान

१. जैन आत्मानन्दसभा

खारगेट, भावनगर

पीन ३६४००१

●

२. सरस्वती पुस्तक भंडार

हाथीखाना, रतनपोल,

अहमदाबाद ३८०००१

फोन : २५३५६६९२

●

अक्षरांकन :

विरति ग्राफिक्स, अहमदाबाद

फोन : ०७९-२२६८४०३२

●


मुद्रक :

मुद्रेश पुरोहित, सूर्या ऑफसेट, आंबली गाम,

सेटेलाइट-बोपल रोड, अहमदाबाद - ५८.


फोन नं. : (०२७१७) - २३०११२

श्री सिद्धगिरिमंडन श्री ऋषभदेव भगवान



श्री शत्रुंजयतीर्थाधिपति श्री आदीश्वरपरमात्मने नमः

श्री शंखेश्वरजी तीर्थमां बिराजमान देवाधिदेव



श्री शंखेश्वर पार्श्वनाथ भगवान

तपगच्छ श्री श्रमणसंघना घणा मोटा भागना श्रमण भगवंतोना गुरुदेव

परमपूज्य पूज्यपाद तपस्विप्रवर

# पं. श्री मणिविजयजी गणी (दादा)



| | | |
|---|---|---|
| जन्म | – | विक्रमसं. १८५२, भादरवा सुदि, अघार (विरमगाम पासे) |
| दीक्षा | – | विक्रमसं. १८७७, पाली (मारवाड) |
| पंन्यासपद | – | विक्रमसं. १९२२, जेठ सुदि १३ अमदावाद |
| स्वर्गवास | – | विक्रमसं. १९३५, आसो सुदि ८ अमदावाद |

पूज्यपाद महातपस्वी गणिवर्य पं. श्री मणिविजयजी महाराज (दादा)ना शिष्यरत्न

पूज्यपाद संघस्थविर आचार्यदेव श्री १००८


# विजय सिद्धिसूरीश्वरजी (बापजी) महाराज



| | |
|---|---|
| जन्म : वि. सं. | १९११ श्रावण सुदि १५, वळाद (अमदावाद पासे) |
| दीक्षा : वि. सं. | १९३४ जेठ वदि २, अमदावाद |
| पंन्यासपद : वि. सं. | १९५७, सुरत |
| आचार्यपद : वि. सं. | १९७५ महा सुदि ५, महेसाणा |
| स्वर्गवास : वि. सं. | २०१५ भाद्रपद वदि १४, अमदावाद |

पूज्यपाद संघस्थविर आचार्यदेव श्री १००८ विजयसिद्धिसूरीश्वरजी (बापजी)
महाराजना पट्टालंकार

# पूज्यपाद आचार्यदेवश्री विजयमेघसूरीश्वरजी महाराज




| | |
|---|---|
| जन्म : | वि. सं. १९३२ मागशर सुदि ८, रांदेर |
| दीक्षा : | वि. सं. १९५८ कारतिक वदि ९, मींयागाम–करजण |
| पंन्यासपद : | वि. सं. १९६९ कारतिक वदि ४, छाणी |
| आचार्यपद : | वि. सं. १९८१ मागशर सुदि ५, अमदावाद |
| स्वर्गवास : | वि. सं. १९९९ आसो सुदि १, अमदावाद |

पूज्यपाद प्रातःस्मरणीय संघस्थविर श्री १००८ आचार्यदेवश्री
विजयसिद्धिसूरीश्वरजी (बापजी) महाराजना पट्टालंकार
पूज्यपाद आचार्यदेवश्री विजयमेघसूरीश्वरजी महाराजना शिष्यरत्न


# पूज्यपाद गुरुदेव मुनिराजश्री भुवनविजयजी महाराज

(मु.श्री जंबूविजयजी म.ना पिताश्री तथा गुरुदेव)



जन्म : वि. सं. १९५१ श्रावण वदि ५, शनिवार, ता.१०–८–१८९५, मांडल
दीक्षा : वि. सं. १९८८ जेठ वदि ६, शुक्रवार, ता.२४–६–१९३२, अमदावाद
स्वर्गवास : वि. सं. २०१५ महा सुदि ८, ता.१६–२–१९५९, शंखेश्वरजी तीर्थ

# पू. आगमप्रभाकर मुनिराज श्री पुण्यविजयजी महाराज
(पं. अमृतलालभाई मोहनलाल भोजकना विद्यागुरु)



जन्म : वि. सं. १९५२ कारतिक सुदि ५, (कपडवंज)
दीक्षा : वि. सं. १९६५ महावदि ५ (छाणी)
स्वर्गवास : वि. सं. २०२७ जेठ वदि ६, (मुंबई) ता.१४–६–१९७१ सोमवार

# पंडित अमृतलाल मोहनलाल गिरधरलाल भोजक



जन्म : विक्रम सं. १९७१ मागशर सुदि १३, सोमवार ता. ३०–११–१९१८

स्वर्गवास : विक्रम सं. २०५६ महावदि १३, शनिवार, ता.८–३–२०००

पूज्यपाद साध्वीजी श्री लाभश्रीजी महाराज (सरकारी उपाश्रयवाला)ना शिष्या

# पूज्यपाद साध्वीजी श्री मनोहरश्रीजी महाराज

(मु.श्री जंबूविजयजी म.ना संसारी मातुश्री)



जन्म : वि. सं. १९५१ मागशर वदि २, शुक्रवार, ता.१४–१२–१८९४ झींझुवाडा
दीक्षा : वि. सं. १९९५ महा सुदि १२, बुधवार, ता.१–२–१९३९ अमदावाद
स्वर्गवास : वि. सं. २०५१ पोष सुदि १०, बुधवार, ता.११–१–१९९५ रात्रे ८.५४
वीशानीमाभवन जैन उपाश्रय, सिद्धक्षेत्र पालिताणा.

संघमाता शतवर्षाधिकायु पूज्यपाद साध्वीजी
श्री मनोहरश्रीजी म. सा. ना शिष्या

# साध्वीजी श्री सूर्यप्रभाश्रीजी महाराज



जन्म : वि.सं. १९७७, फागण वदि ६, सोमवार, आदरियाणा
दीक्षा : वि. सं. महासुदि १, रविवार, ता.३०–१–१९४९, दसाडा
स्वर्गवास : वि. सं. २०५१, आसोवदि १२, शनिवार, ता.२१–१०–१९९५, मांडल

# ग्रन्थानुक्रमः


| | पृष्ठाङ्कः |
|---|---|
| પં. અમૃતલાલ મોહનલાલ ભોજકે પોતાના હાથે જ લખેલી પોતાના જીવનના કેટલાક પ્રસંગોની નોંધ | [illegible] |
| જિનઆગમ જયકારા (પ્રસ્તાવના) | [illegible] |
| द्वित्राः शब्दाः | ११-१[illegible] |
| आचाराङ्गसूत्रस्य विषयानुक्रमः | १३-२४ |
| श्री आचाराङ्गसूत्रम् | १-४३० |
| परिशिष्टे | ४३१-४[illegible] |

# જીવન ચરિત્ર

## પં. અમૃતલાલ મોહનલાલ ભોજકે પોતાના હાથે જ લખેલી પોતાના જીવનના કેટલાક પ્રસંગોની નોંધ

૧. તા. ૩૦-૧૧-૧૯૧૪ (વિક્રમ સં. ૧૯૭૧ માગશર સુદિ ૧૩ સોમવાર) જન્મ.

૨. ગુજરાતી છ ધોરણ સુધીનો અભ્યાસ. પાટણમાં.

૩. શ્રી યશોવિજયજી પાઠશાળામાં (મહેસાણા) એક વર્ષ સુધી ધાર્મિક અને સંસ્કૃત ભાષાનો અભ્યાસ.

૪. શેઠશ્રી માણેકલાલ પ્રેમચંદ (મસ્કતી માર્કેટ મહાજનના પ્રમુખ)ની પ્રેરણાથી અમદાવાદમાં સવારે ડહેલાના ઉપાશ્રયે તથા બપોરે શાંતિસાગરના ઉપાશ્રયે (દેવસાના પાડા પાસે) સંસ્કૃતનો અભ્યાસ.

ત્યાર પછી—

૧. પ્રાયઃ ૧૯ વર્ષની વયે પાટણમાં પૂ. પા. આગમ પ્રભાકર મુનિ ભગવંતશ્રી પુણ્યવિજયજી મ.ના ગુરુજી પૂ.પા.મુ.ભ. શ્રી ચતુરવિજયજી મ. પાસે પ્રાચીન હસ્તલિખિત ગ્રંથની નકલ=પ્રેસકોપી કરવામાં તથા સટીક બૃહત્કલ્પસૂત્રના સંપાદન કાર્યમાં હ.લિ. પ્રતિઓ સાથે પ્રેસમેટર મેળવવાના કાર્યમાં સહકાર આપ્યો.

પ્રાકૃત ભાષાનો અભ્યાસ કરેલો નહીં, છતાં ઉપર જણાવેલ બૃ.ક.નું કાર્ય કરતાં મહાવરાથી કહો કે જન્માંતરની આરાધનાના ફળરૂપે કહો અથવા પૂ.પા. આગમ પ્રભાકરજી મ.ના અંતરના આશીર્વાદથી પ્રાકૃતભાષામાં પ્રાયઃ આર્યાછંદમાં રચના કરવાની શક્તિ મળી. આના ઉદાહરણરૂપે આ.ભ. શ્રીવિજયપ્રેમસૂરીશ્વરજી મ.ના શિષ્ય મુ.ભ.શ્રી જંબૂવિ.મ.ની આચાર્ય પદવી પ્રસંગે પૂ.મુ.ભ.શ્રી જંબૂવિજયજી મ.ના જીવનનિરૂપણરૂપ પ્રાકૃત ભાષામાં રચના કરી. ત્યાર પછી ભારતીયદર્શનોના અધિકારી સુખ્યાત શ્રુતધર વિદ્વદ્વરેણ્ય મુનિ ભ. શ્રી જંબૂવિજયજી મ.સા.ને આજથી કેટલાંક વર્ષો પહેલાં શ્રીસિદ્ધગિરિ ઉપર (પાલિતાણામાં) "શ્રુતસ્થવિર અને

શાસનપ્રભાવક'' નામની બે પદવીઓ શ્રી સંઘ દ્વારા અપાઈ તેની યાદગિરીરૂપ सुयथेरजयवाओ નામની પ્રાયઃ ૭૫ આર્યાછંદમાં રચના કરી. આ રચના ઉપયોગી જાણીને પૂ.પા.આચાર્ય ભ. શ્રી વિજયપ્રદ્યુમ્નસૂરિજીએ શ્રી આત્માનંદ પ્રકાશ માસિકમાં પ્રકાશિત કરી અને તેમાં પં. અમૃતનો અને રચનાનો પરિચય ગુજરાતીમાં આપ્યો.

આ ઉપરાંત કેટલાક આચાર્યભ. અને મુનિભ.ની નિશ્રામાં સંપન્ન થતા ધર્મપ્રસંગોમાં તે તે ધર્મપ્રસંગને અનુરૂપ આર્યાછંદમાં પ્રાકૃત રચનાઓ કરી છે. સંસ્કૃત ભાષામાં તો જેમનો પોતા ઉપર પ્રારંભિક ઉપકાર હતો તે મુ.ભ.શ્રી ચતુરવિજયજી મ.ના સંબંધમાં સહજભાવે બે આર્યાછંદ રચેલા તે આ પ્રમાણે-

मुनिचतुरो धीचतुरो भाषाचतुरश्च शास्त्रचतुरश्च ।
सम्पादनचतुरश्चतुरशालिशीलो जगच्चतुरः ॥१॥
चतुरविनेयो द्वेधा च चतुरगुरुरपि तथैव द्वेधाऽपि ।
जीयात् श्री चतुरविजयनामा मुनिपुङ्गवः सततम् ॥२॥

કિં બહુના ?

ખુદ અમૃતને પોતાને ઘણીવાર આશ્ચર્ય થાય છે કે, વગર અભ્યાસે આવી રચના કેવી રીતે થઈ ? સાથે સાથે સમાધાન પણ મળે છે કે, જન્માંતરમાં કરેલી શ્રુતસેવા અને ગુરુસેવાના આશીર્વાદ જ ફળ્યા છે.

સન ૧૯૪૨માં પુરાતત્ત્વાચાર્ય મુનિજી શ્રી જિનવિ.ની સાથે જેસલમેર ગયેલ. ત્યાં તેમણે સિંધી ગ્રંથમાળામાં પ્રકાશિત કરવા માટે તાડપત્ર ઉપર લખાયેલા મહત્ત્વના ગ્રંથોની નકલો કરાવેલી, તેમાં गुणपालकृत जंबुचरियं ગ્રંથની નકલ કરાવેલી. આ ગ્રંથની કેવળ એક જ પ્રાચીન નકલ જેસલમેરમાં જ છે. મુનિજી (શ્રી જિનવિ.) ખૂબ જ કામના ભારણમાં રહેતા, મુંબઈ, અમદાવાદ, જયપુર અને ચિત્તોડ આ ચાર સ્થાનોમાં કોઈક અપવાદ સિવાય પ્રત્યેક મહિનામાં એકવાર તો જતા જ. દરમિયાનમાં અનવધાનથી ઉપર જણાવેલ जंबुसामिचरियं ની પ્રેસકોપી છાપવા માટે મુંબઈ નિર્ણયસાગરપ્રેસમાં આપી અને આખો ગ્રંથ છપાઈ ગયો ત્યારબાદ તેઓ અમદાવાદ આવ્યા ત્યારે મને પાટણથી બોલાવ્યો અને છપાયેલા ફર્મા આપીને કહ્યું કે આનું શુદ્ધિપત્રક બનાવી આપ. હવે આ કામમાં મૂળ હસ્તપ્રત જોવી હોય તો જેસલમેરથી મંગાવવી શક્ય જ ન હતી. આથી લિપિદોષના નિર્ણય કરવાના મહાવરાથી અમૃતે તેનું શુદ્ધિપત્રક બનાવ્યું. તેની વિશેષતા એ છે કે કોઈ કોઈ સ્થાનના સાચા પાઠોને ન સમજવાથી તેના પછી સાચો પાઠ જણાવવા ( ) આવા

કૌંસમાં જે પાઠ લખેલ તે બરાબર ન હોવાથી અનેક અશુદ્ધિઓ ગ્રંથની લિપિ ન સમજવાથી થયેલી અને ગ્રંથના અંતમાં અંતિમ પેરેગ્રાફને ગદ્ય પાઠરૂપે આપ્યો છે તે પદ્ય દંડક છંદ છે આ બધું સ્પષ્ટ કરતું મોટું શુદ્ધિપત્રક મેં બનાવીને મુનિજીને આપ્યું. ફલતઃ આ શુદ્ધિપત્રક જોઈને મુનિજી ખૂબ જ પ્રસન્ન થયા. અને તે ગ્રંથની અંગ્રેજી પ્રસ્તાવનામાં અમૃત માટે અંગ્રેજીમાં સાઉન્ડ સ્કોલર ઑફ પ્રાકૃત વિશેષણ લખ્યું.

પં. શ્રી રમણિકવિજયજીએ સંપાદિત કરેલ एकाक्षरकोशसंग्रह અને મહોપાધ્યાયજી શ્રી યશોવિજય મ. રચિત વૈરાગ્યરતિના સંપાદનમાં તેમજ શ્રીશાંતિસૂરિરચિત पुहइचंदचरियं ના સંપાદન-સંશોધનમાં સંપૂર્ણ સહયોગ આપ્યો છે.

હસ્તપ્રતના લેખકોની ઓછી-વધતી ક્ષતિ હોય જ છે. પણ તે તે પ્રતને સુધારનાર શોધકની ક્ષતિ પણ પોતાના અનુભવના અને ગુરુકૃપાના આધારે એક સ્થાનમાં સુધારી છે.

शंखपराभवव्यायोग (કર્તા હરિહર પંડિત)નું પ્રકાશન ગાયકવાડ ઓરીએન્ટલ ઈન્સ્ટી. દ્વારા થયું છે, તેના પ્રથમ શ્લોકની આદિમાં "कर्तेति कीर्तिमा स्वयं कुर्वन् करोति यः" આવો પાઠ હતો, આનું પ્રૂફ ડૉ. સાંડેસરાએ અમૃત પંડિતને બતાવીને શુદ્ધિ કરવા જણાવ્યું ત્યારે આ પાઠમાં જે कीर्तिमा છે તેના પછી પ્રતિના શોધકે ઉમેરાનું ચિહ્ન કરીને न्य ઉમેરેલો, આથી कीर्तिमान्य થયું, હકીકતમાં શોધકે અહીં न्यस्य લખવું હતું પણ स्य લખવો રહી ગયો, હકીકતમાં આ પાઠ कर्तेति कीर्तिमन्यस्य स्वयं कुर्वन् करोति यः । આ પ્રમાણે પૂર્વાર્ધ છે.

● ● ●

श्रीसिद्धाचलमण्डनश्री ऋषभदेवस्वामिने नमः ।
श्रीशंखेश्वरपार्श्वनाथाय नमः । श्रीमहावीरस्वामिने नमः ।
अनन्तलब्धिनिधानाय श्रीगौतमस्वामिने नमः ।
आचार्यमहाराजश्रीमद्विजयसिद्धिसूरीश्वरजीपादपद्मेभ्यो नमः ।
आचार्यदेवश्रीमद्विजयमेघसूरीश्वरजीपादपद्मेभ्यो नमः ।
सद्गुरुदेवमुनिराजश्रीभुवनविजयजीपादपद्मेभ्यो नमः ।

# જિનઆગમ જયકારા (પ્રસ્તાવના)

અનંત ઉપકારી પરમ કૃપાળુ અરિહંત પરમાત્મા તથા પરમ ઉપકારી પરમપૂજ્ય પિતાશ્રી તથા સદ્ગુરુદેવ મુનિરાજશ્રી **ભુવનવિજયજી** મહારાજની પરમ કૃપાથી **શીલાચાર્ય** (પ્રસિદ્ધ નામ **શીલાંકાચાર્ય**) વિરચિત વૃત્તિ સહિત શ્રી આચારાંગ-સૂત્રના પ્રથમશ્રુતસ્કંધના પ્રથમ ચાર અધ્યયનોને આગમપ્રેમી જગત સમક્ષ રજૂ કરતાં આજે અમને ઘણો ઘણો ઘણો આનંદ થાય છે.

પૂ. આગમપ્રભાકર પુણ્યનામધેય મુનિરાજશ્રી **પુણ્યવિજયજી** મહારાજ પાસે રહીને જેમણે ઘણાં ઘણાં વર્ષો સુધી સંશોધન-સંપાદન પદ્ધતિનો અનુભવ કર્યો હતો તથા પૂ. **પુણ્યવિજયજી** મહારાજના સંશોધન આદિ કાર્યમાં જે ઘણા ઘણા ઉપયોગી થતા હતા તે **પંડિત અમૃતલાલ મોહનલાલ ગિરધરલાલ ભોજક** કે જે **પાટણ**માં તા. ૩૦-૧૧-૧૯૧૪ (વિક્રમ સં. ૧૯૭૧ માગશર સુદિ ૧૩) સોમવારે જન્મેલા અને **પાટણ**ના વતની છે તથા જે હમણાં **અમદાવાદ**માં સ્થાયી થયા છે તેમણે **આચારાંગસૂત્ર**ના **પ્રથમશ્રુતસ્કંધ**ના **પ્રથમ ચાર અધ્યયનો**ની **શીલાચાર્ય** (પ્રસિદ્ધનામ **શીલાંકાચાર્ય**) વિરચિત વૃત્તિના પ્રથમ ચાર અધ્યયન સુધીના ભાગની અનેક અનેક હસ્તલિખિત આદર્શોને આધારે સંશોધન કરીને તૈયાર કરેલી પાંડુલિપિ (પ્રેસકોપી) અમારા હાથમાં આવી તેના આધારે આ ગ્રંથનું સંપાદન અમે કર્યું છે.

આ પાંડુલિપિમાં **આચારાંગવૃત્તિની** क ख ग घ ङ ...... વગેરે વગેરે હસ્તલિખિત પ્રતિઓનો ઉપયોગ કરીને અનેક અનેક ટિપ્પણોમાં પં. **અમૃતભાઈએ** પાઠભેદો આપ્યા છે. પરંતુ क ख ग ......વગેરેથી કયા કયા સ્થાનના કયા કયા હસ્તલિખિત આદર્શો તેમને વિવક્ષિત છે તેનું કશું જ સ્પષ્ટીકરણ તેમણે ક્યાંયે કર્યું નથી. વિક્રમ સં. ૨૦૫૬ મહાવદિ ૧૩ શનિવારે (ઇસ્વીસન તા. ૪-૩-૨૦૦૦)માં તેઓ સ્વર્ગવાસી થઈ ગયા છે, તેમ જ તેમના સહયોગી શ્રી **લક્ષ્મણભાઈ** ભોજક પણ સ્વર્ગવાસી થઈ ગયા છે એટલે આ क ख आदि સંકેતોથી શું ગ્રાહ્ય છે તેની અમને કશી જ ખબર નથી.

વળી, કેટલેય સ્થળે અમને લાગ્યું છે કે તેમણે મૂળમાં લીધેલો પાઠ બરાબર નથી, પણ ટિપ્પણમાં નોંધેલો પાઠભેદ સારો છે, છતાં અમે કંઈપણ ફેરફાર કર્યા વિના ખોટો લાગતો પાઠ પણ જેવો ને તેવો જ મૂળમાં રાખ્યો છે. જ્યાં તેમણે મૂળમાં લીધેલો પાઠ તદ્દન અસંગત લાગ્યો છે તેવાં બે-ચાર સ્થળોમાં જ અમે પાઠ સુધાર્યો છે.

વળી, પાંડુલિપિમાં માર્જિનમાં તેમણે અનેક સ્થળે પાઠ બાબતમાં શંકા વ્યક્ત કરી છે. અમે એ વિષે કંઈ જ વિચારણા કરી નથી. અમે તો પં. **અમૃતભાઈએ** કરેલો પરિશ્રમ નિરર્થક ન જાય એટલા માટે આ ગ્રંથ મુદ્રિત કરવાનો પ્રયત્ન કર્યો છે. પં. **અમૃતભાઈએ** આચારાંગસૂત્રનું મૂળ તો લખ્યું જ નથી. મૂળની જગ્યાઓ તેમણે પાંડુલિપિમાં ખાલી જ રાખી છે. એટલે **આચારાંગસૂત્રનું** જે મૂળ અમે સંશોધિત-સંપાદિત કર્યું છે અને જે શ્રી **મહાવીર જૈન વિદ્યાલય-મુંબઈ** તરફથી વિક્રમ સં. ૨૦૩૩ (ઈસ્વીસન્ ૧૯૭૭)માં પ્રકાશિત થયું છે તેમાંથી જ સૂત્રો લીધેલાં છે. સૂત્રના નંબરો પણ તેના જ આપ્યા છે. તે તે સૂત્રમાં પાઠભેદો પણ ઘણા છે, પણ તે અમે અહીં લીધા નથી. સૂત્રના પાઠભેદો જોવા જેમની ઇચ્છા હોય તેમણે શ્રી મહાવીર જૈન વિદ્યાલયનું સંસ્કરણ જોઈ લેવું.

**પૂ. મુનિરાજશ્રી પુણ્યવિજયમહારાજનો** સ્વર્ગવાસ વિક્રમ સં. ૨૦૨૭માં થયો છે. પાંડુલિપિમાં માર્જિન આદિમાં તે તે પાઠ અંગે જે શંકા પં. **અમૃતભાઈએ** કેટલેક સ્થળે નોંધી છે તેમાં કેટલીક શંકાઓનું નિરાકરણ તો **પુણ્યવિજયમહારાજ** તરત જ કરી શકત. એટલે **પુણ્યવિજયમહારાજની** હાજરીમાં આ પાંડુલિપિ તેમણે તૈયાર કરી હોય એમ લાગતું નથી, **પુણ્યવિજયમહારાજના** સ્વર્ગવાસ પછી જ તેમણે આ પાંડુલિપિ તૈયાર કરી હશે એમ અમારું અનુમાન છે.

પં. **અમૃતભાઈ** સાથે મારે ઘણો સારો પરિચય હતો, મને ચોક્કસ તો યાદ નથી, પણ પ્રાયઃ એમણે મને કહ્યું હતું કે આચારાંગના ચાર અધ્યયનોની ટીકા ઉપર તેમણે કામ કર્યું છે. તે સમયે મેં તેમને કશું પૂછ્યું નહોતું.

પં. **અમૃતભાઈ**નો પરિશ્રમ વ્યર્થ ન જાય, તેમ જ તેમણે અનેક અનેક પ્રતિઓમાંથી લીધેલા પાઠભેદો સચવાઈ રહે એ દૃષ્ટિથી આ પ્રકાશન ખાસ ઉપયોગી છે. પં. **અમૃતભાઈ**એ પાંડુલિપિમાં આચારાંગના મૂળ સૂત્રો લીધાં નથી, તેમજ આચારાંગવૃત્તિમાં આવતા અનેક અનેક અનેક સાક્ષિપાઠોના મૂળસ્થાનો પણ તેમણે ખાસ જણાવ્યાં નથી. ભવિષ્યમાં દેવ-ગુરુકૃપાથી જે જે કાર્યો હાથમાં લેવાનો અમારો વિચાર છે તેમાં **શીલાચાર્ય વિરચિત આચારાંગસૂત્રવૃત્તિ** પણ અગ્રસ્થાને છે. જ્યારે એ કાર્ય કરાશે ત્યારે શક્ય તેટલી વધારે સામગ્રી મેળવીને સંપૂર્ણ આચારાંગસૂત્ર વૃત્તિનું સંશોધન તેમજ બીજા પણ અનેક પરિશિષ્ટો સાથે એ કાર્ય કરવા અમારી ભાવના છે.

આ ચાર અધ્યયનોની વૃત્તિનું સંપાદન-પ્રકાશન કરતાં પહેલાં અમે આ બધું વાંચવાનો તથા સમજવાનો નિષ્ઠાપૂર્વક પ્રયત્ન કર્યો છે. છતાં પ્રૂફ વાંચન કરતાં અનવધાનથી જે ભૂલો રહી ગઈ હોય કે થઈ ગઈ હોય તે માટે અમે ક્ષમા માગીએ છીએ.

**ધન્યવાદ :** આ ગ્રંથનાં બધાં પ્રૂફો સંયમાતા શતવર્ષાધિકાયુ (મારાં સંસારી માતુશ્રી) પૂ. સાધ્વીજી **મનોહરશ્રીજી** મહારાજનાં પરમસેવિકા શિષ્યા સાધ્વીજી **સૂર્યપ્રભાશ્રી**જીનાં શિષ્યા સાધ્વીજી **જિનેન્દ્રપ્રભાશ્રી**જીએ જોયાં છે. ટિપ્પણો તો મેં ખાસ વાંચ્યાં જ નથી. ટિપ્પણોને પાંડુલિપિ સાથે મેળવવાનું કાર્ય સાધ્વીજીએ જ કર્યું છે. મારાં કાર્યો પરમકૃપાળુ અનંત ઉપકારી અરિહંત પરમાત્માની કૃપાથી જ ચાલે છે. મારા પૂ. પિતાશ્રી તથા ગુરુદેવ મુનિરાજશ્રી **ભુવનવિજયજી** મહારાજ કે જેમનો શ્રી **શંખેશ્વરજીતીર્થમાં** વિક્રમ સં. ૨૦૧૫માં મહાસુદિ આઠમે સોમવારે રાત્રે ૧-૧૫ કલાકે સ્વર્ગવાસ થયો છે તેમની તથા મારાં પૂ.માતુશ્રી સંયમાતા શતવર્ષાધિકાયુ સાધ્વીજીશ્રી **મનોહરશ્રીજી** મહારાજ કે જેમનો સ્વર્ગવાસ સિદ્ધક્ષેત્ર **પાલિતાણામાં તળેટી** પાસે **વિસાનીમાની ધર્મશાળા**માં વિક્રમ સં. ૨૦૫૧માં પોષસુદિ દશમે રાત્રે ૮-૫૪ વાગે સ્વર્ગવાસ થયો છે તેમની કૃપા અને આશિષ એ જ મારું અંતરંગ સામર્થ્ય છે. મારા પ્રથમ શિષ્ય દેવતુલ્ય **દેવભદ્રવિજયજી** મહારાજ કે જેમનો સ્વર્ગવાસ **શંખેશ્વર**જી તીર્થ પાસે **લોલાડા** ગામમાં વિક્રમ સં. ૨૦૪૦માં કાર્તિક સુદિ બીજે સાંજે છ વાગે થયો છે તેમનું પણ આ પ્રસંગે સ્મરણ કરું છું.

મારા અતિવિનીત શિષ્ય મુનિરાજશ્રી **ધર્મચંદ્રવિજયજી** તથા તેમના શિષ્ય-પ્રશિષ્યો મુનિરાજશ્રી **પુંડરીકરત્નવિજયજી**, મુનિરાજશ્રી **ધર્મઘોષવિજયજી**, મુનિરાજશ્રી **મહાવિદેહવિજયજી**, મુનિરાજશ્રી **નમસ્કારવિજયજી** મારાં કાર્યોમાં ખડે પગે સેવા આપી રહ્યા છે તેમને મારા ઘણા ઘણા ધન્યવાદ છે.

મારાં માતુશ્રી સાધ્વીજી **મનોહરશ્રીજી** મહારાજનો શિષ્યા પરિવાર પણ આ કાર્યમાં વિવિધ રીતે ઉપયોગી થયો છે તેમને પણ ધન્યવાદ.

આનું ટાઈપસેટિંગનું કાર્ય અત્યંત ઝડપથી **વિરતિ ગ્રાફિક્સ**વાળા અખિલેશભાઈ મિશ્રાજીએ કર્યું છે : મૂળ **આદરિયાણા**ના વતની અને હમણાં અમદાવાદમાં વસતા **જિતેન્દ્રભાઈ** મણિલાલ મોતીચંદ સંઘવી આ ગ્રંથના પ્રકાશનમાં અનેક રીતે ઉપયોગી થયા છે. તેમને પણ ધન્યવાદ.

આ ગ્રંથ આજે પ્રભુના કરકમળમાં અર્પણ કરીને ધન્યતા અનુભવું છું.

**સુરેલ** (વાયા-વિરમગામ)
(તાલુકો-પાટડી)
(જિલ્લો-સુરેન્દ્રનગર)
પિન-૩૮૨૭૮૦
ભાદ્રપદ શુક્લ-અષ્ટમી
શુક્રવાર તા. ૨૦-૯-૨૦૦૭

પૂજ્યપાદાચાર્યદેવશ્રીમદ્વિજય **સિદ્ધિસૂરીશ્વર**
પટ્ટાલંકારપૂજ્યપાદાચાર્યદેવશ્રીમદ્વિજય-
**મેઘસૂરીશ્વર**શિષ્યપૂજ્યપાદસદ્ગુરુદેવ
મુનિરાજશ્રી **ભુવનવિજયા**ન્તેવાસી
**મુનિ જંબૂવિજય**

●●●

श्रीसिद्धाचलमण्डनश्री ऋषभदेवस्वामिने नमः ।
श्रीशंखेश्वरपार्श्वनाथाय नमः ।
श्रीमहावीरस्वामिने नमः ।
अनन्तलब्धिनिधानाय श्रीगौतमस्वामिने नमः ।
आचार्यमहाराजश्रीमद्विजयसिद्धिसूरीश्वरजीपादपद्मेभ्यो नमः ।
आचार्यदेवश्रीमद्विजयमेघसूरीश्वरजीपादपद्मेभ्यो नमः ।
सद्गुरुदेवमुनिराजश्रीभुवनविजयजीपादपद्मेभ्यो नमः ।

# द्वित्राः शब्दाः

पञ्चमगणधरदेवश्री**सुधर्मस्वामि**सन्दब्धस्य परम्परयातस्य श्री **आचाराङ्ग**सूत्रस्य प्रथमश्रुतस्कन्धस्य श्री**शीलाचार्य**(प्रसिद्धनामशीलाङ्काचार्य)विरचिताया वृत्तेरध्ययन-चतुष्टयात्मको भागो विविधान् हस्तलिखितानादर्शानवलम्ब्य पण्डित-**अमृतलाल**-मोहनलाल-गिरधरलालभोजकेन संशोधितो जैनागमरसिकानां पुरतः प्रकाश्यते ।

स्व० आगमप्रभाकरपूज्यमुनिराजश्री **पुण्यविजयजी**महाराजानां समीपे आ बाल्यकालाद् नैकानि वर्षाणि स्थित्वा पं० **अमृतलालभाई** महोदयेन प्राचीनग्रन्थ-संशोधन-संपादनकला शिक्षिता । पू०मु० **पुण्यविजयजी** महाभागानामयं गृहस्थशिष्य एवासीत् । मूलतोऽयं **पाटण**नगर [उत्तरगुजराते] निवास्यपि सम्प्रति **अहमदाबाद**नगरे स्थायी सञ्जातोऽस्ति स्वकुटुम्बेन सह । विक्रम सं० २०२७ मध्ये **पुण्यवि०** महोदया **मुम्बई**नगरे दिवंगताः । तदनन्तरं कस्मिंश्चिदपि समये **क ख ग घ** आदीननेकान् हस्तलिखितादर्शानवलम्ब्य आचाराङ्गसूत्रवृत्तेरध्ययनचतुष्टयात्मकस्य अंशस्य पं० **अमृतलाल**भाई महोदयेन महता महता परिश्रमेण संशोधनं विधाय लिखिता पाण्डुलिपिः (प्रेसकोपी) दृष्टा अस्माभिः । तस्यायं परिश्रमो विफलो मा भूदिति मत्वा टिप्पने तैर्निर्दिष्टानां पाठभेदानां चोपयोगितां विभाव्य तत्संपादनाय प्रकाशनाय चास्माभिरुपक्रमो विहितः । इसवीये ४-३-२००० वर्षे विक्रमसं० २०५६ माघकृष्णत्रयोदश्यां शनिवासरे पं० **अमृतभाई** महोदयोऽपि दिवंगत इति **क ख ग घ** इत्यादि संकेतानां कोऽर्थ इति न वयं किमपि जानीमहे, न च पं० **अमृतभाई** महोदयेन कुत्रापि किमपि स्पष्टीकरणं विहितं दृश्यते, नापि कश्चित् तस्य सहकारी विद्यते यं वयं पृच्छामः ।

किञ्च, वृत्तेरेव पाण्डुलिपिः तेन लिखिता, न मूलसूत्राणि । अतोऽस्माभिः संशोधितात् श्रीमहावीरजैनविद्यालय-मुंबई इत्यतः विक्रम सं० २०३३ (इशवीये १९७७ वर्षे प्रकाशितात् आचाराङ्गसूत्रादुद्धृत्यात्र मूलसूत्राणि निवेशितानि, सूत्राङ्का अपि तदनुसारेणैवात्र निर्दिष्टाः ।

अन्यच्च, **शीलाचार्यवृत्तौ** ग्रन्थान्तरादुद्धृताः परःशताः साक्षिपाठाः सन्ति, तेषां मूलस्थानानि पण्डितमहाशयेन न निर्दिष्टानि, समयाभावात् सामग्र्यभावाच्च नास्माभिरपि गवेषितानि । कानिचिदेव मूलस्थानानि यान्यस्माकं दृष्टिपथं सरलतया समवतीर्णानि तान्येवास्माभिः सूचितानि ।

क्वचित् क्वचित् 'पं० अमृतभाई महाशयेन वृत्तौ स्वीकृताः पाठा न समुचिताः, किन्तु टिप्पणेषु निर्दिष्टाः पाठाः समीचीनतराः' इति अस्माकं मतिः, तथापि अस्माकमनभिमताः पाठा अपि परिवर्तनमकृत्वा तथैव स्थापिताः । केवलं त्रिचतुरेषु स्थानेषु परिवर्तनं विहितमस्माभिः ।

प्राथमिकमुद्रितपत्र(Proof)पठनादिषु अस्माकमनवधानादिना सञ्जातान-शुद्ध्यादिदोषान् क्षाम्यन्तु सज्जना इति प्रार्थ्यते ।

प्राथमिकमुद्रितपत्र(प्रूफ = Proof)पठने मम मातुः साध्वीजीश्री **मनोहरश्रियः** शिष्यायाः साध्वीजीश्री **सूर्यप्रभाश्रियः** शिष्यया साध्वीजीश्री **जिनेन्द्रप्रभाश्रिया** महत् साहायकमनुष्ठितमिति सा भूयो भूयो धन्यवादमर्हति ।

मम शिष्य-प्रशिष्य-प्रप्रशिष्यैः मुनि**धर्मचन्द्रविजय-पुण्डरीकरत्नविजय-धर्मघोषविजय-महाविदेहविजय-नमस्कारविजयै**रपि विविधरीत्या साहायकमनुष्ठितमिति तेऽपि धन्यवादमर्हन्ति ।

पं० **अमृतलाल**भाई महोदयो दिवंगतः । यदि सोऽभविष्यत् तदा महती विस्तृता सुन्दरतरा च प्रस्तावना तेनाऽलेखिष्यत । परं किं कुर्मः ? । तस्येमं महापरिश्रमं ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च फलेग्रहिं कुर्वन्तु सज्जना इति प्रार्थनापूर्वकं परमात्मनः करकमले समर्प्यतेऽयं ग्रन्थः ।

भाद्रपदशुक्लैकादशी
२३-९-२००७
रविवासरः
**सुरेल** (via विरमगाम)
(तालुका-पाटडी), (**शङ्खेश्वर**तीर्थसमीपे)
पिन - ३८२७८०

पूज्यपादाचार्यदेवश्रीमद्विजय**सिद्धि**सूरीश्वरपट्टालङ्कार-
पूज्यपादाचार्यदेवश्रीमद्विजय**मेघ**सूरीश्वरशिष्य-
सद्गुरुदेव-तातपाद-पूज्यमुनिराजश्री**भुवनविजया**न्तेवासी
**मुनि जम्बूविजयः** ।

## श्री भद्रबाहुस्वामिसन्दब्धनिर्युक्ति-शीलाचार्यविरचितविवरणसमन्वितस्य आचाराङ्गसूत्रस्य विषयानुक्रमः

[ नि०=निर्युक्तिगाथाङ्कः, सू०=सूत्राङ्कः, पृ०=पृष्ठाङ्कः, गा०=गाथा ]


| | | विषयः | पृ० |
|---|---|---|---|
| १ | नि० | निर्युक्तिकारमङ्गलं निर्युक्तिकथनप्रतिज्ञा च | ६ |
| २ | नि० | आचारादीनि निक्षेपपदानि (१०) | ७ |
| ३ | नि० | चरणे षट्, दिशि सप्त, शेषेषु चत्वारः | ८ |
| ४ | नि० | नामादिचतुष्टयस्य सर्वव्यापित्वम् | ८ |
| ५ | नि० | आचाराङ्गयोर्निक्षेपचतुष्टयम् | ८ |
| ६ | नि० | भावाचारे द्वाराणि (७) | ९ |
| ७ | नि० | आचारस्यैकार्थिकानि (१०) | ९ |
| ८ | नि० | प्रवर्तनाद्वारेऽस्य प्रथमत्वम् | ११ |
| ९ | नि० | प्रथमत्वे हेतुः | १२ |
| १० | नि० | आचारायत्तं गणित्वम् | १२ |
| ११ | नि० | अध्ययनादिभिराचारस्य परिमाणम् | १२ |
| १२-१४ | नि० | समवताद्वारे ब्रह्मचर्याध्ययनेषु चूडाऽवतरणम् | १३ |
| १५ | नि० | महाव्रतानां सर्वद्रव्येष्ववतारः | १४ |
| १६-१७ | नि० | सारद्वारेऽङ्गादीनां सारप्रदर्शनम् | १५ |
| १८ | नि० | ब्रह्मनिक्षेपाः (८) स्थापनायां ब्राह्मणस्योत्पत्तिः, वर्ण-(७) वर्णान्तराणां (९) च | १५ |
| १९ | नि० | वर्णवर्णान्तरोत्पत्तिः | १६ |
| २० | नि० | वर्णवर्णान्तरसङ्ख्या | १६ |
| २१ | नि० | सप्तवर्णप्रदर्शनम् | १६ |
| २२ | नि० | वर्णान्तरनामानि | १७ |
| २३-२५ | नि० | वर्णान्तरे हेतुः | १७ |
| २६-२७ | नि० | वर्णान्तराणां संयोगोत्पत्तिः | १८ |
| २८ | नि० | द्रव्यभावब्रह्मप्रतिपादनम् | १८ |
| २९ | नि० | चरणनिक्षेपाः (६) | १९ |
| ३० | नि० | गत्याहारगुणभेदेन भावचरणम् | १९ |
| ३१-३२ | नि० | अध्ययननामानि | २० |
| ३३-३४ | नि० | अध्ययनार्थाधिकाराः २० | २० |

| | | विषयः | पृ० |
|---|---|---|---|
| ३५ | नि० | शस्त्रपरिज्ञाया उद्देशार्थाधिकारः | २१ |
| ३६ | नि० | शस्त्रनिक्षेपाः (४) द्रव्ये शस्त्राग्न्यादिः, भावे दुष्प्रयोगोऽविरतिश्च | २२ |
| ३७ | नि० | द्रव्यभावयोर्ज्ञानप्रत्याख्याने (प्रासाददृष्टान्तः) | २२ |
| १ (१) | सू० | केषाञ्चित्सञ्ज्ञाऽभावः | २३ |
| ३८ | नि० | द्रव्ये सचित्ताचित्तमिश्रभेदाः, भावे ज्ञानमनुभवनं च सञ्ज्ञा | २५ |
| ३९ | नि० | अनुभवनसञ्ज्ञा षोडशधा | २५ |
| १ (२) | सू० | पूर्वाद्यागमनज्ञानाभावः केषाञ्चित् | २६ |
| ४० | नि० | दिग्निक्षेपाः (७) | २६ |
| ४१ | नि० | त्रयोदशप्रदेशावगाढं द्रव्यं द्रव्यदिक् | २७ |
| ४२ | नि० | क्षेत्रदिशो रुचकात् | २७ |
| ४३ | नि० | दिग्नामानि | २७ |
| ४४-४५ | नि० | दिग्विदिक्स्वरूपम् | २८ |
| ४६ | नि० | दिक्संस्थानम् | २९ |
| ४७-४८ | नि० | तापदिक्चतुष्टयज्ञानम् | २९ |
| ४९-५० | नि० | मेरुलवणयोरुत्तरदक्षिणयोः स्थितिः | २९ |
| ५१ | नि० | प्रज्ञापकदिक् (१८) | |
| ५२-५८ | नि० | प्रज्ञापकदिग्ज्ञानं तन्नामानि च | ३० |
| ५९ | नि० | प्रज्ञापकदिक्संस्थानम् | ३१ |
| ६० | नि० | भावदिग् (२८) निरूपणम् | ३२ |
| ६१-६२ | नि० | प्रज्ञापकभावदिग्गुणनेन सर्वासु दिक्षु जीवाजीवानां गत्यागती | ३२ |
| ६३ | नि० | ज्ञानसञ्ज्ञाया अस्तिनास्तित्वम् | ३३ |
| १ (३) | सू० | औपपातिकेतरत्वे पूर्वापरभवज्ञानं च (आत्मसिद्धिः, ३६३ पाखण्डिनश्च) | ३४-४० |
| २ | सू० | जातिस्मृत्यादिना ज्ञानम् | ४१ |
| ६४-६६ | नि० | विशिष्टसञ्ज्ञाकारणे निर्युक्तिगाथाः | ४३-४६ |
| ३ | सू० | आत्मवादिनो लोककर्मक्रियावादित्वम् | ४६ |
| ४ | सू० | अनतिशयिनो मतिज्ञानेन सद्भावावगमः | ४८ |
| ५ | सू० | क्रियापरिमाणनिश्चयः | ४९ |
| ६ | सू० | अपरिज्ञातकर्मणोऽपायप्रदर्शनं विपाकप्रदर्शनं योनिभ्रमणं दुःखवेदनं च | ५० |
| ७-८ | सू० | परिज्ञावर्णनम् | ५३-५७ |
| ६७ | नि० | सदसन्मतिहेतुभ्यां बन्धज्ञानम् | ५३ |
| ९ | सू० | कर्मारम्भपरिज्ञावान् मुनिः | ५७ |

| | | विषयः | पृ० |
|---|---|---|---|
| | | ॥ प्रथमोद्देशकः १ ॥ | |
| ६९ | नि० | पृथिव्या निक्षेपादीनि द्वाराणि (९) | ५८ |
| ६९ | नि० | पृथिव्या निक्षेपचतुष्टयम् | ५९ |
| ७० | नि० | द्रव्यभावपृथिवीवर्णनम् | ५९ |
| ७१-७६ | नि० | सर्वलोके सूक्ष्माः, बादरे श्लक्ष्णाः (५) खराः (३६) | ५९-६० |
| ७७-७८ | नि० | वर्णादिना योनिभेदाः | ६१ |
| ७९ | नि० | बादरे पर्याप्तापर्याप्तभेदानां तुल्यत्वं सूक्ष्मे च | ६२ |
| ८०-८१ | नि० | वृक्षाद्यौषध्याद्युदाहरणेन पृथ्वीभेदप्रदर्शनम् | ६३ |
| ८२ | नि० | असङ्ख्यपृथिवीजीवशरीराणां दृश्यत्वम् | ६४ |
| ८३ | नि० | चक्षुःस्पर्शागतपृथिवीशरीरकथनोपसंहारः शेषाणामाज्ञाग्राह्यता | ६४ |
| ८४ | नि० | लक्षणद्वारे उदयलेश्याभेदाः (११) | ६४ |
| ८५ | नि० | शरीरास्थिदृष्टान्तेन कठिनपृथिवीशरीरे चेतनत्वम् | ६६ |
| ८६-८८ | नि० | पृथिवीकायपरिमाणम् | ६६ |
| ८९ | नि० | क्षेत्रकालयोः सूक्ष्मबादरत्वम् | ६७ |
| ९० | नि० | कालतः पृथ्वीकायपरिमाणम् | ६७ |
| ९१ | नि० | पृथिवीकायानां परस्परमवगाहः | ६७ |
| ९२-९३ | नि० | चङ्क्रमणादिभि(१६)र्मनुष्याणां पृथ्व्या उपभोगः | ६८ |
| ९४ | नि० | सुखार्थं परदुःखोदीरकत्वम् | ६८ |
| ९५ | नि० | शस्त्रद्वारे हलकुलिकादिसमासद्रव्यशस्त्रप्रतिपादनम् | ६९ |
| ९६ | नि० | विभागद्रव्यभावशस्त्रप्रतिपादनम् | ६९ |
| ९७ | नि० | पृथ्वीकाये वेदनाः | ६९ |
| ९८ | नि० | पृथ्वीकायस्याङ्गोपाङ्गरहितत्वेऽपि वेदनाऽस्तित्वम् | ७० |
| ९९ | नि० | वधद्वारे कुतीर्थिकस्वरूपम् | ७१ |
| १०० | नि० | दृष्टान्तगर्भं कुतीर्थिकस्वरूपनिगमनम् | ७१ |
| १०१ | नि० | कृतकारितानुमतिभिर्वधः | ७१ |
| १०२ | नि० | पृथिवीकायवधे निदानिदाभ्यां तदाश्रितान्यदृश्यादृश्यजीववधप्रदर्शनम् | ७१ |
| १०३ | नि० | पृथ्व्या वधे तन्निश्रितानां सूक्ष्मादीनां वधः | ७२ |
| १०४-१०५ | नि० | पृथ्वीवधविरता गुप्त्यादिमन्तश्चानगाराः | ७२ |
| १० | सू० | पृथ्वीहिंसका आर्त्तपरिद्यूनादिमन्तः | ७३ |
| ११ | सू० | असङ्ख्येयजीवसङ्घातरूपा पृथिवीति प्रदर्शनम् | ७५ |
| १२ | सू० | कृतकारितानुमतिभिः पृथिवीसमारम्भे प्रवृत्तिप्रदर्शनम् | ७५ |

| | | विषयः | पृ० |
|---|---|---|---|
| १३-१७ | सू० | पृथिवीसमारम्भे प्रवृत्तमतेरहितादि, भोग्यफलप्राप्तिः | ७७-८० |
| १८ | सू० | पृथिवीदण्डविरतो मुनिः | ८१ |
| | | ॥ द्वितीय उद्देशकः ॥ | |
| १०६ | नि० | अप्कायद्वाराणि भेदपरिमाणोपभोगशस्त्रलक्षणेषु विशेषः | ८३ |
| १०७-१०८ | नि० | अप्कायस्य भेदनानात्वं, बादरे पञ्च शुद्धोदकाद्या भेदाः | ८३ |
| १०९ | नि० | अप्कायपरिमाणद्वारम् | ८४ |
| ११० | नि० | अप्कायलक्षणद्वारम् | ८५ |
| १११ | नि० | अप्कायोपभोग (७) द्वारम् | ८६ |
| ११२ | नि० | अप्कायवधप्रवर्तने हेतुः | ८७ |
| ११३ | नि० | अप्काये शस्त्रद्वारम् (उत्सिञ्चनादि ६) | ८७ |
| ११४ | नि० | विभागतो द्रव्यभावशस्त्रम् | ८७ |
| ११५ | नि० | पृथिवीवदप्कायस्य शेषद्वाराणि | ८८ |
| १९ | सू० | अनगारस्वरूपम् | ८८ |
| २० | सू० | निष्क्रमणश्रद्धारक्षोपदेशः | ९० |
| २१ | सू० | महापुरुषैः कृतपूर्वो मार्गः | ९१ |
| २२ | सू० | आज्ञयाऽप्कायज्ञाने संयमः | ९२ |
| २२ | सू० | अप्कायलोकात्माभ्याख्यानव्याप्तिः | ९२ |
| २३-२५ | सू० | शाक्यादिदृष्टान्तेनाप्कायसमारम्भे दोषप्रदर्शनम् | ९३ |
| २६ | सू० | जिनप्रवचने उदकजीवोपदेशः | ९५ |
| २६ | सू० | अप्कायस्य नानाविधशस्त्रप्रदर्शनम् | ९५ |
| २६ | सू० | अशस्त्रोपहताप्कायपरिभोगेऽदत्तादानदूषणम् | ९५ |
| २७ | सू० | पानविभूषार्थमशस्त्रोपहताप्कायपरिभोगेऽन्यमतानि | ९८ |
| २७ | सू० | अन्यमतेऽप्कायजीवच्छेदनत्वम् | ९८ |
| २८ | सू० | अन्यागमासारत्वम् | ९९ |
| २९-३१ | सू० | अप्कायवधविरतो मुनिः | १००-१०१ |
| | | ॥ तृतीय उद्देशकः ॥ | |
| ११६ | नि० | तेजसो द्वारातिदेशः विधानादिषु भेदः | १०२ |
| ११७-११८ | नि० | तेजोजीवानां द्वैविध्यं, बादरपञ्चभेदप्रतिपादनं च | १०२ |
| ११९ | नि० | खद्योतकज्वरोष्मदृष्टान्तेन तेजसो जीवत्वम् | १०४ |
| १२० | नि० | तेजोजीवपरिमाणद्वारम् | १०५ |
| १२१ | नि० | तेजस उपभोगद्वारम् (५) | १०५ |

| | | विषय: | पृ० |
|---|---|---|---|
| १२२ | नि० | तेज:कायिकहिंसने हेतुः | १०५ |
| १२३ | नि० | तेज:कायिकानां समासतो द्रव्यशस्त्रम् | १०६ |
| १२४ | नि० | तेज:कायिकानां विभागतो द्रव्यशस्त्रम् | १०६ |
| १२५ | नि० | उक्तशेषद्वारातिदेशेनोपसंहारः | १०६ |
| ३२ | सू० | अग्निलोकात्माभ्याख्यानव्याप्तिः | १०७ |
| ३२ | सू० | वनस्पतिसंयमखेदज्ञानव्याप्तिः | १०७ |
| ३३ | सू० | अग्निशस्त्रस्य वीरैर्दृष्टपूर्वता | ११० |
| ३३ | सू० | प्रमत्तो रन्धनाद्यर्थी दण्डवान् | ११० |
| ३३ | सू० | अग्निसमारम्भाकर्त्तव्यता | ११० |
| ३४-३६ | सू० | अग्निशस्त्रसमारम्भेऽन्यतीर्थिकानामयथावादित्वम् | ११२ |
| ३७ | सू० | अग्निसमारम्भे नानाप्राणिविहिंसनम् | ११२ |
| ३८-३९ | सू० | अग्निसमारम्भपरिज्ञाता मुनिः | ११४ |
| | | ॥ चतुर्थ उद्देशकः ॥ | |
| १२६ | नि० | पृथिवीतो वनस्पतिद्वारे नानात्वं विधानादिभिः | ११७ |
| १२७ | नि० | द्विद्विभेदेन सूक्ष्मबादरा वनस्पतयः | ११७ |
| १२८ | नि० | बादरवनस्पतेर्भेदाः | ११८ |
| १२९ | नि० | प्रत्येकतरोर्द्वादश: भेदाः | ११९ |
| १३० | नि० | प्रत्येकवनस्पतिजीवभेदाः (अग्रबीजाद्याः ६) | १२० |
| १३१-१३२ | नि० | प्रत्येकतरुशरीरसङ्घातदृष्टान्तः | १२० |
| १३३ | नि० | पत्रस्कन्धादौ एकजीवत्वम् | १२१ |
| १३४ | नि० | प्रत्येकतरुजीवराशिपरिमाणम् | १२२ |
| १३५ | नि० | शेषा आज्ञाग्राह्याः | १२२ |
| १३६-१३७ | नि० | साधारणवनस्पतिलक्षणम् | १२३ |
| १३८ | नि० | मूलप्रथमपत्रयोरेकजीवत्वम् | १२३ |
| १३९-१४० | नि० | अनन्तकायलक्षणम् | १२४ |
| १४१ | नि० | साधारणवनस्पतेर्भेदाः | १२५ |
| १४२ | नि० | एकाद्यसङ्ख्यातानां प्रत्येके दृश्यत्वम् | १२५ |
| १४३ | नि० | साधारणेऽनन्तानां दृश्यत्वम् | १२५ |
| १४४ | नि० | सूक्ष्मानन्तजीवपरिमाणम् | १२६ |
| १४५ | नि० | बादरनिगोदपरिमाणम् | १२६ |
| १४६-१४७ | नि० | उपभोगविधिः, आहारादिरातोद्यादिश्च | १२७ |

| | | विषयः | पृ० |
|---|---|---|---|
| १४८ | नि० | उपभोगोपसंहारः, वधहेतुश्च | १२८ |
| १४९ | नि० | वनस्पतेः समासद्रव्यशस्त्रं कल्पन्यादि | १२८ |
| १५० | नि० | वनस्पतेर्विभागतो द्रव्यभावशस्त्रम् | १२८ |
| १५१ | नि० | वनस्पतेरुक्तशेषद्वाराणां पृथिव्याः सादृश्यम् | १२९ |
| ४० | सू० | वनस्पत्यारम्भाकरणेऽनगारत्वम् | १२९ |
| ४१ | सू० | गुणावर्त्तयोरैक्यम् | १३२-१३६ |
| ४१ | सू० | वनस्पत्यभिनिर्वृत्तशब्दादीनां सर्वदिग्भाक्त्वम् | १३२-१३६ |
| ४१ | सू० | शब्दादिगुणागुप्तत्वेऽनाज्ञाकारित्वम् | १३२-१३६ |
| ४१ | सू० | शब्दादिगुणास्वादेऽसंयमानुष्ठायित्वम् | १३२-१३६ |
| ४१ | सू० | शब्दादिगुणप्रमत्तत्वे गृहस्थत्वम् | १३२-१३६ |
| ४२-४४ | सू० | वनस्पतिशस्त्रसमारम्भेऽन्यतीर्थिकदशा | १३७ |
| ४५ | सू० | वनस्पतिजीवास्तित्वे लिङ्गम् (जन्मवृद्ध्यादि) | १३८ |
| ४६-४८ | सू० | वनस्पत्यारम्भतत्परिहाराभ्यां बन्ध-मुनित्वे | १४१ |
| | | ॥ पञ्चम उद्देशकः ॥ | |
| १५२ | नि० | पृथ्वीत्रसद्वारसादृश्यं, नानात्वं विधानादिना | १४२ |
| १५३ | नि० | त्रस-लब्धिगतिभ्यां द्विधा | १४२ |
| १५४ | नि० | त्रसजीवभेदाः | १४३ |
| १५५ | नि० | त्रसजीवोत्तरभेदाः (योनिकुलानि) | १४३ |
| १५६-१५७ | नि० | त्रसजीवानां दर्शनादीनि (१९) लक्षणानि | १४५ |
| १५८ | नि० | त्रसजीवानां परिमाणम् | १४६ |
| १५९ | नि० | अविरहितप्रवेशनिर्गमपरिमाणम् | १४७ |
| १६० | नि० | उपभोगशस्त्रवेदनाद्वारत्रयम् | १४८ |
| १६१-१६२ | नि० | मांसाद्युपभोगार्थं जीववधः | १४८ |
| १६३ | नि० | उक्तशेषद्वाराणां पृथिव्याः सादृश्यम् | १४८ |
| ४९ | सू० | अण्डजादित्रसभेदकथनपूर्वकं संसारस्वरूपम् | १४९ |
| ४९ | सू० | अज्ञानिनो भवभ्रमणम् | १४९ |
| ४९ | सू० | संसारे दुःखम् | १४९ |
| ४९ | सू० | वध्यमानदुःखम् | १४९ |
| ५०-५१ | सू० | त्रसेष्वन्यतीर्थिकानामयथावादित्वं तत्फलं च | १५३-१५४ |
| ५२ | सू० | त्रसवधे कारणानि | १५३-१५४ |
| ५३-५५ | सू० | त्रसकायसमारम्भपरिज्ञातृत्वे मुनित्वम् | १५५-१५६ |

| | | विषयः | पृ० |
|---|---|---|---|
| | | ॥ षष्ठ उद्देशकः ॥ | |
| १६४ | नि० | वायुपृथिवीद्वारसादृश्यं, नानात्वं विधानादिना | १५७ |
| १६५-१६६ | नि० | सूक्ष्माः सर्वलोके, पञ्चधा बादरा उत्कालिकाद्याः | १५७ |
| १६७ | नि० | देवान्तर्हितशरीरवद् वायोः सत्त्वम् | १५८ |
| १६८ | नि० | वायुजीवानां परिमाणम् | १५९ |
| १६९ | नि० | बादरवायुकायोपभोगः व्यजनधमनादिभिः | १५९ |
| १७० | नि० | वायुकायानां व्यजनादि द्रव्यशस्त्रम् | १५९ |
| १७२ | नि० | उक्तशेषद्वाराणां पृथिव्याः सादृश्यम् | १६० |
| ५६ | सू० | वायुसमारम्भनिवृत्तौ मनुष्यस्य शक्तत्वम् | १६० |
| ५६ | सू० | अन्तर्बहिर्ज्ञानयोर्व्याप्तिः (द्रव्यातङ्के क्षारगलितपुरुषदृष्टान्तः) | १६० |
| ५६ | सू० | वायुजीवसंरक्षणे साधुत्वम् | १६० |
| ५७-५८ | सू० | वायुशस्त्रसमारम्भेऽन्यतीर्थिकस्वरूपम् | १६५ |
| ५९-६० | सू० | वायुकायसमारम्भपरिज्ञाने मुनित्वम् | १६५ |
| ६१ | सू० | वायुकायसमारम्भे कर्मबन्धनम् | १६५ |
| ६२ | सू० | सर्वारम्भनिवृत्तिर्मुनित्वम् (उपस्थापनाविधिः) | १६७-१७३ |
| | | ॥ सप्तम उद्देशकः ॥ | |
| | | **॥ इति शस्त्रपरिज्ञाध्ययनम् १ ॥** | |
| १७३-१९८ | नि० | लोकविजयाध्ययनम् | १७४-३२२ |
| १७३ | नि० | उद्देशषट्कार्थाधिकाराः | १७५ |
| १७४-१७६ | नि० | लोक (८) विजय (६) गुण-मूलानां निक्षेपाः, आद्ययोर्निष्पन्ने, परयोः सूत्रालापे | १७७ |
| १७७ | नि० | लोकनिक्षेपातिदेशः, भावकषायलोकविजयेनाधिकारः | १७७ |
| १७८ | नि० | भावलोकविजयेन फलम् | १७९ |
| ६३ | सू० | गुणमूलस्थानयोरैक्यम् | १८० |
| १७९ | नि० | गुणनिक्षेपाः (१५) | १८० |
| १८० | नि० | सचित्ताचित्तमिश्रभेदेन द्रव्यगुणस्त्रिधा | १८१ |
| १८१ | नि० | जीवगुणः, सङ्कोचविकाशौ लोकपूरणं च | १८२ |
| १८२ | नि० | देवकुर्वादिषु सुषमसुषमादिपर्यवैर्निर्भजना, गणनायां द्विकादि, करणे कलाः, अभ्यासे भोजनं, ऋजुता अगुणगुणे, गुणागुणे वक्रता, भवे नारकादि, शीले क्षान्त्यादि, भावे जीवाजीवयोः | १८३ |
| १८३ | नि० | मूलनिक्षेपाः (६) | १८७ |

| | विषयः | पृ० |
|---|---|---|
| १८४ | नि० भावमूलस्य त्रैविध्यम्, औदयिक उपदेष्टा आदिः (विनयकषायादि) | १८८ |
| १८५ | नि० स्थाननिक्षेपाः (१५) | १८९ |
| १८६ | नि० शब्दादिविषयेषु मूलस्थानत्वम् | १९२ |
| १८७ | नि० पादपदृष्टान्तेन कर्मणः संसारप्रतिष्ठितमूलत्वम् | १९२ |
| १८८ | नि० कर्माणि मोहनीयमूलानि काममूलानि वा, ततश्च संसारः | १९३ |
| १८९ | नि० मोहनीयस्य द्वैविध्यम् | १९४ |
| १९० | नि० कर्मणि कषायाणां प्रधानकारणत्वं, तेषां स्थानविशेषाश्च | १९४ |
| १९१ | नि० कषायनिक्षेपाः (८) | १९५ |
| १९२-१९३ | नि० संसारः पञ्चधा | १९७ |
| १९४ | नि० कर्मनिक्षेपाः नामस्थापनाद्रव्यप्रयोगसमुदानेर्यापथिकाऽऽधातपः-<br>कृतिभावकर्मभेदेन (वर्गणास्वरूपं मूलोत्तरप्रकृतिस्थित्यनुभावप्रदेशबन्धाः) | १९७ |
| १९५ | नि० अष्टविधकर्मणाऽधिकारः | १९७ |
| ६३ | सू० गुणमूलस्थानयोरैक्यं प्रमत्तस्वरूपं मात्रादिममत्वं च<br>(परशुराम-चाणक्य-जरासिन्धुदृष्टान्ताः) | २११ |
| १९६ | नि० स्वजनत्यागात् कषायकर्मभवच्छेदाः | २१५ |
| १९७ | नि० स्नेहासक्तत्वेन जन्ममरणप्राप्तिः | २१५ |
| ६४ | सू० जरायामिन्द्रियाणां शिथिलता (इन्द्रियनिरूपणम्) | २१८ |
| ६५ | सू० वार्द्धक्ये लोकावगीतत्वम् (वृद्धदृष्टान्तः) | २२७ |
| ६५ | सू० प्रशस्तमूलस्थानम्, अप्रमादः | २२७ |
| ६६ | सू० संसाराभिष्वङ्गिस्वरूपम् | २२७-२३० |
| ६६-६७ | सू० जराद्यभिभवेऽर्थस्यात्राणत्वम् | २३०-२३१ |
| ६८ | सू० स्वकृतकर्मफलसुखदुःखयोर्ज्ञानेऽवैक्लव्यम् | २३२ |
| ६८ | सू० यौवने धर्मोद्यमः | २३२ |
| ६८ | सू० क्षणे द्रव्ये त्रसादि, क्षेत्रे कर्मभूमयः, काले तृतीयचतुर्थारकौ,<br>भावे कर्मणि न्यूनकोटिसागरता (ध्रुवप्रकृतयः), नोकर्मणि आलस्या<br>(२३)द्यभावः | २३३-२३६ |
| ६८ | सू० यावदिन्द्रियशक्ति आत्मार्थोपदेशः | २३३-२३६ |
| | ॥ द्वितीये प्रथमः २-१ ॥ | |
| ६९ | सू० अरतिरहितो मुच्येत | २३७ |
| ७० | सू० अनाज्ञावर्तिनामुभयभ्रष्टत्वम् | २३७ |
| १९८ | नि० संयमावधावनहेतवः | २३८ |

| | विषयः | पृ० |
|---|---|---|
| ७१ | सू० संसारविमुक्तस्वरूपम् | २४२ |
| ७१-७३ | सू० अनगारस्वरूपमज्ञानोपहतस्वरूपं च | २४२-२४५ |
| ७४ | सू० अज्ञानस्वरूपज्ञातुः कर्त्तव्यम् | २४७ |
| | ॥ द्वितीये द्वितीयः २-२ ॥ | |
| ७५ | सू० गोत्राभिमानपरिहारः (पुद्गलावर्त्तस्वरूपम्) | २४९ |
| ७६ | सू० अन्धत्वादि प्रेक्ष्य समितीभावः | २५४ |
| ७७-८० | सू० उच्चैर्गोत्राभिमानमूढस्वरूपम् | २५४-२६८ |
| ७७-८० | सू०गा० मोक्षचारिस्वरूपम् | २५४-२६८ |
| ७७-८० | सू० मृत्यागमानियततादि दृष्ट्वा हितार्थी, | २५४-२६८ |
| ७७-८० | सू० विज्ञस्यानुपदेश्यत्वं, बालस्यावर्त्तः | २५४-२६८ |
| | ॥ द्वितीये तृतीयः २-३ ॥ | |
| ८१ | सू० भोगिनां रोगादावसहायता (ब्रह्मदत्तदृष्टान्तः) | २६९ |
| ८२ | सू० अर्थस्य दायादादिसाधारणत्वम् | २६९ |
| ८४ | सू० स्त्रीभिर्व्यथितो मूढोऽसमर्थो धर्मे | २७२ |
| | ॥ द्वितीये चतुर्थः २-४॥ | |
| ८७-८८ | सू० पुत्राद्यर्थं कर्मसमारम्भाः | २७९-२८१ |
| ८८ | सू० समुत्थितानगारस्याऽऽमगन्धपरिज्ञातृत्वम् | २८१ |
| ८८ | सू० क्रयादिनिषेधः, कालादिज्ञानं निर्ममत्वादिश्च, (४२ दोषाः) | २८२ |
| ८९ | सू० अस्नेहस्य वस्त्रादेर्ग्रहो गृहिभ्यः | २८२ |
| ८९ | सू० आहारविधिः | २८२ |
| ९० | सू० धर्मोपकरणस्यापरिग्रहत्वम् | २८२ |
| ९० | सू० कामानां कामकामिनश्च स्वरूपम् | २८२ |
| ९१-९२ | सू० प्रतिमोचको बहिरन्तर्ज्ञानवान्, श्रवत्पूतिदेहदर्शनम् | २९५-२९८ |
| ९३-९४ | सू० वान्ताशनमायानिषेधः, अविरतिफलम् (दधिघटिकाद्रमक-धनसार्थवाहदृष्टान्तौ) | २९८-३०१ |
| ९४ | सू० अनगारत्वाय बालसङ्गनिषेधः | ३०२ |
| | ॥ द्वितीये पञ्चमः २-५ ॥ | |
| ९५-९६ | सू० अनगारस्य पापकर्माकरणम् | ३०४ |
| ९७ | सू० हिंसायामन्यान्यपि पापानि, अनगारस्य कर्मोपशान्तिप्रकारश्च | ३०८ |
| ९७ | सू० ममतात्यागे मुनित्वम् | ३०८ |
| ९८ | सू०गा० वीरलक्षणम् | ३१० |

| | विषयः | | पृ० |
|---|---|---|---|
| ९९ | सू०गा० | स्पर्शेऽसक्तः नन्दीनिर्विण्णः कर्मच्छेदको मुनिः | ३१० |
| ९९ | सू० | रूक्षसेविसम्यक्त्वदर्शिनो वीराः | ३१० |
| १०० | सू० | दुर्वसु-सुवसुमुनिलक्षणम् | ३१३ |
| १०१-१०३ | सू० | लोकसंयोगात्ययः, अनन्यदर्शनानन्यारामयोर्व्याप्तिः पूर्णतुच्छयोः कथनव्याप्तिश्च | ३१३-३१६ |
| १०३ | सू० | देशकस्य पुरुषादिज्ञानावश्यकता | ३१६ |
| १०४ | सू० | जिनकृताकृतयोः करणाकरणे | ३२० |
| १०५ | सू० | बालस्य दुःखावर्त्ते भ्रमणम् | ३२० |
| | | ॥ द्वितीये षष्ठः २-६ ॥ | |
| | | **॥ इति द्वितीयं लोकविजयाध्ययनम् २ ॥** | |
| | | **अथ शीतोष्णीयाध्ययनम्-३** | |
| १९९-२०० | नि० | उद्देशचतुष्कार्थाधिकाराः | ३२३ |
| २०१ | नि० | शीतोष्णयोर्निक्षेपाः (४) | ३२४ |
| २०२ | नि० | द्रव्यभावशीतोष्णे | ३२४ |
| २०३ | नि० | प्रमादादिपरीषहाणां शीतत्वं, तपउद्यमादिपरीषहाणां चोष्णत्वम् | ३२५ |
| २०४-२०६ | नि० | स्त्री-सत्कारयोः, मन्दपरिणामानां परीषहानां धर्मे प्रमादिनो वा शीतत्वम् | ३२६ |
| २०७ | नि० | उपशमैकार्थिकानि (६) | ३२७ |
| २०८ | नि० | संयमासंयमयोः शीतोष्णत्वे हेतुः | ३२७ |
| २०९ | नि० | सुखदुःखयोः शीतोष्णत्वे हेतुः | ३२७ |
| २१० | नि० | कषायादीनामुष्णत्वे तपस उष्णतरत्वे च हेतुः | ३२८ |
| २११ | नि० | शीतोष्णादिसहानां मुनित्वम् | ३२८ |
| २१२ | नि० | भिक्षूणां परीषहसहनं कामत्यागश्च | ३२९ |
| १०६ | सू० | मुनीनां जागरणम् | ३२९ |
| २१३ | नि० | मुनीनां स्वापेऽपि जागरणम् | ३३० |
| २१४ | नि० | द्रव्यसुप्तस्येव भावसुप्तस्यापि दुःखप्राप्तिः | ३३१ |
| २१५ | नि० | पलायनपथ्यादिषु सचेतनवत् सुखी श्रमणः | ३३१ |
| १०७ | सू० | शब्दादिरूपवेदिनः संयमः | ३३३-३४० |
| | सू० | विषयविरक्तमुनिस्वरूपम् | ३३३-३४० |
| | सू० | निर्ग्रन्थो रत्यरत्यादिसहः वैरोपरतः, धर्माज्ञानी तु मूढः (देवानां जरा) | ३३३-३४० |
| १०९ | सू० | भावजागरस्य कर्त्तव्यं, पर्यायशस्त्रसंयमखेदयोर्व्याप्तिः, | ३३८ |
| ११० | सू० | उपाधिः कर्म (कर्मसत्तास्थानानि) | ३३९ |

| | विषयः | | पृ० |
|---|---|---|---|
| १११ | सू० | रागद्वेषयोरदृश्यो मुनिः | ३४० |
| | | ॥ तृतीये प्रथमः ३-१ ॥ | |
| ११२ | सू०गा० | सम्यक्त्वदर्शिलक्षणम् | ३४५ |
| ११३ | सू० | कामसङ्गौ गर्भमूलम् | ३४५ |
| ११४ | सू० | अमृतात्मस्वरूपम् | ३४७ |
| ११५ | सू० | आतङ्कदर्शी पापविरतोऽग्रमूलं छिन्द्यात् | ३४७ |
| ११६ | सू० | निष्कर्मदर्शिनः स्वरूपम् (प्रकृतिबन्धस्थानानि) | ३४९ |
| ११७ | सू० | सत्ये धृतिः, पापक्षपणं च | ३५३ |
| ११८ | सू० | अनेकचित्तपुरुषप्रवृत्तिः | ३५३ |
| ११९ | सू० | द्वितीयानासेवा-निःसारतादर्शनादिस्वरूपो मुनिः | ३५३ |
| १२० | सू०गा० | क्रोधादित्यागिनो लघुभूतगामिता | ३५७ |
| १२१ | सू०गा० | वीरत्वलक्षणम् | ३५७ |
| | | ॥ तृतीये द्वितीयः ३-२ ॥ | |
| १२२ | सू० | पापकर्माकरणमात्रेण न मुनित्वम् | ३५९ |
| १२३ | सू०गा० | आत्मप्रसादी यात्रामात्रायापको विरक्तश्छेदभेदाद्यविषयः | ३५९ |
| १२४ | सू०गा० | साम्प्रतेक्षिणामतिक्रान्ताऽनागतविचाराभावः | ३६३ |
| १२५-१२६ | सू० | महायोगीश्वरस्वरूपम्, आत्ममित्रता | ३६३-३६८ |
| १२६ | सू० | कर्मापनेतृमोक्षमार्गिणोर्व्याप्तिः आत्मोपदेशश्च | ३६४ |
| १२६ | सू० | प्रमत्तलक्षणम् | ३६८ |
| १२७ | सू० | अप्रमत्तलक्षणम् | ३६९ |
| | | ॥ तृतीये तृतीयः ३-३ ॥ | |
| १२८ | सू० | कषायवमने तीर्थकृदुपदेशः, स्वकृतकर्मभेत्तृत्वं च | ३७२ |
| १२९ | सू० | एकसर्वज्ञानयोर्व्याप्तिः । | ३७४ |
| १२९ | सू० | प्रमत्तस्य भयम्, एकबहुक्षपणव्याप्तिः, निर्लोभस्य महायानं, परात्परत्वं च । | ३७५ |
| १२९ | सू० | आज्ञया संयमः, शस्त्राशस्त्रयोः पारंपर्यम् । | ३७५ |
| १३० | सू० | क्रोधमानादिभिर्मानमायादीनां व्याप्तिः, पश्यककृत्यं च । | ३८०-३८१ |
| | | ॥ तृतीये चतुर्थः ३-४ ॥ | |
| | | **॥ इति शीतोष्णीयाध्ययनम् ॥३॥** | |
| २१६-२१७ | नि० | उद्देशचतुष्कार्थाधिकारः (७) । | ३८२ |
| २१६ | नि० | सम्यक्त्वनिक्षेपाः (४) । | ३८२ |
| २१७-२२० | नि० | कृतसंस्कृतसंयुक्तप्रयुक्तत्यक्तभिन्नच्छिन्नैर्द्रव्ये, दर्शन (३) ज्ञान (२) चारित्रै (३) र्भावे, (वीरसेन-सूरसेनदृष्टान्तः) | ३८३-३८५ |

| | विषयः | पृ० |
|---|---|---|
| २२१-२२२ | नि० अन्धानन्धशत्रुजयाजयदृष्टान्तेन सम्यग्मिथ्यादृष्ट्योः सिद्ध्यसिद्धी | ३८५-३८६ |
| २२३-२२५ | नि० सम्यक्त्वोत्पत्त्यादिजिनान्तश्रेण्या असङ्ख्यगुणनिर्जरकत्वम् | ३८७-३८८ |
| २२६ | नि० त्यक्ताहाराद्युपधेः श्रमणत्वम् । | ३८८ |
| १३२ | सू० उत्थितादिषु सर्वकालीनजिनभाषितं तत्त्वं सर्वप्राणाद्यहिंसादि । | ३८९-३९१ |
| २२७-२२८ | नि० सर्वजिनानामहिंसावादित्वम् । | ३९२ |
| १३३ | सू० दृष्टनिर्वेदो लोकैषणात्यागः । | ३९३ |
| १३३ | सू० गृद्धानां भवभ्रमः । | ३९५ |
| १३३ | सू० प्रमत्तान् दृष्ट्वा धीरस्याप्रमत्तता । | ३९६ |
| | ॥ चतुर्थे प्रथमः ॥ ४-१ ॥ | |
| १३४ | सू० आश्रवनिर्जरयोर्व्याप्तिः । | ३९७ |
| १३४ | सू० न मृत्योरनागमः, यथेच्छानां भवभ्रमः । | ३९७ |
| १३४ | सू० क्रूराक्रूरयोः फले केवलिश्रुतकेवलिनोरेकवाक्यता । | ३९७ |
| १३४ | सू० प्राणादीनां हन्तव्याहन्तव्यादिना आर्यानार्यत्वम् | ४०४ |
| २२९-२३३ | नि० रोहगुप्तकारिता स्वान्यसाधुपरीक्षा | ४०६-४०९ |
| २३४-२३५ | नि० शुष्केतरगोलकदृष्टान्तेन विरक्ताविरक्तयोर्लेपालेपौ । | ४१३-४१४ |
| | ॥ चतुर्थे द्वितीयः ४-२ ॥ | |
| १४० | सू० पाखण्डिनां धर्मबाह्यता, आरम्भजे कर्मदुःखे. (प्रकृत्युदयस्थानानि) | ४१४-४१७ |
| १४१ | सू० जीर्णकाष्ठदाहवत् शरीरकर्मधुननदाहौ | ४१८-४२० |
| २३६ | नि० शुषिरकाष्ठदाहदृष्टान्तेन मुनीनां कर्मक्षयः । | ४२० |
| १४२ | सू० अल्पमायुरागमिष्यद् दुःखं निवृत्तपापस्यानिदानतेति न च क्रुध्येत् । | ४२१-४२२ |
| | ॥ चतुर्थे तृतीयः ४-३ ॥ | |
| १४३ | सू० त्यागी स्मारको मार्गस्थितो धुनाति कर्म । | ४२३ |
| १४४ | सू० प्रमत्तस्वरूपम् | ४२५ |
| १४५ | सू० बुद्धस्य पश्यत्ता, वेदविदो निर्याणम् । | ४२६ |
| १४६ | सू० वीराणां सत्यरतता, पश्यकस्य नोपाधिः । | ४२९-४३० |
| | ॥ चतुर्थे चतुर्थः ४-४ ॥ | |
| | **इति सम्यक्त्वाध्ययनम् ॥४॥** | |
| | परिशिष्टे | |
| | प्रथमं परिशिष्टम् आचाराङ्गसूत्रवृत्तावुद्धृतानां पाठनामकारादिक्रमः | ४३१-४३५ |
| | द्वितीयं परिशिष्टम् आचाराङ्गसूत्रसम्पादनोपयुक्तग्रन्थसंकेतादिसूचिः | ४३६ |

॥ अर्हम् ॥

पञ्चमगणधरदेवश्री सुधर्मस्वामिपरम्परायातं
श्रुतकेवलिभद्रबाहुस्वामिसन्दब्धनिर्युक्तियुतं
श्री [1]शीलाचार्यविरचितविवरणविभूषितं

# श्री आचाराङ्गसूत्रम् ।

## प्रथमः श्रुतस्कन्धः ।

## प्रथमं शस्त्रपरिज्ञाध्ययनम् ।

### प्रथम उद्देशकः ।

॥[2] ॐ नमः सर्वज्ञाय ॥

[3]जयति समस्तवस्तुपर्यायविचारापास्ततीर्थिकम्[4],
विहितैकैकतीर्थनयवादसमूहवशात् प्रतिष्ठितम् ।
[5]बहुतिर्थ[6]भङ्गिसिद्धसिद्धान्तविधूनित[7]मलमलीमसम्,
तीर्थमनादिनिधनगतमनुपममादिनतं जिनेश्वरैः ॥१॥

**आचारशास्त्रं** सुविनिश्चितं यथा, जगाद **वीरो** जगते हिताय यः ।
तथैव किञ्चिद् गदतः स एव मे, पुनातु धीमान् विनयार्पिता गिरः ॥२॥

**शस्त्रपरिज्ञाविवरण**मतिबहु गहनं च **गन्धहस्ति**कृतम् ।
तस्मात् सुखबोधार्थम्, गृह्णाम्यहमञ्जसा सारम् ॥३॥

---

★ अत्रेदमवधेयम्- **आचाराङ्गसूत्र**स्य **शीलाचार्य**विरचितटीकासहितः अध्ययनचतुष्टयात्मको भागः आगमप्रभाकरमुनिराजश्री**पुण्यविजय**जीमहाराजस्य अन्तेवासितुल्येन गृहस्थेन श्रावकेण पं० **अमृतलाल**भाई **मोहनलाल** भोजकेन संशोधितो तेनैव च स्वहस्तेन लिखितोऽस्माकं हस्ते समायातोऽधुना । स यथालब्ध एव सम्प्रति प्रकाश्यते मया **जम्बूविजयेन** । तत्र **क ख ग** इत्यादि संकेतैः बहवः पाठभेदा निर्दिष्टाः । किन्तु तेषां संकेतानां कोऽर्थ इति न ज्ञायतेऽस्माभिः । **क ख ग** इत्यादयो हस्तलिखिता आदर्शाः कुत्रत्या इति वयं न जानीमः । पं० **अमृतलाल**भाई महोदयोऽपि दिवंगत इति अत्रार्थे प्रष्टव्यः कोऽपि नास्ति । --इति **जम्बूविजयेन** निवेद्यते ॥ १ 'शीलाङ्काचार्य' इति प्रसिद्धिः । २. **नमः सर्वविदे** ख घ ङ च ॥ **ॐ नमो वीतरागाय** ग । ३. ''**जयतीति** स्कन्दकं छन्दः'' जै०वि०प० । **जै०वि०प०=जैनसिद्धान्तविषमपदपर्यायनामा** ग्रन्थो ज्ञायते । ४. ''**तीर्थ** इति मत'' जै०वि०प० । ५. **बहुविधभङ्गसि०** ग घ च । ६. **०थभङ्गसि०** ङ । ७. ''**मल** इति बद्धं कर्म, **मलीमसेति** बध्यमानम्'' । जै०वि०प० ।

इह हि राग-द्वेष-मोहा[1]द्यभिभूते[2]न संसारिजन्तुना शारीर-मानसा[3]नेकातिकटुकदु:खोपनिपातपीडितेन तदपनयनाय हेयो[4]पादेयपदार्थपरिज्ञाने यत्नो विधेय:, स च न विशिष्टविवेकमृते, विशिष्टविवेकश्च न प्राप्ताशेषातिशयकलापाप्तोपदेशमन्तरेण, आप्तश्च राग-द्वेष-मोहादीनां दोषाणामात्यन्तिकप्रक्षयात्, [5]स चाऽर्हत एव, अत: प्रारभ्यतेऽर्हद्वचनानुयोग: । [6]स च चतुर्धा, तद्यथा—धर्मकथानुयोगो गणितानुयोगो द्रव्यानुयोगश्चरणकरणानुयोगश्चेति । तत्र धर्मकथानुयोग **उत्तराध्ययना**दिक:, गणितानुयोग: **सूर्यप्रज्ञप्त्या**दिक:, द्रव्यानुयोग: **पूर्वाणि** [7]**सम्मत्या**दिकश्च, चरणकरणानुयोगश्चाऽऽ**चारा**दिक:, स च प्रधानतम:, शेषाणां तदर्थत्वात् । तदुक्तम्—

**चरणपडिवत्तिहेउं, जेणियरे तिण्णि अनुयोग** । [ ] त्ति ।

तथा—

**चरणपडिवत्तिहेउं, [8]धम्मकहा-[9]कालदिक्खमादीया ।**
**दविए [10]दंसणसोही, दंसणसुद्धस्स चरणं तु** ॥ [ ]

गणधरैरप्यत एव तस्यैवादौ प्रणयनमकारि । अतस्तत्प्रतिपादकस्याऽऽ**चाराङ्ग**स्यानुयोग: समारभ्यते । स च परमपदप्राप्तिहेतुत्वात् सविघ्न: । तदुक्तम्—

**श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।**
**अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायका:** ॥ [ ]

तस्मादशेषप्रत्यूहोप[11]शमनाय मङ्गलमभिधेयम् । तच्चाऽऽदि-मध्याऽवसानभेदात् त्रिधा । तत्रादिमङ्गलम्—**सुयं मे आउसं ! [12]तेणं भगवया एवमक्खाय**मित्यादि, [13]अत्र च भगवद्वचनानुवादो मङ्गलम् । अथवा श्रुतमिति

---

१. ०हाभिभू० क । २. **०न सर्वेणापि जन्तुना** ग । ३. **०सातिक०** क घ । **०सानेककटुकदु:खौघनिपा०** ग, **०सानेककटु०** च । ४. **०पादेयार्थप०** ख । ५. **स च** आत्यन्तिकप्रक्षय: । ६. **स चतु०** ग च । ७. "**सम्मती**ति अभयदेवादि" जै०वि०प० । ८. "**धम्मकहे**ति अनेन धर्मकथानुयोगभणन[म्], **काले**ति एतेन गणितानुयोगस्य" जै०वि०प० । ९. **०कालि दिक्ख०** क घ ङ । १०. **दंसणसुद्धी** ग । ११. **०शमाय** ख । १२. **तेण** ग । १३. **तत्र** ख ।

श्रुतज्ञानम्, तच्च [1]नन्द्यन्तःपातित्वाद् मङ्गलमिति । एतच्चाविघ्नेनाभिलषितशास्त्रार्थपारगमनकारणम् । मध्यमङ्गलं **लोकसारा**ध्ययनपञ्चमोद्देशकसूत्रम्- **से० [2]जहा वि [3]हरए पडिपुण्णे चिट्ठइ समंसि भोमे उवसंतरए सारक्ख[4]मीणे[5]**त्यादि, अत्र च ह्रदगुणैराचार्यगुणोत्कीर्तनम्, [6]आचार्यश्च पञ्चनमस्कारान्तःपातित्वाद् मङ्गलमिति । एतच्चाभिलषितशास्त्रार्थस्थिरीकरणार्थम् । अवसानमङ्गलं नवमाध्ययनेऽवसानसूत्रम्-**अभिणिव्वुडे अमाई, आवकहाए भयवं समियासी,** अत्राभिनिर्वृतग्रहणं संसारमहातरुकन्दो[7]च्छेदाविप्रतिपत्त्या ध्यानकारित्वाद् मङ्गल[8]मिति, एतच्च शिष्य-प्रतिशिष्यसन्तानाव्यवच्छेदार्थमिति । अध्ययनगतसूत्रमङ्गलत्वप्रतिपादनेनैवाध्ययनानामपि मङ्गलत्वमुक्तमेवेति न प्रतन्यते । सर्वमेव वा शास्त्रं मङ्गलम्, ज्ञानरूपत्वा[9]त् ज्ञान[10]स्य च निर्जरार्थत्वात्, निर्जरार्थत्वेन च तस्याविप्रतिपत्तिः । यत उक्तम्—

**जं अण्णाणी कम्मं खवेति बहुयाहि वासकोडीहिं ।**
**तं नाणी तिहिँ गुत्तो खवेइ ऊसासमेत्तेण ॥** [ बृ० क० भा० ११७० ]

मङ्गलशब्दनिरुक्तं च मां गालयति-अपनयति भवादिति मङ्गलम्, मा भूद् गलः विघ्नः, गालो [11]वा-विनाशः शास्त्रस्येति मङ्गलमित्यादि । शेषं त्वाक्षेपपरिहारादिकमन्यतोऽवसेयमिति ।

साम्प्रतमाचारानुयोगः प्रारभ्यते—आचारस्यानुयोगः अर्थकथनम् आचारानुयोगः, सूत्राद् अनु पश्चाद् अर्थस्य योगोऽनुयोगः, सूत्राध्ययनात् पश्चादर्थकथनमिति भावना । अणोर्वा-लघीयसः सूत्रस्य महताऽर्थेन योगोऽणुयोगः । स चामीभिर्द्वारैरनुगन्तव्यः, तद्यथा—

---

१. "**नन्द्यन्तः** इति नन्दिध्वनिना ज्ञानपञ्चकं गृहीतम्" जै०वि०प० । २. जहा **केवि** ख ग च । ३. "**हरए** इति ह्रदः" जै०वि०प० । ४. **०क्खमाणे०** घ ङ । ५. **०णे इत्यादि** ग । ६. **आचार्यस्य पञ्च०** च । ७. **०च्छेदप्रति०** घ । **०च्छेद्यविप्रति०** ग च, **०च्छेद्याविप्रति०** ङ, "**छेद्यविप्रति** इति । संशयविपर्यया-ऽनध्यवसायरहितं ज्ञानम्" जै०वि०प० । ८. **०मित्येव तच्च** ग । ९. **०त् तस्य । ज्ञान०** ग ङ । १०. **०स्य निर्ज०** क । ११. **वा विनाशः** ख ।

**निक्खेवेगट्ठनि[1]रुत्तिविहिपवित्ती य केन वा कस्स ।**
**तद्दारभेयलक्खण [2]तदरिहपरिसा य सुत्तत्थो ॥** [ दश० वै० नि० गा० ५ ]

तत्र निक्षेपो नामादिः सप्तधा । नाम-स्थापने क्षुण्णे । द्रव्यानुयोगो [3]द्वेधा-आगमतो नोआगमतश्च । तत्रागमतो ज्ञाता तत्र चानुपयुक्तः । नोआगमतो ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तोऽनेकधा, द्रव्येण [4]सेटिकादिना द्रव्यस्यात्म-परमाण्वादेर्द्रव्ये [5]निषद्यादौ वा । क्षेत्रानुयोगः क्षेत्रेण क्षेत्रस्य क्षेत्रे वाऽनु[6]योगः । एवं कालेन कालस्य काले वाऽनुयोगः कालानुयोगः । एवं वचनानुयोग एकवचनादिना । भावानुयोगो [7]द्वेधा-आगमतो नोआगमत[8]श्च । तत्रागमतो ज्ञातोपयुक्तः । नोआगमतस्तु औपशमिकादिभावैः, तेषां वाऽनुयोगः-अर्थकथनं भावानुयोगः । शेष**मावश्यका**नुसारेण [9]नेयम् । केवलमिहानुयोगस्य प्रस्तुतत्वात् तस्य चाचार्याधीनत्वात् केन इति द्वारं विव्रियते, तथा उपक्रमादी[10]नि च द्वाराणि प्रचुरतरोपयोगित्वात् प्रदर्श्यन्त इति । तत्र 'केन' इति कथम्भूतेन ?, यथाभूते[11]न च सूरिणा व्याख्या कर्तव्या तथा [12]दर्श्यते-

**देस-कुल-जाति-[13]रूवी संघयण-धिईजुतो अणासंसी ।**
**[14]अविकत्थणो अमादी थिरपरिवाडी गहियवक्को ॥**

**जियपरिसो जियनिद्दो मज्झत्थो देस-काल-भावण्णू ।**
**आसन्नलद्धपतिभो नाणाविहदेसभासण्णू ॥**

**पंचविहे आयारे जुत्तो सुत्त-ऽत्थ-तदुभयविहिण्णू ।**
**आहरण-हेउ-कारण-नयनिउणो गाहणाकुसलो ॥**

**ससमय-परसमयविऊ गंभीरो दित्तिमं सिवो सोमो ।**
**गुणसयकलिओ जुत्तो पवयणसारं परिकहेउं ॥** [ बृ०क०भा० २४१-२४४ ]

---

१. **०रुत्तवि०** ख । २. **तयरि०** ग । ३. **द्विधा** ग । ४. "**सेटिका** इति खटिका" जै०वि०प० । ५. **०दौ वा । क्षेत्रेण** ख, **०दौ । क्षेत्रानु०** ग ङ । ६. **०गः क्षेत्रानुयोगः एवं** ख च । ७. **द्विधा** ग । ८. **०श्च । आगम०** ख घ ङ च । ९. **ज्ञेयम्** । ग च । १०. **०नि द्वा०** ख । ११. **०न सू०** ख । १२. **प्रदर्श्यंते** ग घ ङ च । १३. **रूवी संघयणी धीजुतो** ख च, **०रूवी संघयणी धिइजुतो** क ग । १४. **अविकंथणो** ख ग घ ङ ।

आर्यदेशो[१]द्भूतः सुखावबोधवचनो भ[२]वत्यतो देशग्रहणम् । पैतृकं [३]कुलमिक्ष्वाक्वादि, ज्ञातकुलश्च यथोत्क्षिप्तभारवहने न श्राम्यतीति । मातृकी जातिः, तत्सम्पन्नो विनयादिगुणवान् भवति । 'यत्राकृतिस्तत्र गुणा वसन्ति' इति रूपग्रहणम् । संहनन-धृतियुतो व्या[४]ख्यानादिषु न खेदमेति । अनाशंसी श्रोतृभ्यो न वस्त्राद्याकाङ्क्षति । अविकत्थनः हित-मितभाषी । अमायी सर्वत्र विश्वास्यः । स्थिरपरिपाटिः परिचितग्रन्थस्य सूत्रार्थगलनासम्भवात् । ग्राह्यवाक्यः सर्वत्रास्खलिताज्ञः । जितप[५]र्षद् राजादिसदसि न क्षोभमुपयाति । जितनिद्रः अप्रमत्तत्वाद् निद्राप्रमादिनः शिष्यान् सुखेनै[६]व प्रबोधयति । मध्यस्थः शिष्येषु समचित्तो भवति । देश-काल-भावज्ञः सुखेनैव गुणवद्देशादौ विहरिष्यति । आसन्नलब्धप्रतिभो द्राक् परवाद्युत्तरदानसमर्थो भवति । नानाविधदेशभाषा-विधिज्ञस्य [७]नानादेशजाः [८]शिष्याः सुखं व्याख्यामवभोत्स्यन्ते । ज्ञानाद्याचार-पञ्चकयुक्तः श्रद्धेयवचनो भवति । सूत्रा-ऽर्थ-तदुभयविधिज्ञ उत्सर्गा-ऽपवादप्रपञ्चं यथावद् ज्ञापयिष्यति । हेतूदाहरण-निमित्त-नयप्रपञ्चज्ञः अनाकुलो हेत्वादीनाचष्टेग्राहणाकुशलो बह्वीभिर्युक्तिभिः शिष्यान् बोधयति । स्वसमय-परसमयज्ञः सुखेनैव तत्स्थापनोच्छेदौ करिष्यति । गम्भीरः खेदसहः । दीप्तिमान् पराधृष्यः । शिवहेतुत्वात् शिवः, तदधिष्ठितदेशे मार्याद्युपशमनात् । सौम्यः [९]सर्वजनमनो-नयनरमणीयः । गुणशतकलितः प्रश्रयादिगुणोपेतः । एवंविधः सूरिः प्रवचनानुयोगे योग्यो भवति ।

तस्य चानुयोगस्य महापुरस्येव चत्वार्यनुयोगद्वाराणि-व्या[१०]ख्याङ्गानि भवन्ति, तद्यथा—उपक्रमो निक्षेपोऽनुगमो [११]नयः । तत्रोपक्रमणमुपक्रमः, उपक्रम्यते-ऽनेनास्मादस्मिन्निति वोपक्रमः, व्याचिख्यासितशा[१२]स्त्रसमीपानयनमित्यर्थः । स च शास्त्रीय-लौकिकभेदाद् द्विधा । तत्र शास्त्रीय आनुपूर्वी नाम प्रमाणं वक्तव्यताऽर्थाधिकारः समवतारश्चे[१३]ति षोढा । लौकिको नाम-स्थापना-द्रव्य-क्षेत्र-

---

१. ०शोद्भवः सु० ग । २. भवतीत्यतो ग । ३. कुलमैक्ष्वाक्वादि क ख च । ४. ०ख्यादिषु घ । ५. ०परिषद् रा० ख घ ङ च । ६. ०व बोध० ख ग च । ७. नानाविधदे० च । ८. शिष्या व्याख्यानं सुखमव० ग । ९. ०जननयन-मनोरम० ग । १०. ०ख्यानाङ्गानि ग घ ङ । ११. नयश्च । तत्रो० क च । १२. ०स्त्रस्य समी० ग । १३. ०ति । लौ० क ग घ ङ च ।

काल-भावभेदात् षोढैव । निक्षेपणमनेनास्मादस्मिन्निति वा निक्षेपः, उपक्रमानीतस्य व्याचिख्यासितशास्त्रस्य नामादिन्यसनमित्यर्थः । स च त्रिविधः[१], तद्यथा—ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्च । तत्रौघ-निष्पन्नोऽङ्गा-ऽध्ययनादिसामान्याभिधानन्यासः । नामनिष्पन्न आचार-शस्त्र-परिज्ञादि-विशेषाभिधाननामादिन्यासः । सूत्रालापकनिष्पन्नश्च सूत्रालापकानां नामादिन्यसनमिति । अनुगमनमनेनास्मादस्मिन्निति वाऽनुगमः अर्थकथनमित्यर्थः । स च [२]द्वेधा-निर्युक्त्यनुगमः सूत्रानुगमश्चेति । तत्र निर्युक्त्यनुगमस्त्रिविधः, तद्यथा— निक्षेपनिर्युक्त्यनुगम उपोद्घातनिर्युक्त्यनुगमः सूत्रस्पर्शिकनिर्युक्त्यनुगमश्चेति । तत्र निक्षेपनिर्युक्त्यनुगमो निक्षेप एव सामान्य-विशेषाभिधानयोरोघनिष्पन्न-नामनिष्पन्नाभ्यां निक्षेपाभ्यामनुगतः, सूत्रापेक्षया वक्ष्यमाणलक्षणश्चेति । उपोद्घातनिर्युक्त्यनुगमश्चाभ्यां द्वारगाथाभ्यामनुगन्तव्यः, तद्यथा—

**उद्देसे निद्देसे य निग्गमे खेत्तकालपुरिसे य ।**
**कारणपच्चयलक्खण नए समोयारणाणुमए ॥**
**किं कइविहं कस्स कहिं केसु कहं [३]केच्चिरं हवइ कालं ।**
**कइ संतरमविरहियं भवागरिस फासणनिरुत्ती ॥** [ आव० नि० १४०-१४१ ]

सूत्रस्पर्शिकनिर्युक्त्यनुगमः सूत्रावयवानां नयैः साक्षेप-परिहारमर्थ-कथनम् । स च सूत्रे सति भवति, सूत्रं च सूत्रानुगमे । स च सूत्रोच्चारणरूपः पदच्छेदरूपश्चेति । अनन्तधर्माध्यासितं वस्त्वेकेनैव धर्मेण नयन्ति परि-च्छिन्दन्तीति ज्ञानविशेषा नयाः, ते च नैगमादयः सप्तेति । साम्प्रत**माचाराङ्ग**-स्योपक्रमादीनाम[४]नुयोगद्वाराणां यथायोगं किञ्चिद्विभणिषुरशेषप्रत्यूहोपशमनाय मङ्गलार्थं प्रेक्षापूर्वकारिणां च प्रवृत्त्यर्थं सम्बन्धा-ऽभिधेय-प्रयोजनप्रतिपादिकां **निर्युक्तिकारो** गाथामाह—

**वंदित्तु सव्वसिद्धे, जिणे य अणुओगदायए सव्वे ।**
**आयारस्स भग[५]वओ निज्जुत्तिं कित्तइस्सामि ॥१॥**

---

१. ०धः-**ओघ०** ख । २. **द्विधा** ख घ ङ च । ३. **केच्चिरं** ग च, **किच्चिरं** घ ङ । ४. **०नुयोगं कि०** ख । ५. **०वतो णिज्जु०** ख ।

**वंदित्तु सव्वसिद्धे०** इत्यादि । तत्र **वन्दित्वा सर्वसिद्धान् जिनांश्चे**ति मङ्गलवचनम् । **अनुयोगदायका**नित्येतच्च सम्बन्धवचनमपि[१] । **आचारस्ये**त्यभिधेयवचनम् । **निर्युक्तिं करिष्ये** इति प्रयोजनकथनमिति तात्पर्यार्थः ।

अवयवार्थस्तु वन्दित्वा इति **वदि अभिवादन-स्तुत्योः** [पा०धा०११] इत्यर्थद्वयाभिधायी धातुः, तत्राभिवादनं कायेन, स्तुतिर्वाचा, अनयोश्च मनःपूर्वकत्वात् करणत्रयेणापि नमस्कार आवेदितो भवति । सितं ध्मातमेषामिति सिद्धाः प्रक्षीणाशेषकर्माणः, सर्वे च ते सिद्धाश्च सर्वसिद्धाः, सर्वग्रहणं तीर्थाऽतीर्था-ऽनन्तर-परम्परादिसिद्धप्रतिपादकम्, तान् । वन्दित्वेति सम्बन्धः सर्वत्र योज्यः ।

राग-द्वेषजितो जिनाः तीर्थकृतस्तानपि सर्वान् अतीता-ऽनागत-वर्तमान-सर्वक्षेत्रगतानिति । अनुयोगदायिनः **सुधर्मस्वामि**प्रभृतयो यावदस्य भगवतो निर्युक्तिकारस्य **भद्रबाहुस्वामि**नश्चतुर्दशपूर्वधरस्याचार्यः, अतस्तान् सर्वानिति । अनेन चाम्नायकथनेन स्वमनीषिकाव्युदासः[२] कृतो भवति । वन्दित्वा इति क्त्वाप्रत्ययस्योत्तरक्रियासव्यपेक्षत्वाद्[३] उत्तरक्रियामाह-**आचारस्य** यथार्थनाम्नः, **भगवत** इति अर्थ-धर्म-प्रयत्नगुणभाजः । तस्यैवंविधस्य निश्चयेनार्थप्रतिपादिका युक्ति**र्निर्युक्तिः**, तां **कीर्तयिष्ये** अभिधास्ये इति, अन्तस्तत्त्वेन निष्पन्नां निर्युक्तिं बहिस्तत्त्वेन प्रकाशयिष्यामीत्यर्थः ॥१॥ [यथाप्रतिज्ञातमेव बिभणिषुर्निक्षेपार्हाणि पदानि तावत् सुहृद् भूत्वाऽऽचार्यः सम्पिण्ड्य कथयति—

**आयार अंग सुय खंध बंभ चरणे तहेव सत्थे य ।**
**परिण्णाए सन्नाए निक्खेवो तह[४] दिसाणं च ॥२॥**

**आयारे**[५]त्यादि । आचार-अङ्ग-श्रुत-स्कन्ध-ब्रह्म-चरण-शस्त्र-परिज्ञा-संज्ञा-दिशा[६]मित्येतेषां निक्षेपः कर्तव्य इति । तत्राचार-ब्रह्म-चरण-शस्त्र-

---

१. **०वचनम् । आचा०** क-खप्रत्योः पश्चात् कृतम् । "**सम्बन्धवचनमपि** इति न केवल(लं)मङ्गलवचनम्, गुरुपर्वक्रमसम्बन्धकथनमपि" जै०वि०प० । २. **स्वमनीषिकाया व्यु०** ख । ३. **०व्यपेक्षकत्वाद्** ग । ४. **तहा दि०** ख छ ज ञ । ५. **आयारे इत्या०** ग च विना आचारेत्या० ङ । ६. **दिशां निक्षे०** ख ।

परिज्ञाशब्दा नामनिष्पन्ने निक्षेपे द्रष्टव्याः । अङ्ग-श्रुत-स्कन्धशब्दा ओघनिष्पन्ने । संज्ञा-दिक्शब्दौ तु सूत्रालापकनिष्पन्ने निक्षेपे द्रष्टव्याविति ॥२॥ [1]एतेषां मध्ये कस्य कतिविधो निक्षेपः ? इत्यत आह—

**चरण-दिसावज्जाणं निक्खेवो [2]चउविहो उ नायव्वो ।**
**चरणम्मि [3]छव्विहो खलु सत्तविहो होइ [4]उ दिसाणं ॥३॥**

**चरणे**त्यादि । चरण-दिग्वर्जानां चतुर्विधो निक्षेपः । चरणस्य षड्विधः, दिक्शब्दस्य [5]सप्तधा निक्षेपः । अत्र च क्षेत्र-कालादिकं यथासम्भवमायोज्यम् । नामादिचतु[6]ष्टयं तु सर्वव्यापीति दर्शयितुमाह—

**जत्थ य जं जाणेज्जा निक्खेवं निक्खिवे निरवसेसं ।**
**जत्थ [7]वि य ण जाणेज्जा चउक्कयं निक्खिवे तत्थ ॥४॥**

**जत्थ य ज**मित्यादि । यत्र चरण-दिक्शब्दादौ यं निक्षेपं क्षेत्र-कालादिकं जानीयात् तं तत्र निरवशेषं निक्षिपेत्, [8]यत्र तु विशेषं न जानीयाद् आचारा-ऽङ्गादौ तत्रापि नाम-स्थापना-द्रव्य-भावचतुष्कात्मकं निक्षेपं निक्षिपेदित्युपदेश इति गाथार्थः ॥४॥

प्रदेशान्तर[9]प्रसिद्धस्यार्थस्य लाघवमिच्छता **निर्युक्तिकारे**ण गाथाऽभ्यधायि ।

**आयारे अंगम्मि य पुव्वुद्दिट्ठो चउक्कनिक्खेवो ।**
**नवरं पुण नाणत्तं भावायारम्मि तं वोच्छं ॥५॥**

**आयारे**[10] इत्यादि । [11]**क्षुल्लिकाचारकथा**यामाचारस्य पूर्वोद्दिष्टो निक्षेपः । अङ्ग[12]स्य तु **चतुरङ्गाध्ययन** इति, यश्चात्र विशेषः सोऽभिधीयते भावाचारविषय इति ॥५॥ यथाप्रतिज्ञातमाह—

---

१. **एषां** ख घ च । २. **चउक्कओ य ना०** झ, **चउव्विहो** ञ ठ । ३. **छव्विहे** झ, **छव्विहं** ञ । ४. **हु** ख । ५. **सप्तविधो नि०** ग ङ । ६. **०यं सर्व** कप्रतिं विना । ७. **वि न य जा०** छ । ८. **यत्र निरवशेषं न** घ ङ च । ९. **०रसिद्ध०** घ ङ । १०. **०रेत्या०** ग घ ङ विना । ११. **क्षुल्लकाचारे क०** ग । १२. **०स्य चतु०** च ।

**तस्सेगट्ठ पवत्तण पढमंग गणी तहेव परिमाणे ।**
**समोतारे सारे या सत्तहिं दारेहिं नाणत्तं ॥६॥**

**तस्सेत्या**[१]दि गाथा । **तस्य** भावाचारस्यै**कार्था**भिधायिनो वाच्याः । तथा केन प्रकारेण प्रवृत्तिः **प्रवर्तना**[२]ऽऽचारस्याभूत् ? तच्च वाच्यम् । तथा **प्रथमाङ्गता** च वाच्या । तथा **गणी** आचार्यस्तस्य कतिथं स्थानमिदम् ? इति च वाच्यम् । तथा **परिमाणम्** इयत्ता वाच्या । तथा किं क्व **समवतरति** ? इत्येत[३]च्च वाच्यम् । तथा **सारश्च** वाच्यः । इत्येभिर्द्वारैः [४]पूर्वस्माद् भावाचाराद् अस्य भेदो नानात्वमिति पिण्डार्थः ॥६॥ अवयवार्थं तु **निर्युक्तिकृदे**वाभिधातुमाह—

**आयारो आचालो आगा[५]लो आगरो य आसासो ।**
**[६]आयरिसो अं[७]गं ति य [८]आइण्णाऽऽजा[९]ई [१०]आमोक्खो ॥७॥** दारं ॥

**आ[११]यारो०** इत्यादि । [१२]आचर्य[१३]ते आसेव्यते इत्याचारः । स च नामादिश्चतुर्धा । तत्र ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तो द्रव्याचारोऽनया गाथयाऽनुसर्तव्यः—

**नामण धोयण वासण सिक्खावण सुकरणाविरोहीणि ।**
**दव्वाणि जाणि लोए दव्वायारं वियाणाहि ॥**

**[ निशी० पीठिका गा० ६, दशवै० नि० १८० ]**

भावाचारो [१४]द्वेधा-लौकिको लोकोत्तरश्च । तत्र लौकिकः पाषण्डिकादयः पञ्चरात्रादिकं यत् कुर्वन्ति स विज्ञेयः । लोकोत्तर[१५]श्च पञ्चधा ज्ञानादिकः । तत्र ज्ञानाचारोऽष्टधा, तद्यथा—

**काले विणए बहुमाणे उवहाणे तहा अनिण्हवणे ।**
**वंजण अत्थ तदुभए अट्ठविहो णाणमायारो ॥**

**[ निशी० पी० गा० ८, दशवै० नि० १८४ ]**

---

१. ०दि । **तस्य** ग । २. **०र्तनमाचार०** ग । ३. **०तद्वाच्यम्** ख । ४. "**पूर्वस्मादिति क्षुल्लिकाचारात्**" जै०वि०प० । ५. **०लो तग्गिरो य** छ । ६. **आगरिसो** ख झ, **आदरिसो** ञ । ७. **०गं चिय** झ । ८. **आचिण्णा०** छ । ९. **०इ यामोक्खो** ख ज ञ, **०इ यामोक्खे** झ, **०इ यामुक्खो** ठ, १०. **आमोक्खे** छ । ११. **०यारे इ०** ग घ च । १२. **आचार्यते** ग घ च । १३. **०ते सेव्य०** ख । १४. **द्विधा** ग च । १५. **०रस्तु प०** ग घ ङ ।

दर्शनाचारोऽप्यष्टधैव, तद्यथा—

**निस्संकिय निक्कंखिय निव्वितिगिच्छा अमूढ दिट्ठी य ।**
**उववूह थिरीकरणे वच्छल्ल पभावणे अट्ठ ॥**

**[ निशी० पी० गा० २३, दशवै०नि० १८२, आव०नि० १५७५ ]**

चारित्राचारोऽप्यष्टधैव—

**तिण्णेव य गुत्तीओ पंच य समियाओ[1] अट्ठ मिलियाओ ।**
**पवयणमायाउ[2] इमा तासु ठिओ चरणसंपन्नो ॥ [ ]**

तपआचारो द्वादशधा[3], तद्यथा—

**अणसणमूणोदरिया वित्तीसंखेवणं रसच्चाओ ।**
**कायकिलेसो संलीणया य बज्झो तवो होइ ॥**
**पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ ।**
**झाणं उस्सग्गो वि य अब्भिंतरओ तवो होइ ॥** [ दशवै० नि० ४७-४८ ]

वीर्याचारस्त्वनेकधा—

**अणिगूहियबलविरिओ परक्कमइ जो जहुत्तमाउत्तो ।**
**जुंजइ य जहाथामं नायव्वो वीरियायारो ॥**

**[ निशी० पी० गा० ४३, दशवै० नि० १८७ ]**

एष पञ्चविध आचारः[4] । एतत्प्रतिपादकश्चायमेव[5] ग्रन्थविशेषो भावाचारः । एवं सर्वत्र योज्यः । इदानीमाचालः–आचाल्यतेऽनेन निबिडं कर्मादीत्याचालः । सोऽपि चतुर्धा । [6]व्यतिरिक्तो वायुः । भावाचालस्त्वयमेव ज्ञानादिः पञ्चधा । इदानीमागालः–आगालनमागालः[7] समप्रदेशाद्यवस्थानम्[8] । सोऽपि चतुर्धा । व्यतिरिक्त उदकादेर्निम्नप्रदेशावस्थानम्[9] । भावागालो ज्ञानादिक एव, तस्यात्मनि[10] रागादिरहितेऽवस्थाननिमित्तत्वात्[11] । इदानीमाकरः–आगत्य तस्मिन् कुर्वन्तीत्याकरः नामादिः । तत्र व्यतिरिक्तो रजतादिः । भावाकरोऽयमेव ज्ञानादिः, तत्प्रति–

---

१. ०मिईओ ग च । २. ०माईउ ख घ ङ, ०मातीउ च । ३. ०धा–अण० ख । ४. ०रः, तत्प्र० ख । ५. ०नेनातिनिबि० च, ०नेनेतिनिबि० ख ग । ६. ''व्यतिरिक्तो वायुः इति ज्ञशरीर-भव्यशरीरयोः'' जै०वि०प० । ७. आगलन० ग घ ङ । ८. ०शावस्था० ख ग । ९. ०शाद्यवस्था० घ ङ च । १०. तस्मादात्मनि ग । ११. ०नमिति कृत्वा इ० कप्रतिं विना ।

पादकश्चायमेव ग्रन्थः, निर्जरादिरत्नानामत्र लाभात् । इदानीमाश्वासः-आश्वसन्त्यस्मिन्नित्याश्वासः नामादिः । तत्र व्यतिरिक्तो यानपात्र-द्वीपादिः । भावाश्वासो ज्ञानादिरेव । इदानीमादर्शः-आदृश्यते[१]ऽस्मिन्नित्यादर्शः नामादिः । व्यतिरिक्तो दर्पणः । भावादर्श उक्त एव, यतोऽस्मिन्नितिकर्तव्यता दृश्यते । इदानीमङ्गम्-अज्यते व्यक्तीक्रियतेऽस्मिन्नित्यङ्गम्, नामाद्येव । तत्र व्यतिरिक्तं शिरो-बाह्वादि । भावाङ्गमयमेवाचारः । इदानीमाचीर्णम्-आचीर्णम् आसेवितम् । तच्च नामादि षोढा । तत्र व्यतिरिक्तं द्रव्याचीर्णं सिंहादेस्तृणादि-परिहारेण पिशितभक्षणम् । क्षेत्राचीर्णं **वाल्हीकेषु** सक्तवः, **कोङ्कणेषु** पेया । कालाचीर्णं त्विदम्—

**सरसो चंदणपंको अग्घति सरसा य गंधकासायी ।**
**पाडल सिरीस मल्लिय पियाइँ[२] काले निदाहम्मि ॥ [ ]**

भावाचीर्णं तु ज्ञानादिपञ्चकम्, तत्प्रतिपादकश्चाचारग्रन्थः । इदानीमाजातिःआजायन्ते तस्यामित्याजातिः । साऽपि चतुर्धा । व्यतिरिक्ता मनुष्यादिजातिः । भावाजातिस्तु ज्ञानाद्याचारप्रसूतिरयमेव ग्रन्थ इति । इदानीमामोक्षः-आमुच्यन्ते[३]ऽस्मिन्निति आमोक्षणं वाऽऽमोक्षः नामादिः । तत्र व्यतिरिक्तो निगडादेः । भावामोक्षः कर्माष्टकोद्वेष्टनमशेषम्, एतत्साधकश्चायमेवाचार इति । एते किञ्चिद्विशेषादेकमेवार्थं विशिषन्तः प्रवर्तन्त इत्येकार्थिकाः शक्र-पुरन्दरादिवत् । एकार्थाभिधायिनां[४] च छन्दश्चिति-बन्धानुलोम्या[५]दिप्रतिपत्त्यर्थमुद्घट्टनम्, उक्तञ्च—

**बंधाणुलोमया खलु सत्थम्मि य लाघवं असम्मोहो ।**
**संतगुणदीवणा वि य एगत्थ[६]गुणा हवंतेए ॥**

**[ बृ०क०भा० १७३ ] ॥७॥**

इदानीं प्रवर्तन[७]द्वारम्, कदा पुनर्भगवताऽऽचारः प्रणीतः ? इत्यत आह—

**सव्वेसिं आयारो तित्थस्स पवत्तणे पढमयाए ।**
**सेसाइं अंगाइं एक्कारस आणुपुव्वीए ॥८॥** दारं।

१. आदर्श्यते ख । २. ०इं समए नि० ख । ३. ०न्ते तस्मि० ग । ४. ०नां तु छ० ख, ०नां छ० च । ५. ०लोमादि० ख । ६. ०गट्ठगु० ख ग । ७. ०र्तनाद्वा० ख ।

**सव्वेसि**मित्यादि । सर्वेषां तीर्थकराणां तीर्थप्रवर्तनादा[1]वाचारार्थः प्रथमतयाऽभूद् भवति भविष्यति च । ततः शेषाङ्गार्थ इति । गणधरा अप्यनयैवानुपूर्व्या सूत्रतया ग्रन्थन्तीति ॥८॥ इदानीं प्रथमत्वे हेतुमाह–

**आयारो अंगाणं पढमं अंगं दुवालसण्हं पि ।**
**एत्थ य मोक्खोवाओ ए[2]स य सारो पवयणस्स ॥९॥** दारं ॥

**आयारो** इत्यादि । अयमाचारो द्वादशाना[3]मङ्गानां **प्रथममङ्ग**मित्यनूद्य कारणमाह–यतोऽ**त्र मोक्षोपायः** चरणकरणं प्रतिपाद्यते । **एष च प्रवच**[4]**नसारः**, प्रधानमोक्षहेतुप्रतिपादनात् । अ[5]त्र च स्थितस्य शेषाङ्गाध्ययनयोग्यत्वाद् अस्य प्रथमतयोपन्यास इति ॥९॥

इदानीं गणिद्वारम्, साधुवर्गो गुणगणो वा गण इति, सोऽस्यास्तीति गणी । आचारायत्तं च गणित्वमिति प्रदर्शयन्नाह–

**आयारम्मि अही[6]ए जं णाओ होइ समणधम्मो उ[7] ।**
**तम्हा आयारध[8]रो भण्णइ पढमं गणिट्ठाणं ॥१०॥** दारं ॥

**आयारम्मी**त्यादि । यस्माद् आचाराध्ययनात् क्षान्त्यादिकश्चरणकरणात्मको वा श्रमणधर्मः परिज्ञातो भवति तस्मात् सर्वेषां गणित्वकारणानामाचारधरत्वं **प्रथमम्** आद्यं प्रधानं वा **गणिस्थान**मिति ॥१०॥

इदानीं परिमाणम्, किं पुनरस्याध्ययनतः पदतश्च परिमाणम् ? इति अत आह–

**नवबंभचेरमइओ अट्ठारसपयसहस्सिओ वेओ ।**
**हवइ य सपंचचूलो बहु–बहुतरओ पयग्गेणं ॥११॥** दारं ॥

**नवे**त्यादि । तत्राध्ययनतो नवब्रह्मचर्याभिधानाध्ययनात्मकोऽ[9]यम्,

---

१. ०दाचारा० क ग च । २. एसो सारो ख ठ । ३. ०मप्यङ्ग० ग, ०मङ्गानामपि प्रथ० घ ङ । ४. ०नस्य सारः ग घ ङ । ५. अत्रावस्थित० घ ङ । ६. ०ए पन्नाओ क । ७. य ञ । ८. ०रो वुच्चइ झ । ९. यम्, अष्टाद० ख ।

पदतोऽष्टादशपदसहस्रात्मकः, वेद इति विदन्त्यस्माद् हेयोपादेयपदार्थानिति वेदः क्षायोपशमिकभाववर्त्ययमाचार इति, सह पञ्चभि[1]श्चूडाभिर्वर्तत इति सपञ्च[2]चूडश्च भवति । उक्तशेषानुवादिनी चूडा । तत्र प्रथमा

**पिंडेसण सेज्जिरिया [3]भासा वत्थेसणा य पाएसा ।**

**उग्गहपडिम**

त्ति सप्ताध्याययनात्मिका । द्वितीया सत्तसत्तिक्कया । तृतीया भावना । चतुर्थी विमुक्तिः । पञ्चमी **निशीथाध्ययनम्** । **बहु-ब[4]हुतरओ पदग्गेणं** ति तत्र चतुश्चूलिकात्मकद्वितीयश्रुतस्कन्धप्रक्षेपाद् बहुः, **निशीथाध्ययन**पञ्चमचूलिकाप्रक्षेपाद् बहुतरः, अनन्तगमपर्यायात्म[5]कतया बहुतमश्च, पदाग्रेण प[6]दपरिमाणेन भवतीति ॥११॥

इदानीमुपक्रमान्तर्गतं समवतारद्वारम्, तत्रैताश्चूडा [7]नवसु ब्रह्मचर्याध्ययनेष्ववतरन्तीति दर्शयितुमाह—

**आयारग्गाणत्थो बंभच्चेरेसु सो समोयरइ ।**
**सो वि य सत्थपरिण्णाए पिंडियत्थो स[8]मोयरइ ॥१२॥**
**सत्थपरिण्णाअत्थो छस्सु वि काएसु सो समोयरइ ।**
**छज्जी[9]वणियाअत्थो पंचसु वि वएसु ओयरइ ॥१३॥**
**पंच य महव्वयाइं समोयरं[10]ते उ सव्वदव्वेसु ।**
**सव्वेसि पज्जवाणं अणंतभागम्मि [11]उ अइंति ॥१४॥**

**आयारे**त्यादि **सत्थे**त्यादि **पंचे**त्यादि उत्तानार्थाः, नवरम् **आचाराग्राणि**-चूलिकाः, **द्रव्याणि** धर्मास्तिकायादीनि, **पर्यायाः** अगुरुलघ्वादयः तेषामनन्तभागे व्रतानामवतार इति ॥१२-१४॥ कथं पुनर्महाव्रतानां सर्वद्रव्येष्ववतारः ? इति तदाह—

---

१. ०श्चूलाभि० च । २. ०चूलश्च च । ३. भासज्जाया य वत्थ पाएसा ग ङ । ४. ०हुययरो पद० कपुस्तकं विना । ५. ०कविवक्षया ब० ग ङ । ६. ०दप्रमा० ग ङ । ७. नवब्र० ख । ८. ०मोइरइ झ । ९. ०वनिकायत्थो ञ । १०. ०ते य स० ख ठ । ११. उयइंति ख, उयरंति ठ ।

**छज्जीवणिया पढमे[1] बितिए चरिमे य सव्वदव्वाइं ।**
**सेसा महव्वया खलु तदेकदेसेण[2] दव्वाणं[3] ॥१५॥** दारं ॥

**छज्जीवणिया** इत्यादि स्पष्टं, कथं पुनर्महाव्रतानां सर्वद्रव्येष्ववतारः[4] इति न सर्वपर्यायेषु इति ? उच्यते, येनाभिप्रायेण चोदितवांस्तमाविःकर्तुमाह–

**णणु सव्वनहपदेसाणंतगुणं पढमसंजमट्ठाणं ।**
**छव्विहपरिवुड्ढीए[5] छट्ठाणाऽसंखया सेढी ॥**
**अन्ने के पज्जाया[6] जेऽणुवउत्ता चरित्तविसयम्मि ।**
**जे तत्तोऽणंतगुणा[7] जेसिं तमणंतभागम्मि[8] ॥**
**अन्ने केवलगम्म त्ति ते मती ते य के तदब्भहिया ।**
**एवं पि होज्ज[9] तुल्ला णाणंतगुणत्तणं जुत्तं ॥**
[10]**आ०-सेढी[11] सणाणदंसणपज्जाया तेण तप्पमाणा[12] सा ।**
**इह पुण चरित्तमेत्तोपयोगिणो तेण ते थोवा ॥** [विशेषाव०भा० २७५५-५८]

अयमासामर्थो लेशतः–ननु इत्यसूयायाम् । संयमस्थानान्यसङ्ख्या-[13]तानि[14] द्रव्यार्थतया तावद् भवन्ति । तेषां यद् जघन्यं[15] तद् अविभाग-परिच्छेदेन[16] बुद्ध्या खण्ड्यमानं[17] पर्यायैरनन्ताविभागपलिच्छेदात्मकं भवति । तच्च पर्यायसङ्ख्यया निर्दिष्टं **सर्वाकाशप्रदेशसङ्ख्याया अनन्तगुणम्,** सर्वनभःप्रदेशवर्गीकृतप्रमाणमित्यर्थः । ततो द्वितीयादिस्थानैरसङ्ख्यात-गच्छगतैरनन्तभागादिकया वृद्ध्या षट्स्थानकानामसङ्ख्येयस्थानगता श्रेणि-र्भवति। एवं चैकमपि स्थानं सर्वपर्यायान्वितं न शक्यते परिच्छेत्तुम्, किं पुनः सर्वाण्यपीत्यतः **केऽन्ये[18] पर्यायाः[19]** येषामनन्तभागे व्रतानि वर्तेरन्निति । स्यान्मतिः– **अन्ये केवलगम्या[20]** इति, इदमुक्तं भवति केवलगम्याऽप्रज्ञापनीयपर्यायाणामपि[21]

१. ०मे **वयम्मि चरिमे बितिए य** ख ज झ ठ, ०मे **चरिमे बितिए य** छ ञ। २. **तहेक्कदे०** छ, तदिक्कदे० ञ, **तदेक्कदे०** ख ज झ ठ। ३. **०से य दव्वाइं** ख। ४. **०रः न सर्व०** ग च। ५. **०रिवड्ढीए** घ ङ च। ६. **जे पज्जत्ता चरि०** ख। ७. ते ग च, **ये तत्तो इति ये पर्याया ततः संयमस्थानात्, तत् चारित्रम्** जै०वि०प०। ८. **तयणं०** ग च। ९. **होंति** ख, **हुज्ज** घ ङ। १०. **आ०** इति ख ग घ प्रतिषु नास्ति। ११. **सेढी सुणा०** ग च। १२. **०माणे सा** ग। १३. **०ङ्ख्यातपलिच्छेदानि द्रव्या०** ख, "**पलिच्छेद** इति खण्डानि" जै०वि०प०। १४. **०नि ताव०** ग घ ङ च। १५. **जघन्यतरं तद्** च। १६. **०पलिच्छे०** ग। १७. **०नम् अनन्तावि०** ग। १८. **केऽन्ये** इति, **अणंतभागमित्यादिनिर्युक्तिवचनमा-शङ्क्याह परः-केऽन्ये पर्यायाः**" जै०वि०प०। १९. **०याः तेषा०** ग। २०-२१. **केवलिग०** क घ ङ।

तत्र[1] प्रक्षेपाद् बहुत्वम्, एवमपि ज्ञान-ज्ञेययोस्तुल्यत्वात् तुल्या एव नानन्तगुणा इति। अत्राचार्या[2] आहुः-याऽसौ संयमस्थानश्रेणिर्निरूपिता सा सर्वा चारित्रपर्यायैर्ज्ञान-दर्शनपर्यायसहितैः परिपूर्णा[3] **तत्प्रमाणा** सर्वाकाश-प्रदेशानन्तगुणा, **इह पुनश्चारित्रमात्रोपयोगित्वात्**[4] पर्यायानन्तभागवृत्तित्वमित्य-दोषः।

इदानीं सारद्वारम्—कः कस्य सारः ? इत्याह—

**अंगाणं किं सारो आयारो तस्स[5] किं हवइ सारो ।**
**अणुओगत्थो सारो तस्स वि य परूवणा सारो ॥१६॥**

**अंगाण**मित्यादि स्पष्टा, केवलम् **अनुयोगार्थः** व्याख्यानभूतोऽर्थः[6], तस्य **प्ररूपणा** यथास्वं[7] विनियोग इति ॥ अन्यच्च—

**सारो परूवणाए चरणं तस्स[8] वि य होइ निव्वाणं ।**
**निव्वाणस्स उं[9] सारो अव्वाबाहं जिणा बेंति ॥१७॥** दारं ॥

**सारो** इत्यादि । स्पष्टा[10] । इदानीं श्रुत-स्कन्धपदयोः नामादिनिक्षेपादिकं पूर्ववद्विधेयम् , भावेन चेहाधिकारः, भावश्रुतस्कन्धश्च ब्रह्मचर्यात्मक इत्यतो ब्रह्मचरणशब्दौ निक्षेप्तव्यावित्याह—

**बंभम्मि[11]( म्मी ) उं[12] चउक्कं ठवणाए होइ बंभणुप्पत्ती ।**
**सत्तण्ह य वण्णाणं नवण्ह वण्णंतराणं च ॥१८॥**

**बंभम्मी**त्यादि । तत्र ब्रह्म नामादि चतुर्धा । तत्र[13] नामब्रह्म ब्रह्मेत्य-

---

१. **तत्र क्षे०** ग, "**तत्र** इति प्रज्ञापनीयपर्यायेषु, न हि ज्ञानमन्तरेण चारित्रं भवतीति आह **ज्ञान-ज्ञेययो**रित्यादि, कथमुक्तं **निर्युक्तिकृता सव्वेसिं पज्जवाण**मित्यादि इति पराभिप्रायः" जै०वि०प० । २. **०चार्य आह-या०** ग । ३. **०र्णा तावत्प्र०** ख, "**तत्प्रमाणा** इति प्रज्ञापनीया-ऽप्रज्ञापनीयपर्यायप्रमाणा" जै०वि०प० । ४. "**चारित्रमात्र** इति सर्वेषां **ज्ञान**-दर्शनपर्यायाणामपेक्षया चारित्रपर्यायाणामनन्तभागत्वम्, तेन यदुक्तं **निर्युक्तिकृता** तद् घटत एव" जै०वि०प० । ५. **तत्थ किं** ख, **तत्थ हवइ किं सारो** ठ । ६. **०नरूपोऽर्थः** खप्रतौ प्रत्यन्तरम् । ७. **यथास्थं** ग च । ८. **तस्सेव य होइ** ख । ९. **य** ञ । १०. **स्पष्टैव इ०** ग घ ङ च । ११. **बंभम्मि** ञ । १२. **य** ठ । १३. **तत्तु नाम ब्रह्मेत्य०** घ ङ, **तत्र नाम ब्रह्मेत्य** ख ।

भिधानम् । असद्भावस्थापना अक्षादौ, सद्भावस्थापना प्रतिविशिष्टयज्ञोपवीताद्याकृतिमल्लेप्यादौ द्रव्ये, अथवा स्थापनायां व्याख्यायमानायां ब्राह्मणोत्पत्तिर्वक्तव्या[1], तत्प्रसङ्गेन च सप्तानां[2] वर्णानां नवानां च वर्णान्तराणामुत्पत्तिर्भणनीयेति ॥१८॥ यथाप्रतिज्ञातमाह—

**एक्का मणुस्सजाई[3] रज्जुप्पत्तीय[4] दो कया उसहे ।**
**तिण्णेव सिप्पवणिए सावगधम्मम्मि चत्तारि ॥१९॥**

**एक्का** इत्यादि । यावद् **नाभेयो** भगवान् नाद्यापि राजलक्ष्मीमध्यास्ते[5] तावदेकैव मनुष्यजातिः । तस्यैव राज्योत्पत्तौ भगवन्तमेवाश्रित्य ये स्थितास्ते क्षत्रियाः, शेषाश्च शोचनाद्रोदनात्[6] शूद्राः । पुनरग्न्युत्पत्तावयस्कारादिशिल्पवाणिज्यवृत्त्या वेशनाद् वैश्याः । भगवतो ज्ञानोत्पत्तौ **भरत**काकणी-लाञ्छनात् श्रावका एव ब्राह्मणा जज्ञिरे, एते शुद्धाः[7], त्रयश्चान्ये गाथान्तरितगाथया प्रदर्शयिष्यन्ते ॥१९॥ साम्प्रतं वर्ण-वर्णान्तरनिष्पन्नं[8] सङ्ख्यानमाह—

**संजोगे सोलसगं सत्त य वन्ना उ नव य अंतरिणो ।**
**एए दो[9] वि विगप्पा ठवणाबंभस्स नायव्वा ॥२०॥**

**संजोगे[10]** इत्यादि । संयोगेन[11] षोडश वर्णाः समुत्पन्नाः । तत्र सप्त वर्णाः, नव[12] तु वर्णान्तराणि । एतच्च वर्ण-वर्णान्तरविकल्पद्वयं स्थापनाब्रह्मेति ज्ञातव्यम् ॥२०॥ साम्प्रतं पूर्वसूचितं वर्णत्रयमाह, यदिवा प्रागुद्दिष्टान् सप्त वर्णानाह—

**पगई[13]चउक्कगाणंतरे य ते होंति सत्त[14] वन्ना उ[15] ।**
**आणंतरेसु[16] चरिमो वण्णो खलु होइ नायव्वो ॥२१॥**

---

१. ०व्या ब्राह्मणोत्पत्तिप्रस० घ ङ । २. ०नां च व० घ च । ३. माणुसजाई ञ । ४. ०त्तीइ दो ख ठ । ५. राज्यल० क । ६. ०नाच्च शू० कपुस्तकमृते । ७. शुद्धास्त्रयः वर्णा अन्ये ख । ८. ०ष्पन्नस० ग च, ०ष्पन्नसङ्ख्यामाह घ ङ । ९. दोण्णि विग० ञ । १०. ०गेत्यादि क ख ग । ११. संयोगात् षोडशवर्णाः । तत्र ख । १२. नव वर्णा० ख च । १३. ०गतिय च० ञ । १४. ०त्त नायव्वा । ख । १५. य ञ । १६. ०तरे उ च० क छ ञ, ०तरिओ च० झ ।

**पगई** इत्यादि । प्रकृतयश्चतस्रः[१] ब्राह्मण-क्षत्रिय-वैश्य-शूद्राख्याः । आसामेव चतसृणामनन्तरयोगेन प्रत्येकं वर्णत्रयोत्पत्तिः, तद्यथा—द्विजेन क्षत्रिययोषितो जातः प्रधानक्षत्रियः सङ्करक्षत्रियो वा । एवं क्षत्रियेण वैश्ययोषितः, वैश्येन शूद्र्याः प्रधान-सङ्करभेदौ वक्तव्याविति एवं सप्त वर्णा भवन्ति । अनन्तरेषु योगेषु भवा[२] आनन्तरास्तेषु चरमवर्णव्यपदेशो भवति-ब्राह्मणेन क्षत्रियायाः क्षत्रियो भवतीत्यादि, स च स्वस्थाने प्रधानो भवतीति भावः ॥२१॥ इदानीं वर्णानन्तराणां नवानां नामान्याह—

**अंबट्ठुग्गणिसाया[३] अजोगवं मागहा य सूया य ।**
**खत्ता[४] वेदेहा वि य चंडाला नवमगा होंति ॥२२॥**

**अम्बेत्यादि** । अम्बष्ठ[५] उग्रः निषादः अयोगवं[६] मागधः सूतः क्षत्ता वैदेहः चाण्डालश्चेति ॥२२॥ कथमेते भवन्ति ? इत्याह—

**एगंतरिए[७] इणमो अंबट्ठो[८] चेव होइ उग्गो य[९] ।**
**बीयंतरिय[१०] निसाओ परासवं[११] तं च पुणं[१२] एगे[१३] ॥२३॥**
**पडिलोमे सुद्दाई अजोगवं मागहो य[१४] सूओ[१५] य ।**
**एगंतरिए खत्ता वेदेहा[१६] चेव नायव्वा[१७] ॥२४॥**
**बितियंतरिए नियमा चंडालो[१८] सो य होइ नायव्वो ।**
**अणुलोमे पडिलोमे एवं एए भवे भेया ॥२५॥**

**एगंते[१९]** इत्यादि । **पडिलोमे[२०]** इत्यादि । **बीयंतरिए[२१]** इत्यादि । आसामर्थो यन्त्रकादवसेयः, तच्चेदम्—

---

१. ०तस्रोऽपि ब्रा० ग घ ङ । २. ०वा अन० ख । ३. ०बट्ठुग्ग० छ । ४. खत्ता य विदेहा ख, खत्त वइदेहा छ, खत्ता च विदेहा झ, खत्ता वतिदेहा ञ । ५. अम्बुष्ठ्यः उ० च, उम्बष्ठ घ । ६. ०गवः मा० ङ । ७. ०ण इमो अं० क छ । ८. अंबुट्ठो ख ज झ, अंबोट्ठो ञ । ९. उ ख । १०. बिइयंत० ख ज ठ । ११. परोम( स? )वं क, परासरं तं झ ञ । १२. ०ण वेगे ठ । १३. एगो क ञ । १४. इ क झ । १५. सूए य ञ । १६. वेदेहो ञ । १७. नायव्वो ञ । १८. ०लो एस हो० ञ, ०लो सो वि हो० ठ । १९. ०तेत्यादि क ख ग च । २०. ०मेत्यादि ख घ ङ । २१. ०एत्यादि ख घ ङ च ।

| | | | |
|---|---|---|---|
| ब्राह्म० पु०-वैश्यस्त्री=अम्बष्ठः | क्षत्र०पु०-शूद्रा स्त्री=उग्रः | ब्राह्म०पु०-शूद्रस्त्री=निषादः [1]पेरासवो वा | शूद्रपु०-वैश्यस्त्री=आयोगवं[2] |
| वैश्यपुरु०-क्षत्रियस्त्री=मागधः | क्षत्रियपुरु०-ब्राह्मणस्त्री=सूतः | शूद्रः पुरुषः-क्षत्रियस्त्री=क्षत्ता | |
| वैश्यपु०-ब्राह्म० स्त्री=वैदेहः | शूद्रः पु०-ब्राह्म० स्त्री=चाण्डालः | | |

एतानि नव वर्णान्तराणि । इदानीं वर्णान्तरसंयोगोत्पत्तिमाह–

**उग्गेणं खत्ताए सोवागो वेणवो विदेहेणं ।**
**[3]अंबट्ठी [4]सुद्दीए [5]य बोक्कसो जो निसाएणं ॥२६॥**
**[6]सुद्देण निसाईए [7]कुक्कुडओ सो [8]उ होइ नायव्वो ।**
**[9]एसो उ बिइयभेओ चउव्विहो होइ नायव्वो ॥२७॥**

[10]**उग्गेणे**त्यादि । [11]**सुद्देण** इत्यादि । अनयोरप्यर्थो यन्त्रकादवसेयः, तच्चेदम्–

| | | | |
|---|---|---|---|
| उग्रपु०-क्षत्ता स्त्री=श्वपाकः | वैदेहपु०-क्षत्ता-स्त्री=वैणवः | निषादपुं०[12]-अम्बष्ठी[13] स्त्री, शूद्री वा=बोक्कसः | शूद्रपुरु[14]-निषाद-स्त्री=कुक्कुडः[15] |

गतं स्थापनाब्रह्म । इदानीं द्रव्यब्रह्मप्रतिपादनायाह–

**[16]दव्वं सरीरभविओ अन्नाणी बत्थिसंजमो चेव ।**
**भावे उ बत्थिसंजम[17] नायव्वो संजमो चेव ॥२८॥** दारं ॥

१. **परासरो वा** क ख च, **पराशवो वा** ग, **पराशव** घ । २. **०गव** घ, **०गवः** च । ३. **अंबुट्ठी** ख ज, **अम्बोट्ठी**, छ । ४. **सूईए** ख ञ ठ । ५. **व बुक्कसो** ठ । ६. **सूएण** ख ञ ठ । ७. **कुक्कुरओ** ख ञ ठ । ८. **वि** ठ, **य** ख । ९. **एसो बिइओ भेओ** ख ज ठ, **एसो उ ठिईभेओ** छ, **एसो विगइभीओ** झ, **एसो बिइयपभेओ** ञ । १०. **उग्गेण इ०** कप्रतिमृते । ११. **सुद्दीए इ०** क ख, **सूदेण इ०** ग, ञपुस्तके पाठपतनम् । १२. **०पु आंसु स्त्री सूता स्त्री वा बोकसः** क, **०पु अंब० स्त्री सूता स्त्री बोकसः** ग च । १३. **अम्बष्ठ** ख, **अम्बुष्ठी** घ । १४. **सूतपुः नि०** ग च । १५. **कुक्कुटः** ख **कुक्कुरक** घ ङ **कुकुडक** ग, **कुर्कुडः** च । १६. **दव्वे स०** छ । १७. **०जमो ना०** ख ज झ ठ, **०जमु ना०** ञ ।

**दव्व**मित्यादि । ज्ञशरीर-भव्यशरीरव्यतिरिक्तं शाक्य-परिव्राजकादीना-मज्ञानानुगतचेतसां बस्तिनिरोधमात्रं विधवा-प्रोषितभर्तृकादीनां[1] च कुलव्यवस्थार्थं कारिता-ऽनुमतियुक्तं द्रव्यब्रह्म । भावब्रह्म तु साधूनां बस्तिसंयमः, अष्टादश-भेदरूपोऽप्ययं संयम एव, सप्तदश[2]विधसंयमाभिन्नरूपत्वादस्येति । अष्टादश भेदास्त्वमी—

**दिव्यात् कामरतिसुखात् त्रिविधं त्रिविधेन विरतिरिति नवकम् ।**
**औदारिकादपि तथा तद् ब्रह्माष्टादशविकल्पम् ॥ [ प्रशम० गा० १७७ ]**

चरणनिक्षेपार्थमाह—

**चरणम्मि होइ छक्कं गइमा[3]हारे गणे य [4]चरणं च ।**
**खेत्तम्मि जम्मि खेत्ते काले कालो [5]जहिं जो उ ॥२९॥**

**चरण**मित्यादि । चरणं नामादि षोढा । व्यतिरिक्तं द्रव्यचरणं त्रिधा भवति-गति-भक्षण-गुणभेदात् । तत्र गतिचरणं गमनमेव । आहारचरणं मोदकादेः । गुणचरणं द्विधा-लौकिकं लोकोत्तरं च । लौकिकं यद् द्रव्यार्थं हस्तिशिक्षादिकं वैद्यकादिकं वा शिक्षन्ते । लोकोत्तरं साधूनामनुप[6]युक्तचरणम् **उदायिनृप-मारका**देर्वा । क्षेत्रचरणं यस्मिन् क्षेत्रे गत्याहारादि चर्यते व्याख्यायते वा, शब्दसामान्यान्तर्भावाद्वा शालिक्षेत्रादिचरणमिति । कालेऽप्येवमेव । [7]भावचरणमाह—

**भावे [8]गइ आहारे गुणे गुणवओ पस[9]त्थ अपसत्था ।**
**गुणचरणेण पसत्थेण [10]बंभचेरा णव हवंति ॥३०॥**

**भावे** इत्यादि । भावचरणमपि गत्याहार-गुणभेदात् त्रिधा । तत्र गतिचरणं साधोरुपयुक्तस्य युगमा[11]त्रदृष्टेर्गच्छतः । भक्षणचरणमपि [12]शुद्धपिण्डमुपभुञ्जानस्य । गुणचरणमप्रशस्तं मिथ्यादृष्टीनाम्, सम्यग्दृष्टीनामपि सनिदानम् । प्रशस्तं तेषामेव

---

१. ०नां कु० ख । २. ०शसंय० ख । ३. ०हारो गुणो य कजप्रतिभ्यामृते । ४. चरणाइ झ, चरणे वा ज । ५. ०हिं होति ज । ६. ०युक्तं च० घ । ७. भावमाह ग घ ङ । ८. गइमाहारो गुणा गुण० कादर्शं विना । ९. ०त्थमप० कप्रतिमृते । १०. ०चेरे ण० झ । ११. ०त्रदत्तदृष्टे० ग ङ । १२. शुद्धं पि० घ ङ ।

कर्मोद्वेष्टनार्थं मूलोत्तरगुणकलापविषयम् । इह चानेनैवाधिकारः, यतो नवाप्यध्ययनानि मूलोत्तरगुणस्थापकानि निर्[१]जरार्थमनुशील्यन्ते ॥३०॥ एतेषां चान्वर्थाभिधानानि दर्शयितुमाह–

**सत्थपरिण्णा लोगविजओ य सीओसणिज्ज सम्मत्तं ।**
**तह लोगसारणामं धुयं [२]तहा महपरिन्ना य ॥३१॥**
**अट्ठ[३]मए य विमोक्खो उवहाणसुयं च नवम[४]गं होइ ।**
**[५]इय एसो आयारो आयारग्गाणि सेसाणि ॥३२॥**

**[६]सत्थेत्यादि । अट्ठमए[७]** इत्यादि । स्पष्टे, केवल**मित्येष** नवाध्ययनरूप **आचारः**, द्वितीयश्रुतस्कन्धाध्ययनानि तु **शेषाणि आचाराग्राणी**ति ॥३१-३२॥ साम्प्रतमुपक्रमान्तर्गतोऽर्थाधिकारो द्वेधा-अध्ययनार्थाधिकार उद्देशार्थाधिकारश्च, तत्राद्यमाह–

**जियसंजमो य लोगो जह बज्झइ जह य [८]तं पयहियव्वं ।**
**सुह-दुक्खतितिक्खा वि य सम्मत्तं लोगसारो [९]य ॥३३॥**
**निस्संगया य छट्ठे मोहसमुत्था परीसहुवसग्गा ।**
**[१०]णिव्वाणं अट्ठमए नवमे य [११]जिणेण [१२]एवं ति ॥३४॥** दारं ॥

**जिय०** इत्यादि । **निस्सं[१३]गे**त्यादि । तत्र शस्त्रपरिज्ञायामयमर्थाधिकारः– **जियसंजमो** त्ति जीवेषु संयमो जीवसंयमः, तेषु हिंसादिपरिहारः । स च जीवास्तित्वपरिज्ञाने सति भवति अतो जीवास्तित्व-विरतिप्रतिपादनमत्रार्थाधिकारः । लोकविजये तु '**लोगो जह बज्झइ जह य तं पयहियव्वं**' ति विजितभावलोकेन संयमस्थितेन लोको यथा बध्यतेऽष्टविधेन कर्मणा, यथा च तत् प्रहातव्यं तथा ज्ञातव्यमित्ययमर्थाधिकारः । तृतीये त्वयम्-संयमस्थितेन

---

१. ०**र्जरणार्थ०** घ । २. **तह महाप०** ख ज झ ठ । ३. ०**मव( ओ? ) य** छ । ४. ०**गं भणियं । इच्चेसे** । ख ज झ ठ, ०**गं भणियं । इय** ञ । ५. **ईएसो** छ । ६. **सत्थे इत्या०** ग । ७. ०**एत्यादि** ख च । ८. **तं विजहि०** क ञ ठ, **तं पजहि०** ख, **तं पइहि०** ज झ । ९. **उ** क । १०. **निज्जाणं** ख ज ञ ठ । ११. **जिणाणए बेंति** क, **जिणाण** ञ । १२. **एयं ति** ख ज झ । १३. ०**ग इत्या०** ख ग ।

जितकषायेणानुकूल-प्रतिकूलोपसर्गनिपातेषु[1] सुख-दुःखतितिक्षा विधेयेति । चतुर्थे त्वयम्-प्राक्तनाध्ययनार्थसम्पन्नेन तापसादिकष्टतपःसेविनामष्टगुणैश्वर्य-मुद्वीक्ष्यापि दृढसम्यक्त्वेन भवितव्यमिति । पञ्चमे त्वयम्-चतुरध्ययनार्थ-स्थितेनासारपरित्यागेन लोकसाररत्नत्रययुक्तेन[2] भाव्यमिति । षष्ठे त्वयम्-प्रागुक्तगुणयुक्तेन निसङ्गतायुक्तेनाऽप्रतिबद्धेन[3] भाव्यमिति । सप्तमे त्वयम्-संयमादिगुणयुक्तस्य कदाचिन्मोहसमुत्थाः परीषहा उपसर्गा वा प्रादुर्भवेयुस्ते सम्यक् सोढव्याः । अष्टमे त्वयम्-[4]निर्वाणम् अन्तक्रिया, सा सर्वगुणसंयुक्तेन[5] सम्यग् विधेयेति । नवमे त्वयम्-अष्टाध्ययनप्रतिपादितोऽर्थः[6] सम्यगेवं[7] **वर्धमान-स्वामिना** विहित इति, [8]तत्प्रतिपादनं च[9] शेषसाधूनामुत्साहार्थम्, तदुक्तम्—

**तित्थयरो चउणाणी सुरमहिओ सिज्झियव्वय धुंयम्मि[10] ।**
**अणिगूहियबलविरिओ सव्वत्थामेसु उज्जमइ ॥**
**किं पुण अवसेसेहि[11] य दुक्खक्खयकारणा सुविहिएहिं ।**
**होइ ण उज्जमियव्वं सपच्चवायम्मि माणुस्से ? ॥**

[ पंचव० ८०१, आचा० नि० २७८-७९ ]

साम्प्रतमुद्देशार्थाधिकारः **शस्त्रपरिज्ञाया** अयम्—

## जीवो छक्कायपरूवणा य तेसिं वहे[12] य बंधो त्ति ।
## विरईए अहिगारो सत्थपरिण्णाए[13] कायव्वो ॥३५॥

**जीवो** इत्यादि । तत्र प्रथमोद्देशके सामान्येन जीवास्तित्वं प्रतिपाद्यम् । शेषेषु तु षट्सु विशेषेण [14]पृथिवीकायाद्यस्तित्वमिति । सर्वेषां चावसाने बन्ध-विरतिप्रतिपादनमिति, एतच्चान्ते उपात्तत्वात् प्रत्येकमुद्देशार्थेषु योजनीयम्, प्रथमोद्देशके जीवः, तद्वधे बन्धः, विरतिश्चेत्येवमिति । तत्र शस्त्र-परिज्ञेति द्विपदं नाम, [15]शस्त्रस्य निक्षेपमाह—

१. ०पाते सु० कपुस्तकं विना । २. ०त्रयोद्युक्तेन कखआदर्शौ विना । ३. ०न भवितव्यम् । कप्रतिमृते । ४. निर्याणम् कखप्रती ऋते । ५. ०गुणेन सम्य० ख, ०गुणयु० ग घ ङ च । ६. ०यनेन प्र० च । ७. ०गेव व० घ ङ । ८. तत्प्रदर्शनं ग । ९. ०नं चाशेष० च । १०. धुतम्मि ग घ ङ । ११. ०सेहिं दु० कपुस्तकमृते । १२. वहेण ब० कठपुस्तके विना । १३. ०ण्णाय का० ख । १४. पृथ्वीका० कगप्रती विना । १५. शस्त्रनि० क ।

**दव्वं सत्थग्गि[1]विस[2]न्नेहंबिलखारलोणमादीयं ।**
**भावो [3]उ दुप्पउत्तो वाया काओ अविरई य ॥३६॥**

**दव्व**मित्यादि । शस्त्रस्य निक्षेपो नामादिश्चतुर्धा । व्यतिरिक्तं द्रव्यशस्त्रं खड्गाद्यग्नि-विष-स्नेहाऽम्ल-क्षार-लवणादिकम् । भावशस्त्रं तु दुष्प्रयुक्तो **भावः** अन्तकर[4]णं तथा वाक्का[5]यावविरतिश्चेति जीवोपघातकारित्वादिति भावः ॥३६॥ परिज्ञापि चतुर्धेत्याह–

**दव्वं जाणण पच्चक्खाणे [6]भविए सरीर उवगरणे ।**
**भावपरिण्णा जाणण पच्च[7]क्खाणे य भावेणं ॥३७॥**

**दव्व**मित्यादि । तत्र द्रव्यपरिज्ञा द्विधा-ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च । ज्ञपरिज्ञा आगम-नोआगमभेदाद् द्विधा । आगमतो ज्ञाताऽनुपयुक्तः । नो-आगमतस्त्रिधा । तत्र व्यतिरिक्ता द्र[8]व्यज्ञपरिज्ञा यो यद् द्रव्यं जानीते सचित्तादि सा परिच्छेद्यद्रव्यप्राधा[9]न्याद् द्रव्यज्ञपरिज्ञेति । प्रत्याख्यानपरिज्ञाऽप्येवमेव । तत्र व्यतिरिक्ता द्रव्यप्रत्याख्यानपरिज्ञा दे[10]होपकरणपरिज्ञानम्, उपकरणं च रजोहरणादि, साधकतमत्वात् । भावपरिज्ञाऽपि द्विधैव-ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च । [तत्र ज्ञभावपरिज्ञा आगम-नोआगमभेदाद् द्विधा] तत्रागमतो ज्ञातोपयुक्तश्च । नोआगम[11]तस्त्विदमेवाध्ययनं ज्ञान-क्रियारूपम्, नोशब्दस्य मिश्रवाचित्वात् । प्रत्याख्यानभावपरिज्ञाऽपि तथैव । आगमतः पूर्ववत् । नोआगमतस्तु प्राणातिपातनिवृत्तिरूपा मनोवाक्कायकृत-कारिता-ऽनुमतिभेदात्मिका ज्ञेयेति ॥३७॥

गतो नामनिष्पन्नो निक्षेपः । साम्प्रतमाचारादिप्रदानस्य सुखप्रतिपत्तये दृष्टान्तोपन्यासेन विधिराख्यायते यथा-कश्चिद् राजाऽभिनवनगरनिवेशेच्छया भूखण्डानि विभज्य समतया प्रकृतिभ्यो दत्तवान् तथा कचवरापनयने शल्योद्धारे [12]भूमिस्थिरीकरणे पक्वेष्टकापीठप्रासादरचने रत्नाद्युपादाने चोपदेशं च दत्तवान् ।

---

१. **०विसंनेहंबिलल्लोणखारमा०** ञ । २. **०न्नेहिंबि०** ख झ । ३. **य** ठ । ४. **०णं वाक्का०** ङ । ५. **०याविर०** ख ग । ६. **दविए** ख ज ठ । ७. **०क्खाणं च भा०** कप्रतेर्विना । ८. **०व्यज्ञानपरि०** ग घ ङ च । ९. **०न्याद् द्रव्यपरि०** कादर्शमृते । १०. **देह उप०** ख ग च । ११. **०तश्चेदमेवा०** ख । १२. **भूस्थिरी०** कपुस्तकं विना ।

ताश्च प्रकृतयस्तदुप[1]देशद्वारेण तथैव कृत्वा यथाभिप्रेतान् भोगान् बुभुजिरे । अयमत्रार्थोपनयः–राजसदृशेन सूरिणा प्रकृतिसदृशस्य शिष्यगणस्य भूखण्ड-सदृशः संयमो मिथ्यात्वकचवराद्यपनीय सर्वोपधाशुद्धस्यारोपणीयः, तं च सामायिकसंयमं स्थिरीकृत्य पक्वेष्टकापीठतुल्यानि व्रतान्यारोपणीयानि, ततः प्रासादकल्पोऽयमाचारो विधेयः । तत्रस्थश्च शेषशा[2]स्त्रादिरत्नान्यादत्ते निर्वाणभाग् भवति । साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणलक्षणोपेतं सूत्रमुच्चारणीयम्, लक्षणं त्विदम्–

**अप्पग्गंथमहत्थं बत्तीसादोसविरहियं जं च ।**
**लक्खणजुत्तं सुत्तं अट्ठहि य गुणेहिं उववेयं ॥** [आव० नि० ८८०]

इत्यादि । तच्चेदं सूत्रम्–

## [सू० १ (१)] सुयं मे आउसं ! तेणं भगवया एवमक्खायं–इहमेगेसिं नो सन्ना भवति ।

अस्य संहितादिक्रमेण व्याख्या-संहिता उच्चारितैव । पदच्छेदस्त्वयम्-श्रुतं मया आयुष्मन्, तेन भगवता एवम् आख्यातम्-इह एकेषां नो संज्ञा भवति। एकं तिङन्तम्, शेषाणि सुबन्तानि । ग[3]तः सपदच्छेदः सूत्रानुगमः ।

साम्प्रतं सूत्रपदार्थः समुन्नीयते-भगवान् **सुधर्मस्वामी जम्बूनाम्न** इदमाचष्टे यथा-श्रुतम् आकर्णितमव[4]गतमवधारितमिति यावद्, अनेन स्वमनीषिकाव्युदासः । **मया** इति साक्षात्, न पुनः पारम्पर्येण । **आयुष्मन्** इति जात्यादिगुणसम्भवेऽपि दीर्घायु[5]ष्कत्वगुणोपादानम् दीर्घायुरविच्छेदेन शिष्योप-देशप्रदायको यथा स्यात्, इहाचारस्य व्याचिख्यासितत्वात् तदर्थस्य च तीर्थकृत्प्रणीतत्वादिति सामर्थ्यप्रापितं **तेन** इति तीर्थकरमाह । य[6]दिवा **आमृशता** भगवत्पादारविन्दमिति, अनेन विनय आवेदितो भवति । **आवसता** वा तदन्तिक इत्यने[7]न तु गुरुकुलवासः कर्तव्य इत्यावेदितं भव[8]ति । एतच्चार्थद्वयं **आमुसंतेण**

१. ०देशानुसारेण ग । २. ०शास्त्ररत्ना० ख । ३. गतश्च पदच्छेदः । साम्प्र० ख । ४. ०वधारि० ख । ५. ०युष्मत्त्वगु० ग घ ङ । ६. अथवा ख । ७. ०न गुरु० ग च । ८. ०ति । इत्येतच्चा० ख ।

**आवसंतेण** इत्येतत्पाठान्तरमाश्रित्यावगन्तव्यमिति । **भगवता** इति भगः ऐश्वर्यादिषडर्थात्मकः, सोऽस्यास्तीति भगवान्, तेन । **एवम्** इति[1] वक्ष्यमाणविधिनाऽऽ**ख्यात**मिति अनेन कृतकत्वव्युदासेना[2]ऽर्थरूपतयाऽऽगमस्य नित्यत्वमाह । **इह** इति क्षेत्रे प्रवचने आचारे शस्त्रपरिज्ञायां वा आख्यातमिति सम्बन्धः । यदिवा **इह** इति संसारे, **एकेषां** ज्ञानावरणीयावृतानां प्राणिनां **नो संज्ञा** भवति, संज्ञानां संज्ञा स्मृतिरवबोध इत्यनर्थान्तरम्, सा नो[3] जायत इत्यर्थः[4] । उक्तः पदार्थः । पदविग्रहस्य तु सामासिकपदाभावाद् अप्रकटनम् ।

इदानीं चालना-ननु च अकारादिक[5]प्रतिषेधकलघुशब्दसम्भवे सति किमर्थं नोशब्देन प्रतिषेधः ? इति । अत्र प्रत्यवस्था- सत्यमेवम्, किन्तु प्रेक्षापूर्वकारितया नोशब्दोपादानम्, सा चेयम्-अन्येन[6] प्रतिषेधे[7] सर्वनिषेधः स्यात्, यथा-'न घटः, अघटः' इति चोक्ते[8] सर्वात्मना घटनिषेधः । स च नेष्यते, यतः **प्रज्ञापनायां** दश संज्ञाः सर्वप्राणिनामभिहितास्तासां सर्वासां प्रतिषेधः प्राप्नोतीति कृत्वा । ताश्चेमाः—

**कइ णं भंते ! सन्नाओ पन्नत्ताओ ? गोयमा ! दस सन्नाओ पन्नत्ताओ, तंजहा-आहारसन्ना भयसन्ना मेहुणसन्ना परिग्गहसन्ना कोहसन्ना माणसन्ना मायासन्ना लोहसन्ना ओहसन्ना लोगसन्न** [प्रज्ञापनासू०] त्ति, आसां च प्रतिषेधे स्पष्टो दोषः । अतो नोशब्देन प्रतिषेधनमकारि, यतोऽयं सर्वनिषेधवाची देशनिषेधवाची च, तथाहि-नोघट इत्युक्ते घटाभावमात्रं प्रतीयते अर्थप्रकरणादिप्रसक्तनिषेधेन चाप्रसक्तस्य विधानम्, स पुनर्विधीयमानः प्रतिषेध्यावयवो ग्रीवादिः प्रतिषेध्यादन्यो वा पटादिः प्रतीयते[9], तथा चोक्तम्—

**प्रतिषेधयति समस्तं [10]प्रसक्तमर्थं च जगति नोशब्दः ।**
**स पुनस्तदवयवो वा तस्मादर्थान्तरं वा स्यात् ॥** [ ]

---

१. ०ति अनेन वक्ष्य० ख । २. ०नागमस्यार्थरूपतया नित्यत्वमित्यर्थः । इह ग्र । ३. नोपजायत च । ४. इति । उक्तः ङ । ५. ०दिप्रति० क । ६. अन्यप्रति० ग्र । ७. ०धेन स० ग ङ च । ८. इति घटा० ख । ९. ०ते इति तथा ग । १०. "प्रसक्तमर्थं च ज्ञान शब्दात् प्रसक्तनिषेधनाऽप्रसक्तविधानमाह" जै०वि०प० ।

इति । एवमिहापि न सर्वसंज्ञानिषेधः, अपि तु विशिष्टसंज्ञानिषेधः, यथाऽऽत्मादिपदार्थस्वरूपं गत्या-ऽऽगत्यादिकं ज्ञायते तस्या निषेध इति ॥ साम्प्रतं **निर्युक्तिकृत्** सूत्रावयवनिक्षेपार्थमाह—

**दव्वे सच्चित्ताई भावे अणुभवण जाणणा सन्ना ।**
**मइ होइ जाणणा पुण अणुभवणा कम्मसंजुत्ता ॥३८॥**

**दव्वे** इत्यादि । संज्ञा नामादिभेदात् चतुर्धा । नाम-स्थापने क्षुण्णे । ज्ञशरीर-भव्यशरीर[1]-तद्व्यतिरिक्ता सचित्ता-ऽचित्त-मिश्रभेदात् त्रिधा । सचित्तेन हस्तादिद्रव्येण पान-भोजनादिसंज्ञा, अचित्तेन [2]ध्वजादिना, मिश्रेण प्रदीपादिना । संज्ञानं संज्ञाऽवगम इति कृत्वा । भावसंज्ञा पुनर्द्विधा-अनुभवनसंज्ञा ज्ञानसंज्ञा च । तत्राल्पव्याख्येयत्वात् तावद् ज्ञानसंज्ञां दर्शयति-**मइ होइ जाणणा पुण** त्ति मननं मतिः अवबोधः । सा च मतिज्ञाना[3]दिपञ्चधा । तत्र केवलसंज्ञा क्षायिकी, शेषास्तु क्षायोपशमिक्यः । अनुभव[4]नसंज्ञा तु स्वकृतकर्मोदयादिसमुत्था जन्तोर्जायते । सा च षोडशभेदेति दर्शयति—

**[5]आहार भय परिग्गह मेहुण सुह दुक्ख मोह वितिगिच्छा ।**
**[6]कोह मण माय लोभे सोगे लोगे य [7]धम्मोघे ॥३९॥**

**आहारे**त्यादि । आहाराभिलाष आहारसंज्ञा । सा च तैजसशरीरनाम-कर्मोदयादसातोदयाच्च भवति । भयसंज्ञा त्रासरूपा । परिग्रहसंज्ञा मूर्च्छारूपा । मैथुनसंज्ञा स्त्र्यादिवेदोदयरूपा । एताश्च मोहनीयोदयात् । सुख-दुःखसंज्ञे साता-ऽसातानुभवरूपे वेदनीयोदयजे । मोहसंज्ञा मिथ्यादर्शनरूपा मोहोदयात् । विचिकित्सासंज्ञा चित्तविप्लुतिरूपा मोहोदयाद् ज्ञानावरणीयोदयाच्च । क्रोधसंज्ञा अप्रीतिरूपा । मानसंज्ञा गर्वरूपा । मायासंज्ञा [8]वक्रतारूपा । लोभसंज्ञा गृद्धिरूपा । शोकसंज्ञा विप्रलाप-वैमनस्यरूपा । एता मोहोदयजाः । लोकसंज्ञा स्वच्छन्दघटितविकल्परूपा लौकिकाचरिता, यथा-न सन्त्यनपत्यस्य लोकाः,

---

१. ०रव्यति० कप्रतेर्विना । २. त्वाद् ज्ञान० ख । ३. ०नादिः प० ख ग । ४. ०वसंज्ञा क ख ग । ५. आधार छ । ६. कोह माण माया लोभे क झ । ७. धम्मोहे कप्रतिमृते । ८. वक्ररूपा ख ।

श्वानो यक्षाः, विप्रा देवाः, काकाः पितामहाः, बर्हिणां पक्षवातेन गर्भ इत्यादिका[1] ज्ञानावरण[2]क्षयोपशमाद् मोहोदयाच्च भवति । धर्मसंज्ञा क्षमाद्यासेवनरूपा मोहनीयक्षयोपशमाद् जायते । एताश्चाविशेषोपादानात् पञ्चेन्द्रियाणां सम्यग्[3]-मिथ्यादृशां[6] द्रष्टव्याः । ओघसंज्ञा[4] तु अव्यक्तोपयोगरूपा वल्ली[5]विताना-ऽऽरोहणादिलिङ्गा ज्ञानावरणीयाल्पक्षयोपशमसमुत्था द्रष्टव्येति । इह पुनर्ज्ञान-संज्ञयाऽधिकारः, यतः सूत्रे सैव निषिद्धा, **इह एकेषां नो संज्ञा** ज्ञानम् अवबोधो **भवती**ति ॥३९॥ प्रतिषिद्धज्ञानविशेषावगमार्थमाह सूत्रम्—

**[ सू०१ ( २ ) ] तंजहा–पुरत्थिमातो वा दिसातो आगतो अहमंसि, दाहिणाओ वा दिसाओ आगतो अहमंसि, पच्चत्थिमातो वा दिसातो आगतो अहमंसि, उत्तरातो वा दिसातो आगतो अहमंसि, उड्ढातो वा दिसातो आगतो अहमंसि, अधेदिसातो वा आगतो अहमंसि, अन्नतरीतो दिसातो वा अणुदिसातो वा आगतो अहमंसि, एवमेगेसिं णो णातं भवति ।**

**तंजहे**त्यादि **णो णायं भवती**ति यावत् । **तद्यथा** इति प्रतिज्ञातार्थो-दाहरणम् । **पुरत्थिमाउ** त्ति प्राकृतशैल्या **मागधदेशीभाषा**नुवृत्त्या पूर्वस्या दिशोऽभि[7]धायकात् पुरत्थिमाशब्दात् पञ्चम्यन्तात् तसा निर्देशः । **वा**शब्द उत्तरपक्षापेक्षया विकल्पार्थः । यथा लोके भोक्तव्यं वा शयितव्यं वेति एवं पूर्वस्या वा दक्षिणस्या वेति । दिशतीति दिक्, अतिसृजति व्यपदिशति द्रव्यं द्रव्यभागं वेति भावः । तां **निर्युक्तिकृद्** निक्षेप्तुमाह—


**णामं ठवणा दविए खेत्ते तावे य पन्नवग भावे ।**
**एस दिसाणिक्खेवो सत्तविहो होइ नायव्वो ॥४०॥**

---

१. **इत्येवमादिका** ग ङ । २. **०रणीयक्षयो०** ख. **०रणीयाल्पक्षयो०** घ ङ । ३. **सम्यग्दृशां मिथ्यादृशां च द्र०** ग च । ४. **०ज्ञा अव्य०** ख । ५. **वल्लिवि०** ग । ६. **०दिरूपा** घ ङ । ७. **०धानात्** क ।

**नाम**मित्यादि । नाम-स्थापना-द्रव्य-क्षेत्र-ताप-प्रज्ञापक-भावरूपः सप्त[१]धा दिग्निक्षेपो ज्ञातव्यः । तत्र सचित्तादेर्द्रव्यस्य दिगित्यभिधानं नामदिक् । **चित्रलिखितजम्बूद्वीपा**देर्दिग्विभागस्थापनं स्थापनादिक् । [२]द्रव्यदिग्निक्षेपार्थमाह—

**तेरसपएसियं खलु तावइएसुं भवे पएसेसुं ।**
**जं दव्वं [३]ओगाढं जहन्नगं तं दसदि[४]सागं ॥४१॥**

**तेरसे**त्यादि । द्रव्यदिग् [५]द्वेधा-आगमतो नोआगमतश्च । आगमतो ज्ञाताऽनुपयुक्तः, नोआगमतो ज्ञशरीर-भव्यशरीरव्यतिरिक्ता त्वियम्—त्रयो[६]दश-प्रादेशिकं द्रव्यमाश्रित्य या प्रवृत्ता । खलुरवधारणे, त्रयोद[७]शप्रादेशिकमेव दिक्, [८]न तु द[९]शप्रादेशिकं यत् कैश्चिदुक्तमिति । प्रदेशाः परमाणवस्तैर्निष्पादितं कार्यद्रव्यं तावत्स्वेव क्षेत्रप्रदेशेष्ववगाढं जघन्यं द्रव्यमाश्रित्य दशदिग्विभागपरिकल्पनातो द्रव्यदिगियमि[१०]ति । तत्स्थापना—  त्रिबाहुकं नवप्रदेशिकमभिलिख्य चतसृषु दिक्ष्वेकैकगृहवृद्धिः कार्या ।

क्षेत्रदिशमाह—

**अट्ठपएसो रुयगो तिरियंलोयस्स मज्झयारम्मि ।**
**एस पभवो दिसाणं [११]एसेव भवे अणुदिसाणं ॥४२॥**


**अट्ठे**त्यादि । तिर्यग्लोकमध्ये रत्नप्रभापृथिव्या उपरि बहु[१२]मध्यदे[१३]शे मेर्वन्तर्द्वौ सर्वक्षुल्लकप्रतरौ तयोरुपरितनस्य चत्वारः प्रदेशा गोस्तनाकारसंस्थानाः, अधस्तनस्यापि चत्वारस्तथाभूता एव इत्येषोऽष्टाकाशप्रदेशात्मकश्चतुरस्रो रुचको दिसामनुदिशां च प्रभव उत्पत्तिस्थानम् । अभिधानान्याह—

**इं[१४]दग्गेई जम्मा य नेरई वारुणी य वायव्वा ।**
**सोमा ईसाणा वि य विमला य तमा य [१५]बोद्धव्वा ॥४३॥**

---

१. ०धा निक्षे० क । २. द्रव्यनिक्षे० क । ३. तूगाढं छ । ४. ०सामं ञ । ५. द्विधा च । ६-७. ०शप्रदे० ग घ ङ च । ८. न पुनर्दश० कप्रतेर्विना । ९. ०शप्रदे० ख घ ङ । १०. ०ति । स्थाप० घ । ११. एसो य भवे झ । १२. ०मध्ये दे० च । १३. ०शे सर्वतो द्वौ क्षुल्ल० ख । १४. ०दग्गीई ज झ, ०दग्गी यी ञ । १५. बोधव्वा कप्रतिं विना ।

इंदग्गे[1]त्यादि । आसामाद्या ऐन्द्री विजयद्वारानुसारेण शेषाः प्रदक्षिणतः सप्तावसेयाः । ऊर्द्ध विमला, तमा चाध इति स्थापना चेयम्[2]—



आसामेव स्वरूपनिरूपणायाह—

**दुपएसा[3]इ दुरुत्तर एगपएसा अणुत्तरा चेव ।**
**चउरो चउरो य दिसा[4] चउराइ अणुत्तरा दोण्णि[5] ॥४४॥**

**दुपए[6]**त्यादि । चतस्रो महादिशो **द्विप्रदेशाद्या** द्विद्विप्रदेशोत्तरवृद्धाः, विदिशश्चतस्र एकप्रदेशरचनात्मिकाः अनुत्तरा वृद्धिरहिताः, उर्द्धा-ऽधोदिग्द्वयं त्वनुत्तरमेव चतुष्प्रदेशादिरचनात्मकम् । किञ्च—

**अंतो[7] सादीयाओ बाहिरपासे अपज्जवसियाओ[8] ।**
**सव्वाणंतपदेसा सव्वा य[9] भवंति कडजुम्मा[10] ॥४५॥**

**अंतो** इत्यादि । सर्वा अपि **अन्तः** मध्ये **सादिकाः**, रुचकाद्या इति कृत्वा, बहिश्चालोका[11][12]काशाश्रयणाद् अपर्यवसिताः । सर्वाश्च दशाप्यनन्तप्रदेशात्मिका भवन्ति । **कडजुम्म** त्ति सर्वासां दिशां प्रत्येकं ये प्रदेशास्ते चतुष्कके[13]नापह्रियमाणाश्चतुष्कावशेषा भवन्ति[14], तत्प्रदेशात्मिकाश्च दिश आगमसंज्ञया कडजुम्म त्ति शब्देनाभिधीयन्ते, तथा **चागमः**—

कइ[15] णं भंते ! जुम्मा पण्णत्ता ? गोयमा ! चत्तारि जुम्मा पण्णत्ता, तं जहा-कडजुम्मे तेओए दावर[16]जुम्मे कलिओए । से केणऽट्ठेणं भंते ! एवं वुच्चति ? गोयमा ! जे णं रासी चउक्कगावहारेणं अवहीरमाणे अवहीरमाणे चउपज्जवसिए सिया से णं कडजुम्मे, एवं तिपज्जवसिते तेओए, दुपज्जवसिते दावर[17]जुम्मे, एगपज्जवसिते कलिओए[18] [ ] त्ति ।

---

१. ०ग्गेई इत्या० ग । २. ०नायम् ङ । ३. ०साय दु० क ख । ४. ०सा पुव्वाय अणु० ख, ०सा चउरो य अणु० झ । ५. दिण्णि क, दुण्णि ठ । ६. ०ए इत्या० ख ग घ च । ७. अंते झ । ८. य पज्ज० क झ । ९. उ ज । १०. ०डजम्मा झ । ११. ०काशश्र० घ ङ । १२. ०न्ति । सव्वा य भवंति कड० खपुस्तकमृते । १३. चतुष्केणा० ग च । १४. ०वन्तीति कृत्वा तत्प्र० ग । १५. "तेओए इति त्रेतायुग्म द्वापरयुग्म कलियुग्म" जै०वि०प० । १६. बायरजुम्मे ग घ ङ च । १७. बादरजुम्मे कप्रत्या विना । १८. कलितोते त्ति ङ ।

पुनरप्यासां संस्थानमाह—

**सगडु[1]द्धिसंठियाओ महादिसाओ[2] य होंति चत्तारि ।**
**मुत्ताव[3]ली य चउरो दो चेव[4] य होंति[5] रुयगनिभा ॥४६॥**

**सगडुद्धी**त्यादि । महादिशश्चतस्रोऽपि शकटोद्धिसंस्थानाः, विदिशश्च[6] मुक्ता[7]वलीनिभाः, उर्द्ध्वा-ऽधोदिग्द्वयं रुचकाकारमिति[8] । तापदिशमाह-

**जस्स जओ आइच्चो उ[9]एइ सा तस्स होइ पुव्व[10]दिसा ।**
**जत्तो अत्थ[11]मेई अवरदिसा सा उ नायव्वा ॥४७॥**
**दाहिणपासम्मि य दाहिणा दिसा उत्तरा य[12] वामेणं ।**
**एया चत्तारि दिसा तावक्खेत्ते उ अक्खाया ॥४८॥**

**जस्से**त्यादि । **दाहिणे**त्यादि । तापयतीति **तापः** आदित्यः तदाश्रिता दिक् **तापदिक्**, शेषं सुगमम्, केवलं **दक्षिणपार्श्वा**दिव्यपदेशः पूर्वाभि[13]मुखस्येति द्रष्टव्यः । तापदिगङ्गीकरणेनान्योऽपि व्यपदेशो भवतीति प्रसङ्गत आह—

**जे मंदरस्स पुव्वेण मणुस्सा[14] दाहिणेण[15] अवरेणं ।**
**जे यावि उत्तरेणं सव्वेसिं उत्तरो[16] मेरू ॥४९॥**
**सव्वेसि[17] उत्तरेणं मेरू लवणो य होइ दाहिणओ ।**
**पुव्वेणं[18] तु उदेई[19] अवरेणं[20] अत्थमइ[21] सूरो ॥५०॥**

**जे मंदरस्से**त्यादि । **सव्वेसिमि**त्यादि । ये मन्दरस्य मेरोः पूर्वेण मनुष्याः क्षेत्रदिगङ्गीकरणेन, रुचकापेक्षं पूर्वादित्वं[22] वेदितव्यम्, तेषामुत्तरो मेरुः दक्षिणेन

---

१. ०डुद्धिसं० ख झ ज ट । २. ०ओ हवंति च० ज ट । ३. ०वलिया च० ख ज झ. ०वलीउ च० ज । ४. ०व हवंति रु० ज । ५. हुंति ट । ६. ०श्चतस्रोऽपि मुक्ता० ख । ७. ०वलिनि० कप्रतेर्विना । ८. ०रम् । ना० ख । ९. उवेति ज । १०. पुव्वा उ ज । ११. ०त्थमइ उ अव० ट । १२. उ ट । १३. ०मुखेषु द्रष्ट० ख । १४. मणूसा कप्रतिमृते । १५. दक्खिणेण ज । १६. उत्तरे ख ज झ ट विना । १७. ०सिमुत्त० ज । १८. ०णं उदेती अ० ख ज ट । १९. उवेई ज । २०. ०रेण य अ० ज झ ज । २१. ०त्थमे सू० झ ज । २२. पूर्वादिदिक्त्वं ङ ।

लवण इति तापदिगङ्गीकरणेन । शेषं स्पष्टम् । प्रज्ञापकदिशमाह–

**जत्थ य जो पन्नवओ कस्स इ[1] साहइ दिसाण[2] उ निमित्तं ।**
**जत्तोमुहो य ठायइ[3] सा पुव्वा पच्छओ अवरा ॥५१॥**

**जत्थ[4]** इत्यादि । प्रज्ञापको यत्र क्वचित् स्थितो दिशां बलात् कस्यचिद् निमित्तं कथयति स यदभिमुखस्तिष्ठति[5] सा पूर्वा, पृष्ठतश्चापरेति । निमित्तकथनं चोपलक्षणम्, अन्योऽपि व्याख्याता ग्राह्य इति । शेषदिक्साधनार्थमाह–


**दाहिणपासम्मि य[6] दाहिणा दिसा उत्तरा य[7] वामेणं ।**
**एतासिमंतरेणं अन्ना[8] चत्तारि विदिसाओ[9] ॥५२॥**
**एतासि[10] चेव अट्ठण्हमंतरा[11] अट्ठ होंति अन्नाओ ।**
**सोलस सरीरउस्सयबाहल्ला सव्वतिरियदिसा ॥५३॥**
**हेट्ठा पादतलाणं अहोदिसा सीसउवरिमा उड्ढा[12] ।**
**एया अट्ठारस वी पन्नवगदिसा मुणेयव्वा ॥५४॥**
**एवं विगप्पियाणं[13] दसण्ह अट्ठण्ह चेव य[14] दिसाणं ।**
**नामाइं[15] वोच्छामि[16] अहक्कमं आणुपुव्वीए ॥५५॥**
**पुव्वा य पुव्वदाहिण[17] दक्खिण तह दक्खिणावरा[18] चेव[19] ।**
**अवरा य अवरउत्तर उत्तर पुव्वुत्तरा चेव ॥५६॥**
**सामुत्थाणी कविला खेलेज्जा खलु तहेव अहिधम्मा ।**
**परिता[20] धम्मा य तहा सावित्ती पुन्नवित्ती[21] य ॥५७॥**

---

१. वि छ ज ठ, य ञ । २. ०सासु य नि० कप्रत्या विना । ३. ठाती ख छ, ठाई ज झ ञ ठ । ४. त्थ य इ० ख ग ङ च । ५. ०मुख: कथयति सा ख । ६-७. उ ठ । ८. एया ख । ९. ०दिसीओ छ । १०. एएसिं ख । ११. ०ण्ह अंत० झ । १२. उड्ढा कपुस्तकादृते । १३. पकप्पियाणं ख ठ । १४. वि ख । १५. नामाई ञ । १६. वोच्छामी ख ञ, वुच्छामिं जह० ठ । १७. पुव्वदक्खिण ख ज झ ठ । १८. ०ण तह दक्खिण दक्खिणा० ठ । १९. ०णापरा ञ । २०. ०रित्तध० छ । २१. पण्णवित्ती ख झ ।

**हेट्ठा नेरइयाणं अहोदिसा उवरि[1]मा य देवाणं ।**
**एयाइं नामाइं पन्नवगस्सा दिसाणं तु ॥५८॥**

**दाहिणे**त्यादि । **एयासिमि**[3]त्यादि । **हेट्ठा** इत्यादि । **एव**मित्यादि । **पु**[2]**व्वा** इत्यादि । **सामुत्थाणी**त्यादि । **हेट्ठे**त्यादि । एताः सप्त गाथाः कण्ठ्याः, नवरं द्वितीयगाथायां सर्वतिर्यग्दिशां बाहल्यं पिण्डः शरीरोच्छ्रयप्रमाणमिति ।




साम्प्रतमासां संस्थानमाह—

**सोलस[4] वी तिरियदिसा सगडु[5]द्धीसंठिया मुणेयव्वा ।**
**दो मल्लगमूलाओ उड्ढं च अहे[6] वि य दिसाओ ॥५९॥**

**सोलस** इत्यादि । षोडशापि तिर्यग्दिशः शकटोद्धिसंस्थाना बोद्धव्याः, प्रज्ञापक[7]प्रदेशे सङ्कटा बहिर्विशालाः, नारक-देवाख्ये द्वे एवोर्द्धा-ऽधोगामिन्यौ शरावाकारे[8] स्तः, यतः शिरोमूले पादमूले च स्वल्पत्वाद् मल्लकबुध्नाकारे, गच्छन्त्यौ च विशाले भवत[9] इति । आसां सर्वासां तात्पर्यं यन्त्रकादवसेयम्, ★तच्चेदम्—

---

१. ०माण दे० झ, ०गा उ दे० ठ । २. पुव्वाए इ० ख ग, पुव्वाएत्या० घ ङ च । ३. हेट्ठा इत्या० ग ङ । ४. ०स वि य ति० झ ज । ५. ०डुद्धीसं० ख ज झ ठ । ६. ०हे य वि दि० ख, ०हे चिय दि० झ । ७. कदेशे ङ । ८. ०रे भवतः, यतः ख च । ९. ०वतः । आसां ख । ★ अत्र 'तच्चेदमधस्तनपत्रे' इति खंभातस्थप्रतौ पाठः ।

भावदिग्निरूपणायाह[1]—

**मणुया तिरिया[2] काया[3] तहग्गबीया चउक्कगा चउरो ।**
**देवा नेरइया[4] या अट्ठारस होंति[5] भावदिसा ॥६०॥**

**मणुया** इत्यादि । मनुष्याश्चतुर्भेदाः तद्यथा—सम्मूर्छनजाः[6] कर्मभूमिजा अकर्मभूमिजा अन्तरद्वीपजाश्चेति, तथा तिर्यञ्चः द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रियाश्चेति[7] चतुर्धा, कायाः पृथिव्यप्-तेजो-वायवश्चत्वारः, तथाऽग्र-मूल-स्कन्ध-पर्वबीजाश्चत्वारि[8] एव । एते षोडश देव-नारकप्रक्षेपाद् अष्टादश । एभिर्भावैर्भवनाद् जीवो व्यपदिश्यत इति भावदिगष्टादशविधेति[9] ।

अत्र च सामान्यदिग्ग्रहणेऽपि यस्यां दिशि जीवानामविगानेन गत्यागती स्पष्टे सर्वत्र सम्भवतस्तयैवेहाधिकार इति तामेव **निर्युक्तिकृत्** साक्षाद्दर्शयति, भावदिक् चाविनाभाविनी सामर्थ्यादधिकृतैव, यतस्तदर्थमन्या दिशश्चिन्त्यन्त इति[10] अत आह—

**पन्नवगदिसट्ठारस भावदिसाओ वि[11] तत्तिया चेव ।**
**एक्केक्कं विंधिज्जा भवंति अट्ठारसऽट्ठारा ॥६१॥**

**पन्नवगदिसाए पुण अहिगारो एत्थ होइ कायव्वो ।**
**जीवाण पोग्गलाण य एयासु गयागई अत्थि ॥६२॥**

**पन्नवगे**[12]त्यादि । **पन्नवगदिसाए** इत्यादि । प्रज्ञापका[13]पेक्षया अष्टादशभेदा दिशः, अत्र च भावदिशोऽपि तावत्प्रमाणा एव प्रत्येकं सम्भवन्तीत्यत एकैकां प्रज्ञापकदिशं भावदिगष्टादशकेन विध्येत्[14] ताडयेत्[15], ततोऽष्टादशाऽष्टादशकाः, ते च सङ्ख्यया त्रीणि शतानि चतुर्विंशत्यधिकानि भवन्तीति[16] । एतोच्चोपलक्षणम्, तापदिगादावपि यथासम्भवमायोजनीयमिति । क्षेत्रदिशस्तु[17] चतसृष्वेव महादिक्षु

---

१. ०णार्थमाह ख ग । २. तिदिया छ, इंदिय ज । ३. ०या अग्गा बी० ग्र छ ठ, ०या अग्ग बी० ज, ०या तउ अग्गबी० ञ । ४. ०इआ वा ख । ५. होइ छ, हुंति ञ ट । ६. ०र्छजाः ख । ७. ०पकाश्चेति ख । ८. ०रः । एते ग घ ङ । ९. ०शभेदेति ख ग च । १०. इत्याह ख । ११. य ञ । १२. ०वग इत्यादि ख । १३. ०पनापे० घ । १४. विन्ध्यात् ख ग । १५. ०येद्, अतो० ख । १६. मन्तीति घ ङ च । १७. दिशि तु च० खपुस्तकादृते ।

सम्भवः, न विदिगादिषु, तासामेक[1]प्रदेशिकत्वाच्चतुष्प्रदेशिकत्वाच्चेति भावार्थः[2]। अयं च दिक्संयोगकलापः **अन्नयरीओ दिसाओ आगओ अहमंसि** इत्यनेन परिगृहीतः ।

सूत्रावयवार्थश्चायम्—इह **दिग्ग्रहणात्** प्रज्ञापकदिशश्चतस्रः पूर्वादिका ऊर्द्धा[3]धोदिशौ च परिगृह्यन्ते, भावदिशस्त्वष्टादशापि । **अनुदिग्ग्रहणात्** प्रज्ञापकविदिशो द्वादशेति । तत्रासंज्ञिनां नैषोऽवबोधोऽस्ति, संज्ञिनामपि केषाञ्चिद् भवति केषाञ्चिन्नेति[4] यथा—अहममुष्या दिशः समागत इह इति । **एवमेगेसिं नो नायं[5] भवति** त्ति **एवम्**[6] अनेन प्रकारेण प्रतिविशिष्टदिग्-विदिगागमनं नैकेषां विदितं भवति इत्येतदुपसंहारवाक्यम्, एतदेव **निर्युक्तिकृदाह—**

**केसिंचि नाणसण्णा[7] अत्थी[8] केसिंचि[9] नत्थि जीवाणं ।**
**कोऽहं परम्मि लोए आसी केयरा[10] दिसाओ वा[11] ॥६३॥**

**केसिमित्यादि । केषाञ्चि**ज्जीवानां ज्ञानावरणीयक्षयोपशमवतां **ज्ञानसंज्ञा**ऽस्ति, केषाञ्चित्[12] तु तदावृतिमतां न भवतीति । याद्दशी[13] संज्ञा न भवति तां दर्शयति—**कोऽहं परस्मिन् लोके** जन्मनि मनुष्यादि**रासम्** ? अनेन भावदिग् गृहीता । **कतरस्या वा दिशः** समायात इत्यनेन तु प्रज्ञापकदिगुपात्तेति, यथा कश्चिन्मदिरामदाघूर्णित[14]लोललोचनोऽव्यक्तमनोविज्ञानो रथ्या[15]मार्गनिपतित-श्छर्द्याकृष्टश्वगणा[16]वलिह्यमानवदनो गृहमानीतो मदात्यये न जानाति कुतो-ऽहमागतः ? इति, तथा प्रकृतो मनुष्यादिरपीति गाथार्थः[17] ॥६३॥ न केवलमेषैव संज्ञा नास्ति, अपरापि नास्तीति **सूत्रकृदाह—**

---

१. ०कप्रादे० च । २. ०ति गाथाद्वयार्थः ग. ०ति भावावाद्वयार्थः ङ । ३. ऊर्धाधो( ऊर्ध )दिगधोदिक् च परि० ङ । ४. ०ति यथा ख च । ५. ०सिं नो सन्नायं ख । ६. एवमित्यनेन ख ग । ७. णानसत्था क. नाणचिन्ता ञ । ८. अत्थि उ के० ञ । ९. केसिं च ञ । १०. कइरा ग्व ज ट । ११. य ञ । १२. ०न् तदा० ख । १३. याद्दग्भूता संज्ञा ख ग । १४. ०तलोच० च । १५. ०थ्यानिप० च । १६. ०णापलि० ग ङ । १७. ०ति भावार्थः ख ङ च ।

**[ सू०१ ( ३ ) ] अत्थि मे आया ओववाइए, नत्थि मे आया उववाइए, कोऽहं आसी ? के वा इओ चुए इह पेच्चा भविस्सामि ?** त्ति ।

**अस्ति** विद्यते, **मम** इत्यनेन षष्ठ्यन्तेन शरीरं[1] निर्दिशति, ममास्य *शरीरस्याधिष्ठाता अतति गच्छति सततगतिप्रवृत्त आत्मा जीवोऽस्तीति*, किम्भूतः ? **औपपातिकः** उपपातः प्रादुर्भावो[3] जन्मान्तरसङ्क्रान्तिः, उपपाते[2] भव औपपातिक इत्यनेन संसारिणः स्वरूपं दर्शयति । स एवम्भूत आत्मा ममास्ति नास्तीति चैवम्भूता संज्ञा केषाञ्चिदज्ञानावष्टब्धचेतसां न जायत इति । तथा कोऽहं नारक-तिर्यङ्-मनुष्यादिरासं[4] पूर्वजन्मनि ? **को वा**[5] **इतः** मनुष्यादेर्जन्मनः[6] **च्युतः** विनष्टः **इह**[7] संसारे **प्रेत्य** जन्मान्तरे **भविष्यामि** उत्पत्स्ये[8] ? इत्येषा च संज्ञा न भवतीति। इह च यद्यपि सर्वत्र भावदिशाऽधिकारः प्रज्ञापकदिशा च तथापि पूर्वसूत्रे साक्षात् प्रज्ञापकदिगुपात्ता[9], अत्र तु भावदिगित्यवगन्तव्यम् ।

ननु चात्र संसारिणां दिग्-विदिगागमनादिका विशिष्टा संज्ञा निषिध्यते न सामान्यसंज्ञेति, एतच्च संज्ञिनि धर्मिण्यात्मनि सिद्धे सति भवति, **'सति धर्मिणि धर्माश्चिन्त्यन्ते'** [ ] इति वचनात् । स च प्रत्यक्षादिप्रमाणा[10]गोचरत्वाद् दुरुपपादः, तथाहि--नासावध्यक्षेणार्थसाक्षात्कारिणा विषयीक्रियते, तस्यातीन्द्रियत्वात्, अतीन्द्रियत्वं च स्वभावविप्रकृष्टत्वात् । अतीन्द्रियत्वादेव च तदव्यभि-चारिकार्यादिलिङ्ग[11]सम्बन्ध[12]ग्रहणासम्भवाद् नाप्यनुमानेन । तस्याप्रत्यक्षत्वे तत्सामान्य[13]ग्रहणशक्त्यनुपपत्तेः नाप्युपमानेन । आगमस्यापि विवक्षायां प्रतिपाद्य-मानायामनुमानान्तर्भावाद् अन्यत्र[14] च बाह्येऽर्थे सम्बन्धाभावाद् अप्रमाणत्वम्, प्रमाणत्वे वा परस्परविरोधित्वाद् नाप्यागमेन । तदन्तरेणापि सकलार्थोपपत्तेः

१. ०रं दर्शयति क । २. ०पातैर्भव क । ३. ०ति । एवं० ख । ४. ०ष्यादिः पूर्वजन्मन्यासम् ? को वा ख ग । ५. वा देवादिरितो मनु० ख ग च,-०दिरतो मनु० घ ङ। ६. ०न्मतः ग घ ङ। ७. इह च सं० घ ङ। ८. उत्पत्स्यामि ? इत्ये० ख । ९. ०पका दि० ग ङ, ०पकादिका दि० ख घ च । १०. ०माणगोचरातीतत्वाद् ख ग घ ङ। ११. ०ङ्गग्रहणा० ख । १२. ०न्धसम्यग्ग्रहणा० घ ङ। १३. तत्समानग्रह० ख । १४. ०त्र बा० ख।

नाप्यर्थापत्त्या । तदेवं प्रमाणपञ्चकातीतत्वात् षष्ठप्रमाणविषयत्वादभाव एवात्मनः । प्रयोगश्चायाम्-नास्त्यात्मा प्रमाणपञ्चकविषयातीतत्वात् खरविषाणवत्[1], तदभावे च विशिष्टसंज्ञाप्रतिषेध[2]ासम्भवेनानुत्थानमेव सूत्रस्येति । एतत् सर्वमनुपासित-गुरोर्वचः, तथाहि—प्रत्यक्ष एवात्मा, तद्गुणस्य ज्ञानस्य स्वसंवित्तिसिद्धत्वात्, संविन्निष्ठा[3] हि विषयव्यवस्थितयः, घट-पटादीनामपि रूपादिगुणप्रत्यक्ष-त्वादेवाध्यक्षत्वमिति । मरणाभावप्रसङ्गाच्च न भूतगुणश्चैतन्यमाशङ्कनीयम्, तेषां सदा सन्निधानसम्भवत[4] इति, हेयोपादेयपरिहारो[6]पादानप्रवृत्तेश्चानुमानेन परात्मनि सिद्धिर्भवति[5], एवमनयैव दिशोपमानादिकमपि स्वधिया[7] स्वविषये यथा-सम्भवमायोज्यम्, केवलं मौनीन्द्रेणा[8]नेनैवा[9]गमेन विशिष्टसंज्ञानिषेधद्वारेण 'अहम्' इति चात्मो[10]ल्लेखेनाऽऽत्मसद्भावः प्रतिपादितः, शेषागमानां चानाप्तप्रणीतत्वाद-प्रामाण्यमेवेति । अत्र च अस्त्यात्मेत्यनेन क्रियावादिनः सप्रभेदाः नास्तीत्यनेन चाक्रियावादिन एतदन्तःपातित्वाच्चाज्ञानिका वैनयिकाश्च सप्रभेदा[11] उपक्षिप्ताः, ते चामी—

**असियसयं किरियाणं अकिरियवाईण होइ चुलसीई ।**
**अण्णाणिय सत्तट्ठी वेणइयाणं च बत्तीसा ॥ [ ]**

तत्र जीवा-ऽजीवा-ऽऽश्रव-बन्ध-पुण्य-पाप-संवर-निर्जरा-मोक्षाख्या नव पदार्थाः स्व-परभेदाभ्यां नित्या-ऽनित्यविकल्पद्वयेन च काल-नियति-स्वभावेश्वरा-ऽऽत्माश्रयणादशीत्युत्तरं भेदशतं भवति क्रियावादिनाम्, एते चास्तित्ववादिनोऽभिधीयन्ते[12] । इयमत्र भावना—अस्ति जीवः स्वतो नित्यः कालतः १, अस्ति जीवः स्वतोऽनित्यः कालतः २, अस्ति जीवः परतो नित्यः कालतः ३, अस्ति जीवः परतोऽनित्यः कालतः[13] ४। एवं कालेन[14] चत्वारो भेदा

---

१. ०वदिति, तद० ख ग । २. ०धाभावसम्भ० ग घ ङ च । ३. ०ष्ठाश्च वि० ख ग च । ४. ०म्भवादिति कप्रतिमृते । ५. ०वतीति कप्रतेर्विना । ६. ०पि स्वविष० क घ ङ च । ७. ०या यथा० ख ग । ८. ०नीन्द्राणामनेनै० क । ९. ०नैव विशि० ख । १०. चागमोल्ले० क । ११. ०दा आक्षिप्ताः ख । १२. ०न्ते । अस्ति जी० ख । १३. ०तः इत्येवं ख ग ङ । १४. ०न चत्वारश्चत्वारो ग ।

लब्धाः । एवं नियति-स्वभावेश्वरा-ऽऽत्मभिरप्येकैकेन चत्वारो विकल्पा लभ्यन्ते। एते[1] च पञ्च चतुष्कका[2] विंशतिर्भवति । इयं च जीवपदार्थेन लब्धा। एवमजीवादयोऽप्यष्टौ प्रत्येकं विंशतिभेदा[3] भवन्ति । ततश्च नव विंशतयः शतमशीत्युत्तरं भवति १८०। तत्र[4] स्वत इति स्वेनैव रूपेण जीवोऽस्ति, न परोपाध्यपेक्षया[5] ह्रस्वत्व-दीर्घत्वे इव, नित्यः शाश्वतो न क्षणिकः, पूर्वोत्तर-कालयोरवस्थितत्वात्, कालत इति काल एव विश्वस्य स्थित्युत्पत्ति-प्रलयकारणम्, उक्तं च—

**कालः पचति भूतानि कालः संहरते प्रजाः ।**
**कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥ [ ]**

स चातीन्द्रियो युगपच्चिरक्षिप्रक्रियाभिव्यङ्ग्यो हिमोष्ण-वर्षाव्यवस्थाहेतुः क्षण-लव-मुहूर्त-यामा-ऽहोरात्र-पक्ष-मासर्त्वयन-संवत्सर-युग-कल्प-पल्यो-पम-सागरोपमा[6]-ऽवसर्पिण्युत्सर्पिणी-पुद्गलपरावर्ता-ऽतीता-ऽनागत-वर्तमान-सर्वाद्धाव्यवहाररूपः[7] । द्वितीयविकल्पे तु कालादेवात्मनोऽस्तित्वमभ्युपेयम्, किन्त्वनित्योऽसाविति विशेषोऽयं पूर्वविकल्पात् । तृतीयविकल्पे तु परत एवास्तित्वमभ्युपगम्यते, कथं पुनः परतोऽस्तित्वमात्मनोऽभ्युपेयते[8] ? नन्वेतत् प्रसिद्धमेव सर्वपदार्थानां परपदार्थस्वरूपापेक्षया स्वरूपपरिच्छेदः, यथा—दीर्घत्वापेक्षया ह्रस्वत्वपरिच्छेदो ह्रस्वत्वापेक्षया च दीर्घत्वस्येति । एवमेव चानात्मनः स्तम्भ-कुम्भादीन् समीक्ष्य तद्व्यतिरिक्ते[9] वस्तुन्यात्मबुद्धिः प्रवर्तत इति, अतो यदात्मनः स्वरूपं तत् परत एवावधार्यते, न स्वत[10] इति । तुर्यविकल्पोऽपि[11] प्राग्वदिति चत्वारो विकल्पाः । तथाऽन्ये नियतित एवात्मनः स्वरूपमवधारयन्ति, का पुनरियं नियतिः इति ? उच्यते—पदार्थानामवश्यन्तया यद्यथाभवने प्रयोजककर्त्री नियतिः, उक्तं च—

---

१. ०ते पञ्च ग । २. चातुष्क० च । ३. ०दाः । तत० ग ङ । ४. ०ति तत्र स्वेनैव स्वरूपे० ख । ५. पररूपव्यपेक्ष० क । ६. ०पमोत्सर्पिण्यवसर्पिणी-पु० ख ग । ७. ०द्धादिव्यव० ग च ङ । ८. ०त्वमात्मनोऽभ्यु० च ङ । ९. ०रिक्तवस्तु० ख । १०. स्वतः । तुर्य० क च । ११. चतुर्थविकल्पेऽपि ग ।

प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः,
सोऽवश्यं भवति नृणां शुभोऽशुभो वा ।
भूतानां महति कृतेऽपि हि प्रयत्ने,
नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥ [ ]

इयं च **मस्करिपरिव्राणमता**नुसारिणी[1] प्राय[2] इति । अपरे पुनः स्वभावादेव संसारव्यवस्थामभ्युपयन्ति । कः पुनरयं स्वभावः ? वस्तुनः स्वत एव तथापरिणतिभावः स्वभावः[3], उक्तं च–

कः कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां च ।
स्वभावतः सर्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुतः प्रयत्नः ॥ [ ]

स्वभावतः प्रवृत्तानां, निवृत्तानां स्वभावतः ।
नाहं कर्तेति भूतानां, यः पश्यति स पश्यति ॥ [ ]

केनाञ्जितानि नयनानि मृगाङ्गनानां,
कोऽलङ्करोति रुचिराङ्गरुहान् मयूरान् ।
कश्चोत्पलेषु दलसन्निचयं करोति,
को वा[4] करोति विनयं कुलजेषु पुंसु ॥ [ ]

तथाऽन्येऽभिदधते–सर्वमेतज्जीवादि[5] ईश्वरात् प्रवृत्तं[6] तस्मादेव स्वरूपेऽवतिष्ठते, कः पुनरयमीश्वरः ? अणिमाद्यैश्वर्ययोगादीश्वरः, उक्तं च–

अज्ञो[7] जन्तुरनीशः स्यादात्मनः सुख-दुःखयोः ।
ईश्वरप्रेरितो गच्छेत्[8] श्वभ्रं वा स्वर्गमेव वा ॥ [ ]

तथाऽन्ये ब्रुवते–न जीवादयः पदार्थाः कालादिभ्यः स्वरूपं प्रतिपद्यन्ते, किं तर्हि ? आत्मनः, कः पुनरयमात्मा ? आत्माद्वैतवादिनां विश्वपरिणतिरूपः[9], यत उक्तम्–

एक एव हि भूतात्मा[10] देहे देहे व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ [ ]

१. ०णी । अपरे क । २. प्रायः । अप० च । ३. ०वः । कः कण्ट० ख । ४. वा दधाति ख ग । ५. समस्तमेत० ख ग । ६. प्रसूतम् ख ग घ । ७. अन्यो घ ङ च । ८. ०त् स्वर्गं वा श्वभ्रमेव वा ख । ९. ०पः, उक्तं च–एक ख, ०प आत्मा, उक्तं च–एक ग ङ । १०. ०त्मा भूते भूते व्य० ख घ ङ ।

तथा **पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्** [ ] इत्यादि । एवमस्त्यजीवः स्वतो नित्यः कालत[1] इत्येवं[2] सर्वत्र योज्यम् ।

तथा अक्रियावादिनः नास्तित्ववादिनः, तेषामपि जीवा-ऽजीवा-ऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षाख्याः सप्त पदार्थाः स्व-परभेदद्वयेन तथा काल-यदृच्छा-नियति-स्वभावेश्वरा-ऽऽत्मभिः षड्भिश्चिन्त्यमानाश्चतुरशीतिविकल्पा भवन्ति, तद्यथा—नास्ति जीवः स्वतः कालतः, नास्ति जीवः परतः कालतः इति कालेन द्वौ लब्धौ । एवं यदृच्छादिष्वपि[3] द्वौ द्वौ भेदौ प्रत्येकं भवतः । सर्वे[4] जीवपदार्थे द्वादश भवन्ति । एवमजीवादिष्वपि प्रत्येकं द्वादशैव[5] । सप्त द्वादशकाश्चतुरशीतिः[6] ८४। अयमत्रार्थः-नास्ति जीवः स्वतः कालत[7] इति । इह पदार्थानां लक्षणेन सत्ता निश्चीयते, कार्यतो वा । न चात्मनस्तादृगस्ति किञ्चिल्लक्षणं येन सत्तां प्रतिपद्येमहि[8], नापि कार्यमणूनामिव[9] महीध्रादि[10] सम्भवति, यच्च लक्षण-कार्याभ्यां नाधिगम्यते[11] वस्तु तद् नास्त्येव[12] यथा वियदिन्दीवरम् । तस्माद् नास्त्यात्मेति । द्वितीयविकल्पोऽपि[13] यच्च स्वतो नात्मानं[14] बिभर्ति गगनारविन्दादिकं तत् परतोऽपि नास्त्येव, अथवा सर्वपदार्थानामेव परभागादर्शनात् सर्वार्वाग्भागसूक्ष्मत्वाच्चोभयानुपलब्धेः सर्वानुपलब्धितो नास्तित्वमध्यवसीयते, उक्तं च—

**यावद् दृश्यं परस्तावद्[15] भागः स च न दृश्यते ।** [ ]

इत्यादि[16] । तथा यदृच्छातोऽपि नास्तित्वमात्मनः । का पुनर्यदृच्छा ? अनभिसन्धिपूर्विका अर्थप्राप्तिर्यदृच्छा,

**अतर्कितोपस्थितमेव सर्वं, चित्रं जनानां सुख-दुःखजातम् ।**
**काकस्य तालेन यथाभिघातो, न बुद्धिपूर्वोऽत्र वृथाभिमानः ॥** [ ]

---

१. ०त एवं स० ख । २. इत्येतत् स० घ । ३. ०च्छानियत्यादि० ग ङ । ४. सर्वेऽपि जी० ग घ ङ । ५. ०शैते । सप्त ख घ, ०शैव । ते सप्त ङ । ६. ०शीतिरिति ८४ ख ग । ७. ०तः । इह घ ङ । ८. प्रपद्ये० ख । ९. ०व महामहीध्रा० घ ङ । १०. महीरन्ध्रादि च । ११. नाभिग० ग । १२. ०व वियदिन्दीवरवत् । तस्मा० ख ग । १३. ०कल्पेऽपि घ ङ । १४. ०नं विनक्ति ग० च । १५. परं ताव० च । १६. इत्यादि इति चप्रतौ नास्ति ।

सत्यं पिशाचाः स्म वने वसामो,
भेरीं[१] कराग्रैरपि न स्पृशामः ।
यदृच्छया सिद्ध्यति लोकयात्रा,
भेरीं[२] पिशाचाः परि[३]ताडयन्ति ॥ [ ]

यथा काकतालीयमबुद्धिपूर्वकम्, न काकस्य बुद्धिर[४]स्ती[५]ति मयि तालं पतिष्यति, नापि तालस्याभिप्रायः काकोपरि पतिष्यामि, अथ च तत् तथैव भवति। एवमन्यदप्यतर्कितो[६]पनतमजाकृपाणीय[७]मातुरभेषजीय[८]मन्धकण्टकीयमित्यादि द्रष्टव्यम् । एवं सर्वं जाति-जरा-मरणादिकं लोके यादृच्छिकं काकतालीयादिकल्पमवसेयमिति । एवं नियति-स्वभावेश्वरा-ऽऽत्मभिरप्यात्मा निराकर्तव्यः ।

तथा अज्ञानिकानां सप्तषष्टि[१०]भे[११]दाः, ते चामी—जीवादयो नव पदार्थाः, उत्पत्तिश्च दशमी, सद् १ असत् २ सदसद् ३ अवक्तव्यः ४ सदवक्तव्यः ५ असदवक्तव्यः ६ सदसदवक्तव्यः[१२] ७ इत्येतैः सप्तभिः प्रकारैर्विज्ञातुं न शक्यन्ते, न च विज्ञातैः प्रयोजनमस्ति । भावना चेयम्—सन् जीव इति को वेत्ति ? किं वा तेन ज्ञातेन ? असन्[१३] जीव इति को जानाति ? किं वा तेन ज्ञातेन ? इत्यादि । एवमजीवादिष्वपि प्रत्येकं सप्त विकल्पाः । नव सप्तकास्त्रिषष्टिः । अमी चान्ये चत्वारस्त्रिषष्टिमध्ये प्रक्षिप्यन्ते, तद्यथा—सती भावोत्पत्तिरिति को जानाति ? किं वा तया ज्ञातया ? एवमस[१४]ती सदसती अवक्तव्या भावोत्पत्तिरिति को वेत्ति ? किं [१५]वा तया ज्ञातया ? इति । शेषविकल्पत्रयं तूत्पत्त्युत्तरकालं पदार्थावयवापे[१६]क्षमतोऽत्र न सम्भवतीति नोक्तम् । एतच्चतुष्टयप्रक्षेपात् सप्तषष्टिर्भवति । तत्र [१७]सन् जीव इति को वेत्ति ? इत्यस्यायमर्थः-न कस्यचिद् [१८]विशिष्टं ज्ञानमस्ति योऽतीन्द्रियान्

---

१-२. **भेरिं** ख ग । ३. **परिवादयन्ति** घ ङ च । ४. **०रस्ति मयि** ख, **०रस्ति नापि तालं पित्सति, नापि तालस्या०** ग । ५. **०ति ममोपरि तालं** च । ६. **०पगमजा०** ङ । ७. "**आतुर** इति कुट्टि(ष्टि?)नो गरलमिश्रोदकपानं प्रगुणतावत्" जै०वि०प० । ८. "**अन्धकण्टक** इति मृत्युपातप्रविष्टाक्षिकण्टकाकर्षणेन पटलनिर्गमवत्" जै०वि०प० । ९. **०दि लोके** क । १०. **०ष्टिर्भेदाः** ग घ ङ । ११. **दा भवन्ति ते चा०** ख ङ । १२. **०व्यः एतैः** क च । १३. **जीवः को वेत्ति ? किं वा** ग । १४. **०तीति सद०** घ ङ च । १५. **वा ज्ञात०** क घ ङ, **वाऽनया ज्ञा०** ग च । १६. **०पेक्ष्यम०** च । १७. **सज्जीव** क । १८. **०शिष्टज्ञा०** ख च ।

जीवादीनवभोत्स्यते, न च तैर्ज्ञातैः किञ्चित् फलमस्ति, तथाहि—यदि नित्यः सर्वगतोऽमूर्तो ज्ञानादिगुणोपेत एतद्गुणव्यतिरिक्तो वा ततः कतमस्य पुरुषार्थस्य सिद्धिः ? इति तस्मादज्ञानमेव श्रेयः । अपि च तुल्येऽप्यपराधे अकामकरणे लोके[1] स्वल्पो दोषः, लोकोत्तरेऽपि आकुट्टिका-ऽनाभोग-सहसाकारादिषु क्षुल्लक-भिक्षु-स्थविरोपाध्याय-सूरीणां यथाक्रममुत्तरोत्तरं प्रायश्चित्त[2]मिति । एवमन्येष्वपि विकल्पेष्वायोज्यम् ।

तथा वैनयिकानां द्वात्रिंशद् भेदाः, ते चानेन विधिना भावनीयाः—सुर-नृप-यति-[3]ज्ञाति-स्थविरा[4]-ऽधम-मातृ-पितृष्वष्टसु मनो-वाक्-काय-प्रदानचतुर्विधविनयकरणात्, [5]तद्यथा—देवानां विनयं करोति मनसा वाचा कायेन तथा देश-कालोपपन्न[6]दानेनेत्येवमादि । एते च विनयादेव स्वर्गा-ऽपवर्ग[7]मार्गमभ्युपयन्ति[8] । नीचैर्वृत्त्यनुत्सेकलक्षणो विनयः । सर्वत्र चैवंविधेन विनयेन[9] देवादिषूपतिष्ठ[10]मानः स्वर्गा-ऽपवर्गभाग् भवति[11], उक्तं च—

**विणया नाणं णाणाओ दंसणं दंसणा[12]ओ चरणं च ।**
**चरणाहिंतो मोक्खो मोक्खे सोक्खं अणाबाहं ॥** [ ]

अत्र च क्रियावादिनामस्तित्वे सत्यपि केषाञ्चित् सर्वगतो[ऽसर्वगतो?] नित्योऽनित्यः कर्ताऽकर्ता मूर्तोऽमूर्तः श्यामाकतन्दुलमात्रोऽङ्गुष्ठपर्वमात्रो दीप-शिखोपमो[13] हृदयाधिष्ठान इत्यादिकोऽस्ति, चौपपातिकश्च । अक्रियावादिनां त्वात्मैव न विद्यते कुतः पुनरौपपातिकत्वम् ? अज्ञानिकास्तु नात्मानं प्रति विप्रतिपद्यन्ते, किन्तु तज्ज्ञानमकिञ्चित्करमेषामिति । वैनयिकानामपि नात्मास्तित्वे विप्रतिपत्तिः, किन्त्वन्यद् [14]मोक्षकारणं विनयादृते न सम्भवतीति[15] प्रतिपन्नाः ।

[16]तत्रानेन सामान्या[17]त्मास्तित्वप्रतिपादनेनाक्रियावादिनो निरस्ता द्रष्टव्याः[18] ।

---

१. **स्वल्पदोषः** च । २. **०त्तम् । एव०** ख । ३. **०ज्ञानि०** ग । ४. **०रा-ऽवम०** ख च । ५. **तद्यथा** इति न वर्तते ङपुस्तके । ६. **०पन्नेन दाने०** क-चप्रतिभ्यामृते । ७. **०र्गमभ्यु०** ग घ च । ८. **०न्ति । सर्वत्र** ख । ९. **०न स्वर्गा०** ख । १०. **०ष्ठन् स्वर्गा०** घ च । ११. **०ति । विणया** क । १२. **०णा हि च०** ङ । १३. **०पमानो हृ०** घ च । १४. **मोक्षसाधनं** ख ग । १५. **०ति विप्रति०** क । १६. **तत्रान्येन** घ ङ । १७. **०न्यास्तित्व०** क । १८. **०व्याः । आत्मास्ति०** क-खप्रती ऋते ।

किञ्चात्मास्तित्वानभ्युपगमे[1] च—

शास्ता शास्त्रं शिष्यः प्रयोजनं वचन-हेतु-दृष्टान्ताः ।
सन्ति न शून्यं[2] वदतस्तदभावादप्रमाणं स्यात् ॥ [ ]
प्रतिषेद्धृ[3]-प्रतिषेधौ स्तश्चेच्छून्यं कथं भवेत् सर्वम् ।
तदभावेन तु सिद्धा अप्रतिषिद्धा जगत्यर्थाः ॥ [ ]

एवं शेषाणामप्यत्रैव यथासम्भवं निराकरणमुत्प्रेक्ष्यमिति ।

गतमानुषङ्गिकम् । प्रकृतमनुश्रियते, तत्रेह **एवमेगेसिं नो[4] नायं भवइ** इत्यनेन केषाञ्चिदेव संज्ञानिषेधात् केषाञ्चित्[5] तु भवतीत्युक्तं भवति । तत्र सामान्यसंज्ञायाः प्रतिप्राणिसिद्धत्वात् तत्कारणपरिज्ञानस्य[6] चेहाकिञ्चित्करत्वात्, विशिष्टसंज्ञायास्तु केषाञ्चिदेव भावात् तस्यास्तु[7] भवान्तरगाम्यात्मस्पष्टप्रतिपादने सोपयोगित्वात् सामान्यसंज्ञाकारणप्रतिपादनमनादृत्य विशिष्टसंज्ञायाः कारणं **सूत्रकृद्** दर्शयितुमाह—

**[सू० २] से ज्जं पुण जाणेज्जा सह सम्मुइयाए परवागरणेणं अण्णेसिं वा अंतिए सोच्चा, तंजहा—पुरत्थिमातो वा दिसातो आगतो अहमंसि एवं दक्खिणाओ वा पच्चत्थिमाओ वा उत्तराओ वा उड्ढाओ वा अहाओ वा अन्नतरीओ दिसाओ वा अणुदिसाओ वा आगतो अहमंसि, एवमेगेसिं णातं भवति । अत्थि मे आया उववाइए जो इमाओ दिसाओ वा अणुदिसाओ वा अणुसंचरति सव्वाओ दिसाओ सव्वाओ अणुदिसाओ सो हं ।**

**से ज्जं पुण जाणेज्ज[8]** त्ति सूत्रं यावत् **सोऽहमिति** । **से** इति निर्देशो

१. ०मे-शास्ता ख । २. ०न्यं ब्रुवत० ख ग । ३. ०षेध्यप्र० ग ङ । ४. नो संज्ञा भवति ख । ५. ०ञ्चिद् भव ख । ६. ०नस्येहा० च । ७. ०स्याश्च भ० कपुस्तकमृते । ८. ०णेज्जेति सू० ख ।

**मागध**शैल्या प्रथमैकवचनान्तः । **स** [1]इत्यनेन च यः प्राग्निर्दिष्टो ज्ञाता विशिष्टक्षयोपशमादिमान् स प्रत्यवमृश्यते । **यद्** इत्यनेनापि यत् प्राग्निर्दिष्टं दिग्विदिगागमनम्, तथा कोऽहमभूवमतीतजन्मनि देवो नारकस्तिर्य[2]ग्योनो मनुष्यो वा ? स्त्री पुमान् नपुंसको वा ? को [3]वाऽमुतो मनुष्यज[4]न्मनः प्रभ्रष्टोऽहं प्रेत्य देवादिर्भविष्यामि ? इत्येतत् परामृश्यते । **जानीयाद्** अवगच्छेत् । इदमुक्तं भवति—न कश्चिदनादौ संसृतौ पर्यटन् असुमान् दिगागमनादिकं जानीयात् । यः पुनर्जानीयात् स एवम्—**सह** [5]**सम्मइए** त्ति **सह**शब्दः सम्बन्धवाची, **सद्** इति प्रशंसायाम्, **मतिः** ज्ञानम् । [6]अयमत्र वाक्यार्थः—आत्मना सह सदा या सन्मतिर्वर्तते तया सन्मत्या कश्चिज्जानीते, सहशब्दविशेषणाच्च सदाऽऽत्म-स्वभावत्वं मतेरावेदितं भवति, न पुनर्यथा वैशेषिकाणां व्यतिरिक्ता सती समवायवृत्त्याऽऽत्मनि समवेतेति । यदि वा **स**[7]**म्मइए** त्ति स्वकीयया मत्या स्वमत्येति । तत्र भिन्नमप्यश्वादिकं स्वकीयं दृष्टमतः सहशब्दविशेषणम्, सहशब्दश्चासमस्त इति, सत्यपि चात्मनः सदा मतिसन्निधाने प्रबलज्ञाना-वरणावृतत्वाद् न सदा विशिष्टोऽवबोध इति । सा पुनः सन्मतिः स्वमतिर्वा अवधि-मनःपर्याय-केवलज्ञान-जातिस्मरणभेदात् चतुर्विधा ज्ञेया । तत्रावधि-मनःपर्याय-केवलानां स्वरूपमन्यत्र विस्तरेणोक्तम्, जातिस्मरणं त्वाभि-निबोधिकविशेषः । तदेवं चतुर्विधया मत्याऽऽत्मनः कश्चिद्विशिष्टदिग्गत्या-ऽऽगती जानाति । क[8]श्चिच्च **परः** तीर्थकृत् सर्वज्ञः, तस्यैव परमार्थतः परशब्दवाच्यत्वात् परत्वम्, तस्य तेन वा **व्याकरणम्** उपदेशस्तेन जीवांस्तद्भेदांश्च पृथिव्यादीन् तद्गत्या-ऽऽगती च जानाति । अपरः पुनः अन्येषां तीर्थकरव्यतिरिक्ताना-मतिशयज्ञानिनामन्तिके श्रुत्वा जानातीति । यच्च जानाति तत् सूत्रावयवेन दर्शयति, तद्यथा—पूर्वस्या दिश आगतोऽहमस्मि, एवं दक्षिणस्याः पश्चिमाया उत्तरस्या ऊर्द्ध्वदिशोऽधोदिशोऽन्यतरस्या दिशोऽनुदिशो [9]वाऽऽगतो[10]ऽहमस्मीति

---

१. इत्येतेन च घ ङ । २. ०ग्योनिर्मनु० ग म । ३. **वा मृतो मनु०** क ग च । ४. ०न्मतः प्र० ग । ५. **सम्मुइय त्ति** ख, **सम्मइय त्ति** ग । ६. **अत्र वा०** ग । ७. ०म्मईए त्ति च, ०म्मइय त्ति ख । ८. ०श्चिच्च परतः परः ख, ०श्चित् परतः तीर्थ० ग । ९. **वा गतो वाऽऽगतो वाऽहम०** ख । १०. ०तो वाऽह० घ ।

एवमेकेषां विशिष्टक्षयोपशमादिमतां तीर्थकरा-ऽन्यातिशयज्ञानिबोधितानां च ज्ञातं[1] भवति । तथा प्रतिविशिष्टदिगागमनपरिज्ञानानन्तरमेषामेतदपि[2] ज्ञातं[3] भवति, यथा— अस्ति मेऽस्य शरीरकस्याधिष्ठाता ज्ञान-दर्शनोपयोगलक्षणः उपपादुकः भवान्तर-सङ्क्रान्तिभाग् असर्वगतो भोक्ता मूर्तिरहितोऽविनाशी शरीरमात्रव्यापीत्यादि-गुणवानात्मेति । स च द्रव्य-कषाय-योगोपयोग-ज्ञान-दर्शन-चारित्र-वीर्यात्म-भेदाद् अष्टधा । तत्रोपयोगात्मना बाहुल्येनेहाधिकारः ।शेषास्तु[4] तदंशतयोपयुज्यन्त इति[5] उपन्यस्ताः । तथा अस्ति च ममात्मा, योऽमुष्या दिशोऽनुदिशश्च सकाशाद् अनुसञ्चरति गतिप्रायोग्यकर्मोपादानाद् **अनु** पश्चात् सञ्चरति अनुसञ्चरति, पाठान्तरं वा **अनुसंसरइ** त्ति दिग्-विदिगागमनं[6] भावदिगागमनं वा स्मरतीत्यर्थः । साम्प्रतं सूत्रावयवेन पूर्वसूत्रोक्तमेवार्थमुपसंहरति **सर्वस्या दिशः सर्वस्याश्चानुदिशो** य आगतोऽनुसञ्चरति[7] अनुसंस्मरतीति वा **सोऽहम्** इत्यात्मोल्लेखे । अहंप्रत्यय-ग्राह्यत्वाद् आत्मनः । अनेन च पूर्वाद्याः प्रज्ञापकदिशः सर्वा गृहीताः भावदिशश्चेति । इममेवार्थं **निर्युक्तिकृद्** दर्शयितुमना गाथात्रितयमाह—

**जाणइ सयं मतीए अन्नेसिं वा वि अंतिए[8] सोच्चा ।**
***जाणगजणपन्नविओ[9] जीवं तह जीवकाए य ॥६४॥***

**सह[10] सम्मुइय त्ति[ य? ] जं पयं सुए तत्थ जाणणा होइ ।**
**ओही[11] मणपज्जवणाण केवले जाइसरणे[12] य ॥६५॥**

**परवइवागरणं पुण जिणवागरणं जिणा परं नत्थि ।**
**अन्नेसिं सोउ[13] त्ति य जिणेहिं सव्वो परो अन्नो ॥६६॥**

**जाण[14]** इत्यादि, **सहे**त्यादि, **परे**त्यादि । कश्चिदनादिसंसृतौ पर्यटन्न-वध्यादिकया चतुर्विधया स्वकीयया मत्या जानाति । अनानुपूर्वीन्यायप्रकटनार्थं

१. ज्ञानं ख । २. ०मेतेषामे० ख, ०मेतदपि ग, ०मेषां तद० च । ३. ज्ञानं ख च । ४. शेषास्तदं० ख । ५. इति । तथा ख । ६. ०दिशाग० ग । ७. ०रतीति अनु० ख । ८. अंतिये ख । ९. ०णातिजण० ख । १०. एत्थ य सह सम्मुइए त्ति जं पयं तत्थ जप्रतिं विना, ...सम्मुइयं ति ज... ख ज, ...सहस्समइयाए जं... झ । ११. उवही झ । १२. जायस० झ । १३. सोउं ति य ख ज, सोव( च्च )त्ति य झ, सोच्चं ति य ज । १४. जाणइ इत्यादि एत्थ चेत्यादि परे० ग ङ च ।

पश्चादुपात्तमपि अन्येषाम् इत्येतत् पदं तावदाचष्टे—अन्येषां वा अतिशयज्ञानिनामन्तिके श्रुत्वा जानाति, तथा **जाणगजणपण्णविओ** इत्यनेन परव्याकरणमुपात्तम्, तेनायमर्थः—[1]ज्ञायकः तीर्थकृत् [2]तत्प्रज्ञापितश्च जानाति । यद् जानाति तत् स्वत एव दर्शयति—सामान्यतो **जीवम्** [3]इत्यनेन चाधिकृतोद्देशकस्यार्थाधिकारमाह, **तथा जीवकायांश्च** [4]पृथिवीकायादीन् इत्यनेन चोत्तरेषां षण्णामप्युद्देशकानां यथाक्रममधिकारार्थमाहेति ।

**अत्र च सह [5]सम्मुइए त्ति** सूत्रे **यत् पदं [6]तत्र जाणण** त्ति ज्ञानमुपात्तं **भवति,** [7]मन ज्ञाने [पा० धा० ११७७] मननं मतिरिति कृत्वा । तच्च किम्भूतमिति दर्शयति—अवधि-मनःपर्याय-[8]केवल-जातिस्मरणरूपमिति । तत्रावधिज्ञानी सङ्ख्येयान[9]सङ्ख्येयान् वा भवान् जानाति । एवं मनःपर्यायज्ञान्यपि । [10]केवलज्ञानी तु नियमतोऽनन्तान् । जाति[11]स्मरस्तु नियमतः सङ्ख्येयानिति । शेषं स्पष्टम् । अत्र [12]च सहसम्मत्यादिपरिज्ञाने सुखप्रतिपत्त्यर्थं त्रयो दृष्टान्ताः प्रदर्श्यन्ते, तद्यथा—

वसन्तपुरे नगरे **जितशत्रू** राजा । **धारिणी** महादेवी । तयो**र्धर्मरुच्य**भिधानः सुतः । स च राजाऽन्यदा तापसत्वेन प्रव्रजितुमिच्छु**र्धर्मरुचिं** राज्ये स्थापयितु-मुद्यतः । तेन च जननी पृष्टा—किमिति तातो [13]राज्यश्रियं त्यजति ? तयोक्तम्किमनया चपलया नारकादिसकलदुःखहेतुभूतया स्वर्गा-ऽपवर्गमार्गार्गलयाऽवश्यमपायिन्या परमार्थत इहलोकेऽप्यभिमानमात्रफल[14]या ? अतो विहायैनां सकलसुख[15]साधकं धर्मं कर्तुमुद्यतः । **धर्मरुचि**[16]स्तमाकर्ण्योक्तवान्—यद्येवं किमहं तातस्यानिष्टो येनैवम्भूतां सकलदोषा[17]श्रयिणीं मयि नियोजयति, सकलकल्याणहेतोर्धर्मात् प्रच्यावयति ? इत्यभिधाय पित्रानुज्ञातस्तेन सह

---

१. **ज्ञापकः** कपुस्तकमृते । २. **तत्प्रतिज्ञा०** ख । ३. **०नेनाधिकृ०** ख । ४. **०थिव्य[ प्? ]काया०** क । ५. **सम्मइए** ग, **समुइए** घ, **सम्मए** ङ **समइए** च । ६. **०त्र च जा०** क । ७. **मनि ज्ञाने** ग, **मनं ज्ञाने** ङ । ८. **०लज्ञान-जाति०** च । ९. **०ङ्ख्येयांश्च भवा०** घ ङ च । १०. **केवली तु** ख ग । ११. **०स्मरणस्तु** क-खप्रतिभ्यामृते । १२. **च सम्म०** ख । १३. **राज्यं त्यज०** च । १४. **०या इत्यतो** ख ग ङ । १५. **०साधनं** ग । १६. **०स्तथाक०** ग ङ **०स्तदाक०** च । १७. **०श्रयणीं** ग ङ, **०श्रयणीयां मयि** च ।

तापसाश्रममगात् । तत्र च [१]सकलां तापसक्रियां यथोक्तां पालयन्नास्ते । अन्यदा[२] चामावास्यायाः [३]पूर्वेऽह्नि एकेन तापसेनोद्घुष्टम्, [४]यथा—भो भोः तापसाः ! श्वोऽनाकुट्टिर्भविता[५], तदद्यैव कुश-कुसुम-समित्-[६]कन्द-फल-मूलाद्याहरणं कुरुत[७] इति । [८]एतच्चाकर्ण्य **धर्मरुचि**ना जनकः पृष्टः—तात ! केयमनाकुट्टिर्नाम ? तेनोक्तम्—[१०]पुत्र ! लतादीनामच्छेदनं [अनाकुट्टिः, आकुट्टिस्तु छेदनम्,] तद्धि अमावास्यादिके विशिष्टे पर्वदिवसे न [११]वर्तते, सावद्यत्वात् छेदनादिक्रियायाः । श्रुत्वा चैतदसावचिन्तयत्—यदि पुनः [१२]सर्वदाऽनाकुट्टिः स्याच्छोभनं भवेत् । एव[१३]मध्यवसायिनस्त[१४]स्यामावास्यायां [१५]तपोवनासन्नप[१६]थेन गच्छतां साधूनां दर्शनमभूत् । ते च तेनाभिहिताः—किमद्य भवतामनाकुट्टि[१७]र्न जाता, येनाटवीं प्रस्थिताः ? [१८]तैरभिहितं यथा—अस्माकं यावज्जी[१९]वमेवानाकुट्टिः इत्यभिधायातिक्रान्ताः साधवः । तस्य च तदाकर्ण्येहापोहविमर्शेन जातिस्मरणमुत्पन्नं यथा—अहं जन्मान्तरे प्रव्रज्यां कृत्वा देवलोकसुखमनुभूयेहागत इति । एवं तेन विशिष्टदिगागमनं स्वमत्या जातिस्मरणरूप[२०]या ज्ञातम्, प्रत्येकबुद्धश्च जातः । एवमन्येऽपि **वल्कलचीरि**-**श्रेयांस**प्रभृतयोऽत्र योज्या इति ।

परव्याकरणे त्विदमुदाहरणम्—**गौतमस्वामिना** भगवान् **वर्धमानस्वामी** पृष्टः—भगवन् ! किमिति मे के[२१]वलज्ञानं नोत्पद्यते ? भगवता [२२]व्याकृत[२३]म्—गौतम ! भवतोऽतीव ममोपरि स्नेहोऽस्ति तद्वशात् । तेनो[२४]क्तम्—भगवन् ! एवमेतत्, किंनिमित्तः पुनरसौ मम भगवदुपरि स्नेहः ? ततो भगवता तस्य बहुषु भवान्तरेषु पूर्वसम्बन्धः समावेदितः—चिर[२५]संसिद्धोऽसि मे गोयमा ! चिरपरिचिओऽसि मे

---

१. **सकलास्तापसक्रिया यथोक्ताः पा०** ग ङ । २. **०दाऽमा०** ग ङ । ३. **पूर्वाह्ने ए०** ख, **पूर्वाह्णे केनचित् ताप०** ग ङ । ४. **०था भोः ता०** ख ग । ५. **०ता अतोऽद्यैव समित्-कुश-कन्द-फलाद्या०** ख, **०ता अतोऽद्यैव समित्-कुसुम-कुश-कन्दफल-मूलाद्या०** ग ङ । ६. **०न्द-मूल-फलाद्या०** घ च । ७. **०त । एत०** ग ङ । ८. **एतच्च धर्म०** ख च । ९. **०ट्टिरिति ? तेनो०** ख ग । १०. **पुत्र ! कन्दफलादीना०** ग । ११. **वर्तत इति साव०** ख । १२. **सर्वथाऽना०** च । १३. **०मव्यवसा०** क । १४. **०स्याममावा०** क । १५. **तपोधना०** ख ग । १६. **०थेनागच्छ०** क । १७. **०र्न मञ्जाता** ख ग । १८. **तैरप्यभि०** ख ग । १९. **०वमना०** कप्रत्या विना । २०. **०या विज्ञा०** ग च । २१. **०वलं ज्ञा०** घ ङ । २२. **व्याहृतम्** च । २३. **०म्-भो गौ०** कपुस्तकादिना । २४. **०क्तम्-किंनिमि०** ख । २५. **०संसृष्टो०** ख ।

**गोयमा** ! [ ] इत्येवमादि । तच्च तीर्थकृ[१]त्प्रतिपादितमाकर्ण्य **गौतमस्वामिनो** विशिष्टदिगागमनादिविज्ञानमभूदिति ।

अन्यश्रवणे त्विदमुदाहरणम्—**मल्लिस्वामि[२]न्या** षण्णां राजपुत्राणामुद्वाहार्थमागतानामवधिज्ञानेन तत्प्रति[३]बोधनार्थं यथा जन्मान्तरे सहितैरेव प्रव्रज्या कृता यथा च तत्फलं देवलोके **जयन्ता[४]**भिधाने विमानेऽनुभूतं तथाऽऽख्यातम् । तच्चाकर्ण्य ते लघुकर्मत्वात् प्रतिबुद्धा विशिष्टदिगागम[५]नविज्ञानं च सञ्जातम् । उक्तं च—

**किं थ[६] तयं पम्हुट्ठं जं च तया भो जयंतपवरम्मि ।**
**वुत्था समयनिबद्धं देवा तं संभरह जा[७]तिं ॥** [ ज्ञाताधर्मकथा ]

इति गा[८]थात्रयतात्पर्यार्थः ॥ साम्प्रतं प्रकृतमनुश्रियते-यो हि सोऽहम् इत्यनेनाहङ्कारज्ञानेनात्मोल्लेखेन पू[९]र्वादेर्दिश आगतमात्मानमविच्छिन्नसन्ततिपतितं द्रव्यार्थतया नित्यं पर्यायार्थत[१०]या त्वनित्यं जानाति स पर[११]मार्थत आत्मवादीति **सूत्रकृद्** दर्शयति—

## [ सू० ३ ] से आयावादी [१२]लोयावादी कम्मावादी किरिया[१३]वादि त्ति ।

स इति यो भ्रान्तः पूर्वं नारक-तिर्य[१४]ग्-मनुष्या-ऽमराद्यासु भावदिक्षु पूर्वाद्यासु च प्रज्ञापकदिक्षु अक्षणिका-ऽमूर्तादिगुणोपेतमा[१५]त्मानं वेत्ति **स** एवम्भूतः आत्मवादी इति आत्मानं वदितुं शीलमस्येति । यः पुनरेवम्भूतमात्मानं नाभ्युपगच्छ[१६]ति सोऽनात्मवादी नास्तिक इत्यर्थः । योऽपि सर्वव्यापिनं नित्यं क्षणिकं वाऽऽत्मानमभ्युपैति सोऽप्यनात्मवाद्येव, यतः सर्वव्यापिनो निष्क्रियत्वाद् भवा[१७]न्तरसङ्क्रान्तिर्न स्यात् , सर्वथा नित्य[१८]त्वेऽपि **अप्रच्युतानुत्पन्नस्थिरैकस्वभावं**

१. ०कृद्व्याकरणमाक० ख ग । २. ०मिना ष० कआदर्शाहते । ३. ०बोधार्थं ख । ४. भिधानेऽनु० क ङ, ०भिधविमा० ख, ०भिधानविमा० ग । ५. ०नज्ञानं ख । ६. च ग घ च । ७. जाई च । ८. ०थातात्प० घ ङ । ९. पूर्वाद्या दिश ख । १०. ०या अनि० च । ११. ०मार्थेनाऽऽत्म० ख, ०मार्थतयाऽऽत्म० च । १२. लोयवादी कम्मवादी ख । १३. ०वादीति ख च, ०वादी त्ति ग घ ङ । १४. ०ग्-नरा-ऽम० कपुस्तकेन विना । १५. ०त्मानमवैति स ग घ ङ च । १६. ०ति स नात्म० घ ङ । १७. ०न्तरे स० ङ । १८. ०त्वे अप्र० क ।

**नित्यम्** [  ] इति कृत्वा मरणाभावेन भवान्तरसङ्क्रान्तिरेव[1] न स्यात्, सर्वथा क्षणिकत्वेऽपि[2] निर्मूलविनाशात् सोऽहम् इत्यनेन पूर्वोत्तरानुसन्धानं न स्यात् । य एव चात्मवादी स एव परमार्थतो लोकवादी, यतो लोकयतीति लोकः प्राणिगणस्तं वदितुं शीलमस्येति । अनेन चात्माद्वैतवादिनिरासेनात्मबहुत्वमुक्तम्[3] । यदि वा लोकापाती[4], लोकः चतुर्दशरज्ज्वात्मकः प्राणिगणो वा, तत्रापतितुं शीलमस्येति । अनेन[5] च विशिष्टाकाशखण्डस्य[6] लोकसंज्ञाऽऽवेदिता[7] । तत्र[8] च जीवास्तिकायस्य सम्भवेन जीवानां गमना-ऽऽगमनमावेदितं भवति । य एव[9] च दिगादिगमनपरिज्ञानेनात्मवादी लोकवादी च संवृत्तः स एवासुमान् कर्मवादी, कर्म ज्ञानावरणीयादि तद्वदितुं शीलमस्येति[10], यतो हि प्राणिनो मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगैः पूर्वं गत्यादियोग्यानि कर्माण्याददते पश्चात् तासु तासु विरूपरूपासु योनिषूत्पद्यन्ते । कर्म[11] च प्रकृति-स्थित्य-ऽनुभाव-प्रदेशा-त्मकमवसेयमिति । अनेन च काल[12]-यदृच्छा[13]-ऽऽत्म-नियती-श्वरादिवादिनो निरस्ता द्रष्टव्याः । तथा य एव कर्मवादी स एव क्रियावादी, यतः कर्म योगनिमित्तं बध्यते, योगश्च व्यापारः, स च क्रियारूपः । अतः कर्मणः कार्यभूतस्य वदनात्[14] तत्कारणभूतायाः क्रियाया[15] अप्यसावेव परमार्थतो वादीति । क्रियायाश्च कर्मनिमित्तत्वं प्रसिद्ध**मागमे**, स चाय**मागमः**—

**जाव णं भंते एस[16] ज्जीवे सया समियं[17] एयइ वेयइ चलइ फंदइ[18] कंदइ तिप्पति जाव तं तं भावं परिणमति ताव णं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एगविहबंधए वा, नो[19] णं अबंधए** [] त्ति।

एवं च कृत्वा य एव कर्मवादी स एव क्रियावादीति । अनेन च

---

१. ०न्तिरपि न ख । २. क्षणविनाशेऽपि निर्मूलत्वात् सोऽहं० क । ३. ०तनिरा० ख। ४. ०ती लोकयतीति लोकः च० ख, ०तीति लोकः ग । ५. ०न विशि० ख । ६. ०ण्डकस्य च, ०ण्डलोक० क । ७. ०ज्ञा निवे० ख । ८. तत्र जी० ख । ९. एव दि० ख। १०. ०मस्य यतो क-खआदर्शावृते । ११. कर्म प्रकृ० ङ। १२. काल-नियति-यदृच्छा-ईश्वरा-ऽऽत्मवादिनो ख । १३. ०च्छा-नियतीश्वरा-ऽऽत्मवादिनो ग घ ङ च । १४. ०त् कार० क । १५. ०य असा० क । १६. एस जीवे कप्रतेर्विना । १७. ''समियमिति यावज्जीवम्'' जे०वि०प० । १८. फंदइ तिप्पइ कंपइ जीवो जं जं भावं ख, फंदइ तिप्पति जीवो तं तं ग, फंदइ घट्टइ तिप्पति जीवो तं तं घ ङ च । १९. नो उ णं क ।

साङ्‌ख्याभिमतमात्मनोऽक्रियावादित्वं निरस्तं भवति ॥छ॥

साम्प्रतं पूर्वोक्तां क्रियामात्मपरिणतिरूपां विशिष्टकालाभिधायिना तिङ्प्रत्ययेनाभिदधद् अहंप्रत्ययसाध्यस्यात्मनस्तद्भव एवावधि-मनःपर्याय-केवलज्ञान-जातिस्मरणव्यतिरेकेणैव त्रिकाल[1]संस्पर्शिना मतिज्ञानेन सद्भावा[2]वगमं दर्शयितुमाह—

**[ सू०४ ] अ[3]करिसुं च[4] हं कारा[5]विसुं च[6] हं करओ या[7]वि समणुण्णे भविस्सामि** त्ति

इह भूत-वर्तमान-भविष्यत्कालापेक्षया कृत-कारिता-ऽनुमतिभिर्नव विकल्पाः सम्भवन्ति, ते चामी—अहमकार्षम् अचीकरमहं कुर्वन्तमन्यमन्वज्ञासिषमहम् करोमि कारयाम्यनुजानाम्यहमिति करिष्याम्यहं कारयिष्याम्यहं कुर्वन्तमन्यमनुज्ञास्याम्यहमिति । एतेषां च मध्ये आद्यन्तौ सूत्रेणैवोपात्तौ, तदुपादानाच्च तन्मध्यपातिनां सर्वेषां ग्रहणम् । अस्यैवार्थस्याविष्करणाय द्वितीयो विकल्पः **का[8]रावेसुं च** हमिति सू[9]त्रेणैवोपात्तः । एते च चकार[10]द्वयोपादानाद् अपिशब्दोपादा[11]नाच्च मनो-वाक्-कायैश्चिन्त्यमानाः सप्तविंश[12]तिर्भेदा भवन्ति । अयमत्र भावार्थः—अकार्षमहमित्यत्राहमित्यनेनात्मोल्लेखिना विशिष्टक्रिया-परिणतिरूप आत्माऽभिहितः । ततश्चायं भावार्थो भवति—स एवा[13]हं येन मयाऽस्य देहादेः पू[14]र्वं यौवनावस्थायामिन्द्रियवशगेन [15]विषयविषमोहितान्धचेतसा तत्तदकार्यानुष्ठानपरायणे[16]नाऽऽनुकूल्यमनुष्ठितम्, उक्तं च—

**विहवावले[17]वनडिएहिं जाइं कीरंति जोव्वणमएण ।**
**वयपरिणामे स[18]रियाइं ताइं हियए ख[19]डुक्कंति ॥** [ ]

---

१. ०लस्प० ग । २. **०वागमनं द०** ख ग च । ३. **०करिंसु** ख, **०करिस्सं** ग घ ङ च । ४-६. **व हं** ग घ, **च अहं** च । ५. **०राविंसु चाहं करओ चावि** ख, **०रावेस** च घ, **०रावेसं च** ङ च । ७. **आवि** ग घ ङ च । ८. **०राविंसु चाहमिति** ख **०रावेसं च** च, **०वेसु** च घ, **वेसुं चाहं** ग । ९. **सूत्रेणोपात्तः** क-खप्रती ऋते । १०. **द्वया-ऽपिश०** ख । ११. **०नाद् मनो०** क ख च । १२. **०तिभेदा** ख ग । १३. **०हं मया** च । १४. **पूर्वयौ०** क घ । १५. **विषमोहि०** ग, **विषयमोहि०** च । १६. **०नानुष्ठि०** घ । १७. **०वभरिएहिं** ख । १८. **भरियाइं** ख, **वरियाइं** ग । १९. **खुडक्कंति** ख, **खडुक्कंति** ङ ।

तथा अचीकरमहम् इत्यनेन[1] परोऽकार्यादौ[2] प्रवर्तमानो मया प्रवृत्तिं कारितः, तथा कुर्वन्तमन्यमनुज्ञातवानित्येवं[3] कृत-कारिता-ऽनुमतिभिर्भूतकालाभिधानम् । तथा करोमीत्यादिना वचनत्रिकेण वर्तमानकालोल्लेखः[4] । तथा करिष्यामि कारयिष्यामि कुर्वतोऽन्यान् प्रति समनुज्ञः[5] अनुज्ञापरायणो भविष्यामीत्य-नागतकालोल्लेखः । अनेन च कालत्रयसंस्पर्शेन[6] देहेन्द्रियातिरिक्तस्यात्मनो भूत-वर्तमान-भविष्यत्कालपरिणतिरूपस्यास्तित्वावगतिरावेदिता भवति। सा च नैकान्तक्षणिकनित्यवादिनां[7] सम्भवतीत्यतोऽनेन ते निरस्ताः, क्रियापरिणामेनात्मनः परिणामित्वाभ्युपगमादिति एतदनुसारेणैव सम्भवानुमानादतीता-ऽनागतयोरपि[8] भवयोरात्मास्तित्वमवसेयम् । यदि वा अनेन क्रियाप्रबन्धप्रतिपादनेन कर्मण उपादानभूतायाः क्रियायाः[9] स्वरूपमावेदितमिति । अथ किमेतावत्य एव क्रियाः उतान्या अपि सन्ति ? इति, एतावत्य[10] एवेत्याह—

## [ सू०५ ] एयावंति सव्वावंति लोगंसि कम्मसमारंभा परिजाणितव्वा भवंति ।

**एयावंती**त्यादि । एतावन्तः सर्वेऽपि लोके प्राणिसङ्घाते कर्मसमारम्भाः क्रियाविशेषा ये प्रागुक्ताः अतीता-ऽनागत-वर्तमानभेदेन कृत-कारिता-ऽनुमतिभिश्च, अशेषक्रियानुयायिना च करोतिना सर्वेषां सङ्ग्रहादिति एतावन्त एव परिज्ञातव्या भवन्ति, नान्य इति । परिज्ञा च ज्ञ-प्रत्याख्यानभेदाद् द्विधा । तत्र ज्ञपरिज्ञयाऽऽत्मनो बन्धस्य चास्तित्वमेतावद्भिरेव सर्वैः कर्मसमारम्भैर्ज्ञातं भवति । प्रत्याख्यानपरिज्ञया च सर्वे पापोपादानहेतवः कर्मसमारम्भाः प्रत्याख्यातव्या इति । इयता सामान्येन जीवास्तित्वं प्रसाधितम् । अधुना तस्यैवात्मनो दिगादि-भ्रमण[11]हेतूप[12]प्रदर्शनपुरस्सरमपायान् प्रदर्शितुमाह । यदि वा यस्तावदात्म-कर्मादिवादी स दिगादि[13]भ्रमणान्मोक्ष्यते, इतरस्य तु विपाकान्[14] दर्शयितुमाह—

---

१. **इति परो०** क । २. **०दौ प्रवृत्तमा०** क, **०दौ वर्त०** घ । ३. **०निति भू( कृ )त०** क । ४. **०मानाका०** घ ङ । ५. **समनुज्ञापरा०** क ग ङ, **समनुज्ञानपरा०** ख । ६. **यस्प०** ख । ७. **०न्तनित्यक्षणिकवा०** ख । ८. **०पि कालयो०** ख । ९. **०याः सम्प्रदानमावे०** च । १०. **एता एवे०** ङ । ११. **०मणे हे०** च । १२. **०पदर्श०** ग ङ च । १३. **०गादिपरिभ्र०** ग च । १४. **०न् प्रदर्श०** ख घ ङ ।

**[ सू०६ ] अपरिण्णायकम्मे खलु अयं पुरिसे जो इमाओ दिसाओ वा अणुदिसाओ वा अणुसंचरति सव्वाओ दिसाओ सव्वाओ अणुदिसाओ सहेति, अणेगरूवाओ जोणीओ संधेति, विरूवरूवे फासे पडिसंवेदयति ।**

**अपरिन्नाए**[1] इत्यादि । यो[2]ऽयं पुरि शयनात्, पूर्णः सुख-दुःखानां वा पुरुषः जन्तुर्मनुष्यो वा, प्राधान्याच्च पुरुषस्योपादानम्, उपलक्षणं चैतत्, सर्वोऽपि चतुर्गत्यापन्नः प्राणी गृह्यते, दिशोऽनुदिशो वाऽनुसञ्चरति, स[3]ः **अपरिज्ञातकर्मा** अपरिज्ञातं कर्मानेनेत्यपरिज्ञातकर्मा, **खलुः** अवधारणे अपरिज्ञातकर्मैव दिगादौ भ्राम्यति नेतर इति, उपलक्षणं चैतत्, अपरिज्ञातात्माऽपरिज्ञातक्रिय[4]श्चेति, यश्चापरिज्ञातकर्मा स सर्वा दिशः सर्वाश्चानुदिशः **सहैति**[5] स्वयंकृतेन कर्मणा सहानुसञ्चरति, सर्वग्रहणं सर्वासां प्रज्ञापकदिशां भावदिशां चोपसङ्ग्रहार्थम् ।

स यदाप्नोति तद् दर्शयति—**अणेगरू[6]याओ जोणीओ संधेइ** त्ति । अनेकं सङ्कट-विकटादिकं रूपं यासां ताः तथा यौति मिश्रीभवति औदारिकादिशरीरवर्गणापुद्गलैरसुमान् यासु ता योनयः प्राणिनामुत्पत्तिस्थानानि । अनेक[7]रूपत्वं चासां संवृत-विवृतोभय-शीतोष्णोभयरूपतया । यदि वा चतुरशी[8]तियोनिलक्षभेदेन, ते चामी चतुरशी[9]तिलक्षाः—

**पुढवि जल जलण मारुय एक्केक्के सत्त[10] सत्त लक्खा उ ।**
**वण पत्तेय अणंते दस चोद्दस जोणिलक्खा उ ॥ [ ]**
**विगिलिंदिएसु दो दो चउरो चउरो य णारय-सुरेसु ।**
**तिरिएसु होंति चउरो चोद्दस लक्खा य मणुएसु ॥ [ ]**

तथा शुभा-ऽशुभभेदेन योनीनामनेक[11]रूपत्वं गाथाभिः प्रदर्श्यते—

---

१. ०न्नायए इत्या० ख, ०न्नाएत्या० च । २. सोऽयं क ख । ३. सोऽपरिज्ञातं क० ख । ४. ०यश्च । यश्चा० क । ५. सहेति घङआदर्शौ ऋते । ६. ०रूवाओ कप्रतिं विना । ७. ०कस्वरू० ङ । ८. ०तिलक्ष० घ ङ । ९. ०तिर्लक्षाः ग । १०. सत्त जोणिलक्खा उ ख । ११. ०कत्वं गा० ख ।

सीयादी जोणीओ चउरासीती य सयसह[1]स्सेहिं ।
असुहाओ य सुहाओ तत्थ सुहाओ इमा [2]जाण ॥ [ ]
अस्संखाउमणुस्सा राईसर संखमा[3]दियाऊणं ।
तित्थयरनामगोयं सव्वसुहं होइ नायव्वं ॥ [ ]
तत्थ वि य जातिसंपन्नयादि[5] सेसा उ हों[4]ति असुहाओ ।
देवेसु किब्बिसादी सेसाओ होंति [6]उ सुहाओ ॥ [ ]
पंचिंदियतिरिएसुं हय-गयर[7]यणा हवंति [8]उ सुहाओ ।
सेसाओ असुहा[9]ओ हवंति एगिंदियादीया ॥ [ ]
देविंद-चक्कवट्टित्तणाइं [10]मोत्तुं च तित्थयरभावं ।
अणगारभावि[11]या वि य सेसा [12]उ अणंतसो पत्ता ॥ [ ]

एताश्चानेकरूपा योनीर्दिगादिषु पर्यटन्नपरिज्ञातकर्माऽसुमान् **संधेई** त्ति सन्ध[13]यति सन्धिं करोत्यात्मना सहाविच्छेदेन [14]सङ्घटयतीत्यर्थः **संधावइ** त्ति वा पाठान्तर[15]म्, संधावति पौनःपुन्येन [16]तां गच्छतीत्यर्थः ।

तत्स[17]न्धाने च यदनुभवति तद् दर्शयति-**विरूपं** बीभत्सममनोज्ञं **रूपं** स्वरूपं येषां स्पर्शानां दुःखोपनिपातानां ते त[18]था, स्पर्शाश्रिता दुःखोपनिपाताः 'स्पर्शा' इत्युक्ताः, 'तात्स्थ्यात् तद्व्यपदेशः' इति कृत्वा । उपलक्षणं चैतद् मानस्योऽपि वेदना ग्राह्याः । अतस्तानेवम्भूतान् **स्पर्शान् प्रतिसंवेदयति** अनुभवति । प्रतिग्रहणात् प्रत्येकं शारीरान् मानसांश्च दुःखोपनिपाताननुभवतीत्युक्तं भवति । स्पर्शग्रहणं चेह सर्वसंसा[19]रान्तर्वर्तिजीवराशिसङ्ग्रहार्थम्, स्पर्शनेन्द्रियस्य सर्वजीवव्यापित्वात् । [20]अत्रेदमपि वक्तव्यम्—सर्वान् विरूपरूपान् रस-गन्ध-रूप-शब्दान् प्रतिसंवेदयतीति । विरूपरूपत्वं च स्पर्शानां कार्यभूतानां विचित्रकर्मोदयात् कारणभूताद् भवतीति वेदितव्यम्, विचित्रकर्मोदयाच्चा-

---

१. ०हस्साइं । ग । २. जाणे घ, जाणो च । ३. ०दिआऊणं ग घ ङ ०दिआयूणं च । ४. हुंति घ ङ । ५. हुंति च । ६, ८. य ग । ७. ०रयणे ग ङ । ९. ०ओ सुभवन्नेगिं० कआदर्शाद्विना । १०. मुत्तूण तित्थ० घ च । ११. ०या इ य मोत्तूणमणं० क । १२. य घ च । १३. ०यते ख । १४. सङ्घट्टय० ग । १५. ०म् पौनः० क ख । १६. तां क, वा घ ङ । १७. ०न्धानेन च ख घ ङ । १८. ०था दुःखो० ग । १९. ०रावर्ति० घ । २०. अत्रैतदपि ग ।

परिज्ञातकर्मा संसारी स्पर्शादीन् विरूपरूपांस्तेषु तेषु योन्यन्तरेषु विपाकतः परिसंवेदयति[1], आह च—

तैः कर्मभिः स जीवो विवशः संसारचक्रमुपयाति ।
द्रव्य-क्षेत्रा-ऽद्धा-भावभिन्नमावर्तते बहुशः ॥

नरकेषु देवयोनिषु तिर्यग्योनिषु च मनुजयोनिषु च ।
पर्यटति घटीयन्त्रवदात्मा बिभ्रच्छरीराणि ॥

सततानुबद्धमुक्तं[2] दुःखं नरकेषु तीव्रपरिणामम् ।
तिर्यक्षु भय-क्षुत्-तृड्-वधादिदुःखं सुखं चाल्पम् ॥

सुख-दुःखे मनुजानां मनः-शरीराश्रये बहुविकल्पे ।
सुखमेव हि देवानां दुःखं स्वल्पं च[3] मनसि भवम् ॥

कर्मानुभावदुःखित एवं मोहान्धकारगहनवति ।
अन्ध इव दुर्गमार्गे भ्रमति हि संसारकान्तारे ॥

दुःखप्रतिक्रियार्थं सुखाभिलाषाच्च[4] पुनरपि तु जीवः ।
प्राणिवधादीन्[5] दोषानधितिष्ठति मोहसम्पन्नः[6] ॥

बध्नाति ततो बहुविधमन्यत् पुनरपि नवं सुबहु कर्म ।
तेनाथ पच्यते पुनरग्नेरग्निं प्रविश्येव ॥

एवं कर्माणि पुनः पुनः स बध्नंस्तथैव मुञ्चंश्च ।
सुखकामो बहुदुःखं संसारमनादिकं भ्रमति ॥

एवं भ्रमतः संसारसागरे दुर्लभं मनुष्यत्वम् ।
संसारमहत्त्वा[7]-ऽधार्मिकत्व-दुष्कर्मबाहुल्यैः[8] ॥

आर्यो देशः कुल-रूप-संपदा-ऽऽयुश्च दीर्घमारोग्यम् ।
यतिसंसर्गः श्रद्धा धर्मश्रवणं च मतितैक्ष्ण्यम् ॥ [ ]

एतानि दुर्लभानि प्राप्तवतोऽपि दृढमोहनीयस्य ।
कुपथाकुलेऽर्हदुक्तोऽतिदुर्लभो जगति[9] सन्मार्गः ॥ [ ]

यदि वा योऽयं पुरुषः सर्वा दिशोऽनुदिशश्चानुसञ्चरति तथाऽनेकरूपा योनीः सन्धावति विरूपरूपांश्च स्पर्शान् प्रतिसंवेदयति[10] सः **अविज्ञातकर्मा**

---

१. ०यतीति आह च ङ च । २. ०बन्धमु० च । ३. तु ख घ ङ । ४. ०षाय पु० ख । ५. प्राणव० कगपुस्तके ऋते । ६. ०सञ्छन्नः कप्रत्या विना । ७. ०रबहुत्वा० ख । ८. ०बाहल्यैः घ । ९. ०ति तन्मा० ख । १०. प्रतिवे० ख ।

अविज्ञातम् अविदितं कर्म क्रिया व्यापारो मनो-वाक्-कायलक्षणः अकार्षमहं करोमि करिष्यामीत्येवंरूपो जीवोपमर्दात्मकत्वेन बन्धहेतुः सावद्यो येन सोऽयम् । अविज्ञातकर्मा, अविज्ञातकर्मत्वेन च तत्र तत्र कर्मणि जीवोपमर्दादिके प्रवर्तते येन येनास्याष्टविधकर्मबन्धो भवति, तदुदयाच्चानेकरूपयोन्यनुसन्धानं विरूपरूप-स्पर्शानुभवश्च भवतीति । यद्येवं ततः किम् ? इत्यत आह–

**[सू०७] तत्थ खलु भगवता परिण्णा पवेदिता । इमस्स चेव जीवियस्स परिवंदण-माणण पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेतुं ।**

**तत्थे**त्यादि । **तत्र** कर्मणि व्यापारेऽकार्षमहं करोमि करिष्यामी[1]त्याद्यात्म-परिणतिस्वभावतया मनो-वाक्-कायव्यापाररूपे । **भगवता वीरवर्धमान-स्वामिना**। परिज्ञानं **परिज्ञा** । सा प्रकर्षेण प्रशस्ताऽऽदौ वा वेदिता प्रवेदिता । एतच्च **सुधर्मस्वामी** [2]**जम्बूस्वामि**नाम्ने कथयति । सा च [3]द्विधा–ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च । तत्र ज्ञपरिज्ञया 'सावद्यव्यापारेण बन्धो भवति' इत्येवं **भगवता परिज्ञा प्रवेदिता** । प्रत्याख्यानपरिज्ञया च सावद्ययोगा बन्धहेतवः प्रत्याख्ये[4]या एवंरूपा चेति । अमुमेवार्थं **निर्युक्तिकृदाह–**

**तत्थ अकारि करिस्सं ति बंधचिंता कया पुणो होइ ।**
**सह[5]सम्मुइया जाणइ कोई पुण हेउजुत्तीए** ॥६७॥ दारं ॥

**तत्थे**त्यादि । **तत्र** कर्मणि क्रियाविशेषे, किम्भूत इत्याह–**अकारि करिस्सं** ति, **अकारि** इति कृतवान्, **करिस्सं** ति करिष्यामीति । अनेनातीता-ऽनागतोपादानेन तन्मध्यवर्तिनो वर्तमानस्य कारिता-ऽनुमत्योश्चोपसङ्ग्रहाद् नवापि भेदा आत्मपरिणामत्वेन योगरूपा उपात्ता द्रष्टव्याः । तत्रानेनात्मपरिणामरूपेण क्रियाविशेषेण **बन्धचिन्ता कृता भवति** बन्धस्योपादानमुपात्तं भवति, **कर्म योगनिमित्तं बध्यते** [ ] इति वचनात् । एतच्च कश्चिज्जानाति आत्मना सह या

---

१. **०त्यात्म०** ग ङ । २. **जम्बूनाम्ने** कपुस्तकं विना । ३. **द्विविधा** च । ४. **०य इत्येवं** कप्रतिमृते । ५. **०सम्मइया** ठ, **०सम्मुयया** झ ।

सन्मतिः स्वमतिर्वा अवधि-मनःपर्याय-केवल-जातिस्मरणरूपा, तया जानाति, कश्चिच्च [१]पक्ष-धर्मा-ऽन्वय-व्यतिरेकलक्षणया हेतुयुक्त्येति ।

अथ किमर्थमसौ कटुकविपाकेषु कर्माश्र[२]वहेतुभूतेषु क्रियाविशेषेषु प्रवर्तते ? इत्याह—

**इमस्से**त्यादि । तत्र **जीवित**मिति जीव[३]न्त्यनेनायुःकर्मणेति **जीवितं** प्राणधारणम् । एतच्च प्रतिप्राणिस्वसंविदितमिति कृत्वा प्रत्यक्षासन्नवाचिना 'इद[४]मा' निर्दिशति । **च**शब्दो वक्ष्यमाणजात्यादिसमुच्चयार्थः । **एव**कारोऽवधारणे, अस्यैव जीवित[५]स्यार्थे परिफल्गुसारस्य तडिल्लताविलसितचञ्चलस्य बह्वपायस्य दीर्घसु[६]खार्थं क्रिया[७]सु प्रवर्तते, तथाहि—जीविष्याम्यहमरोगः, सुखेन भोगान् भोक्ष्ये, ततो व्याध्यपनयनार्थं स्नेहपान-लावकपिशितभक्षणादिषु क्रियासु प्रवर्तते, तथा[८]ल्पसुखकृतेऽभि[९]मानग्रहाकुलितचेता बह्वारम्भपरिग्रहाद् बह्व[१०]शुभं कर्मादत्ते, उक्तं च—

**द्वे वाससी प्रवरयोषिदपायशुद्धा,**<br>
**शय्याऽऽसनं करिवरस्तुरगो रथो वा ।**<br>
**काले भिषग् नियमिताशन-[११]पानवृत्तिः,**<br>
**राज्ञः पराक्यमिव सर्वमवैहि शेषम् ॥** [ ]

**तुष्ट्यर्थमन्नमिह यत् प्रणिधिप्र[१२]योग-**<br>
**सन्त्रासदोषकलुषो नृपतिस्तु भुङ्क्ते ।**<br>
**यद् निर्भयः प्रशमसौख्य[१३]रतिश्च भैक्ष्यम्,**<br>
**तत्स्वादुतां भृशमुपैति न पार्थिवान्नम्॥** [ ]

**भृत्येषु मन्त्रिषु सुतेषु मनोरमेषु,**<br>
**कान्तासु वा मधुमदाङ्कुरितेक्षणासु ।**<br>
**विश्रम्भमेति न कदाचिदपि क्षितीशः,**<br>
**सर्वाभिशङ्कितमतेः कतरत् तु सौख्यम् ?** ॥ [ ]

---

१. **पक्षद्वयधर्मा०** ग । २. **०वभूते०** घ च । ३. **०वत्यने०** च । ४. **०मा दिशति** च । ५. **०तव्यस्या०** क । ६. **०खार्थक्रि०** ग घ । ७. **०सु वर्त०** ख । ८. **०ल्पस्य सुखस्य कृ०** ख घ ङ; **०ल्पसुखस्य कृ०** ग । ९. **०मानाग्र०** क । १०. **०शुभक०** ख । ११. **०पानमात्रा, रा०** ग घ ङ; **०पानवृत्ति रा०** च । १२. **०योगैः स०** ग । १३. **०रतश्च** ग ।

तदेव[१]मनवबुद्धतरुण[२]किशलयपलाशचञ्चलजीवितरतयः कर्माश्रवेषु जीवितोपमर्दादिरूपेषु प्रवर्तन्ते । [३]तथाऽस्यैव जीवितस्य परिवन्दन-मानन-पूजनार्थं हिंसादिषु प्रवर्तन्ते । तत्र **परिवन्दनं** संस्तवः प्रशंसा, तदर्थमाचेष्टते, तथाहि—अहं मयूरादिपिशिताशनाद् बली तेजसा देदीप्यमानो देवकुमार [४]इव लोकानां प्रशंसास्पदं भविष्यामी[५]ति । **माननम्** अभ्युत्थाना-ऽऽसनदाना-ऽञ्जलि-प्रग्रहादिरूपम्, तदर्थं चाऽऽचेष्टमानः कर्माचिनोति । तथा **पूज[६]नं** द्रविण-वस्त्रा-ऽन्न-पान-सत्कार-प्रणामसेवाविशेषरूपम्, तदर्थं च प्रवर्तमानः क्रियासु कर्माश्रवैरात्मानं सम्भावयति, तथाहि—वीरभोग्या वसुन्धरा इति मत्वा पराक्रमते, दण्डभयाच्च सर्वाः प्रजा बिभ्यतीति दण्डयति, इत्येवं राज्ञाम्, अन्येषामपि यथासम्भवमायोजनीयम् । अत्र च वन्दनादीनां [७]द्वन्द्वसमासं कृत्वा तादर्थ्ये चतुर्थी विधेया । परिवन्दन-मानन-पूजनाय जीवितस्य कर्माश्रवे[८]षु प्र[९]वर्तन्त इति समुदायार्थः । न केवलं परिवन्दनाद्यर्थमेव कर्मादत्ते, अन्यार्थमप्यादत्त इति दर्शयति—जातिश्च मरणं च मोचनं च **जाति-मरण-मोचन**मिति समाहारद्वन्द्वात् तादर्थ्ये चतुर्थी, एतदर्थं [१०]च क्रियासु प्रवर्तमानाः प्राणिनः कर्माददते । [११]तत्र जात्यर्थं **क्रौ[१२]ञ्चारि**वन्दनादिकाः क्रिया विधत्ते, तथा यान् यान् कामान् [१३]ब्राह्मणादिभ्यो ददाति तांस्तानन्यजन्मनि पुनर्जातो भोक्ष्यते, तथा **मनु**नाऽप्युक्तम्—

**वारिदस्तृप्तिमाप्नोति, सुखमक्षयमन्नदः ।**
**तिलप्रदः प्रजामिष्टामायुष्कमभयप्रदः ॥ [ ]**

अत्र चैकमेव सुभाषितम् **अभयप्रदान**मिति तुषमध्ये कणिकावदिति । एवमादिकुमार्गोपदेशाद् हिंसादौ प्रवृत्तिं विदधाति । तथा मरणार्थम[१४]पि पितृपिण्डदाना[१५]दिषु क्रियासु प्रवर्तते, यदि वा ममाऽनेन सम्बन्धी व्यापादितस्तस्य वैरनिर्यातनार्थं वध-बन्धादौ प्रवर्तते, यदि वा मरणनिवृत्त्यर्थमात्मनो

---

१. ०मनुबद्धत० क । २. **०किसल०** कगप्रतिभ्यामृते । ३. **०तथास्यापि जी०** ख । ४. **इव प्रशंसास्पदं लोकानां भवि०** ख । ५. **०ति । तथा मान०** ख । ६. **०नं पूजा द्रवि०** ख । ७. **द्वन्द्वं स०** ख । ८. **०षु वर्त०** क । ९. **वर्तंत** ग ङ विना । १०. **च प्राणिनः क्रियासु प्रवर्तमानाः कर्मा०** कप्रत्या विना । ११. तत्र इति नास्ति खपुस्तके । १२. **०ञ्चादिव०** ग । १३. **ब्राह्मणेभ्यो** च । १४. **०पि पिण्ड०** ख । १५. **०दिक्रिया०** ङ ।

दुर्गाद्युपयाचितमजादिना[1] विधत्ते **यशोधर**[2] इव पिष्टमय[3]कुर्कुटेन[4] । तथा मोक्षाया[5]ऽज्ञानावृतचेतसः पञ्चाग्नितपोऽनुष्ठानादि[6]षु प्राण्युपमर्दकारिषु प्रवर्तमानाः कर्मादददते, यदि वा जाति-मरणयोर्विमोचनाय[7] हिंसादिकाः क्रियाः [8]कुर्वन्ति । **जाइ-मरण-भोयणाए**[9] त्ति [10]वा पाठान्तरम्, तत्र भोजनार्थं कृष्यादिकर्मसु प्रवर्तमाना वसुधा-जल-ज्वलन-पवन-वनस्पति-द्वि-त्रि-चतुः-पञ्चेन्द्रिय-व्यापत्तये व्याप्रियन्त इति । तथा दुःखप्रतिघातमुररीकृत्यात्मपरित्राणार्थ*मारम्भमासेवन्ते, तथाहि—व्याधिवेदनार्ता लावकपिशित*-मदिराद्यासेवन्ते, तथा वनस्पतिमूल-त्वक्-पत्र-निर्यासादि[11]सिद्धशतपाकादितैलार्थमग्न्यादिसमारम्भेण पापं [12]कुर्वन्ति स्वतः, कारयन्त्यन्यैः, कुर्वतोऽन्यान् समनुजानत इत्येवमतीताऽनागतकालयोरपि मनो-वाक्-[13]काययोगैः कर्मादानं विदधतीत्यायोजनीयम् । तथा दुःखप्रतिघातार्थमेव सुखोत्पत्त्यर्थं च कलत्र-पुत्र-गृहो[14]पस्कराद्याददते, तल्लाभपालनार्थं[15] च तासु तासु क्रियासु प्रवर्तमानाः पापकर्माऽऽसेवन्ते[16] इति, उक्तं च—

**आदौ प्रतिष्ठाऽधिगमे प्रयासो दारेषु पश्चाद् गृहिणः सुतेषु ।**
**कर्तुं पुनस्तेषु गुणप्रकर्षं चेष्टा तदुच्चैःपदलङ्घनाय ॥** [ ]

तदेवम्भूतैः क्रियाविशेषैः कर्मोपादाय नानादिक्ष्वनुसञ्चरन्ति, अनेकरूपासु च योनिषु सन्धावन्ति, विरूपरूपांश्च स्पर्शान्[17] प्रतिसंवेदयन्ति[18] इत्येतद् ज्ञात्वा क्रियाविशेषनिवृत्तिर्विधेया[19] ।

एतावन्त [20]एव क्रियाविशेषा इति दर्शयितुमाह—

## [ सू०८ ] एतावंति सव्वावंति लोगंसि कम्मसमारंभा परिजाणियव्वा भवंति ।

---

१. ०**ना बलिं वि**० क-खप्रतिभ्यामृते । २. "**यशोधर इव** इति समरादित्यकथायां यशोधरो राजा" जै०वि०पा० । ३. **पिष्टकु**० ख । ४. ०**कुर्कुटेन** ग घ । ५. **मोक्षार्थमज्ञा**० ख, **मुक्त्यर्थमज्ञा**० ग घ ङ च । ६. ०**दिकेषु** कखपुस्तके विना । ७. ०**ना हिं**० ख । ८. **कुर्वते** कप्रतेर्विना । ९. ०**ए इति वा** ख । १०. **वा** इति न वर्तते कगङप्रत्यादर्शेषु । ११. "**सिद्ध** इति सिद्धार्थं कृतम्" जै०वि०प० । १२. **कुर्वते** ख । १३. ०**कायैः कर्मा**० क । १४. ०**पस्कारा**० ग ङ । १५. ०**र्थं तासु** क । १६. ०**न्ते** । **उक्तं** ख । १७. ०**न् संवे**० क । १८. ०**न्ति । एवं ज्ञात्वा** ख । १९. ०**धेयेति । एता**० कपुस्तकाद्विना । २०. **एव च क्रि**० खघप्रतिभ्यामृते ।

[१]**एतावंती**त्यादि । **एयावंती सव्वावंती** इति एतौ शब्दौ मागधदेशीभाषाप्रसिद्ध्या[२] एतावन्तः सर्वेऽपीत्येतत्पर्यायौ । एतावन्त एव सर्वस्मिन् लोके धर्मा-ऽधर्मास्तिकायावच्छिन्ने नभःखण्डे ये पूर्वं प्रतिपादिताः कर्मसमारम्भाः क्रियाविशेषाः, नैतेभ्योऽधिकाः केचन सन्तीत्येवं परिज्ञातव्या भवन्ति । सर्वेषां पूर्वत्रोपादानादिति भावः, तथाहि—आत्म-परोभयैहिका-ऽऽमुष्मिका-ऽतीता-ऽनागत-वर्तमानकाल-कृत-कारिता-ऽनुमतिभिरारम्भाः क्रियन्ते, ते[३] च सर्वेऽपि प्रागुपात्ता यथासम्भवमायोज्या इति ।

एवं सामान्येन जीवास्तित्वं प्रसाध्य तदुपमर्दकारिणां च क्रियाविशेषाणां[४] बन्धहेतुत्वं प्रदर्श्योपसंहारद्वारेण विरतिं प्रतिपादयन्नाह—

## [ सू०९ ] जस्सेते लोगंसि कम्मसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ।

**जस्से**त्यादि । भगवान् समस्तवस्तुवेदी केवलज्ञानेन साक्षादुपलभ्यैवमाह—**यस्य** मुमुक्षोः **एते** पूर्वोक्ताः [५]**कर्मसमारम्भाः** क्रियाविशेषाः, कर्मणो वा ज्ञानावरणीयाद्यष्टप्रकारस्य[६] समारम्भाः उपादानहेतवः, ते च क्रियाविशेषा एव, **परि** समन्तात् **ज्ञाताः** परिच्छिन्नाः कर्मबन्धहेतुत्वेन **भवन्ति** । **हुः** अवधारणे । मनुते मन्यते वा जगतस्त्रिकालावस्थामिति **मुनिः** । **स** एव मुनिः ज्ञपरिज्ञया **परिज्ञात**-कर्मा प्रत्याख्यानपरिज्ञया च प्रत्याख्यातकर्मबन्धहेतुभूतसमस्तमनो[७]-वाक्-कायव्यापार इति । अनेन च मोक्षाङ्गभूते ज्ञान-क्रिये उपात्ते भवतः, न ह्याभ्यां विना मोक्षो भवति, यत उक्तम्—ज्ञान-**क्रियाभ्यां मोक्षः** [नाणकिरियाहिं मोक्खो विशेषाव०भा० ३] इति । **इति**शब्दः एतावानयमात्मपदार्थविचारः [८]कर्मबन्धहेतुविचारश्च सकलोद्देशकेन परिसमापित [९]इति प्रदर्शकः । यदि वा **इति** एतद् अहं **ब्रवी**[१०]**मि** यत् प्रागुक्तं यच्च वक्ष्ये तत् सर्वं भगवदन्तिके साक्षात् श्रुत्वेति ॥

**[११]प्रथमोद्देशकः [१२]समाप्तः ॥**

• • •

१. **एयावंती सव्वावंतीत्यादि एतौ** क । २. **०सिद्धौ ए०** ग । ३. **ते सर्वे** ख । ४. **०णां कर्मबन्ध०** ख । ५. **कर्मारम्भाः** क । ६. **०नाद्यावर०** घ च । ७. **०तमनो०** क । ८. **कर्मसम्बन्ध०** ख । ९. **इति । यदि** ख । १०. **०मि इति यत्** क, **०मि यच्च प्रा०** घ । ११. शस्त्रपरिज्ञायां प्रथमोद्देशकः समाप्त इति घ च, ..**०शक उक्तः** । ग ङ । १२. **समाप्त** इति कपुस्तके नास्ति ।

उक्तः प्रथमोद्देशकः । साम्प्रतं द्वितीयः प्रस्तूयते । [१]अस्य चायमभिसम्बन्धः—प्रथमोद्देशके सामान्येन जीवास्तित्वं प्रसाधितम् । इदानीं तस्यैवैकेन्द्रियादिपृथिव्याद्यस्तित्वप्रतिपिपादयिषयाऽऽह । यदि वा प्राक् परिज्ञातकर्मत्वं मुनित्वकारणमुपादेशि, यः पुनरपरिज्ञातकर्मत्वाद् मुनिर्न भवति विरतिं न प्रतिपद्यते स पृथिव्यादिषु बम्भ्रमीति । अथ क एते पृथिव्याद[२]यः ? इत्यतस्तद्विशेषास्ति[३]त्वज्ञापनार्थमिदमुपक्रम्यत इति ।

[४]अनेन सम्बन्धेनायातस्यास्योद्देशकस्य चत्वार्यनुयोगद्वारा[५]णि वाच्यानि यावन्नामनिष्पन्ने निक्षेपे पृथिव्युद्देशक इति । तत्रोद्देशकस्य निक्षे[६]पादिरन्यत्र प्रतिपादितत्वाद् नेह प्रदर्श्यते । पृथिव्यास्तु यद् निक्षेपादि सम्भवति तद् **निर्युक्तिकृद्** दर्शयितुमाह—

**पुढवीए निक्खेवो परूवणा लक्खणं परीमाणं ।**
**उवभोगो सत्थं वेयणा य वहणा [७]णिवित्ती य ॥६८॥**

[८]**पुढवीए** इत्यादि । प्राग् जीवोद्देशके जीवस्य प्ररूपणा किं न कृता ? इत्येतच्च नाशङ्कनीयम्, यतो जीवसामान्यस्य विशेषाधारत्वात्, विशेषस्य च पृथिव्यादिरूपत्वात् सामान्यजीवस्य चोपभोगादेरसम्भवात् पृथिव्यादिचर्चयैव त[९]स्य चिन्तितत्वादिति ।

तत्र पृथिव्या नामादिनिक्षेपो वक्तव्यः । प्ररूपणा सूक्ष्म-बादरादिभेदा । लक्षणं साकारा-ऽनाकारोपयोग-काययोगादिकम् । परिमाणं संवर्तितलोकप्रतरासङ्ख्येयभागमात्रादिकम् । उपभोगः शयना-ऽऽसन-चङ्क्रमणादिकः । शस्त्रं स्नेहा-ऽम्ल-क्षारा[१०]दि । वेदना स्वशरीराव्यक्तचेतनानु[११]रूपा सुख-दुःखानुभवस्वभावा । वधः कृत-कारिता-ऽनुमतिभिरुपमर्दनादिकः । निवृत्तिः अप्रमत्तस्य मनो-वाक्-कायगुप्त्याऽनुपमर्दादिकेति समासार्थः । व्यासार्थं तु

---

१. तस्य कप्रतिमृते । २. ०यः ? तद्वि० ख । ३. ०त्वप्रज्ञा० ग । ४. अनेनाभिसम्ब० कखप्रती ऋते । ५. ०णि भवन्ति या० क । ६. ०पादेरन्य० खपुस्तकं विना । ७. णिवत्ती ख ठ, णियत्ती ञ । ८. ०वीओ इ० ख, ०वीएत्यादि ङ च । ९. ०स्य चर्चितत्वा० ख । १०. ०दिकम् । वे० ख । ११. ०रूपसुख० ख ।

**निर्युक्तिकृद्** यथाक्रममाह—

**णामं ठवणा पुढवी ये[१] दव्वपुढवी य भावपुढवी य ।**
**एसो खलु पुढवीए निक्खेवो चउव्विहो होइ ॥६९॥**

**नाम**मित्यादि । स्पष्टा । नाम-स्थापने क्षुण्णत्वाद् अनादृत्याह—

**दव्वं सरीरभविओ भावेण[२] य होइ पुढविजीवो उ[३] ।**
**जो पुढविनामगोयं कम्मं वेतेति सो जीवो ॥७०॥** दारं ॥

**दव्व**मित्यादि । तत्र द्रव्यपृथिवी आगमतो नोआगमतश्च[४] । आगमतो ज्ञाता [५]तत्रानुपयुक्तः, नोआगमतस्तु[६] पृथिवीपदार्थज्ञस्य शरीरं जीवापेतम्, तथा पृथिवीपदार्थज्ञत्वेन भव्यः बालादिः, ताभ्यां विनिर्मुक्तो[७] द्रव्यपृथिवीजीवः एकभविको बद्धायुष्कोऽभिमुखनाम-गोत्रश्च । भावपृथिवीजीवः पुनर्यः पृथिवी-नामादिकर्मोदीर्णं[८] वेदयति । गतं निक्षेपद्वारम् । साम्प्रतं प्ररूपणाद्वारम्—

**दुविहा ये[९] पुढविजीवा सुहुमा तह बायरा य लोगम्मि ।**
**सुहुमा य सव्वलोए दो चेव य बायरविहाणा ॥७१॥**

**दुविहे**त्यादि । पृथिवीजीवा द्विविधाः[१०]—सूक्ष्मा बादराश्च । सूक्ष्म-नामकर्मोदयात् सूक्ष्माः, बादरनामकर्मोदयात्[११] तु बादराः । कर्मोदयजनिते एवैषां[१२] सूक्ष्म-बादरत्वे, न त्वापेक्षिके बदरा-ऽऽमलकयोरिव । तत्र सूक्ष्माः समुद्गक-[१३]पर्याप्तप्रक्षिप्तगन्धावयववत् सर्वलोकव्यापिनः । बादरास्तु मूलभेदाद् द्विधा[१४] इत्याह—

**दुविहा बायरपुढवी समासओ सण्हपुढवि खरपुढवी ।**
**सण्हा य पंचवण्णा[१५] खरा य छत्तीसइविहाणा ॥७२॥**

**दुविहा**[१६] इत्यादि । समासतः सङ्क्षेपाद् द्विविधा[१७] बादरपृथिवी—

१. छआदर्शं विना सर्वास्वपि प्रतिषु **य** इति नास्ति । २. **०वेणं होइ** झ ञ । ३. **य** क । ४. **०श्च । तत्र चागमतो ज्ञातानुप०** ख । ५. **तत्र चानुप०** ग घ ङ च । ६. **०मतः पृ०** ख । ७. **वियुक्तो** ञ । ८. **०र्मोदयं वे०** कखपुस्तके विना । ९. उ ठ । १०. **द्विधा** ञ । ११. **०याद्बाद०** ग । १२. **एवैतेषां** ख । १३. **०कपर्याप्तिप्र०** ख ञ, **०कप्रक्षि०** ग घ । १४. **द्विविधाः** कख-आदर्शावृते । १५. **०ण्णा अवरा छत्ती०** ठ । १६. **०विहेत्या०** घ ङ च । १७. **द्विधा** क ।

श्लक्ष्णबादरपृथिवी खरबादरपृथिवी च । तत्र श्लक्ष्णबादरपृथिवी कृष्ण-नील-लोहित-पीत-शुक्लभेदात् [१]पञ्चधा । इह [२]च गुणभेदाद् गुणिभेदोऽभ्युपगन्तव्यः । खरबादरपृथिव्यास्त्वन्येऽपि षट्त्रिंशद्विशेषभेदाः सम्भ[३]वन्तीति तानाह—

**पुढवी य सक्करा वालुगा य उवले सिला य लोणूसे ।**
**अय तंब तउय सीसय रुप्प सुवन्ने य वइरे य ॥७३॥**

**हरियाले [५]हिंगलोए मणोसिला सासगंजण पवाले ।**
**अब्भपडलऽब्भवालुय बायरकाए मणिविहाणा ॥७४॥**

**गोमेज्जए य रुयए अंके फलिहे य लोहियक्खे य ।**
**[६]चंदण गेरुय हंसग भुयमोय [७]मसारगल्ले य ॥७५॥**

---

१. श्रीमति **प्रज्ञापनोपाङ्गे** श्लक्ष्णबादरपृथिवीकायिकाः सप्तप्रकारा निरूपिताः, तद्यथा—"से किं तं सण्हबायरपुढविकाइया ? सण्हबायरपुढविकाइया सत्तविहा पन्नत्ता, तं जहा—किण्हमत्तिया १ नीलमत्तिया २ लोहियमत्तिया ३ हालिद्दमत्तिया ४ सुक्किलमत्तिया ५ पंडुमत्तिया ६ पणगमत्तिया ७ । से त्तं सण्हबादरपुढविकाइया ॥" (प्रज्ञा० प० २६ सू० १४) ॥ तथोत्त**राध्ययने**ष्वपि सप्तैव प्रकाराः समाख्याताः, तद्यथा—"सण्हा सत्तविहा तहिं ॥७१॥ किण्हा नीला य रुहिरा य, हालिद्दा सुक्किला तहा पंडु-पणगमट्टिया....॥७२॥ षट्त्रिंशत्तमे **जीवाजीवविभक्त्य**भिधानेऽध्ययने ॥ २. **च** इति गपुस्तके नास्ति । ३. **भगवति प्रज्ञापनोपाङ्गे** खरबादरपृथ्वीकायिकास्त्वनेकधा प्ररूपिताः, तद्यथा—"से किं तं खरबादरपुढविकाइया ? खरबादरपुढविकाइया अणेगविहा पण्णत्ता, तं जहा—

पुढवी य सक्करा वालुया य उवले सिला य लोणुसे ।
अय तंब तउय सीसय रुप्प सुवन्ने य वइरे य ॥१४॥१॥
हरियाले हिंगुलए मणोसिला सासगंजणपवाले ।
अब्भपडलऽब्भवालुय बायरकाए मणिविहाणा ॥८॥२॥
गोमेज्जए य रुयए अंके फलिहे य लोहियक्खे य ।
मरगयमसारगल्ले भुयमोयग इंदनीले य ॥९॥३॥
चंदण गेरुय हंसगब्भ पुलए सोगंधिए य बोधव्वे ।
चंदप्पभ वेरुलिए जलकंते सूरकंते य ॥९॥४॥

जे यावन्ने तहप्पगारा ।" (प्रज्ञा० प० २७ सू० १५) । ४. **०वन्ति । ता०** ख । ५. **हिंगुलुए** ठप्रतिमृते, हिंगुलए झ । ६. **मरकयमसारगल्ले भुयमोयग इंदनीले य ॥७५॥** ख ज, ....**इंदगले( ल्ले? ) य** ॥७५॥ झ । ७. **गसारवल्ले य** ज ।

**चंदप्पभ वेरुलिए जलकन्ते चेव सूरकन्ते य ।**
**एए [1]खरपुढवीए [2]नामा [3]छत्तीसइं [4]होंति ॥७६॥**

**पुढवी**त्यादि । **हरि[5]याले**त्यादि । **गो[6]मेज्जे**त्यादि । **चंद[7]प्पभे**त्यादि । गाथाश्चतस्रः । अत्र च प्रथमगाथया पृथिव्यादयश्चतुर्दश भेदाः परिगृहीताः द्वितीयगाथया त्वष्टौ हरितालादयः । तृती[8]यया दश गोमेदकादयः । तु[9]र्यया चत्वारश्चन्द्रकान्तादयः । अत्र च पूर्वगाथाद्वयेन सामान्य[10]पृथिवीभेदाः प्रदर्शिताः, उत्तरगाथाद्वयेन मणिभेदाः प्रदर्शि[11]ताः । स्पष्टत्वाद् न विवृताः ॥ एवं सूक्ष्म-बादरभेदान् प्रतिपाद्य पुनर्वर्णादिभेदेन पृथिवीभेदान् दर्शयितुमाह–

**वण्ण रस गंध फासे जोणिप्पमुहा भवंति संखेज्जा ।**
**णेगाइं सहस्साइं होंति विहाणम्मि एक्केक्के ॥७७॥**

**वन्न** इत्यादि । तत्र वर्णाः शुक्लादयः पञ्च, रसास्तिक्तादयः पञ्च, गन्धौ सुरभि-दुरभी, स्पर्शा मृदु-कर्कशादयोऽष्टौ । तत्र वर्णादिके एकैकस्मिन् *योनिप्रमुखाः योनिप्रभृतयः सङ्ख्येया भेदा भवन्ति । सङ्ख्येयस्यानेकरूपत्वाद्* विशिष्टसङ्ख्यार्थमाह–**अनेकानि सहस्राणि एकैकस्मिन्** वर्णादिके **विधाने** भेदे भवन्ति, योनितो गुणतश्च भेदानामिति । एतच्च सप्तयोनिलक्षप्रमाणत्वात् पृथिव्या एवं भावनीयमिति, उक्तं च **प्रज्ञापनायाम्**–

**तत्थ णं जे ते पज्जत्तगा एएसि णं वण्णाएसेणं गंधा[12]एसेणं रसा[13]एसेणं फासाएसेणं सहस्सग्गसो विहा[14]णाइं संखे[15]ज्जाइं जोणिप्पमुहसयसहस्सा[18]इं, पज्जत्त[16]यनीसाए अपज्जत्तया [17]वक्कमंति जत्थेगो तत्थ नियमा असंखेज्जा, से तं खरबायरपुढविकाइया ।** [प० २७ सू० १५]

---

१. **खलु पुढ०** क । २. **नामं** छ-झप्रती विना । ३. **०सयं** क ठ, **०स ते** ज । ४. होति झ ठ । ५. **०ताले इ०** ख ङ **०याल इ०** ग च, **०यालि इ०** घ । ६. **०मे इत्या०** ग, **०मेजे इ०** घ, **०मेज्ज इ०** च । ७. **०प्पभे इत्या०** ग ङ **०प्पभ इत्या०** घ च । ८. **०यगाथया** कप्रत्या विना । ९. **तुर्यगाथया** कप्रतेर्विना । १०. **०पृथ्वीभे०** च । ११. **०ताः । एते स्पष्टा इति कृत्वा न विवृताः** । कपुस्तकमृते । १२-१३. **०तेसेणं** ग । १४. **०णाति** च । १५. **०ज्जायं** ङ **०ज्जाति** ग च । १६. **०यणिस्साते** ङ । १७. "**वक्कमंति** इति उत्पद्यन्ते" जै०वि०प० । १८. **से त्तं** ख ग ।

इह च संवृतयोनय[1]: पृथिवीकायिका: । सा पुन: सचित्ता अचित्ता मिश्रा वा । तथा पुन[2]: शीता उष्णा शीतोष्णा वेत्येवमादिका द्रष्टव्येति । एतदेव भूयो **निर्युक्तिकृत्** स्पष्टतरमाह—

**वन्नम्मि य एक्केक्कं गंधम्मि रसम्मि तह य फासम्मि ।**
**णाणत्ती कायव्वा विहाणिए[3] होइ एक्केक्के ॥७८॥**

**वन्नम्मी**त्यादि । वर्णादिके[4] एकैकस्मिन् विधाने भेदे सहस्राग्रशो नानात्वं विधेयम्, तथाहि—कृष्णो वर्ण इति सामान्यम्, तस्य च[5] भ्रमरा-ऽङ्गार-कोकिल-गवल-कज्जलादिषु प्रकर्षा-ऽप्रकर्षविशेषाद् भेद: कृष्ण: कृष्णतर: कृष्णतम इत्यादि । एवं नीलादिष्वप्यायोज्यम् । तथा रस-गन्ध-स्पर्शेषु सर्वत्र पृथिवीभेदा वाच्या: । तथा वर्णादीनां परस्परसंयोगाद् धूसर-केसर-कर्बुरादिवर्णान्तरोत्पत्ति: । एवमुत्प्रेक्ष्य वर्णादीनां प्रत्येकं प्रकर्षा-ऽप्रकर्षतया परस्परानुवेधेन च बहवो भेदा वाच्या: । पुनरपि पर्याप्तकादिभेदेन[6] भेदमाह—

**जे बायरे विहाणा पज्जत्ता तित्तिया अपज्जत्ता ।**
**सुहुमा वि होंति दुविहा पज्जत्ता चेव[7]ऽपज्जत्ता ॥७९॥**

**जे बादर** इत्यादि । यानि बादरपृथिवीकाये विधानानि भेदा: प्रतिपादिता: तानि यावन्ति पर्याप्तकानां तावन्त्येवापर्याप्तकानामपि । अत्र च भेदानां तुल्यत्वं द्रष्टव्यम्, न तु जीवानाम्, यत एकपर्याप्तकाश्रयेणासङ्ख्येया अपर्याप्तका भवन्ति । सूक्ष्मा अपि पर्याप्तका-ऽपर्याप्तकभेदेन[8] द्विविधा[9] एव, किन्तु अपर्याप्त[10]निश्रया पर्याप्तका: समुत्पद्यन्ते, यत्र चैकोऽपर्याप्तकस्तत्र नियमाद-सङ्ख्येया: पर्याप्ता[11]: स्यु: । पर्याप्तिस्तु—

---

१. ०य: खरबादरपृथिवीकायिका उक्ता: । सा ख । २. **पुनश्च शी०** कआदर्शं विना । ३. **०णाओ** क । ४. **०र्णाद्येकै०** ख । ५. **च** इति कप्रतौ न वर्तते । ६. ०भेदानाह ख. **०भेदाद् भेद०** ग घ ङ च । ७. **०व अपज्ज( ज ) त्ता** छप्रतिं विना । ८. **०र्याप्ता-ऽप०** ख घ ङ । ९. **द्विधा** च । १०. **०प्तकनि०** कखप्रती विना । ११. **०र्याप्तका:** घ च ।

**आहार-सरीरिंदिय-ऊसास-व[1]ओ-मणोभिणि[2]व्वत्ती ।**
**होइ जओ द[3]लियाओ करणं पइ सा उ पज्जत्ती ॥** [ जीवस० ]

जन्तुरुत्पद्यमानः पुद्गलोपादानेन करणं निर्वर्तयति, तेन च करण-विशेषेणाहारमवगृह्य पृथक् खलरसादिभावेन परिणतिं नयति स तादृक्करणविशेष आहारपर्याप्तिशब्देनोच्यते । एवं शेषपर्याप्तयोऽपि वाच्याः । तत्रैकेन्द्रियाणामाहार-शरीरेन्द्रियोच्छ्वासाभिधानाश्चतस्रो भवन्ति । एताश्चान्तर्मुहूर्तेन जन्तुरादत्ते । अनाप्तपर्याप्तिरपर्याप्तकः । अवाप्तपर्याप्तिस्तु पर्याप्तक इति । अत्र च पृथिव्येव कायो येषामिति विग्रहः । यथा सूक्ष्म-बादरादयो भेदाः सिद्ध्यन्ति तथा प्रसिद्धभेदेनोदाहरणेन दर्शयितुमाह—

**रुक्खाणं ग[4]च्छाणं गुम्माण लयाण वल्लि-वलयाणं ।**
**जह दीसइ न[5]ाणत्तं पु[6]ढवि[7]क्काए तहा जा[8]ण ॥८०॥**

**रुक्खाण**मित्यादि । यथा वनस्पतेर्वृक्षादिभेदेन स्पष्टं नानात्वमुपलभ्यते तथा पृथिवीका[9]येऽपि जानीहि । [10]तत्र वृक्षाः चूतादयः, [11]गच्छाः वृन्ताकी-सल्लकी-कर्पास्यादयः, गुल्मानि नवमालिका-[12]कोरण्टकादीनि, लताः पुन्नागा-ऽशोकलताः, वल्ल्यः त्रपुषी-वालुङ्की-कोशात[13]क्यादयः, वलयानि केतकी-कदल्यादीनि । पुनरपि वनस्पतिभेददृष्टान्तेन पृथिव्या भेदमाह—

**ओसहि तण सेवाले पणगविहाणे य कंदमूले य ।**
**जह दीसइ [14]णाणत्तं [15]पुढविक्काए तहा जाण ॥८१॥**

**ओसही**त्यादि । यथा हि वनस्पतिकायस्यौषध्यादिको भेदः एवं पृथि[16]व्या अपि द्रष्टव्यः । तत्र औषध्यः शाल्याद्याः, तृणानि दर्भादीनि, शैवलं जलोपरि

---

१. **वयो** क-खप्रतिभ्यामृते । २. **०णिव्वित्ती** घ ङ । ३. ''**दलियाओ** इति तत्तनि(न्नि)ष्पत्ति-योग्यवर्गणारूपात्, तस्य दलिकस्य स्वस्वविषये प्रणमं तं प्रति यत् करणं शक्तिरूपं सा पर्याप्तिरुच्यते'' जै०वि०प० । ४. **गुच्छाणं** क झ ञ ठ । ५. **नाणत्ती** छ ज झ । ६. **पुढवीकाए** ख ज झ । ७. **०क्काया** क । ८. **जाणे** ख । ९. **०कायिकेऽपि** ग ङ, **०काये विजानी०** क । १०. **तथा** च । ११. **गुच्छाः** क-गपुस्तके विना । १२. **०कोरेण्ट०** ग, **०कोरिण्ट०** घ । १३. **०क्याद्याः** कागदीयादर्शेपु । १४. **णाणत्ती** छ ज झ । १५. **पुढवीकाए** झ । १६. **०व्यामपि** ख ।

मलरूपम्, पनकः काष्ठादावुल्लीविशेषः पञ्चवर्णः, कन्दः सूरणकन्दादिः, मूलम् उशीरादीति । एते च सूक्ष्मत्वाद् नैक-द्व्यादिकाः समुपलभ्यन्ते, यत्सङ्ख्यास्तूपलभ्यन्ते तद् दर्शयितुमाह–

**एक्कस्स दोण्ह तिण्ह व संखेज्जाण व ण पासिउं[१] सक्का ।**
**दीसंति सरीराइं पुढविजियाणं असंखाणं ॥८२॥**

**एगस्से**त्यादि । स्पष्टा[२] । कथं पुनरिदमवगन्तव्यम् 'सन्ति पृथिवीकायिकाः' इति ? उच्यते–तदधिष्ठितशरीरोपलब्धेः अधिष्ठातरि प्रतीतिः, गवाश्वादाविव इति । एतद्दर्शयितुमाह–

**एएहिं सरीरेहिं पच्चक्खं ते[३] परूविया होंति ।**
**सेसा आणागेज्झा[४] चक्खुप्फासं न ते इंति ॥८३॥**

**एएही**[५]त्यादि । **एभिः** असङ्ख्येयतयोपलभ्यमानैः[६] पृथिवी-शर्करादिभेदभिन्नैः **शरीरैः ते** शरीरिणः शरीरद्वारेण **प्रत्यक्षं** साक्षात् **प्ररूपिताः**[७] प्रख्यापिता भवन्ति । **शेषास्तु** सूक्ष्मा **आज्ञाग्राह्या** एव द्रष्टव्याः, यतस्ते **चक्षुःस्पर्शं ना**ऽऽगच्छन्ति । **स्पर्श**शब्दः विषयार्थः । प्ररूपणाद्वारानन्तरं लक्षणद्वारमाह–

**उवओग जोग अज्झवसाणे मइ सुय अचक्खुदंसे य ।**
**अट्ठविहोदयलेसा[८] सण्णुस्सासे कसाए य ॥८४॥**

**उवओगे**त्यादि । तत्र पृथिकायादीनां स्त्यानर्द्ध्युदयाद्[९] या च यावती चोपयोगशक्तिरव्यक्ता ज्ञान-दर्शनरूपा इत्येवमात्मक उपयोगो लक्षणम् । तथा योगः कायाख्य एक एव औदारिक-तन्मिश्र-कार्मणात्मको वृद्ध्यपचयविकल्पो जन्तोः सकर्मकस्यालम्बनाय व्याप्रियते । तथा अध्यवसायाः सूक्ष्मा आत्मनः परिणामविशेषाः, ते च लक्षणम्, अव्यक्तचैतन्यपुरुषमनःसमुद्भूतचिन्ताविशेषा इवानभिलक्ष्यास्तेऽभिगन्तव्याः । तथा साकारोपयोगान्तःपातिमति-श्रुताज्ञानसमन्विताः

---

१. पासियं ज । २. स्पष्टम् च । ३. ते वरूवि० ज । ४. ०ज्झा उ चक्खुफासं न तो ति ( ते तिं )ति ञ । ५. ०एहिं इत्या० ख । ६. असङ्ख्यतयो० ख । ७. ०ताः ख्यापि० कप्रतेर्विना । ८. ०लेस्सा ख । ९. ०नर्द्धयाद्युदयाद् क-खपुस्तके विना ।

[१]पृथ्वीकायिका बोद्धव्याः । तथा स्पर्शनेन्द्रियेणाचक्षुर्दर्शनानुगता बोद्धव्याः । तथा [२]ज्ञानावरणीयाद्यष्टविधकर्मोदयभाजस्तावद् बन्धभाजश्च । तथा लेश्याः अध्यवसायविशेषरूपाः कृष्ण-नील-[३]कापोत-तैजस्यश्चतस्रः ताभिरनुगताः । तथा दशविधसंज्ञानुगताः, ताश्चाहारादिकाः प्रागुक्ता एव । तथा सूक्ष्मोच्छ्वासनिःश्वासानुगताः, उक्तं च—

**पुढविकाइया णं भंते ! जीवा आणवंति वा पाणवंति वा ऊससंति वा नीससंति वा ? गोतमा ! अविरहियं [४]संतयं चेव आणवंति वा पाणवंति वा ऊससंति वा नीससंति वा । [ ]**

कषाया अपि सूक्ष्माः क्रोधादयः । एवमेतानि जीवलक्षणान्युपयोगादीनि कषायपर्यवसानानि पृथिवीकायिकेषु सम्भ[५]वन्ति । ततश्चैवंविधजीवलक्षणकलापसमनुगतत्वाद् मनुष्यवत् सचित्ता पृथिवीति । ननु च [६]तदिदमसिद्धमसिद्धेन साध्यते, तथाहि—न ह्युपयोगादीनि लक्षणानि [७]पृथ्वीका[८]ये प्रव्यक्तानि समुपलक्ष्यन्ते ? सत्यमेतद्, अव्यक्तानि तु [९]दृश्यन्ते, यथा कस्यचित् पुंसः हृत्पू[१०]रव्यतिमिश्रमदि[११]रातिपानपित्तोदयाकुलीकृतान्तःकरणविशेषस्याव्यक्ता चेतना, न चैतावता तस्याचिद्रूपता, एवमत्राप्यव्यक्तचेतनासम्भवोऽभ्युपगन्तव्यः । ननु चात्रोच्छ्वासादिकमव्यक्तचेतनालिङ्गमस्ति, न चेह तथाविधं किञ्चिच्चेतनालिङ्गमस्ति ? नैतदेवम्, इहापि समानजातीयलतोद्भेदादिकमर्शोमांसाङ्कुरवत् चेतनाचिह्नमस्त्येव, अव्यक्तचेतनानां हि सम्भावितैकचेतनालिङ्गानां वनस्पतीनामिव चेतनाऽभ्युपगन्तव्येति, वनस्पतेश्च चैतन्यं वि[१२]शिष्टर्तुपुष्प-फलप्रदत्वेन [१३]स्पष्टम्, साधयिष्यते च । ततोऽव्यक्तोपयोगादिलक्षणसद्भावात् सचित्ता [१४]पृथ्वीति स्थितम् । ननु चाश्मलतादेः कठिनपुद्गलात्मिकायाः कथं चेतनत्वम् ? इति, [१५]अत्राह—

---

१. **पृथिवीका०** कप्रत्या ऋते । २. **ज्ञानदर्शनावर०** ग । ३. **०कपोत** च । ४. **सततं** ख । ५. **वन्तीति** ग । ६. **तद् असिद्धं यद् असिद्धेन** ख । ७. **पृथिवीकाये** कपुस्तकाद्विना। ८. **०येषु व्य०** ख । ९. **विद्यन्ते** कप्रतिमृते । १०. **०रकव्य०** च । ११. **०रापान०** च । १२. **०शिष्टार्थपु०** ख । १३. **स्फ(स्फु)टं** क । १४. **पृथिवीति** कआदर्शाहते । १५. **अत आह** कप्रतिमनाहत्य ।

**अट्ठी जहा सरीरम्मि अणुगयं चेयणं खरं दिट्ठं ।**
**एवं [1]जीवमणुगयं पुढविसरीरं खरं होइ ॥८५॥**

[2]**अट्ठि**मित्यादि । यथास्थि शरीरानुगतं सचेतनं खरं दृष्टम् एवं जीवानुगतं [3]पृथ्वीशरीर[4]मपीति । साम्प्रतं लक्षणद्वारानन्तरं परिमाणद्वारमाह—

**जे बायरपज्जत्ता पयरस्स असंखभागमेत्ता ते ।**
**सेसा तिन्नि वि रासी वीसुं [5]लोया असंखेज्जा ॥८६॥**

**जे बायरे**त्यादि । तत्र पृथिवीकायिकाश्चतुर्धा, तद्यथा—बादराः पर्याप्ता अपर्याप्ताश्च, तथा [6]सूक्ष्मा अपर्याप्ताः पर्याप्ताश्च । तत्र ये बादराः [7]पर्याप्तास्ते संवर्तितलोकप्रतरासङ्ख्येयभागमात्रवर्तिप्रदेशराशिप्रमाणा[8] भवन्ति, शेषास्तु त्रयोऽपि राशयः प्रत्येकमसङ्ख्येयानां लोकानामाकाशप्रदेशराशिप्रमाणा भवन्ति, यथानिर्दिष्ट[9]क्रमेण चैते यथोत्तरं बहुतराः, यत उक्तम्—

**सव्वत्थोवा बायरपुढविकाइया पज्जत्ता, बादरपुढविकाइया अपज्जत्ता असंखेज्जगुणा, सुहुमपुढविकाइया अपज्जत्ता असंखेज्जगुणा, सुहुमपुढविकाइया पज्जत्ता असंखेज्जगुणा ।** [ ]

प्रकारान्तरेणापि राशित्रयस्य [10]प्रमाणं दर्शयितुमाह—

**पत्थेण व [11]कुलएण व जह कोइ मिणिज्ज सव्वधन्नाइं ।**
**एवं मविज्जमाणा हवंति लोगा असंखेज्जा ॥८७॥**

**पत्थे**त्यादि । यथा प्रस्थादिना कश्चित् सर्वधान्यानि मिनुयाद् एवमसद्भावप्रज्ञापनाङ्गीकरणाद् लोकं कुडवीकृत्य अजघन्योत्कृष्टावगाहनान् पृथिवी[12]कायिकान् जीवान् यदि मिनोति ततोऽसङ्ख्येयान् लोकान् पृथिवीकायिकाः पूरयन्ति ॥ पुनरपि प्रकारान्तरेण परिमाणमाह—

---

१. **जीवाणुगयं** ख ज झ ठ । २. **अट्ठीत्यादि** ग च । ३. **पृथिवीश०** कपुस्तकं विमुच्यान्यत्र । ४. **०मपि** ॥ **सा०** ख । ५. **लोए** झ ज । ६. **सूक्ष्माः पर्याप्ता अपर्याप्ताश्च** ग ङ। ७. **०र्याप्तकास्ते** कागदीयप्रतिपु । ८. **०शिपरिमाणा** ख । ९. **०मेणैवैते** ग । १०. **परिमाणं** कसंज्ञकादर्शेन विना । ११. **कुलवेण** ख, **कुडएण** ज झ, **कुडवेण** ठ । १२. **०यिकान् यदि** ख, **०यिकजी०** कागदीयप्रतिपु ।

**लोगागासपएसे [१]एक्केक्कं निक्खिवे पुढवि[२]जीवं ।**
**[३]एवं मविज्जमाणा हववंति लोगा असंखेज्जा ॥८८॥**

**लोए**त्यादि । स्पष्टा । साम्प्रतं कालतः [४]प्रमाणं निर्दिदिक्षुः क्षेत्र-कालयोः सूक्ष्म-बादरत्वमाह—

**निउणो [५]य [६]होइ कालो तत्तो णिउण[७]यतरं हवइ खेत्तं ।**
**[८]अंगुलसेढीमेत्ते [९]उसप्पिणीओ असंखेज्जा ॥८९॥**

**निउणे**त्यादि । **निपुणः** सूक्ष्मः **कालः** समयात्मकः । **ततो**ऽपि सूक्ष्मतरं **क्षेत्रं भवति,** यतोऽङ्गुलीश्रेणिमात्रक्षेत्रप्रदेशानां समयापहारेणासङ्ख्येया उत्सर्पिण्य-वसर्पिण्योऽपक्रामन्तीति, अतः कालात् क्षेत्रं सूक्ष्मतरम् ॥ प्रस्तुतं कालतः परिमाणं दर्शयितुमाह—

**अणुसमयं च पवेसो णिक्खमणं चेव पुढविजीवाणं ।**
**काए [१०]कायठिईया चउरो लोया असंखेज्जा ॥९०॥**

**अणुसमय**मित्यादि । तत्र जीवाः पृथिवीकायेऽनुसमयं प्रविशन्ति निष्क्रामन्ति च । एकस्मिन् समये कियतां निष्क्रमः प्रवेशश्च १-२ ? तथा विव[११]क्षिते च समये कियन्तः पृथिवी[१२]कायपरिणताः सम्भवन्ति ३ ? तथा कियती च कायस्थितिः ४ ? इत्येते चत्वारोऽपि विकल्पाः कालतोऽभिधीयन्ते । तत्रा-सङ्ख्येयलोकाकाशप्रदेशपरिमाणाः समयेनोत्पद्यन्ते विनश्यन्ति च । पृथिवीत्वेन परिणता अप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणाः । तथा कायस्थितिरपि मृत्वा मृत्वाऽसङ्ख्येयलोकाकाशप्रदे[१३]शप्रमाणं कालं तत्र तत्रोत्पद्यन्त इति । एवं क्षेत्र-कालाभ्यां [१४]प्रमाणं प्रतिपाद्य परस्परावगा[१५]हप्रतिपिपादयिषयाह—

---

१. **एक्केक्के** क-छ-ञप्रतीर्विना । २. **०जीयं** झ । ३. **एवं गणिज्ज०** झ ञ । ४. **परिमाणं** ख । ५. **इ** झ, **उ** ञ ठ । ६. **हवइ** झ ञ । ७. **०यरयं ह०** ठ । ८. **अंगुलि०** छ ज ञ । ९. **ओसप्पिणिओ** ख ज । १०. **कायट्ठितिया** ज ठ । ११. **०क्षितसम०** ख घ ङ । १२. **०रो विक०** कआदर्शादृते । १३. **०शपरिमाणं** कपुस्तकेन विनाऽन्यत्र । १४. **परिमाणं** कप्रतिं विमुच्यान्यत्र । १५. **०हनाप्रति०** ख ।

**बायरपु[1]ढविक्काइयपज्जत्ता अन्नमन्नमोगाढा ।**
**सेसा ओगाहंती सुहुमा पुण सव्वलोयम्मि ॥९१॥[2]** दारं ॥

**बायरे**त्यादि । बादरपृथिवीकायिकः पर्याप्तो यस्मिन्नाकाशखण्डे अवगाढस्तस्मिन्नेवाकाशखण्डेऽपरस्यापि बादरपृथिवीकायिकस्य शरीरमवगाढमिति **शेषास्तु** अपर्याप्ताः पर्याप्तकनिश्रया समुत्पद्यमाना अनन्तरप्रक्रियया पर्याप्तकावगाढाकाशप्रदेशावगाढाः । **सूक्ष्माः पुनः सर्वस्मिन्नपि** लोकेऽवगाढा इति । उपभोगद्वारमाह—

**चंकमणे य ट्ठाणे णिसीयण तुयट्टणे [3]ये कयकरणे ।**
**उच्चारे पासवणे उवकरणाणं [4]च निक्खिवणे ॥९२॥**

**आलेवण पहरण भूसणे य कयविक्कए किसीए य ।**
**भंडा[5]णं पि य करणे उवभोगविही मणुस्साणं ॥९३॥**

**चंकमणे**त्यादि । **आलेवणे**त्यादि । चङ्क्रमण-ऊर्द्धस्थान-निषीदन-त्वग्वर्तन-कृतकपुत्रककरण-उच्चार-प्रश्रवण-उपकरणनिक्षेप-आलेपन-प्रहरण-भूषण-क्रय-विक्रय-कृषीकरण-भण्डक[6]घटनादिषूपभोगविधिर्मनुष्याणां पृथिवीकायेन भवतीति । यद्येवं ततः किम् ? इति अत आह—

**एएहिं कारणे[7]हिं हिंसंती पुढविकाइए जीवे ।**
**सायं गवेसमाणा परस्स दुक्खं [8]उदीरंति ॥९४॥** दारं ॥

**ए[9]एही**त्यादि । **एभिश्चङ्क्रमणादिभिः कारणैः पृथिवीजीवान् हिंसन्ति ।** किमर्थम् ? इति दर्शयति—**सातं** सुखमात्म**नोऽ[10]न्विषन्तः** पर[11]दुःखान्यजानानाः कतिपयदिवसरमणीयभोगाशाकर्षितसमस्तेन्द्रियग्रामा विमूढचेतस[12] इति । परस्य पृथिव्याश्रितजन्तुराशेः **दुःखम्** असातलक्षणं तद् **उदीरयन्ति**

---

१. **०ढवीकातिय०** अ । २. **नास्तीयं गाथा** झसंज्ञकादर्शे । ३. **य करणे य** । छ । ४. **तु** ख ज झ , **पि** अ । ५. **०णंकियकरणे** क । ६. **०घट्टना०** घ ङ । ७. **०हिं वि हंसं०** अ । ८. **उईरंति** अ । ९. **०एहिमित्या०** ख घ । १०. **०नोऽन्वेषयन्तः** क-गप्रती विना । ११. **०दुःखमजानानाः** ख । १२. **०न्ति ईरयन्ती०** ग ।

उत्पादयन्तीति । अनेन भूदानजनितः शुभफलोदयः प्रत्युक्त इति । अधुना शस्त्रद्वारम् । शस्यतेऽनेनेति शस्त्रम्, [1]तच्च द्विधा—द्रव्यशस्त्रं भावशस्त्रं च । द्रव्यशस्त्रमपि समास-विभागभेदाद् द्विधैव[2] । तत्र समासद्रव्यशस्त्रप्रतिपादनायाह—

**हल[3]कुलियवि[4]संकुद्दा( दा )[5]ला अलित्तमिगसिंगकट्ठमग्गी य ।**
**उच्चारे पासवणे एयं तु समासओ सत्थं ॥९५॥**

**हले**त्यादि । तत्र हल-कुलिक-विष-[6]कुद्दाला-ऽलित्रक-मृगशृङ्ग-काष्ठा-ऽग्नि-उच्चार-प्रश्रवणादिकमेतत् समासतः सङ्क्षेपतः द्रव्यशस्त्रम् ॥ विभाग-द्रव्यशस्त्रप्रतिपाद[7]नायाह—

**किंची सकायसत्थं किंची परकाय तदुभयं [8]किंचि ।**
**एयं तु दव्वसत्थं भावे [9]य असंजमो सत्थं ॥९६॥** दारं ॥

**किंची**त्यादि । किञ्चित् स्वकायशस्त्रं पृथिव्येव पृथिव्याः । किञ्चित् परकायशस्त्रमुदकादि । तदुभयं किञ्चिद् इति भूदकं मिलितं [10]भुवः । एतच्च सर्वमपि द्रव्यशस्त्रम् । भावे पुनः असंयमः दुष्प्रयुक्ता मनो-वाक्-कायाः शस्त्रमिति । वेदनाद्वारमाह—

**पायच्छेयण भेयण जंघोरू [11]तह य अंगमंगेसु ।**
**जह होंति नरा दुहिया पुढवि[12]क्काए तहा जाण ॥९७॥**

[13]**पाए**त्यादि । यथा पादादिकेष्वङ्ग-प्रत्यङ्गेषु छेदन-[14]भेदनादिकया क्रियया नरा दुःखिताः तथा पृथिवी[15]कायेऽ[16]पि वेदनां जानीहि ॥ यद्यपि पाद-शिरो-ग्रीवादीन्यङ्गानि पृथिवीकायिकानां न [17]सन्ति तथापि तच्छेदनानु[18]रूपा

---

१. तद् द्वि० क । २. द्विधा । तत्र क विना । ३. ०लियाविसकुद्दालऽलित्तमिग० ठ । ४. ०सकोद्दा( कुदा? )लयखणित्तमिग० ञ । ५. ०लालित्तं मिग० छ, ०लालित्तमिग० ख ज झ । ६. ०कुर्दाला० ख ग, ०कुदाला० ङ । ७. ०नार्थया( मा? ) ह घ । ८. किंची छ । ९. उ ख, अ छ ठ । १०. भुव इति । ए० ख ग घ ङ । ११. तहेव अंगुवंगेसु ख ठ, तहेव अंगवंगेसु ज झ, तहेव अंग० ञ । १२. ०क्कायं तहा । क । १३. पाय इत्या० ख । १४. ०भेदादि० ङ च । १५. ०काये वेद० ख । १६. ०पि जानीहि वेदनाम् क । १७. सम्भवन्ति ख । १८. ०रूपवे० क ।

वेदनाऽस्त्येवेति दर्शयितुमाह–

**नत्थि य सि[1] अंगमंगा तयाणुरूवा य वेयणा तेसिं ।**
**केसिंचि उदीरेंती[2] केसिंचऽइवायए पाणे ॥९८॥**

**नत्थि य स्येत्यादि** । पूर्वार्धं गतार्थम् । केषाञ्चित् पृथिवीकायिकानां तदारम्भिणः पुरुषा वेदनामुदीरयन्ति, केषाञ्चित् तु प्राणानप्यतिपातयेयुरिति, तथाहि **भगवत्यां** दृष्टान्त उपात्तो[3] यथा–चतुरन्त[4]चक्रवर्तिनो गन्धपेषिका यौवनवर्तिनी बलवती आर्द्रा[5]मलकप्रमाणं सचित्तपृथिवीगोलकमेकविंशतिकृत्वो गन्धपट्टके कठिनशिलापुत्रकेण पिंष्यात्, ततस्तेषां पृथिवीजीवानां कश्चित् सङ्घट्टितः कश्चित् परितापितः कश्चिद् व्यापादितः, अपरः किल तेन शिलापुत्रकेण न स्पृष्टोऽपीति ॥

वधद्वारमाह–

**पवयंति य अणगारा ण य तेहिं गुणेहिं जेहिं अणगारा ।**
**पुढविं विहिंसमाणा[6] ण[7] होंति वायाए अणगारा ॥९९॥**

**पवयंतीत्यादि** । इह ह्येके[8] कुतीर्थिका यतिवेषमास्थायैवं[9] च प्रवदन्ति– वयम् अनगाराः प्रव्रजिताः, न च तेषु गुणेषु निरवद्यानुष्ठानरूपेषु[10] वर्तन्ते येष्वनगाराः । यथा चानगारगुणेषु न वर्तन्ते तद् दर्शयति–यतस्तेऽहर्निशं पृथिवी[11]जीवव्यापत्तिकारिणो दृश्यन्ते गुद-पाणि-पादप्रक्षालनार्थम्, अन्यथाऽपि निर्लेपनिर्गन्धत्वं कर्तुं शक्यम् । अतश्च यतिगुणकला[12]पनिरपेक्षा न वाङ्मात्रेण युक्तिशून्येना[13]ऽनगारा[14] भवन्तीति । अनेन प्रयोगः सूचितः । तत्र गाथापूर्वार्धेन प्रतिज्ञा, पश्चार्धेन हेतुः, उत्तरगाथार्धेन साधर्म्यदृष्टान्तः, स चायं प्रयोगः[15]– कुतीर्थिका यत्यभिमानवादिनोऽपि यतिगुणेषु न[16] वर्तन्ते, पृथिवी[17]हिंसाप्रवृत्तत्वाद्,

१. से अंगोवंगा ख, सि अंगुवंगा ठ, सि यंग० ञ । २. ०सिंचि उ वायओ पा० ख, ०सिंचि य वा० झ, ०सिंचि इ वा० ठ । ३. उक्तो यथा च । ४. ०रङ्गच० घ ङ । ५. आमल० ग च । ६. ०हिंसिमा० क । ७. ण हु ते वा० ख ठ । ८. के ती० च । ९. ०माधायैवं च । १०. ०षु प्रव० ख । ११. ०बीजन्तुवि० ख ग घ च, ङपुस्तके पाठभङ्गः । १२. ०पशून्या न कप्रतिं विमुच्यान्यत्र । १३. ०क्तिनिरपेक्षेणानगा० कप्रतिमृतेऽन्यत्र । १४. ०गारत्वं बिभ्रतीति क ख, ०गारता भवतीति ग घ, ङसंज्ञादर्शे पाठत्रुटिः । १५. ०गः ती० क ख ग । १६ न प्रव० च । १७ ०वीविहिं० घ ङ ।

इह ये ये पृथि[१]वीहिंसाप्रवृत्तास्ते ते यतिगुणेषु न[२] वर्तन्ते गृहस्थवत् ॥ साम्प्रतं दृष्टान्तगर्भं निगमनमाह—

**अणगारवाइणो पुढवि[३]हिंसगा णिग्गुणा अगारिसमा ।**
**णिद्दोस त्ति य मइला विरइदुगुंछाए मइलतरा ॥१००॥**

**अणे**त्यादि । **अनगारवादिनः** वयं यतय इति वदनशीलाः पृथिवीकायविहिंसकाः सन्तो **निर्गुणाः**, यतोऽतः **अगारिसमा** गृहस्थतुल्या भवन्ति । अभ्युच्चयमाह—सचेतना पृथिवीत्येवं ज्ञानरहितत्वेन तत्समारम्भवर्तिनः सदोषा अपि सन्तो वयं निर्दोषा इत्येवं मन्यमानाः स्वदोषप्रेक्षाविमुखत्वात् मलिनाः कलुषितहृदयाः, पुनश्चातिप्रगल्भतया साधु[४]जनाश्रिताया निरवद्यानुष्ठानात्मिकाया विरतेः जुगुप्सया निन्दया मलिनतरा भवन्ति । अनया च साधुनिन्दयाऽनन्तसंसारित्वं प्रदर्शितं भ[५]वतीति । एतच्च गाथाद्वयं सूत्रोपात्तार्थानुसार्यपि वधद्वारावसरे निर्युक्तिकृताऽभिहितम्, तस्य स्वयमेवोपात्तत्वेन तद्व्याख्यानस्य न्याय्यत्वात् । तच्चेदं सूत्रम्—**लज्जमाणा पुढो पास अणगारा मो त्ति एगे पवदमाणे**त्यादि ।

अयं च वधः कृत-कारिता-ऽनुमतिभिर्भवती[६]ति तदर्थमाह—

**केई सयं वहंती केई अन्नेहि तुं[७] वधावेंति ।**
**केई अणुमन्नंती पुढविक्कायं वहेमाणा ॥१०१॥**

**के** इत्यादि । स्पष्टा ॥ तद्वधेऽन्येषामपि तदाश्रितानां वधो भवतीति दर्शयितुमाह—

**जो पुढवि स[८]मारभए अन्ने वि हु[९] सो समारभइ काए ।**
**अणियाए अ णियाए दिस्से य तहा अदिस्से य ॥१०२॥**

**जो** इत्यादि । **यः पृथिवीकायं समारभते** व्यापादयति तथा **स**

---

१. **०वीविहिं०** घ ङ । २. **न प्रव०** च । ३. **०हिंसिगा** क । ४. **०जनेनाश्रि०** च । ५. **०वति** क । ६. **०ति एतद०** ख । ७. उ ( ऊ ) ख ज झ, **रू( ऊ )वहाणत्ति( वन्ति )** छ, उं ञ । ८. **०मारंभति** ञ ठ । ९. **य** ठ ।

**अन्यानपि** अप्काय-द्वीन्द्रियादीन् **समारभते** व्यापादयति, उदुम्बरफल-भक्षणप्रवृत्तः तत्फलान्तःप्रविष्टत्रसजन्तुभक्षणवदिति । तथा **अणियाए य नियाए** [1]त्ति अकारणेन कारणेन च, यदि वा असङ्कल्पेन सङ्कल्पेन च पृथिवीजन्तून् समारभते तदारम्भवांश्च **दृश्यान्** दर्दुरादीन् **अदृश्यान्** पनकादीन् समारभते व्यापादयतीत्यर्थः ॥ एतदेव स्पष्टतरमाह–

**[2]पुढवी समारभंता हणंति तन्नि[3]स्सिते बहू जीवे ।**
**सुहुमे य बायरे [4]या पज्जत्ते [5]वा अपज्जत्ते ॥१०३॥** दारं ॥

**[6]पुढवी**त्यादि । स्पष्टा, अत्र च सूक्ष्माणां वधः परिणामाशुद्धत्वात् तद्विषयनिवृत्त्यभावेन द्रष्टव्य इति ॥ विरतिद्वारमाह–

**एवं वियाणिऊणं पुढ[7]वीओ निक्खिवंति जे दंडं ।**
**तिविहेण सव्वकालं मणेण वायाए काएणं ॥१०४॥**

**एव**मित्यादि । **एवम्** इत्युक्तप्रकारानुसारेण पृथिवीजीवा[8]न् विज्ञाय तद्[9]वधं बन्धं च विज्ञाय पृथिवीतो निक्षिपन्ति ये दण्डं पृथिवीसमारम्भाद् व्युपरमन्ति ते ईदृक्षा अनगारा भवन्तीत्यु[10]त्तरगाथायां वक्ष्यति । **त्रिविधेन** इति कृत-कारिता-ऽनुमतिभिः सर्व[11]कालं यावज्जीवमपि मनसा वाचा कायेनेति ॥ अनगारभवने उक्तशेषमाह–

**गुत्ता गुत्तीहिं सव्वाहिं, समिया समिईहिं संजया ।**
**जयमाणगा सुविहिया ए[12]रिसिया होंति अणगारा ॥१०५॥**

**गुत्ता** इत्यादि । तिसृभिः मनो-वाक्-कायगुप्तिभिर्गुप्ताः, तथा पञ्चभिः ईर्यासमित्यादिभिः **समिताः**, सम्यग् उत्थान-शयन-चङ्क्र[13]मणादिक्रियासु यताः **संयताः**, यतमानाः सर्वत्र प्रयत्नकारिणः, शोभनं विहितं सम्यग्दर्शनाद्यनुष्ठानं येषां ते त[14]था, ईदृक्षा अनगारा भवन्ति, न तु पूर्वोक्तगुणाः पृथिवीकायसमारम्भिणः

१. क-खसंज्ञकादर्शयोर्न वर्तते त्ति इति । २. **पुढविं** क-छप्रती विना । ३. **०स्सिए य बहुजीवे** ठ । ४. **वा** छ झ । ५. **या** क-छपुस्तके विना । ६. **०ढविमित्या०** कप्रत्या ऋते । ७. **०वीए नि०** छ-जप्रती ऋते । ८. **०न् तद्वधबन्धं** ग च । ९. **०द्वधबन्धं** घ । १०. **०त्तरार्धेन वक्ष्य०** ख । ११. **०काल-मिति या०** ख । १२. **०रिसगा** ज । १३. **०मक्रिया०** च । १४. **०था, ते ईदृ०** क-घ-चप्रतीर्विना ।

**शाक्या**दय इति ॥ गतो नामनिष्पन्नो निक्षेपः । अधुना सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चार्यते, तच्चेदम्—

**[ सू०१० ] अट्टे लोए परिजुण्णे दुस्संबोधे अविजाणए । अस्सिं लोए पव्वहिए तत्थ तत्थ पुढो पास आतुरा परितावेंति ।**

**अट्टे**त्यादि । अस्य चायमभिसम्बन्धः—इहानन्तरसूत्रे परिज्ञातकर्मा मुनिर्भवतीत्युक्तम्, यस्त्वपरिज्ञातकर्मा स भावार्तो भवतीति[1] । तथाऽऽदिसूत्रेण सम्बन्धः, **सुधर्मस्वामी जम्बू**नाम्ने इदमाचष्टे—श्रुतं मया, किं तत् श्रुतम् ? पूर्वोद्देशकार्थं प्रदर्श्येदमपीति **अट्टे**त्यादि । परम्परसम्बन्धस्तु **इहमेगेसिं नो सन्ना भवती**त्युक्तम्, कथं पुनः संज्ञा न भवतीति ? आर्तत्वात्[2], तदाह—**अट्टे**त्यादि ।

आर्तो नामादिश्चतुर्धा । नाम-स्थापने क्षुण्णे । ज्ञशरीर-भव्यशरीर[3]-तद्व्यतिरिक्तो नोआगमतो द्रव्यार्तः शकटादिचक्राणामुद्धिमूले वा यो लोहमयः पट्टो दीयते स द्रव्यार्तः । भावार्त[4]स्तु द्विधा—आगमतो नोआगमतश्च । तत्रागमतो ज्ञाता आर्तपदार्थज्ञः तत्र चोपयुक्तः । नोआगमत[5]स्तु औदयिकभाववर्ती राग-द्वेष[6]ग्रह-परिगृहीतान्तरात्मा प्रियविप्रयोगादिदुःख[7]सङ्कटनिमग्नो भावार्त इति व्यपदिश्यते, अथवा शब्दादिविषयेषु विषविपाकसदृशेषु तदा[8]काङ्क्षत्वाद् हिता-हितविचार-शून्यमना भावार्तः कर्मोपचिनोति, [9]यत उक्तम्—

**सोइंदिय[10]वसगे णं भंते ! जीवे किं बंधइ ? किं चिणाइ ? किं उवचिणाइ ? गोयमा ! अट्ठ कम्मपयडीओ सिढिलबंधणबद्धाओ धणियबंधणबद्धाओ पकरेइ, जाव अणाइयं च णं अणवयग्गं दीहमद्धं चाउ[11]रंतसंसारकंतारमणुपरियट्टइ ।** [ ]

एवं स्पर्शनादिष्वप्यायोजनीयम् । एवं क्रोध-मान-माया-लोभ-दर्शन-मोहनीय-चारित्रमोहनीयादिभिर्भावार्ताः संसारिणो जीवा इति, उक्तं च—

**राग-द्दोस-कसाएहिं इंदिएहिं य पंचहिं ।**
**दुहा वा मोहणिज्जेण अट्टा संसारिणो जिया ॥** [ ]

---

१. ०ति । आदिसू० च । २. ०त्, आह ख । ३. ०र-व्यति० कपुस्कादृतेऽन्यत्र । ४. ०र्तश्च च । ५. ०त औद० च । ६. ०षपरिगृ० ग ङ, ०षपरिग्रहगृ० च । ७. सङ्करनि० घ । ८. ०काङ्क्षित्वाद् घ ङ च । ९. यदुक्तम् ङ । १०. ०वसट्टे ख घ ङ च, ०वसद्दे ग । ११. ०रंतं सं० ख ।

यदि वा ज्ञानावर[1]णीयादिना शुभ-ऽशुभेनाष्टप्रकारेण कर्मणाऽऽर्त: । क: पुनरेवंविध: ? इत्यत[2] आह—लोकयतीति **लोक:** एक-द्वि-त्रि-चतु:-पञ्चेन्द्रियजीवराशिरित्यर्थ: । अत्र[3] **लोक**शब्दस्य नाम-स्थापना[4]-द्रव्य-क्षेत्र-काल-भव-भाव-पर्यायभेदादष्टधा निक्षेपं प्रदर्श्याप्रशस्तभावोदयवर्तिना लोकेनेहाधिकारो वाच्य: । यस्माद् यावान् आर्त: सर्वोऽपि **परिद्यून**[5] इति । **परिद्यूनो** नाम परिपेलवो निस्सार: औपशमिकादिप्रशस्तभावहीनोऽव्यभिचारिमोक्षसाधनहीनो वेति । स च द्विधा द्रव्य-भावभेदात् । तत्र सचित्तद्रव्यपरिद्यूनो जीर्णशरीर[6]: स्थविरक: जीर्णवृक्षो वा, अचित्तद्रव्यपरिद्यूनो जीर्णपटादि:[7] । भावपरिद्यून[8] औदयिकभावोदयात् प्रशस्तज्ञानादिभावविकल: । कथं विकल: ? अनन्तगुणपरिहाण्या, तथाहि[9]—पञ्च-चतु:-त्रि-द्वि-एकेन्द्रिया: क्रमशो ज्ञानविकला: । तत्र सर्वनिकृष्टज्ञाना: सूक्ष्मनिगोदा अपर्याप्तका: प्रथमसमयोत्पन्ना:[10], उक्तं च—

**सर्वनिकृष्टो जीवस्य दृष्ट उपयोग एव वीरेण ।**
**सूक्ष्मनिगोदापर्याप्तानां स भवति विज्ञेय: ॥ [ ]**
[11]**तस्मात् प्रभृति ज्ञानविवृद्धिर्दृष्टा जिनेन जीवानाम् ।**
**लब्धिनिमित्तै: करणै: कायेन्द्रिय-वाङ्-मनो-दृग्भि: ॥ [ ]**

स च विषय-कषायार्त: प्रशस्तज्ञानद्यून: किमवस्थो भवति ? इति दर्शयति—**दुस्सम्बोध** इति, दु:खेन सम्बोध्यते धर्मचरणे[12] प्रतिपत्तिं[13] कार्यत इति दुस्सम्बोधो **मेतार्य**वदिति । यदि वा **दुस्सम्बोध:** यो बोधयितुमशक्य: **ब्रह्मदत्त**वदिति[14] । किमित्येवं ? यत: **अवियाणए** त्ति विशिष्टावबोधरहित: । स चैवंविध: किं विदध्यात् ? इत्याह—**अस्मिन्** पृथिवीकाय**लोके प्रव्यथिते** प्रकर्षेण व्यथिते, सर्वस्यारम्भस्य तदाश्रयत्वादिति प्रकर्षार्थ:, तत्तत्प्रयोजनतया खननादिभि: पीडिते नानाविधशस्त्रोद्वीते[15] वा । **व्यथ भय-चलनयो:** [पा०धा०

---

१. **०रणादिना** ग । २. **इत्याह** ख, **इत्यत्राह** ग । ३. **अथ** ख । ४. **०पने क्षुण्णत्वाद् अनादृत्य द्रव्य-क्षेत्र०** ख । ५. **परिदून** क, ग-घ प्रत्यो: पाठभङ्ग: । ६. **०रीरस्थ०** ख घ ङ । ७. **जीर्ण: प०** ख च । ८. **भावद्यून** घ ङ । ९. **तथाहि** इति न विद्यते ख-गसंज्ञकादर्शयो: । १०. **०न्ना इति उक्तं** कप्रतिं विना । ११. "**तस्मात् प्रभृति** इति प्रथमसमयमादिं कृत्वा" जै०वि०प० । १२. **०रणप्रति०** ख । १३. **प्रभृ( वृ? )त्तिं** क । १४. **०वत् कि०** कप्रतेर्विना । १५. *०शस्त्राद्वीते क-ङपुस्तकाभ्यामृते ।*

[illegible] इति कृत्वा व्यथितं भीतमिति । **तत्थ तत्थेति** तेषु तेषु कृषि-खनन-गृहकरणादिषु **पृथग्** विभिन्नेषु कार्येपूत्पन्नेषु **पश्य** इति विनेयस्य लोकाकार्यप्रवृत्तिः प्रदर्श्यते । सिद्धान्तशैल्या एकादेशेऽपि प्रकृते बह्वादेशो भवतीति **आतुराः** विषय-कषायादिभिः अस्मिन् पृथिवीकाये विषयभूते सामर्थ्यात् पृथिवीकायं **परितापयन्ति** परि समन्तात् तापयन्ति पीडयन्तीत्यर्थः । बहुवचननिर्देशस्तु तदारम्भिणां बहुत्वं गमयति, यदि वा लोकशब्दः प्रत्येकमभिसम्बध्यते कश्चिल्लोको विषयकषायादिभिरार्तः अपरस्तु कायजीर्णः कश्चिद् दुःखसम्बोधः तथाऽपरो विशिष्टज्ञानरहितः, एते सर्वेऽप्यातुरा विषय-जीर्णदेहादिभिः सुखाप्तयेऽस्मिन् पृथिवीकायलोके विषयभूते पृथिवीकायं नानाविधैरुपायैः परितापयन्ति पीडयन्तीति सूत्रार्थः ॥ ननु चैकदेवताविशेषावस्थिता पृथिवीति शक्यं प्रतिपत्तुम्, न पुनरसङ्ख्येयजीवसङ्घातरूपेति, एतत् परिहर्तुकाम आह—

## [ सू०११ ] संति पाणा पुढो सिता ।

**संतीत्यादि** । **सन्ति** विद्यन्ते **प्राणाः** सत्त्वाः **पृथक्** पृथग्भावेन अङ्गुलासङ्ख्येयभागस्वदेहावगाहनया पृथिव्या**श्रिताः, सिता** वा सम्बद्धा इत्यर्थः । अनेनैतत् कथयति—नैकदेवता पृथिवी, अपि तु प्रत्येकशरीरपृथिवीकायात्मिकेति । तदेवं सचेतनत्वमनेकजीवाधिष्ठितत्वं च पृथिव्या आविष्कृतं भवतीति ।

एतच्च ज्ञात्वा तदारम्भनिवृत्तान् दर्शयितुमाह—

## [ सू०१२ ] लज्जमाणा पुढो पास । अणगारा मो त्ति एगे पवयमाणा, जमिणं विरूवरूवेहिं सत्थेहिं पुढविकम्मसमारंभेणं पुढविसत्थं समारंभमाणो अणेगरूवे पाणे विहिंसति ।

**लज्जमाणा पुढो पास** त्ति, लज्जा द्विविधा—लौकिकी लोकोत्तरा च ।

१. ०प्राकृतं ग ङ च । २. परिः ङ च । ३. ०र्तः कश्चित् तु कायपरिजीर्णः अपरो दुःसम्बोधः ख घ ङ च । ४. ०र्णभेदा देहा० च । ५. ०न्तीत्यर्थः । घ । ६. ०श्रिता वा सि० ख । ७. ०यात्मकेति च । ८. द्विधा ग ङ च ।

तत्र लौकिकी स्नुषा-सुभटादेः श्वशुर-सङ्ग्रामविषया, लोकोत्तरा सप्तदशप्रकारः संयमः, तदुक्तम्—लज्जा दया [1]संजम बंभचेर[ ]मित्यादि, लज्जमानाः संयमानुष्ठानपराः, यदि वा पृथिवीकायसमारम्भरूपादसंयमानुष्ठाद् लज्जमानाः । **पृथग्** इति प्रत्यक्षज्ञानिनः परोक्षज्ञानिनश्च । अतस्तान् लज्जमानान् **पश्य** इत्यनेन शिष्यस्य कुशलानुष्ठानप्रवृत्तिविषयः प्रदर्शितो [2]भवतीति ।

कुतीर्थिकास्त्वन्यथावादिनो[3]ऽन्यथाकारिण इति दर्शयितुमाह—**अणगारा** इत्यादि । न विद्यतेऽगारं गृहमेषामित्यनगाराः यतयः स्मो वयम् इत्येवं प्रकर्षेण वदन्तः प्रवदन्त इति । **एके** शाक्यादयो ग्राह्याः, ते च वयमेव जन्तुरक्षणपराः क्षपितकषाया-ऽज्ञानतिमिरा इति एवमादि प्रतिज्ञामात्रमनर्थकमारटन्ति यथा कश्चिदत्यन्तशुचि[4]र्बौद्रश्चतुःषष्टिमृत्तिकास्नायी गोशवस्याशुचितया परित्यागं विधाय पुनः कर्मकरवाक्यात् चर्मा-ऽस्थि-पिशित-स्नाय्वादेर्यथास्वमु[5]पयोगार्थं सङ्ग्रहं कारितवान् । तथा च तेन शुच्यभिमानमुद्वहताऽपि किं [6]तस्य परित्यक्तम् ? एवमेतेऽपि **शाक्या**दयोऽनगारवादमुद्वहन्ति, न चानगारगुणेषु मनागपि [7]वर्तन्ते, न [8]च गृहस्थचर्यां मनागप्यतिलङ्घयन्तीति दर्शयति—**यद्** यस्माद् **इमम्** इति सर्वजनप्रत्यक्षं पृथिवीकायं **विरूपरूपैः** नानाप्रकारैः **शस्त्रैः** हल-कुद्दा[9]ल-खनित्रादिभिः पृथिव्या[10]श्रयं कर्म क्रियां समारभमाणा विहिंसन्ति, तथाऽनेन च [11]**पृथ्वीकर्मसमारम्भेण** पृथ्वीशस्त्रं समारभमाणो व्यापारयन् पृथिवीकायं नानाविधैः शस्त्रैर्व्यापादयन् **अनेकरूपान्** तदाश्रितान् उदक-वनस्पत्यादीन् **विविधं हिनस्ति** नानाविधैरुपायैर्व्यापाद[12]यतीत्यर्थः । एवं शाक्यादी[13]नां पार्थिवजन्तुवैरिणामयतित्वं प्रतिपाद्य [14]साम्प्रतं सुखाभिलाषितया कृत-कारिता-ऽनुमतिभिर्मनो-वाक्-कायलक्षणा प्रवृत्तिं दर्शयितुमाह—

---

१. **संजमो** ग घ । २. **भवति** घ ङ च । ३. **०मेषां ते अन०** क-गप्रती ऋते । ४. "**बोद्रः** इति मूर्खः" जै०वि०प० । ५. **०पभोगा०** च । ६. **तस्य त्यक्तम्** ङ । ७. **प्रवर्तन्ते** ग घ ङ । ८. **वा** घ च । ९. **०लक-ख०** घ ङ च । १०. **०श्रयकर्म** घ-ङप्रतिभ्यां विना । ११. **पृथ्वीकायस०** ग च, अत आरभ्याग्रे कपुस्तकं विमुच्य सर्वेष्वप्यादर्शेषु प्रायोऽसमानतया **पृथ्वी** स्थाने **पृथिवी**, **पृथिवी**स्थाने च **पृथ्वी** इति बहुधा समुपलभ्यते । १२. **०यन्तीत्यर्थः** क ख । १३. **०नां पृथिवीजन्तु०** ख । १४. **सम्प्रति** क-गप्रती ऋते ।

**[ सू०१३ ] तत्थ खलु भगवता परिण्णा पवेदिता । इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेउं से सयमेव पुढविसत्थं समारंभति अण्णेहिं वा पुढविसत्थं समारंभावेति अण्णे वा पुढविसत्थं समारंभंते समणुजाणति । तं से अहिताए, तं से अबोहीए ।**

**तत्थे**त्यादि । **तत्र** पृथिवीकायसमारम्भे **खलु**शब्दः वाक्यालङ्कारे **भगवता** श्री**वर्धमानस्वामि**ना परिज्ञानं **परिज्ञा** सा **प्रवेदिते**ति । इदमुक्तं भवति— भगवतेदमाख्यातं यथा एभिः[1] वक्ष्यमाणैः कारणैः कृत-कारिता-ऽनुमतिभिः सुखैषिणः पृथ्वीकायं समारभन्ते, तानि चामूनि—**अस्यैव जीवितस्य**[2] परिपेलवस्य **परिवन्दन-मानन-पूजनार्थं**[3] तथा **जाति-मरण-मोचनार्थं दुःख-प्रतिघातहेतुं** च सुखलिप्सुर्दुःखद्विट् **स्वय**मात्मनैव पृथिवीशस्त्रं समारभते, तथाऽन्यैश्च पृथ्वीशस्त्रं समारम्भयति, **पृथ्वीशस्त्रं समारभमाणानन्यांश्च** स एव **समनुजानीते** । एवमतीता-ऽनागताभ्यां मनो-वाक्-कायकर्मभिरायोजनीयम् ।

तदेवं प्रवृत्तमतेर्यद् भवति तद् दर्शयितुमाह—**तं से अहियाए तं से अबोहीए, तत्** पृथिवीकायसमारम्भणं **से** तस्य कृत-कारिता-ऽनुमतिभिः पृथ्वीशस्त्रं समारभमाणस्यागामिनि कालेऽ**हिताय** भवति, **तदेव** च**अबोधि**लाभायेति, न हि प्राणिगणोपमर्दनप्रवृत्तानामणीयसाऽपि हितेना-ऽऽयत्यां[4] योगो भवतीत्युक्तं भवति ।

यः पुनर्भगवतः सकाशात् तच्छिष्यानगारेभ्यो वा विज्ञाय पृथ्वीसमारम्भं पापात्मकं भावयति[5] स एवं मन्यत इत्याह—**से त्त**[6]मित्यादि । **सः** ज्ञातपृथ्वीजीवत्वेन विदितपरमार्थः पृथ्वीशस्त्र-समारम्भमहितं सम्यगवबुध्यमानः **आदानीयं** ग्राह्यं सम्यग्दर्शनादि **सम्यगुत्थाय** अभ्युपगम्य, केन प्रत्ययेन ? इति

१. **एभिः का०** ख । २. **०तव्यस्य** ख, **०तस्य पेल०** क । ३. **०पूजार्थं** क । ४. **०यत्या** घ । ५. **विभावयति** ख । ६. **से तमि०** ख घ ।

दर्शयति—**श्रुत्वा** अवगम्य साक्षाद् **भगवतो**ऽ**नगाराणां** वा समीपे । ततः **इह** मनुष्यजन्मनि **एकेषां** प्रतिबुद्धतत्त्वानां साधूनां **ज्ञातं भवतीति** ।

**[ मू०१४ ] से तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णातं भवति—एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु निरए ।**

**इच्चत्थं गढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं पुढविकम्मसमारंभेणं पुढविसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ।**

यद् ज्ञातं भवति तद् दर्शयितुमाह—**एसे**त्यादि । य **एष** पृथ्वीशस्त्रसमारम्भः, **खलुः** अवधारणे, कारणे कार्योपचारं कृत्वा नड्वलोदक[१]पादरोग[२]न्यायेनैष एव **ग्रन्थः** अष्टप्रकारकर्मबन्धः । तथैष एव पृथ्वीसमारम्भो मोहहेतुत्वाद् **मोहः** कर्मबन्धविशेषो दर्शन-चारित्रभेदोऽष्टाविंशतिविधः । तथैष [३]एव मरणहेतुत्वाद **मारः** आयुष्क[४]क्षयलक्षणः । तथैष एव नरकहेतुत्वाद् **नरकः** [५]सीमन्ता[६]दिर्भूभागः, अनेन चासाता[७]वेदनीयमुपात्तं भवति । कथं पुनरेकप्राणिव्यापादनप्रवृत्तावष्टविधकर्मबन्धं करोति ? इति उच्यते—मार्यमाणजन्तुज्ञानावरोधित्वाद् ज्ञानावरणीयं बध्नाति, एवमन्यत्राप्यायोजनीयमिति ।

अन्यदपि तेषां ज्ञातं भवतीति दर्शयितुमाह—**इच्चत्थ**मित्यादि । इत्येवमर्थम् आहारभूषणोपकरणार्थं तथा परिवन्दन-मानन-पूजनार्थं[८] दुःखप्रतिघातहेतुं च **गृद्धः** मूर्छितः **लोकः** प्राणिगणः । एवंविधेऽप्यतिदुरितनिचयविपाकफले पृथ्वीकायसमारम्भेऽज्ञानवशाद् मूर्छितस्त्वेतद् विधत्त इति दर्शयति- **यद्** यस्माद् **इमं** पृथ्वीकायं **विरूपरूपैः** शस्त्रैः [९]पृथ्वीकायं समारभमाणो **हिनस्ति**,

---

१. ०दकं पा० कसंज्ञकादर्शेन विना । २. ०ग इति न्या० घ ङ च । ३. एव च म० ख । ४. ०ष्ककर्मक्षय० ग । ५. सीमन्तकादि० ग घ ङ च । ६. ०दिभूभा० ख घ । ७. ०सातवे० ख । ८. ०पूजार्थं च । ९. पृथिवीकर्म समा० क खप्रती ऋतेऽन्यत्र ।

[1]पृथ्वीकायसमारम्भेण च पृथिव्येव शस्त्रं स्वकायादेः [2]पृथिव्यां वा शस्त्रं हल-[3]कुद्दालादि तत् समारभते, पृथिवीशस्त्रं समारभमाणश्चान्याननेकरूपान् प्राणिनः द्वीन्द्रियादीन् विविधं हिनस्तीति । स्यादारेका-ये हि न पश्यन्ति न शृण्वन्ति न जिघ्रन्ति न गच्छन्ति कथं पुनस्ते वेदनामनुभवन्तीति ग्रहीतव्यम् ? अमुष्यार्थस्य प्रसिद्धये दृष्टान्तमाह—

**[ सू०१५ ] से बेमि—अप्पेगे अंधमब्भे अप्पेगे अंधमच्छे, अप्पेगे पादमब्भे २★, अप्पेगे गुप्फमब्भे २, अप्पेगे जंघमब्भे २, अप्पेगे जाणुमब्भे २, अप्पेगे ऊरुमब्भे २, अप्पेगे कडिमब्भे २, अप्पेगे णाभिमब्भे २, अप्पेगे उदरमब्भे २, अप्पेगे पासमब्भे २, अप्पेगे पिट्ठिमब्भे २, अप्पेगे उरमब्भे २ अप्पेगे हिययमब्भे २, अप्पेगे थणमब्भे २, अप्पेगे खंधमब्भे २, अप्पेगे बाहुमब्भे २, अप्पेगे हत्थमब्भे २, अप्पेगे अंगुलिमब्भे २, अप्पेगे णहमब्भे २, अप्पेगे गीवमब्भे २, अप्पेगे हणुमब्भे २, अप्पेगे होट्ठमब्भे २, अप्पेगे दंतमब्भे २, अप्पेगे जिब्भमब्भे २, अप्पेगे तालुमब्भे २, अप्पेगे गलमब्भे २, अप्पेगे गंडमब्भे २, अप्पेगे कण्णमब्भे २, अप्पेगे णासमब्भे २, अप्पेगे अच्छिमब्भे २, अप्पेगे भमुहमब्भे २, अप्पेगे णिडालमब्भे २, अप्पेगे सीसमब्भे २, अप्पेगे संपमारए, अप्पेगे उद्दवए ।**

**से बेमी**त्यादि सोऽहं पृष्टो भवता पृथ्वीकायवेदनां ब्रवीमि । [4]अथवा से इति तच्छब्दार्थे वर्तते, यत् त्वया पृष्टस्तदहं ब्रवीमि । **अपि**शब्दः यथानामशब्दार्थे, यथा नाम कश्चिज्जात्यन्धो बधिरो मूकः कुष्ठी पङ्गुः अनभिनिर्वृत्तपाण्याद्य-

१. **पृथिवीकर्मसमा०** ख घ च । २. **०थिव्या वा** घ । ३. **०कुद्दाला०** च । ★ अत्र २ अङ्केन '**अप्पेगे पादमच्छे**' इति ज्ञेयम् । एवमग्रेऽपि सर्वत्रास्मिन् सूत्रेऽवगन्तव्यम् ॥ ४. **यदि वा** ख घ ङ च ।

वयवविभागो **मृगापुत्रवत्** पूर्वकृताशुभकर्मोदयाद् हिता-ऽहित-प्राप्ति-परिहार-विमुखोऽतिकरुणां दशां प्राप्तः तमेवंविधमन्धादिगुणोपेतं कश्चित् कुन्ताग्रेण **अब्भे** इति आभिन्द्यात्, तथाऽपरः कश्चिदन्धमाच्छिन्द्यात् । स च भिद्यमानाद्यवस्थायां न पश्यति, न शृणोति, मूकत्वाद् नोच्चै रारटीति, किमेतावता तस्य वेदनाऽभावो जीवाभावो वा शक्यो विज्ञातुम् ? एवं पृथ्वीजीवा अप्यव्यक्तचेतना जात्यन्ध-बधिर-मूक-पङ्ग्वादिगुणोपेतपुरुषवदिति । यथा वा पञ्चेन्द्रियाणां परिस्पष्ट-चेतनानां **अप्पेगे पायमब्भे** इति यथा[1] नाम कश्चित् पादमाभिन्द्याद् आच्छिन्द्या-द्वेति, एवं गुल्फादिष्वप्यायोजनीयमिति । एवं जङ्घा-जानु-ऊरु-कटी[2]-नाभि-उदर-पार्श्व-पृष्ठ-उरो-हृदय-स्तन-स्कन्ध-बाहु-हस्ता-ऽङ्गुलि-नख-ग्रीवा-हनुक-ओष्ठ[3]-[दन्त-]जिह्वा-तालु-गल-गण्ड-कर्ण-नासिका-ऽक्षि-भ्रू-ललाट-शिरःप्रभृतिष्ववयवेषु भिद्यमानेषु छिद्यमानेषु वा वेदनोत्पत्तिर्लक्ष्यते । एवमेषामुत्कटमोहाज्ञानभाजां स्त्यानर्द्ध्युदयादव्यक्तचेतनानामव्यक्तैव[4] वेदना भवतीति ग्राह्यम् । अत्रैव दृष्टान्तान्तरं दर्शयितुमाह—**अप्पेगे संपमारए अप्पेगे उद्दवए** यथा नाम कश्चित् सम् एकीभावेन प्रकर्षेण प्राणानां मारणम् अव्यक्तत्वापादनं कस्यचित् कुर्यात्, मूर्च्छामापादयेदित्यर्थः[5], तथाऽवस्थं च यथा नाम कश्चिद् अपद्रापयेत्[6] प्राणेभ्यो व्यपरोपयेत्, न चासौ तां वेदनां[7] स्फुटमनुभवति, अस्ति चाव्यक्ता तस्यासौ वेदनेति[8] । एवं पृथिवीजीवानामपि[9] द्रष्टव्यमिति ।

पृथिवीकायिकानां जीवत्वं प्रसाध्य तथा नानाविधशस्त्रसम्पाते वेदनां चाविर्भाव्याधुना तद्वधे बन्धं[10] दर्शयितुमाह—

## [ सू०१६ ] एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा

---

१. ०ति दर्शयति । एवं कप्रत्या विना । २. ०कटि० घ ङ । ३. ०ष्ठ-तालु-जिह्वा-गल० क ग । ४. ०नर्द्ध्यद्युदया० ग च । ५. ०मासाद० क । ६. ०द्रावयेत् ख । ७. ०नां अनुभ० ख । ८. चेतनेति । ख च । ९. ०वानां द्रष्ट० क । १०. ०न्धं प्रतिपादयन्नाह घ ङ च ।

**अपरिण्णाता भवंति । एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाता भवंति ।**

**एत्थ सत्थे**त्यादि । **अत्र** पृथ्वीकाये[1] **शस्त्रं** द्रव्य-भाव[2]भिन्नम् । तत्र द्रव्यशस्त्रं स्वकाय-परकाय-उभयरूपम् । भावशस्त्रं त्वसंयमो दुःप्रणिहितमनो-वाक्-कायलक्षणः । एतद् द्विविधमपि शस्त्रं समारभमाणस्य इत्येते खनन-कृष्याद्यात्मकाः समारम्भा बन्धहेतुत्वेन अपरिज्ञाताः अविदिता[3] भवन्ति । एतद्विपरीतस्य परिज्ञाता भवन्तीति दर्शयितुमाह—

**एत्थे**त्यादि । अत्र पृथिवीकाये द्विविधमपि शस्त्रम् असमारभमाणस्य अव्यापारयत इत्येते प्रागुक्ताः कर्मसमारम्भाः परिज्ञाताः विदिता भवन्ति । अनेन च विरत्यधिकारः प्रतिपादितो भवतीति तामेव विरतिं स्वनामग्राहमाह—

**[ सू०१७ ] तं परिण्णाय मेहावी णेव सयं पुढविसत्थं समारभेज्जा, णेवऽण्णेहिं पुढविसत्थं समारभावेज्जा, णेवऽण्णे पुढविसत्थं समारभंते समणुजाणेज्जा ।**

**त**मित्यादि । तं पृथिवीकायसमारम्भे बन्धं **परिज्ञाय** असमारम्भे चाऽबन्धमिति **मेधावी** कुशलः एतत् कुर्यादिति दर्शयति—**नैव** पृथिवीशस्त्रं द्रव्य-भावभिन्नं समारभेत, नापि तद्विषयोऽन्यैः समारम्भः कारयितव्यः, **न चान्यान्** पृथिवीशस्त्रं समारभमाणान् समनुजानी[4]यात् । एवं मनो-वाक्-काय-कर्मभि[5]रतीताऽनागतकालयोरप्यायोजनी[6]यम् । ततश्चैवं कृतनिवृत्तिरसौ मुनिरिति व्यपदिश्यते, न शेष इति दर्शयन्नुपसञ्जिहीर्षुराह—

**[ सू०१८ ] जस्सेते पुढविकम्मसमारंभा परिण्णाता भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ।**

**जस्से**त्यादि । यस्य विदितपृथ्वीजीववेदनास्वरूपस्य एते पृथ्वीविषयाः

---

१. ०ये **द्विविधमपि शस्त्रं** ख । २. **०वशस्त्रम्** । क । ३. **भवन्तीति०** । घ ङ च । ४. **०यादिति । एवं** ख ङ च । ५. **०रनागता-ऽतीतकाल०** क घ ङ । ६. **०यमिति । तत०** ख च ।

कर्मसमारम्भाः खनन-कृष्याद्यात्मकाः कर्मबन्धहेतुत्वेन परिज्ञाता भवन्ति ज्ञपरिज्ञया[1], प्रत्याख्यानपरिज्ञया च परिहृता भवन्ति, हुः अवधारणे, स एव मुनिर्द्विविधयाऽपि परिज्ञया परिज्ञातं कर्म सावद्यानुष्ठानम्[2] अष्टप्रकारं वा कर्म येन स परिज्ञातकर्मा, नापरः **शाक्यादिः । ब्रवीमि** इति[3] पूर्ववदिति ।

**शस्त्रपरिज्ञाया[4] द्वितीय[5] उद्देशकः समाप्तः[6] ॥**

● ● ●

---

१. **०या, तथा प्रत्या०** ख ग च । २. **०वद्या( द्य )मनुष्ठा०** क । ३ **इति** घ ङप्रत्योर्नास्ति । ४. **०ज्ञायां** ग घ ङ । ५. **०तीयोद्दे०** ख च । ६. **०प्त इति** । च ।

गतः पृथिव्युद्देशकः । साम्प्रतमप्कायोद्देशकः समारभ्यते[1] । तस्य[2] चायमभिसम्बन्धः—इहानन्तरोद्देशके पृथ्वीकायजीवाः प्रतिपादिताः, तद्वधे[3] बन्धो विरतिश्च, साम्प्रतं क्रमायातस्याप्कायस्य जीवत्वं तद्वधे बन्धो विरतिश्च प्रतिपाद्यते[4] । अनेन सम्बन्धेनायातस्यास्योद्देशकस्य चत्वार्यनुयोगद्वाराणि वाच्यानि । तत्र नामनिष्पन्ने निक्षेपे अप्कायोद्देशकः । तत्र पृथिवीकायजीवस्वरूपसमधिगतये[5] यानि नव निक्षेपादीनि द्वाराण्युक्तानि अप्कायेऽपि तान्येव समानतया[6]ऽतिदेष्टुकामः कानिचिद् विशेषाभिधित्सयोद्धर्तुकामश्च **निर्युक्तिकारो** गाथामाह—

**आउस्स वि[7] दाराइं ताइं जाइं[8] हवंति पुढवीए ।**
**णाणत्ती उ[9] विहाणे परिमाणुवभोग सत्थे य ॥१०६॥**

**आउस्से**त्यादि । अप्कायस्यापि[10] तान्येव द्वाराणि भवन्ति यानि पृथिव्याः प्रतिपादितानीति । **नानात्वं**[11] भेदरूपं **विधान-परिमाण-उपभोग-शस्त्र**विषयं द्रष्टव्यम् । चशब्दाद् लक्षणविषयं च । तुशब्दोऽवधारणार्थः[12], एतद्गतमेव नानात्वम्, नान्यगतमिति ॥१०६॥ । तत्र **विधानं** प्ररूपणा, तद्गतं नानात्वं दर्शयितुमाह—

**दुविहा[13] य आउजीवा सुहुमा तह बायरा य लोयम्मि ।**
**सुहुमा य सव्वलोए [14]पंचेव य बायरविहाणा ॥१०७॥**

[15]**दुविहा ये**त्यादि । स्पष्टा ॥१०७॥ तत्र पञ्च बादरविधानानि दर्शयितुमाह—

**सुद्धोदए य [16]उस्सा हिमे य महिया य हरतणू चेव ।**
**बायर आउविहाणा पंचविहा वण्णिया एए ॥१०८॥** दारं ॥

**सुद्धोदये**त्यादि । शुद्धोदकं तडाग-समुद्र-नदी-ह्रदा-ऽवटादिगतमव-

---

१. **प्रारभ्यते** ख ग च । २. **अस्य** ग । ३. **तद्वधो** ख । ४. ०ते । **इत्यनेन** भ च । ५. ०**समभिगतये** ख । ६. ०**या निर्देष्टुकामः** च । ७. **ति** छ । ८. **जायं** ख ज झ । ९. **य** ख । १०. ०**यस्य ता**० ग । ११. ०**त्वं विभेदरूपं** च, ०**त्वं भेदो विधान**० ग । १२. ०**णार्थे एत**० च । १३. ०**हा आउज्जीवा** क ट, ०**हा इहाऽऽउजीवा** ख । १४. **पंचविहा पुण बायर**० ज । १५. **दुविहेत्यादि** ख । १६. **ओसा** ख ज झ ।

श्यायादिरहितमिति । अवश्यायः रजन्यां यः स्नेहः पतति । **हिमं** तु शिशिरसमये शीतपुद्गलसम्पर्काद् जलमेव कठिनीभूतमिति । गर्भमासादिषु सायं प्रातर्वा धूमिका[१]वपातो **महिका** इत्युच्यते । वर्षा-शरत्कालयोर्हरिताङ्कुरमस्तकस्थित[२]-जलबिन्दुर्भूमिस्नेहसम्पर्कोद्भूतो **[३]हरतणु**शब्देनाभिधीयते । एवमेते पञ्च बादराप्कायविधयो व्यावर्णिताः ।

ननु च **[४]प्रज्ञापना**यां बादराप्कायभेदा बहवः परिपठिताः, तद्यथा—करक-शीत-उष्ण-क्षार-क्षत्र-कटु-[५]अम्ल-लवण-वरुण-कालोद-पुष्कर-क्षीर-घृत-इक्षुरसादयः । [६]कथं पुनस्तेषामत्र सङ्ग्रहः ? उच्यते—करकस्तावत्कठिनत्वाद् हिमान्तःपाती, शेषाश्च स्पर्श-रस-स्थान-वर्णमात्रभिन्नत्वाद् न शुद्धोदकमतिवर्तन्ते । यद्येवं **प्रज्ञापना**यां किमर्थो[७]ऽपरभेदानां पाठः ? उच्यते—स्त्री-बाल-मन्दबुद्ध्यादिप्रतिपत्त्यर्थमिति । इहापि कस्मान्न तदर्थं पाठः[८] ? उच्यते—**प्रज्ञापनाध्ययन**मुपाङ्गत्वाद् आर्षम्, [९]तत्र युक्तः सकलभेदोपन्यासः स्त्र्याद्यनु[१०]ग्रहाय, निर्युक्तयस्तु सूत्रार्थं [११]पिण्डीकुर्वन्त्यः प्रवर्तन्त इत्यदोषः ।

[१२]एते बादराप्कायाः समासतो द्वेधा—पर्याप्तका अपर्याप्तकाश्च । तत्रापर्याप्तका वर्णादीनसम्प्राप्ताः । पर्याप्तकास्तु वर्ण-गन्ध-रस-स्पर्शादेशैः सहस्राग्रशो भिद्यन्ते । ततश्च सङ्ख्येयानि योनिप्रमुखानि शतसहस्राणि भवन्ति भेदानामित्यवगन्तव्यम् । संवृतयोनयश्चैते । सा च योनिः सचित्ता-ऽचित्त-मिश्र-भेदात् त्रिधा । पुनश्च शीत-उष्ण-उभयभेदात् त्रिधैव । एवं गण्यमाना योनीनां सप्त लक्षा [१३]भवन्ति । प्ररूपणानन्तरं परिमाणद्वारमाह—

**जे बायरपज्जत्ता पयरस्स असंखभागमेत्ता ते ।**
**सेसा तिन्नि वि रासी वीसं लोगा असंखेज्जा ॥१०९॥** दा०॥

---

१. **०कापातो** कपुस्तकादृते । २. **०स्थितो जल०** ग । ३. **हरतनुश०** ग । ४. से किं तं बादरआउकाइया ? बादरआउकाइया अणेगविहा पन्नत्ता, तंजहा—उस्सा हिमए महिया करए हरतणुए सुद्धोदए सीतोदए उसिणोदए खारोदए खट्टोदए अंबिलोदए लवणोदए वारुणोदए खीरोदए घओदए खोतोदए रसोदए, जे यावन्ने तहप्पगारा । (प्रज्ञा० प० २८ सू० १६) ५. **०आम्ल०** क । ६. **शेषास्तु** ख ग च । ७. **किमनर्थो०** च । ८. **पाठ इति उच्यते** ख च । ९. **तत्र च युक्तः** ख । १०. **०ग्रहार्थम्** ख । ११. **सम्पिण्डीकु०** ख । १२. **त एते बा०** कप्रतिमृते । १३. **भवन्तीति** च ।

**जे बायरे**त्यादि । ये बादराप्कायपर्याप्तकास्ते संवर्तितलोकप्रतरासङ्ख्येयभागवर्तिप्रदेशराशिपरिमाणाः । शेषास्तु त्रयोऽपि राशयः **विष्वक्** पृथगसङ्ख्येयलोकाकाशप्रदेशराशिपरिमाणा इति । विशेषश्चायम्—बादरपृथिवीकायपर्याप्तकेभ्यो बादराप्कायपर्याप्तका असङ्ख्येयगुणाः, बादरपृथ्वीकायापर्याप्तकेभ्यो बादराप्कायापर्याप्तका असङ्ख्येयगुणाः, सूक्ष्मपृथिवीकायापर्याप्तकेभ्यः सूक्ष्माप्कायापर्याप्तका विशेषाधिकाः, सूक्ष्मपृथिवीकायपर्याप्तकेभ्यः सूक्ष्माप्कायपर्याप्तका विशेषाधिकाः ॥ साम्प्रतं परिमाणद्वारानन्तरं चशब्दसूचितं लक्षणद्वारमाह—

**जह हत्थिस्स सरीरं [१]कललावत्थस्स अहुणो( ऽहुणु )ववन्नस्स ।**
**[२]जह वोदगअंडस्स व एसुवमा आउजीवाणं ॥११०॥** दा० ॥

**जहे**त्यादि । अथवा पर आक्षिपति—नाप्कायो जीवः, [३]तल्लक्षणायोगात्, प्रश्रवणादिवदिति । अस्य हेतोरसिद्धतोद्भावनार्थं दृष्टान्तद्वारेण लक्षणमाह—**जहे**त्यादि, यथा हस्तिनः शरीरं कललावस्थायामधुनोत्पन्नस्य द्रवं चेतनं च दृष्टम् एवम[४]प्कायोऽपीति । यथा वा उदक[५]प्रधानमण्डकमुदकाण्डकम् अधुनोत्पन्नमित्यर्थः, [६]तन्मध्ये व्यवस्थितं रसमात्रमसञ्जातावयवमनभिव्यक्तचञ्च्वा[७]दिप्रविभागं चेतनावद् दृष्टम् । **एषैवोप[८]माऽब्जीवानाम**पीति । हस्तिशरीरकललग्रहणं च महाकायत्वात् तद् बहु भवतीत्यतः सुखेन प्रतिपद्यते । अधुनोपपन्नग्रहणं सप्ताहपरिग्रहार्थम्, यतः सप्ताहमेव कललं भवति, परतस्त्वर्बुदादि । [९]अण्डकेऽप्युदकग्रहणमेवमर्थमेव । प्रयोगश्चायम्—सचेतना आपः, शस्त्रानुपहतत्वे सति द्रवत्वात्, हस्तिशरीरोपादानभूतकललवत् । विशेषणोपादानात् प्रश्रवणादिव्युदासः । तथा सात्मकं तोयम्, अनुपहत[१०]द्रवत्वात्, अण्डकमध्य[११]स्थितकलल-

---

१. **कललाकलियस्स अहु०** छ ञ । २. होइ उदगंडगस्स य **एसुवमा सव्वजीवाणं** ख ठ,....**व तओवमा आउजी०** छ, ....**य तओवमा आउजी०** ज झ, ...**वि तयोवमा आउजी०** ञ । ३. **तल्लक्षणरहितत्वात्** ख च । ४. **०प्कायेऽपीति** क । ५. **०प्रधानाण्डक०** च । ६. **तन्मध्यव्य०** ख ग । ७. **०दिविभागं** क । ८. **०मापजीवा०** क, **०माप्कायजीवा०** ख । ९. **अण्डकेषूदक०** क, "**उदकग्रहणमेव** इति सप्ताहःपरिग्रहार्थम्" जै०वि०प० । १०. **०द्रव्यत्वात्** ख ग घ । ११. **०स्थकलल०** ख च ।

वदिति । तथा आपो जीवशरीराणि, छेद्यत्वाद् भेद्यत्वाद् उत्क्षेप्यत्वाद् भोज्यत्वाद् भोग्यत्वाद् घ्रेयत्वाद् रसनीयत्वात् [१]स्पर्शनीयत्वात् [२]दृश्यत्वाद् [३]द्रव्यत्वाद्, एवं सर्वेऽपि शरीरधर्मा हेतुत्वेनोपन्यसनीयाः, गगनवर्जभूतधर्माश्च रूपवत्त्वा-ऽऽकारवत्त्वादयः । सर्वत्र चायं दृष्टान्तः—सास्ना-विषाणादिसङ्घातवदिति । ननु च रूपवत्त्वा-ऽऽकारवत्त्वाद[४]यो धर्माः परमाणुष्वपि दृष्टा इत्यनैकान्तिकता ? नैतदेवम्, यदत्र छेद्यत्वादि हेतुत्वेनोपन्यस्तं तत् सर्वमिन्द्रियव्यवहारानुपाति, न च तथा परमाणवः, [५]अतः कारणाद् अतीन्द्रियपरमाणुव्यवच्छेदः । यदि वा नैवासौ विपक्षः, सर्वस्य पुद्गलद्रव्यस्य द्रव्यशरीराभ्युपगमात्, जीवसहिता-ऽसहितत्वं [६]तु विशेषः, उक्तं च—

**तणवोऽ[७]णब्भाइविगारमुत्तजाइत्तओऽ[८]णिलंता उ ।**
**सत्था-ऽसत्थहया उ, निज्जीव-सजीव[९]रूवा उ ॥ [ विशेषाव० १७५१ ]**

एवं शरीरत्वे सिद्धे सति प्रमाणम्—सचेतना हिमादयः, [१०]कदाचिद् अप्कायत्वाद्, इतरोदकवदिति । तथा सचेतना आपः, क्वचित् खातभूमिस्वा-भाविकसम्भवत्वात्, दर्दुरवत् । अथवा सचेतना अन्तरिक्षोद्भवा आपः, स्वाभाविकव्योमसम्भूत[११]सम्पातित्वाद्, मत्स्यवत्, अत एते एवंविधलक्षण-भाक्त्वाद् जीवा भवन्त्यप्कायाः । साम्प्रतमुपभोगद्वारमाह—

**ण्हाणे पियणे [१२]तह [१३]धोयणे य भत्तकरणे य सेए [१४]अ ।**
**आउस्स उ परिभोगो गमणा-ऽऽगमणे [१५]य जाणाणं ॥१११॥**

**ण्हाणे** इत्यादि । स्नान-पान-धावन-भक्तकरण-सेक-यानपात्रोडुप-गमना-ऽऽगमनादिरुपभोगः ॥१११॥ [१६]ततश्च तत्परिभोगाभिलाषिणो जीवा एतानि कारणान्युद्दिश्याप्कायवधे प्रवर्तन्त इति दर्शयितुमाह—

---

१. **स्पृश्यत्वात्** ख च । २. **दृश्यद्रव्यत्वाद्** क घ । ३. **द्रवत्वाद्** च । ४. **०यो भूतधर्माः** ख ग च । ५. **अतः प्रकरणाद्** कप्रतिमृते । ६. **च** घ ङ । ७. "**औ( अ )णब्भा** इति अनभ्रादिविकारमूर्तिजातित्वात्" जै०वि०प० । ८. "**अन( नि )लंता** इति पृथिव्यप्-तेजो-वायवः" जै०वि०प० । ९. **०रूवा उ** ख ग च । १०. **क्वचिद्** क-खप्रतिभ्यां विना । ११. **०सम्पातत्वाद्** ख घ ङ । १२. **तहा** झ । १३. **धोवणे** ञ । १४. **य** क-ठसंज्ञकादर्शा ऋते । १५. **य णावाणं** कप्रत्या विना । १६. **ततश्चैतत्परि०** ख ।

**एएहिँ कारणेहिं हिंसंती आउकाइए जीवे ।**
**सायं गवेसमाणा परस्स दुक्खं उदीरेंति ॥११२॥** दा०॥

[१]एएत्यादि । एभिः स्नाना-ऽवगाहनादिकैः कारणैरुपस्थितैर्विषयविष-मोहितात्मानो निष्करुणा अप्कायिकान् जीवान् हिंसन्ति व्यापादयन्ति । किमर्थमिति [२]आह—**सातं** सुखं तद् आत्मनः **अन्वेषयन्तः** प्रार्थयन्तः, हिता-ऽहितविचारशून्यमनसः कतिपयदिवसस्थायि[३]रम्ययौवनदर्पाध्मातचेतसः [४]सद-सद्विवेकरहिताः तथा विवेकिजनसंसर्गविकलाः **परस्य** [५]अप्कायादेर्जन्तुगणस्य दुःखम् असातलक्षणं तद् **उदीरयन्ति,** [६]असातावेदनीयमुत्पादयन्तीत्यर्थः, उक्तं च—

**एकं हि चक्षुरमलं सहजो विवेकस्तद्वद्भिरेव सह संवसतिर्द्वितीयम् ।**
**एतद् द्वयं भुवि न यस्य स तत्त्वतोऽन्धस्तस्याऽपमार्गचलने खलु कोऽपराधः ? ॥ [ ]**

इदानीं शस्त्रद्वारमुच्यते—

**[७]उस्सिंचण गालणा [८]धोयणे य उवकरण [९]कोस भंडे य ।**
**बायर आउक्काए एयं तु समासओ सत्थं ॥११३॥**

**उस्सिंचणे**त्यादि । शस्त्रं द्रव्य-भावभेदाद् द्विधा । द्रव्यशस्त्रमपि समास-विभागभेदाद् द्विधैव । तत्र समासतो द्रव्यशस्त्रमिदम्—ऊर्द्धं सेचनम् **उत्सेचनम्,** कूपादेः कोशादिनोत्क्षेपणमित्यर्थः । **गालनं** घनमसृणवस्त्रार्द्धान्तेन । **धावनं** वस्त्राद्युपकरण-चर्मकोश-घटादिभण्डकविषयम् । एवमादिकं **बादराप्काये एतत्** पूर्वोक्तं **समासतः** सामान्येन **शस्त्रम्** । **तु**शब्दो विभागापेक्षया विशेषणार्थः ॥११३॥ विभागतस्त्विदम्—

**किंची सकायसत्थं [१०]किंची परकाय तदुभयं किंचि ।**
**एयं तु दव्वसत्थं [११]भावे अस्संजमो सत्थं ॥११४॥**

---

१. एएहीत्यादि कप्रतिं विना । २. **दर्शयति** ख च । ३. **०रमणीययौवन०** ख च । ४. **सन्तः सद्विवेक०** ख-गप्रती ऋते । ५. **अबादेर्जन्तु०** कपुस्तकं विना । ६. **असातवे०** ख घ । ७. **ओसिंचण** क छ । ८. **धोवणे** ञ । ९. **मत्त भंडे य** ख ठ । १०. **किंचि य पर०** ञ । ११. **भावे य असंजमो** ज झ ठ, **०तु असंजमो** ञ ।

**किंची**[1]त्यादि । किञ्चित् स्वकायशस्त्रं नादेयं [2]तडागस्य । [3]किञ्चित् परकायशस्त्रं मृत्तिका-स्नेह-क्षारादिकम् । किञ्चिच्चोभयम् उदक[4]मिश्रा मृत्तिका उदकस्येति । भावशस्त्रं त्वसंयमः प्रमत्तस्य दुष्प्रणिहितमनो-वाक्-कायलक्षण इति ॥११४॥ शेषद्वाराणि पृथिवीकायवद् नेतव्यानि इति दर्शयितुमाह—

**[5]सेसाणि उ दाराइं ताइं जाइं हवंति पुढवीए ।**
**एवं आउद्देसे निज्जुत्ती कित्ति[6]या होइ ॥११५॥**

**सेसाणी**त्यादि । **शेषाणि** इति उक्तशेषाणि निक्षेप-वेदना-व[7]ध-निवृत्तिरूपाणि । **तान्ये**[8]वात्र द्रष्टव्यानि **यानि** [9]**पृथिव्यां** [10]**भवन्ती**ति । **एवम्** उक्त-प्रकारेणा**प्कायोद्देशके निर्युक्तिः** निश्चयेनार्थघटना **कीर्तिता** प्रदर्शिता **भवती**ति ॥११५॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम्, तच्चेदम्—

## [ सू०१९ ] से बेमि-से जहा वि अणगारे उज्जुकडे णियागपडिवण्णे अमायं कुव्वमाणे वियाहिते ।

**से बेमी**त्यादि । अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके परिसमाप्ति-सूत्रे 'पृथिवीकायसमारम्भव्यावृत्तो मुनिः' इत्युक्तम्, न चैतावता सम्पूर्णो मुनिर्भ[11]वति, यथा च भवति तथा [12]दर्शयति । तथाऽऽ[13]दि[14]सूत्रेण सम्बन्धः—**सुधर्मस्वामी** इदमाह श्रुतं मया भगवदन्तिके यत् प्राक् प्रतिपादितम् अन्यच्चेदमिति । एवं परम्परसूत्रसम्बन्धोऽपि [15]प्राग्वद् वाच्यः ।

**से** शब्दः तच्छब्दार्थे[16] । स यथा पृथ्वीकायसमारम्भव्यावृत्त्युत्तरकालं सम्पूर्णानगारव्यपदेशभाग् भवति तदहं ब्रवीमि । **अपिः**[17] समुच्चये[18], यथा चाऽनगारो

---

१. **किंची० गाहा किञ्चित्** च । २. **तटाकस्य** च । ३. **किञ्चिच्च पर०** ख च । ४. **०मिश्रमृत्तिका** च । ५. **सेसाइं दाराइं** जप्रत्या विना । ६. **०या एसा** ख, **०या हुंति** ज झ, **०या हुस्स** ज । ७. **०बन्ध०** ख ग । ८. **०वात्रापि द्रष्ट०** कपुस्तकेन विना । ९. **पृथिव्या** ग । १०. **भवन्ति । एवम्** घ ङ । ११. **०वतीति, यथा** ख । १२. **दर्शयितुमाह । तथा०** ख च । १३. 'सुयं मे आउसं !०' इत्यादिप्रथमोद्देशकस्याद्यसूत्रेणेत्यर्थः । १४. **०सूत्रेणायं सम्ब०** ग । १५. अवलोक्यतां द्वितीयोद्देशकप्रथमसूत्रटीका । १६. **०र्थे । तद्यथा पृ०** ख । १७. **अपि** ग च । १८. **०ये, स यथा** ग च ।

न भवति तथा च ब्रवीमि **अणगारा**[१] **मो त्ति एगे पवदमाणे**त्यादिनेति । न विद्यते अगारं गृ[२]हमस्येत्यनगारः । इह च यत्यादिशब्दव्युदासेनानगार-शब्दोपादानेनैतदाचष्टे—गृहपरित्यागः प्रधानं मुनित्वकारणम्, तदाश्रयत्वात् सावद्यानुष्ठानस्य ।

निरवद्यानुष्ठायी च[३] मुनिरिति दर्शयति—**उज्जुकडे** त्ति ऋजुः अकुटिलः संयमो दुष्प्रणिहितमनो-वाक्-कायनिरोधः सर्वसत्त्वसंरक्षणप्रवृत्तत्वाद् दयैकरूपः सर्वत्राकुटिलगतिरिति यावत्, यदि वा मोक्षस्थानगमनर्जुश्रेणिप्र[४]तिपत्तिः सर्वसंवरसंयमात्, कारणे कार्योपचारं कृत्वा संयम एव सप्तदशप्रकार ऋजुः, तं करोतीति **ऋजुकृत्** ऋजुकारीत्यर्थः । अनेन चेदमुक्तं भवति—अशेषसंयमानुष्ठायी सम्पूर्णोऽनगारः[५] ।

एवंविधश्चेदृग् भवतीति दर्शयति—**नियागपडिवण्णे** त्ति, यजनं यागः, नियतो निश्चितो वा यागो नियागो मोक्षमार्गः, [६]सङ्गतार्थत्वाद् धातोः सम्यग्ज्ञान-दर्शन-चारित्रात्मतया गतं सङ्गतमिति । तं नियागं सम्यग्दर्शन-ज्ञान-चारित्रात्मकं मोक्षमार्गं प्रतिपन्नो नियागप्रतिपन्नः । पाठान्तरं वा **निकायप्रतिपन्नः**, निर्गतः कायः औदारिकादिर्यस्माद् यस्मिन् वा सति स निकायः मोक्षः, तं प्रतिपन्नो निकायप्रतिपन्नः, तत्कारणस्य सम्यग्दर्शनादेः स्वशक्त्यानुष्ठानात् ।

[७]स्वशक्त्यानुष्ठानं चामायाविनो भवतीति दर्शयति—**अमायं कु**[८]**व्वमाणे** त्ति, माया सर्वत्र स्ववीर्यनिगूहनम्, न माया अमाया, ताम् कुर्वाणः अनिगूहित-बलवीर्यः संयमानुष्ठाने पराक्रममाणोऽनगारो व्याख्यात इति । अनेन च [९]तज्जातीयोपादाना[१०]द् अवशेषकषायापगमोऽपि द्रष्टव्य इति, उक्तं च—

**सोही य उज्जुभूयस्स, धम्मो सुद्धस्स चिट्ठइ**[११] ॥ [ उत्तरा० ] त्ति ।

---

१. **मो त्तेगे पव०** ख । २. **गृहमेषामित्यनगाराः । इह** घ ङ । ३. **स** च । ४. **०प्रतिपत्तेः** ख-ङप्रती विना । ५. **०रः । स एवं०** च । ६. "यज देवपूजासंगतिकरणदानेषु"-**पा०धा०** १००२ । ७. **स्वशक्त्यनुष्ठानं** च । ८. **कुव्वमाणो** ख ग । ९. "**तज्जातीय** इति । कषायजातीय" जै०वि०प० । १०. **०नात् शेष०** कसंज्ञकादर्शमृते । ११. **वड्डई ॥ इत्यादि । तदेव०** च, **चिट्ठइत्यादि । तदेव०** ख ।

तदेवमसावुद्धृतसकलमायावल्लीवितानः किं कुर्यात् ? इत्याह—

**[ सू०२० ] जाए सद्धाए णिक्खंतो तमेव अणुपालिया विजहित्ता विसोत्तियं ।**

[१]**जाए सद्धाए** इत्यादि । **यया श्रद्धया** प्रवर्धमान[२]संयमस्थानकण्डकरूपया **निष्क्रान्तः** प्रव्रज्यां गृहीतवान् **तामेव** श्रद्धामश्रान्तो यावज्जीवम् **अनुपालयेत्** [३]रक्षेदित्यर्थः । प्रव्रज्याकाले च प्रायशः प्रवृद्धपरिणाम एव प्रव्रजति, पश्चात् तु संयमश्रे[४]णीं प्रतिपन्नो वर्धमानपरिणामो वा हीयमानपरिणामो वा अवस्थितपरिणामो वेति । तत्र वृद्धिकालो हानिकालो वा समयाद्युत्कर्षेणान्तर्मौहूर्तिकः, नातः परं सङ्क्लेश-[५]विशुद्ध्यद्धे भवतः, उक्तं च—

**नान्तर्मुहूर्तकालमतिवृत्य शक्यं हि जगति सङ्क्लेष्टुम् ।**
**नापि विशोद्धुं शक्यं प्रत्यक्षो ह्यात्मनः सोऽर्थः ॥**
**उपयोगद्वयपरिवृत्तिः सा निर्हेतुका स्वभावत्वात् ।**
**आत्मप्रत्यक्षो हि स भावो व्यर्थाऽत्र हेतूक्तिः ॥** [　　　　]

[६]अवस्थितकालश्च द्वयो[७]र्वृद्धि-हानिलक्षणयोर्यवमध्यवज्रमध्ययोरष्टौ समयाः, तत ऊर्द्धमवश्यं पातात् । अयं च वृद्धि-हानि-अवस्थितरूपः परिणामः केवलिनां निश्चयेन गम्यः, न च्छद्मस्थानामिति । यद्यपि च प्रव्रज्याभिगमोत्तरकालं श्रुतसागरमवगाहमानः संवेगवैराग्यभावनाभावितान्तरात्मा कश्चित् प्रवर्धमानमेव परिणामं भजते, तथा चोक्तम्—

**जह जह सुयमवगाहइ अइसयरसपसरसंजुय[८]मउव्वं ।**
**तह तह [९]पल्हाइ मुणी नवनवसंवेग[१०]सद्धाओ ॥** [ बृ० क० भा० ११६७ ]

---

१. जाइ सद्धाइ इत्यादि ख, जाए सद्धाएत्यादि ग घ ङ च । २. ०संयमानुष्ठानकरणरूपया ग, ०संयमानुष्ठानकण्डकरूपया घ, ०संयमस्थानरूपया ख । ३. रक्षयेदित्यर्थः ख च । ४. ०श्रेणीप्रतिपन्नो ग घ च । ५. ०विशोद्ध्यद्धे ख च । ६. अवस्थितिकालश्च ग घ ङ। ७. "वृद्धि-हानिलक्षणयोः इति ज[हा-?]४ ५ ६ ७ ८ ७ ६ ५ ४ ३ २ वृद्धिहानिकालोऽप्ययमेव, नवरं व्यत्ययेन" जै०वि०प० । ८. ०मपुव्वं ख च । ९. पल्हाय ख । १०. ०सद्धाते क-खप्रती विना ।

तथापि स्तोक एव तादृक्, बहवश्च परिपतन्ति, अतोऽभिधीयते— **तामेवानुपालयेदि**ति । कथं पुनः कृत्वा श्रद्धामनुपालयेत् ? इत्याह—

[१]**विजहे**त्यादि, **विहाय** परित्यज्य **विश्रोतसिकां** शङ्काम् । सा च द्विधा— सर्वशङ्का देशशङ्का च । तत्र सर्वशङ्का किमस्ति आर्हतो [२]मार्गो न वा ? इति । देशशङ्का तु किं विद्यन्तेऽप्कायादयो [३]जीवविशेषाः प्रवचनेऽभिहितत्वात्, प्रस्पष्टचेतनात्मलिङ्गाभावाद् न विद्यन्ते इति वा ? इति । एवमादिका[४]मारेकां विहाय सम्पूर्णानगारगुणान् पालयेत् । यदि वा विश्रोतांसि द्रव्य-भावभेदाद् द्विधा । तत्र द्रव्यविश्रोतांसि नद्यादिश्रोतसां प्रतीपगमनानि । भावविश्रोतांसि तु मोक्षं प्रति सम्यग्दर्शनादिश्रोतसा प्रस्थितानां विरूपाणि प्रतिकूलानि गमनानि भावविश्रोतां[५]सि, तानि विहाय सम्पूर्णानगारगुणभाग् भवति, श्रद्धां चाऽनुपालयेदिति । पाठान्तरं वा **विजहित्ता पुव्वसंजोगं** पूर्वसंयोगः माता-[६]पित्रादिभिः, अस्य चोपलक्षणार्थत्वात् पश्चात्संयोगोऽपि श्वसुरादिकृतो ग्राह्यः, तं विहा[७]य परित्यज्य श्रद्धामनुपालयेदिति मीलनीयम् । तत्र यस्यायमुपदेशो दीयते यथा 'विहाय विश्रोतांसि तदनु [८]श्रद्धानुपालनं कार्यम्' स एवाभिधीयते—न केवलं भवानेवापूर्वमिदमनुष्ठानमेवंविधं करिष्यति, किन्त्वन्यैरपि महासत्त्वैः कृतपूर्वमिति दर्शयितुमाह—

## [ सू०२१ ] पणया वीरा महावीहिं ।

**प्रणताः** प्रह्वाः । **वीराः** परीषह-[९]उपसर्ग-कषायसेनाविजयात् । **वीथिः** पन्थाः, महांश्चासौ वीथिश्च **महावीथिः** सम्यग्दर्शनादिरूपो मोक्षमार्गो जिनेन्द्रचन्द्रादिभिः सत्पुरुषैर्द[१०]क्षैः प्रहतः, तं प्रति प्रह्वाः वीर्यवन्तः संयमानुष्ठानं कुर्वन्ति । ततश्चोत्तमपुरुषप्रहतोऽयं मार्ग इति प्रदर्श्य तज्जनितमार्गविश्रम्भो विनेयः संयमानुष्ठाने [११]सुखेनैव प्रवर्तयिष्यते । उपदेशान्तरमाह—

---

१. **विजहित्तेत्यादि** घ ङ च । २. **मार्ग उत न ? इति** । ख च । ३. **जीवा विशेष्यप्रवचने** च । ४. ०**माशङ्कां** ख । ५. ०**सि विहाय** ग । ६. ०**पित्रादिः अस्य** ग च । ७. ०**य त्यक्त्वा श्रद्धा०** ख ग च । ८. **श्रद्धापालनं** च । ९. ०**उपसर्गविजयात्** ख । १०. **दक्षैः** इति कप्रतिं विमुच्यान्यत्र न वर्तते । ११. **सुखेन प्रव०** ख च ।

**[ सू०२२ ] लोगं च आणाए अभिसमेच्चा अकुतो-भयं ।**

**से बेमि-णेव सयं लोगं अब्भाइक्खेज्जा, णेव अत्ताणं अब्भाइक्खेज्जा । जे लोगं अब्भाइक्खति से अत्ताणं अब्भाइक्खति, जे अत्ताणं अब्भाइक्खति से लोगं अब्भाइ-क्खति ।**

**लोगं चे**त्यादि । अथवा यद्यपि भवतो मतिर्न[1] क्रमतेऽप्कायजीवविषये असंस्कृतत्वात्, तथापि भगवदाज्ञेयमिति श्रद्धातव्यमित्याह—**लोगं च आणाए अभिसमेच्च अकुओभयं**, अत्राधिकृतत्वाद्[2] अप्कायलोको लोक-शब्देनाभिधीयते । अप्कायलोकं **च**शब्दाद् अन्यांश्च पदार्थान् आज्ञया मौनीन्द्रवचनेन[3] **आभिमुख्येन सम्यग् इत्वा** ज्ञात्वा यथा-अप्कायादयो जीवा इत्यवगम्य[4], न विद्यते कुतश्चिद्धेतोः केनापि प्रकारेण जन्तूनां भयं यस्मात् सोऽयम**कुतोभयः**[5] संयमः तम्, अनुपालयेदिति सम्बन्धः । यद्वा[6] **अकुतोभयः** अप्कायलोको यतोऽसौ न कुतश्चिद्भयमिच्छति[7] मरणभीरुत्वात्[8] तम् आज्ञया-ऽभिसमेत्या**नुपालयेद्** रक्षेदित्यर्थः[9] ।

अप्कायलोकमाज्ञया अभिसमेत्य यत् कर्तव्यं तदाह—**से बेमी**त्यादि । सोऽहं ब्रवीमि । **से**शब्दस्य युष्मदर्थत्वात् त्वां वा ब्रवीमि । **न स्वयम्** आत्मना लोकः अप्कायलोकोऽभ्याख्यातव्यः । अभ्याख्यानं नाम असदभियोगः, यथा—अचौरं चौरमित्याह । इह तु जीवा न भवन्त्यापः, केवलमुपकरणमात्रं घृत-तैलादिवत्, एषोऽसदभियोगः, हस्त्यादीनामपि जीवानामुपकरणत्वात् । स्यादारेका—नन्वेतदेवाभ्याख्यानं यद् अजीवानां जीवत्वापादनम् ? नैतदस्ति, प्रसाधितमपां प्राक् सचेतनत्वम्, यथा ह्यस्य शरीरस्याहंप्रत्ययादिभि-

---

१. **मतिर्नाक्रमते** क । २. **०ते । तमप्कायलोकं** ग च । ३. **०न्द्रप्रवचनेन** घ ङ च । ४. **इत्येवमभिगम्य** ख, **इत्येवमवगम्य** च । ५. **सोऽकुतोभयः** ख । ६. **यदि वा** ख च । ७. **कुतोऽपि भय०** ख । ८. **भीतत्वात्** ख । ९. **रक्षयेदित्यर्थः** च ।

हेतुभिरधिष्ठातात्मा व्यतिरिक्तः प्राक्[1] प्रसाधितः एवमप्कायोऽप्यव्यक्तचेतनया सचेतन इति प्राक् प्रसाधितः, न च प्रसाधितस्याभ्याख्यानं न्याय्यम् ।

अथापि स्यात्—'आत्मनोऽपि शरीराधिष्ठातुरभ्याख्यानं कर्तव्यम्', न च[3] तत् क्रियमाणं घटामियर्तीति दर्शयति—**नेव अत्ताणं अब्भाइक्खेज्ज**[2], नैव आत्मानं शरीराधिष्ठातारमहम्प्रत्ययसिद्धं ज्ञानाभिन्नगुणप्रत्यक्षं प्रत्याचक्षीत अपह्नुवीत[4] । ननु चैतदेव कथमवसीयते शरीराधिष्ठाताऽऽत्माऽस्तीति ? उच्यते—विस्मरणशीलो देवानाम्प्रिय उक्तमपि भाणयति, तथाहि—आहृतमिदं शरीरं केनचिद् अभिसन्धिमता, कफ-रुधिरा-ऽङ्गोपाङ्गादिपरिणतेः, अन्नादिवत्, तथोत्सृष्टमपि केनचिदभिसन्धिमतैव, आहृतत्वात्, अन्नमलवदिति[5], तथा न ज्ञानोपलब्धिपूर्वकः परिस्पन्दो भ्रान्तिरूपः, परिस्पन्दत्वात्, त्वदीयवचन-परिस्पन्दवत्, *तथा विद्यमानाधिष्ठातृव्यापारभाञ्जीन्द्रियाणि*[6], करणत्वात्, दात्रादिवत् । *एवं कुतर्कमार्गानुसारिहेतुमालोच्छेदः स्याद्वादपरशुना कार्यः* । अत एवंविधोपपत्तिसमधिगतमात्मानं शुभा-ऽशुभफलभाजं न प्रत्याचक्षीत । एवं च सति यो ह्यज्ञः कुतर्कतिमिरोपहतज्ञानचक्षुरप्कायलोकम् अभ्याख्याति प्रत्याचष्टे स सर्वप्रमाणसिद्धमात्मानमभ्याख्याति, यश्चात्मानम् अभ्याख्याति-नास्म्यहम्, स सामर्थ्याद् अप्कायलोकमभ्याख्याति, यतो ह्यात्मनि पाण्याद्यवयवोपेत-शरीराधिष्ठायिनि प्रस्पष्टलिङ्गेऽभ्याख्याते सति अव्यक्तचेतनालिङ्गोऽप्काय-लोकस्तेन सुतरामभ्याख्यातः । एवमनेकदोषोपपत्तिं विदित्वा नायमप्काय-लोकोऽभ्याख्यातव्य इत्यालोच्य साधवो नाप्कायविषयमारम्भं कुर्वन्तीति ॥

**शाक्यादयस्त्वन्यथोपस्थिता** इति दर्शयितुमाह—

**[ सू०२३ ] लज्जमाणा पुढो पास । 'अणगारा मो' त्ति एगे पवयमाणा, जमिणं विरूवरूवेहिं सत्थेहिं उदयकम्मसमारंभेणं उदयसत्थं समारंभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ।**

---

१. प्राक् साधितः ख । २. ०इक्खेज्जा क-घप्रती विना । ३. नात्मानं घ ङ । ४. अपह्नुयात् क घ ङ । ५. दन्तमलवदिति च । ६. ०याणीति करण० ख-चपुस्तके ऋते ।

**लज्जमाणे**त्यादि । लज्जमानाः स्वकीयं प्रव्रज्याभासं कुर्वाणाः, यदि वा सावद्यानुष्ठानेन लज्जमानाः लज्जां कुर्वाणाः । **पृथग्**[1] विभिन्नाः **शाक्य**[2]-**कणभुक्**-**कपिला**दिशिष्याः । **पश्य** इति शिष्यचोदना । अविवक्षितकर्मका अपि अकर्मका भवन्ति, यथा–पश्य मृगो धावति[3], द्वितीयार्थे वा प्रथमा सुब्व्यत्ययेन द्रष्टव्या, ततश्चायमर्थः–**शाक्या**दीन् गृहीतप्रव्रज्यानपि सावद्यानुष्ठानरतान् पृथग् विभिन्नान् पश्य ।

किं तैरसदाचरितं येनैवं प्रदर्श्यन्ते[4] ? इति दर्शयति–**अनगारा वयम्** इति एके **शाक्या**दयः प्रवदन्तः **यदिदं** यदेतत् काक्वा दर्शयति–**विरूपरूपैः** उत्सेचना-ऽग्निविध्यापनादिशस्त्रैः स्वकाय-परकायभेदभिन्नैः उदककर्म समारभन्ते[5] । उदककर्मसमारम्भेण च उदके शस्त्रं उदकमेव वा शस्त्रं समारभन्ते[6] । तच्च समारभमाणो अनेकरूपान् वनस्पति-द्वीन्द्रियादीन् विविधं हिनस्ति ।

**[सू०२४] तत्थ खलु भगवता परिण्णा पवेदिता— इमस्स चेव जीवितस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेतुं से सयमेव उदयसत्थं समारभति, अण्णेहिं वा उदयसत्थं समारभावेति, अण्णे वा उदयसत्थं समारभंते समणुजाणति । तं से अहिताए तं से अबोधीए ।**

**[सू०२५] से त्तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णातं भवति-एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु निरए ।**

---

१. पृथग् इति भिन्नाः क । २. शाक्य-उलूक-कणभुक्० ग च, शाक्य-औलौ( लू )क्य-कणभुक्० ङ । ३. धावतीति द्विती० च । ४. प्रदर्श्यते ङ च । ५. समारभते क । ६. समारभते क, समारम्भयन्ति ख ।

**इच्चत्थं गढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं उदयकम्मसमारंभेणं उदयसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ।**

तत्र खलु भगवता परिज्ञा प्रवेदिता, [1]यथा–अस्यैव जीवितव्यस्य परिवन्दन-मानन-पूजनार्थं जाति-मरण-मोचनार्थं दुःखप्रतिघातहेतुं यत् करोति तद् दर्शयति–स स्वयमेवोदकशस्त्रं समारभते, अन्यैश्चोदकशस्त्रं समारम्भयति, अन्यांश्चोदकशस्त्रं समारभमाणान् समनुजानीते । तच्चोदकसमारम्भणं तस्याहिताय भवति, तथा तदेवाबोधिलाभाय भवति । स एतत् सम्बुध्यमान आदानीयं सम्यग्दर्शनादि सम्यगुत्थाय अभ्युपगम्य श्रुत्वा भगवतोऽनगाराणां वाऽन्तिके इहैकेषां साधूनां यद् ज्ञातं भवति तद् दर्शयति–

**एषः** अप्कायसमारम्भो ग्रन्थः, एष खलु मोहः, एष खलु मारः, एष खलु नरकः । इत्येवमर्थं गृद्धो लोको यदिदं विरूपरूपैः शस्त्रैरुदककर्मसमारम्भेणोदकशस्त्रं समारभमाणोऽन्याननेकरूपान् प्राणिनो विविधं हिनस्तीति [2]एतत् प्राग्वद् व्याख्येयम् । पुनरप्याह–

**[ सू०२६ ] से बेमि–संति पाणा उदयणिस्सिया जीवा अणेगा । इहं च खलु भो अणगाराणं उदयं जीवा वियाहिया । सत्थं चेत्थ अणुवीयि पास । पुढो सत्थं पवेदितं । अदुवा अदिण्णादाणं ।**

**से बेमी**त्यादि । **से**शब्द आत्मनिर्देशे । सः अहमेवमुपलब्धानेकाप्काय-तत्त्ववृत्तान्तो ब्रवीमि–**संति** [3]**पाणा** विद्यन्ते प्राणिनः [4]**उदकनिश्रिताः** पूतरक-मत्स्यादयो यानुदकारम्भप्रवृत्तो हन्यादिति । अथवाऽपरः सम्बन्धः–प्रागुक्तमुदक-शस्त्रं समारभमाणोऽन्या[5]नप्यनेकरूपान् [6]जन्तून् विविधं हिनस्तीति । तत् कथमेतत्

---

१. यतो क घ ङ । २. **एतत् प्रगृह्याख्येयम्** ख । ३. **पाणा** इति कप्रतिं परित्यज्य नान्यत्रास्ति । ४. **उदकमिश्रिताः** क ग । ५. **०ननेकरूपान्** ख । ६. **प्राणिनो** ख ।

शक्यमभ्युपगन्तुम् ? इत्यत आह—**संति पाणा** इत्यादि पूर्ववत् । कियन्तः पुनस्ते ? इति दर्शयति—**जीवा अणेगा** पुनर् 'जीवो'पादानमुदकाश्रितप्रभूतजीवभेदज्ञापनार्थम् । ततश्चेदमुक्तं भवति—एकैकस्मिन् जीवभेदे उदकाश्रिता अनेके असङ्ख्येयाः प्राणिनो भवन्ति । एवं चाब्विषयारम्भभाजः पुरुषास्तन्निश्रितप्रभूतसत्त्वव्यापत्तिकारिणो द्रष्टव्याः । **शाक्यादयस्तूदकाश्रितानेव** द्वीन्द्रियादीन् जीवानिच्छन्ति नोदकमित्येतदेव दर्शयति—**खलु**शब्दोऽवधारणे **इहैव ज्ञातपुत्रीये** प्रवचने [1]द्वादशाङ्गगणिपिटके अनगाराणां साधूनाम् उदकं जीवाः [2]उदकरूपा जीवाः चशब्दात् तदाश्रिताश्च पूतरक-छेदनक-[3]लोद्दणक-[4]भ्रमरक-मत्स्यादयो जीवा व्याख्याताः । अवधारणफलं च नान्येषामुदकरूपा जीवाः प्रतिपादिताः ।

यद्येवमुदकमेव जीवाः, ततोऽवश्यं तत्परिभोगे सति प्राणातिपातभाजः साधव इति ? अत्रोच्यते—नैतदेवम्, यतो वयं त्रिविधमप्कायमाचक्ष्महे—सचित्तं मिश्रमचित्तं च, तत्र योऽचित्तोऽप्कायस्तेनोपयोगविधिः साधूनाम्, नेतराभ्याम् । कथं पुनरसौ भवत्यचित्तः ?, किं [5]स्वभावादेव ?, आहोश्वित् शस्त्रसम्बन्धात् ? उभयथाऽपीति । तत्र यः स्वभावादेवाचित्तीभवति न [6]बाह्यशस्त्रसम्बन्धात् तमचित्तं जानाना अपि केवल-मनःपर्याया-ऽवधि-श्रुतज्ञानिनो न परिभुञ्जते, अनवस्था-प्रसङ्गभीरुतया, [7]यतो नु श्रूयते—

[8]भगवता किल **श्रीवर्धमान[9]स्वामि**ना विमलसलिलसमुल्लसत्तरङ्गः शैवलपटल-त्रसादिरहितो महाह्रदो व्यपगताऽशेषजलजन्तुकोऽचित्तवारिपरिपूर्णः स्वशिष्याणां तृड्बाधितानामपि पानाय नानुजज्ञे, तथाऽचित्ततिलशकटस्थण्डिल-परिभोगानुज्ञा चानवस्थादोषसंरक्षणाय भगवता न कृतेति, श्रुतज्ञानप्रामाण्य-ज्ञापनार्थं च, तथाहि—सामान्यश्रुतज्ञानी बाह्येन्धनसम्पर्कारुषितस्वरूपमेवा-

---

१. द्वादशाङ्गे गणि० कपुस्तकेन विना । २. उदकजीवाः क । ३. ०लोट्टणक० ख, ०लोड्डणक० ग, ०लोडुणक० घ ङ, ०लोडुणक० च । ४. भ्रमर-मत्स्या० क ख । ५. स्वभावात् ? अहो० कप्रत्या विना । ६. बाह्यशस्त्रसम्पर्कात् ख च, बाह्यशस्त्रसम्बन्धत्वात् घ ङ । ७. यतोऽनुश्रूयते ख, यते न श्रूयते ग । ८. भगवन्तः घ, भगवता श्रीवर्ध० च । ९. ०स्वामिनो घ ।

चित्तमिति व्यवहरति जलम्, न पुनर्निरिन्धनमेवेति ।

अतो यद् बाह्यशस्त्रसम्पर्कात् परिणामान्तरापन्नं वर्णादिभिस्तद् अचित्तं साधुपरिभोगाय [1]कल्पते । किं पुनस्तत् शस्त्रम् ? इत्यत आह—**सत्थं चेत्थ** [2]**अणुवीयी पासे**त्यादि । शस्यन्ते हिंस्यन्तेऽनेन प्राणिन इति शस्त्रम् । तच्चोत्सेचन-गालन-उपकरणधावनादि स्वकायादि च । वर्णाद्यापत्तयो वा पूर्वावस्थाविलक्षणाः शस्त्रम्, तथाहि—अग्निपुद्गलानुगतत्वाद् ईषत्पिङ्गलं जलं भवत्युष्णम्, गन्धतोऽपि धूमगन्धि, रसतो विरसम्, स्पर्शत उष्णम् तच्चोद्वृ[3]त्तत्रिदण्डम् । एवंविधावस्थं यदि ततः कल्पते, नान्यथा । तथा कचवर-गोकरीष-मूत्र-ऊषादीन्धनसम्बन्धात् स्तोक-मध्य-बहुभेदात्, स्तोकं स्तोके प्रक्षिपतीत्यादिचतुर्भङ्गिकाभावना कार्या । एवमेतत् त्रिविधं शस्त्रम् । चशब्दोऽवधारणार्थः—अन्यतमशस्त्रसम्पर्कविध्वस्तमेव ग्राह्यम्, नान्यथेति । **एत्थ** त्ति एतस्मिन् अप्काये प्रस्तुते **अनुविचिन्त्य** विचार्य इदमस्य शस्त्रमित्येवं ग्राह्यम् । **पश्य** इत्यनेन शिष्यस्य चोदनेति । तदेवं नानाविधं शस्त्रमप्कायस्यास्तीति प्रतिपादितम् । [4]एतदेव दर्शयति—**पुढो सत्थं पवेदितं** पृथक् विभिन्नमुत्सेचनादिकं शस्त्रं प्रवेदितम् आख्यातं भगवता । पाठान्तरं वा—**पुढोऽपासं पवेदितं** एवं पृथक् विभिन्नलक्षणेन शस्त्रेण परिणामितमुदकग्रहणमपाशं प्रवेदितम् आख्यातं भगवता, अपाशः अबन्धनम्, शस्त्रपरिणामितोदकग्रहणमबन्धनमाख्यातमिति यावत्[5] ।

एवं तावत् साधूनां सचित्त-मिश्राप्कायपरित्यागेनाचित्तपयसा परिभोगः प्रतिपादितः । ये पुनः **शाक्या**दयोऽप्कायोप[6]भोगप्रवृत्तास्ते नियमत एवाप्कायं विहिंसन्ति, तदाश्रितांश्चान्यानिति । तत्र न केवलं प्राणातिपातापत्तिरेव तेषाम्, किमन्यत् ? इत्यत आह—**अदुवा** [7]**अदिन्नादाणं** ति । अथवा इति पक्षान्तरोपन्यासद्वारेणाभ्युच्चयोपदर्शनार्थः, अशस्त्रोपहताप्कायोपभोगकारिणां न केवलं

---

१. **परिकल्पते** च । २. **अणुवीइ** घ ङ; **अणुवीति** च, **अणुवीई** ग, **अणुवीइ पास इत्यादि** ख । ३. **०त्तदण्डम्** क ख ग । ४. **एवमेतदेव** ङ । ५. अत्र चूर्णिकृत्पादा इत्थं प्रतिपादयन्ति—पुढो सत्थं पवेदितं ति बहूणि आउक्कायसत्थाणि भगवता पवेदिताणि । ६. **०भोगपरिवृत्ता( ता )स्ते** ङ । ७. **अदिन्नदाणं** क ग च ।

प्राणातिपातः, अपि त्वदत्तादानमपि तत् तेषाम्, यतो यैरप्कायजन्तुभिर्यानि शरीराणि निर्वर्तितानि तैरदत्तानि ते तान्युपभुञ्जते । यथा कश्चित् पुमान् सचित्त-**शाक्य**भिक्षुकशरीरकात् खण्डमुत्कृत्य गृह्णीयाद्, अदत्तं हि तस्य तत्, परपरिगृहीतत्वात् परकीयगवाद्यादानवत्, एवं तानि शरीराण्यब्जीव[1]गृहीतानि गृह्णतोऽदत्तादानमवश्यम्भावि स्वाम्यनुज्ञानाभावादिति । ननु यस्य तत् तडाग-कूपादि तेनानुज्ञातं सकृत् तत्पय इति, ततश्च नादत्तादानम्, स्वामिनाऽनु[2]ज्ञातत्वात् परानुज्ञातपश्वादिघात[3]वत् ? नन्वेतदपि साध्यावस्थमेवोपन्यस्तम्, यतः पशुरपि शरीरप्रदानविमुख एव भिन्नार्यमर्यादैरुच्चैरारटन् विशस्यते, ततश्च कथमिव नादत्तादानं स्यात् ? न चान्यदीयस्यान्यः स्वामी दृष्टः परमार्थचिन्तायाम् । नन्वेवमशेषलोकप्रसिद्धगोदानादिव्यवहारस्त्रुट्यति ? त्रुट्यतु नामैवंविधपाप-सम्बन्धः, तद् हि देयं यद् दुःखितं स्वयं न भवति, दासी-ब[4]लीवर्दादिवत्, न चान्येषां दुःखोत्पत्तेः कारणं हल-खड्गादिवत् । एतद्व्यतिरिक्तं दातृ-परिगृहीत्रोरेकान्तत एवोपकारकं देयं प्रतिजानते जि[5]नेन्द्रमतावलम्बिनः, उक्तं च–

**यत् स्वयमदुःखितं स्याद्, न च परदुःखे निमित्तभूतमपि ।**
**केवलमुपग्रहकरं, ध[6]र्मकृते तद् भवेद्देयम् ॥** [ ] इति ॥

तस्माद् अवस्थितमेतत्–तेषां तद् अदत्तादानमपीति ॥ साम्प्रतमेतद् दोषद्वयं स्वसिद्धान्ताभ्युपगमद्वारेण प[7]रः परिजिहीर्षुराह–

## [सू०२७] कप्पइ णे कप्पइ णे पातुं, अदुवा विभूसाए । पुढो सत्थेहिं विउट्टंति ।

**कप्पइ णे कप्पइ णे पाउं अदुवा विभूसाए ।** अशस्त्रोपहतोदकारम्भिणो हि चोदिताः सन्त एवमाहुः, यथा–नैतत् स्वमनीषिकातः समारम्भयामो वयम्, किन्तु आगमे निर्जीवत्वेनानिषिद्धत्वात् **कल्पते** युज्यते **नः** अस्माकं **पातुम्**

१. **०वपरिगृहीतानि** घ ङ च । २. **०नुज्ञाभावादिति** च । ३. **०वत् ? इति । नन्वेतदपि** ख च । ४. "**बलीवद्द( र्द )** इति वैधर्म्यदृष्टान्तः" जै०वि०प० । ५. **जिनेन्द्र-वचनावलम्बिनः** ख च । ६. **धर्मकृते भवति तद् देयम्** ख । ७. **परः** इति नोपलभ्यते कसंज्ञकादर्शे ।

अभ्यवहर्तुमिति । वीप्सया च नानाविधप्रयोजनविषय [1]उपभोगोऽभ्यनुज्ञातो भवति, तथाहि–**आजीविक**–**भस्मस्नाय्या**दयो वदन्ति पातुमस्माकं कल्पते, न स्नातुं वारिणा, **शाक्य**–**परिव्राजका**दयस्तु स्नान–पाना–ऽवगाहनादि सर्वं कल्पते इति [2]भाषन्ते । एतदेव स्वनामग्राहं दर्शयति–**अथवोदकं विभूषार्थ**मनुज्ञातं नः समये । विभूषा च कर–चरण–पायु–उपस्थ–मुखप्रक्षालनादिका वस्त्र–भण्डकादि–प्रक्षालनात्मिका [3]वा । एवं स्नानादिशौचानुष्ठायिनां नास्ति कश्चिद्दोष इति ॥

एवं ते परिफल्गुवचसः परिव्राजकादयो निजराद्धान्तोपन्यासेन मुग्धमतीन् विमोह्य किं कुर्वन्ति ? इत्याह–**पुढो सत्थेहिं विउट्टंति** । पृथग् विभिन्न–लक्षणैर्नानारूपैः उत्सेचनादिशस्त्रैस्तेऽनगारायमाणाः **विउट्टंति** त्ति अप्कायजीवान् जीवनाद् व्यावर्तयन्ति व्यपरोपयन्तीत्यर्थः । यदि वा पृथग् विभिन्नैः शस्त्रै–रप्कायिकान् विविधं कुट्टन्ति छिन्दन्तीत्यर्थः, [4]कुट्टेः छेदनार्थत्वात् ॥ अधुनैषा–मागमानुसारिणामागमासारत्व[5]प्रतिपादनायाह–

## [ सू०२८ ] एत्थ वि तेसिं णो णिकरणाए ।

[6]एतस्मिन्नपि प्रस्तुते स्वागमानुसारेणाभ्युपगमे [7]सति '**कप्पइ णे कप्पइ णे [8]पाउं अदुवा [9]विभूसाए**'त्ति [10]*एवंरूपे, तेषामयमागमो यद्बलादप्कायपरिभोगे* ते प्रवृत्ताः स स्याद्वादयुक्तिभिरभ्याहतः सन् **नो निकरणाए** त्ति नो निश्चयं कर्तुं समर्थो भवति । न केवलं तेषां युक्तयो न निश्चयायालम्, अपि त्वागमोऽपीति **अपि**शब्दः । कथं पुनस्तदागमो निश्चयाय नालमिति ? अत्रोच्यते–ते एवं प्रष्टव्याः–कोऽयमागमो नाम यदादेशात् कल्पते भवतामप्कायारम्भः ? ते आहुः–प्रतिविशिष्टानुपूर्वीविन्यस्तवर्ण–पद–वाक्यसङ्घात आप्तप्रणीत आगमो नित्यो–

---

१. **उपभोगोऽनुज्ञातो** घ । २. **प्रभाषन्ते** क–घआदर्शा ऋते । ३. चूर्णिकृद्भिस्त्वेतद–तिरिक्तः सम्प्रदायान्तराचीर्णो जलोपयोगविधिरुल्लिखितः, तद्यथा–केसिंचि परिपूतं, केसिंचि अपरिपूतं, केसिंचि परिमियं, केसिंचि अपरिमियमिति । ४. **कुट्टेर्धातोः छेदनार्थत्वात्** क–घप्रती ऋते । ५. **०प्रतिपादनार्थमाह** ख । ६. '**एत्थ वि तेसिं णो णितरणा**' इति चूर्णौ । ७. **सति** इति ख–चपुस्तकयोर्न वर्तते । ८. **पायुं** च । ९. **विभूसणाए त्ति** च, **विहूसाए त्ति** ग । १०. **एवंरूपः तेषा०** ख ।

ऽकर्तृको वा । ततश्चैवमभ्युपगते[1] यो येन प्रतिपन्न आप्तः स निराकर्तव्यः— अनाप्तोऽसौ, अप्कायजीवाऽपरिज्ञानात् तद्वधानुज्ञानाद्वा, भवानिव । जीवत्वं चापां प्राक् प्रसाधितमेव, ततस्तत्प्रणीतागमोऽपि सद्धर्मचोदनायामप्रमाणम्, अनाप्त-प्रणीतत्वाद् रथ्यापुरुषवाक्यवत् । अथ नित्योऽकर्तृकः समयोऽभ्युपगम्यते ततो नित्यत्वं दुष्प्रतिपादम्, यतः शक्यते वक्तुम्—भवदभ्युपगतः समयः सकर्तृको वर्ण-पद-वाक्यात्मकत्वाद्, विधि-प्रतिषेधात्मकत्वाद्, उभयसम्मतसकर्तृक-ग्रन्थसन्दर्भवदिति । अभ्युपगम्य वा ब्रूमः—अप्रमाणमसौ, नित्यत्वाद्, आकाश-वत् । यच्च प्रमाणं तदनित्यं दृष्टं प्रत्यक्षादिवदिति । तथा विभूषासूत्रावयवे[2]ऽपि पृष्टा न प्रत्युत्तरदाने क्षमाः । यतियोग्यं स्नानं न भवति, कामाङ्गत्वात्, मण्डनवत् । कामाङ्गता च सर्वजनप्रसिद्धा[3], तथा चोक्तम्—

**स्नानं मद-दर्पकरं, कामाङ्गं प्रथमं स्मृतम् ।**
**तस्मात् कामं परित्यज्य, नैव स्नान्ति दमे रताः ॥ [ ]**

शौचार्थोऽपि न पुष्कलः[4], वारिणा बाह्यमलापनयनमात्रत्वात्, न ह्यन्तर्व्यवस्थितकर्ममलक्षालन[5]समर्थं वारि दृष्टम् । तस्मात् शरीर-वाङ्-मनसामकुशलप्रवृत्तिनिरोधो भावशौचमेव कर्मक्षयायालम् । तच्च वारिसाध्यं न भवति, कुतः[6] ? अन्वय-व्यतिरेकसमधिगम्यत्वात् सर्वभावानाम्, न हि मत्स्या-दयस्तत्र स्थिता मत्स्यादित्वकर्मक्षयभाक्त्वेनाभ्युपगम्यन्ते, विना च वारिणा महर्षयो विचित्रतपोभिः कर्म क्षपयन्तीति । अतः[7] स्थितमेतत्—तत्समयो न[8] निश्चयाय प्रभवतीति ॥ तदेवं निःसपत्नमपां जीवत्वं प्रतिपाद्य तत्प्रवृत्ति-निवृत्तिविकल्पफलप्रदर्शनद्वारेणोपसञ्जिहीर्षुः सकलमुद्देशार्थमाह—

**[ सू०२९ ] एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाया भवंति, एत्थ सत्थं असमारभमाणस्स इच्चेते**

---

१. ०मभ्युपगमने घ ङ । २. "सूत्रावयवे इति कप्पय णे इत्यादि" जै०वि०प० । ३. सर्वजनसिद्धा ख, सर्वजनसिद्धा उक्तं च च । ४. "पुष्कलः इति मुक्कलः" जै०वि०प० । ५. ०मलप्रक्षालन० घ ङ च । ६. स्थिताः कर्मक्षयभावेनाभ्युप० ग च । ७. अतः इति खपुस्तके नास्ति, अवस्थितमेतत् च । ८. नो ग ।

**आरंभा परिण्णाया भवंति ।**

**[ सू०३० ] तं परिण्णाय मेहावी णेव सयं उदयसत्थं समारभेज्जा, णेवण्णेहिं उदयसत्थं समारभावेज्जा, उदयसत्थं समारभंते वि अण्णे ण समणुजाणेज्जा ।**

**[ सू०३१ ] जस्सेते उदयसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णातकम्मे त्ति बेमि ।**

**एत्थ सत्थ**मित्यादि यावत् **से हु मुणी परिण्णायकम्मे त्ति बेमि । एतस्मिन्** अप्काये **शस्त्रं** द्रव्य-भावरूपं **समारभमाणस्ये**त्येते [1]समारम्भा बन्धकारणत्वेनाऽपरिज्ञाता भवन्ति । अत्रैव अप्काये शस्त्रमसमारभमाणस्येत्येते आरम्भा ज्ञपरिज्ञ[2]या परिज्ञाता भवन्ति, प्रत्याख्यानपरिज्ञया च परिहृता भवन्ति । तामेव प्रत्याख्यानपरिज्ञां विशेषतो ज्ञपरिज्ञापूर्विकां दर्शयति—**तद्** उदकारम्भणं बन्धाय इत्येवं **परिज्ञाय मेधावी** मर्यादाव्यवस्थितो नैव स्वयमुदकशस्त्रं समारभेत, नैवान्यैरुदकशस्त्रं समारम्भयेत्, नैवान्यानुदकशस्त्रं समारभमाणान् समनुजानीयात् । यस्यैते उदकशस्त्रसमारम्भा द्विधा परिज्ञाता भवन्ति स एव मुनिः परिज्ञातकर्मा भवति । **ब्रवीमी**ति पूर्ववदिति ।

**[3]शस्त्रपरिज्ञायां तृतीयोद्देशकः समाप्तः ॥३॥**

• • •

१. **समारम्भा वध-बन्ध०** च । २. **०या ज्ञाता भवन्ति** क घ ङ । ३. **शस्त्रपरिज्ञाया-स्तृतीयोद्देशकः परिसमाप्तः ॥** च ।

उक्तस्तृतीयोद्देशकः साम्प्रतं चतुर्थ आख्यायते[१] । अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके मुनित्वप्रतिपत्तयेऽप्कायः प्रतिपादितः, तद् अधुना तदर्थमेव क्रमायाततेजस्कायप्रतिपादनायायमुद्देशकः समारभ्यते । तस्य चोपक्रमादीनि चत्वार्यनुयोगद्वाराणि वाच्यानि तावद् यावद् नामनिष्पन्ने निक्षेपे तेजउद्देशक इति नाम । तत्र तेजसो निक्षेपादीनि द्वाराणि वाच्यानि । अत्र च पृथिवीविकल्पतुल्यत्वात् केषाञ्चिदतिदेशो द्वाराणाम्, अपरेषां तद्विलक्षणत्वाद् अपोद्धार इत्येतद् द्वयमुरीकृत्य **निर्युक्तिकृद्** गाथामाह—

**तेउस्स वि[२] दाराइं ताइं जाइं हवंति पुढवीए ।**
**णाणत्ती उ[३] विहाणे परिमाणुवभोग सत्थे य ॥११६॥**

**तेउस्स वी**त्यादि । तेजसोऽपि अग्नेरपि द्वाराणि निक्षेपादीनि यानि पृथिव्याः समधिगमे[४]ऽभिहितानि तान्येव वाच्यानि । अपवादं दर्शयितुमाह—**नानात्वं** भेदो[५] **विधान-परिमाण-उपभोग-शस्त्रेषु । तुः** अवधारणे विधानादिष्वेव नानात्वम्, नान्यत्रेति । **च**शब्दाद् लक्षणद्वारपरिग्रहः ॥११६॥ यथाप्रतिज्ञातनिर्वहणार्थमादिद्वारव्याचिख्यासयाऽऽह—

**दुविहा उ[६] तेउजीवा सुहुमा तह बायरा य लोयम्मि ।**
**सुहुमा य सव्वलोए पंचेव य बायरविहाणा ॥११७॥**

**दुविहे**त्यादि । स्पष्टा ॥११७॥ बादरपञ्चभेदप्रतिपादनायाह—

**इंगाल अगणि अच्ची जाला तह मुम्मुरे य बोधव्वे ।**
**बायरतेउविहाणा पंचविहा वण्णिया एए ॥११८॥** द्वारं ॥

**इंगाले**त्यादि । दग्धेन्धनो विगतधूमज्वालः **अङ्गारः** इन्धनस्थ[७]प्लोषक्रियाविष्टरूपः, तथा विद्युद्-उल्का-ऽशनि-सङ्घर्षसमुत्थितः सूर्यमणिसंसृतादिरूपश्च **अग्निः**, दाह्यप्रतिबद्धो ज्वालाविशेषः **अर्चिः, ज्वाला** छिन्नमूला[८]ऽनङ्गारप्रतिबद्धा, प्रविरलाग्निकणानुविद्धं भस्म मुर्मुरः, एते बादरा[९]

१. **आरभ्यते** कप्रतिं विना । २. **व** छ । ३. **ए(य)** ख । ४. **समभिगमे** ख । ५. **विभेदो** घ ङ च । ६. **य** क-ठवर्जितप्रतिपु । ७. **इन्धनस्थः** क-खप्रती विना । ८. ०ला नाङ्गार० क । ९. ०रा अग्नि० ख च विना ।

अग्निभेदाः पञ्च भवन्ती[1]ति । एते च बादराग्नयः स्वस्थानाङ्गीकरणाद् मनुष्यक्षेत्रेऽर्द्धतृतीयेषु द्वीप-समुद्रे[2]ष्वप्यव्याघातेन पञ्चदशसु कर्मभूमिषु [3]व्याघाते सति पञ्चसु [4]विदेहेषु, नान्यत्र, उपपाताङ्गीकरणेन लोकासङ्ख्येयभागवर्तिनः । तथा चागमः—

**उववाएणं [5]दोसुद्धकवाडेसुं तिरियलोय[6]तट्टे य ।** [ ]

[7]→। अस्याऽयमर्थः-←अर्द्धतृतीयद्वीप-समुद्रबाहल्ये पूर्वाऽपर-दक्षिणोत्तर[8]स्वयम्भुरमणपर्यन्ताऽऽयते [9]ऊर्ध्वा-ऽधोलोकप्रमाणे कपाटे, तयोः प्रविष्टा बादराग्निषूत्पद्यमानकास्तद्व्यपदेशं लभन्ते, तथा **तिरियलोय[10]तट्टे** य त्ति तिर्यग्लोक[11]स्थालके [12]च व्यवस्थितो बादराग्निषूत्पद्यमानो बादराग्निव्यपदेशभाग् भवति । **अन्ये** तु व्याचक्षते—तयोस्तिष्ठतीति तत्स्थः, तिर्यग्लोकश्चासौ तत्स्थश्च तिर्यग्लोकतत्स्थः, तत्र च स्थित उत्पित्सुर्बादराग्निव्यपदेशमासादयति । अस्मिंश्च व्याख्याने कपाटान्तर्गत एव गृह्यते, स च द्वयो[13]रूर्ध्वकपाटयोरित्यनेनैवोपात्त इति तद्व्याख्यानाभिप्रायं न विद्मः । कपाटस्थापना चेयम्—समुद्घातेन सर्व-लोकवर्तिनः ते च पृथिव्यादयो मारणान्तिकसमुद्घातेन [14]समवहता बादरा-ग्निषूत्पद्यमानास्तद्व्यपदेशभाजः सर्वलोकव्यापिनो भवन्ति । यत्र च बादराः पर्याप्तकास्तत्रैव बादरा अपर्याप्तकाः, तन्निश्रया तेषामुत्पद्यमानत्वात् । तदेवं सूक्ष्मा बादराश्च [15]पर्याप्तका-ऽपर्याप्तकभेदे[16]न प्रत्येकं द्विधा भवन्ति । एते च वर्ण-

---

१. "से किं तं बादरतेउकाइया ? बादरतेउकाइया अणेगविहा पण्णत्ता, तं जहा—इंगाले जाला मुम्मुरे अच्ची अलाए सुद्धागणी उक्का विज्जू असणी णिग्घाए संघरिससमुट्ठिए सूरकंतमणिणिस्सिए, जे यावन्ने तहप्पगारे ।" (प्रज्ञा० प० २९ सू० १७) इति प्रज्ञापनायामनेक-विधत्वमुपलभ्यते तेजस्कायस्य, तथोत्तराध्ययनेषु जीवाऽजीवविभक्त्याख्ये षट्त्रिंशत्तमेऽध्ययने-बायरा जे उ पज्जत्ता, णेगहा ते वियाहिया । इंगाले मुम्मुरे अगणी, अच्चि जाला तहेव य ॥१०९॥ उक्का विज्जू य बोधव्वा णेगहा एवमायओ ॥११०, पू० ॥ २. **०ष्वव्याघातेन** क-ख विना । ३. '**व्याघात** इति सुसमादौ स्निग्धत्वादिना भरतादौ न भवति" जै०वि०प० । ४. **विदेहे [ षु न? ] पुनरन्यत्र** क । ५. **दोसूद्ध०** क । ६. **०तट्ठे य** घ ङ । ७. → ← एतच्चिह्नान्तर्गतः पाठः खपुस्तके नास्ति । ८. **०स्वयम्भूर०** ङ च । ९. **ऊर्द्धा-ऽधो०** क विना । १०. 'ताट=थालो' इति भाषायाम्. **०तट्ठे** घ ङ । ११. **०स्थानके** च । १२. **च** इति ख ग प्रत्योर्न विद्यते । १३. **०रूर्द्ध०** क विना । १४. **समुपहता** ख । १५. **पर्याप्ता-ऽप०** ग च । १६. **०न द्विधा** क घ ङ ।

गन्ध-रस-स्पर्शादेशैः सहस्राग्रशो भिद्यमानाः सङ्ख्येययोनि[१]प्रमुखशतसहस्र-भेदपरिमाणा भवन्ति। तत्रैषां संवृता योनिरुष्णा च सचित्ता-ऽचित्त-मिश्रभेदात् [२]त्रिधा, सप्त चैषां योनिलक्षा भवन्ति। साम्प्रतं चशब्दसमुच्चितं लक्षणद्वारमाह—

**जह देहपरीणामो रत्तिं खज्जोयगस्स सा उवमा।**
**जरियस्स [३]वे जा उण्हा [४]एसुवमा तेउजीवाणं ॥११९॥** दारं ॥

**जहे**त्यादि। यथा इति दृष्टान्तोपन्यासार्थः। **देहपरिणामः** प्रतिविशिष्टा शरीरशक्तिः। **रात्रौ** इति विशिष्टकालनिर्देशः। **खद्योतक** इति प्राणिविशेषपरि-ग्रहः। यथा तस्यासौ देहपरिणामो जीवप्रयो[५]गविनिर्वृत्तशक्तिराविष्कारास्ति एवमङ्गारादीनामपि प्रतिविशिष्टा प्रकाशादिशक्तिरनुमीयते जीवप्रयोगविशेषा-विर्भावितेति। यथा वा ज्वरोष्मा जीवप्रयोगं नातिवर्तते, जीवाधिष्ठित[६]शरीरका-नुपात्येव भवति एषैवोपमाऽऽग्नेयजन्तूनाम्, न च मृता ज्वरिणः क्वचिदुप-लभ्यन्ते। एवमन्वयव्यतिरेकाभ्यामग्नेः सचित्तता [७]मुक्तकग्रन्थोपपत्तिमुखेन प्रतिपादिता। सम्प्रति प्रयोगमारोप्यते अयमेवार्थः—जीवशरीराण्यङ्गारादयः, छेद्यत्वादिहेतुगणान्वितत्वात् सास्ना-विषाणादिसङ्घातवत्। तथा आत्म-संयोगाविर्भूतोऽङ्गारादीनां प्रकाशपरिणामः, शरीरस्थत्वात्, खद्योतकदेह-परिणामवत्। [८]तथा आत्मसम्प्रयोगपूर्वकोऽङ्गारादीनामूष्मा, शरीरस्थत्वात्, ज्वरोष्मवत्। न चादित्यादिभिरनेकान्तः, सर्वेषामात्मप्रयोगपूर्वकं यत [९]उष्ण-परिणामभाक्त्वम्, तस्मान्नानेकान्तः। तथा सचेतनं तेजः, यथायोग्याहारोपादानेन वृद्धिविशेष-[१०]तद्विकारवत्त्वात् पुरुषवत्। [११]एवमादिलक्षणे[१२]नाऽऽग्नेयजन्तवोऽवसेया इति। उक्तं [१३]लक्षणद्वारम्। तदनन्तरं परिमाणद्वारमाह—

---

१. **०प्रमुखयोनिशत०** ख। २. **०त्रिधैव** ख। ३. **व जह उण्हा** झ, **वा जउम्हा** ञ. **य जह उम्हा** ठ। ४. **तओवमा** क विना, **ततोवमा** ञ। ५. **०गनिर्वृत्त०** घ ङ च। ६. **०शरीरानुपात्येव, एषै०** ख। ७. "आचारे—शस्त्रपरिज्ञाया उद्दे० ४ **मुक्तकं** मुत्कलम्" स०वि०प०, "**मुक्व( क्त )क** इति मुक्व(त्क)लः, वृत्तिकारेणेति शेषः" जै०वि०प०, **मुक्तकल-ग्रन्थो०** च। ८. **तथा** इति ख विनाऽन्यत्र नास्ति। ९. **उष्णपरमाणुभाक्त्वम्** ख। १०. **०द्विकारत्वात्** ख-च विना। ११. **एवमादिना ल०** ग च। १२. **०नाग्नेया जन्तवो निश्चेया** इति च, **०नाग्नेयजन्तवो निश्चेया इति** ख। १३. **लक्षणम्। अधुना परि०** ख।

**जे बायरपज्जत्ता पलियस्स असंखभागमेत्ता[१] ते ।**
**सेसा तिन्नि वि रासी वीसुं[२] लोया असंखेज्जा ॥१२०॥** दारं ॥

**जे बायरे**त्यादि । ये बादरपर्याप्ता[३]नलजीवाः क्षेत्रपल्योपमासङ्ख्येयभागमात्रवर्तिप्रदेशराशि[४]प्रमाणा भवन्ति ते पुनर्बादरपृथिवीकायपर्याप्तकेभ्योऽसङ्ख्येयगुणहीनाः । शेषास्त्रयोऽपि राशयः पृथ्वीकायवद् भावनीयाः, किन्तु बादरपृथ्वीकायापर्याप्तकेभ्यो बादराग्न्यपर्याप्तका असङ्ख्येयगुणहीनाः, सूक्ष्मपृथ्वीकायापर्याप्तकेभ्यः सूक्ष्माग्नेयापर्याप्तका विशेषहीनाः, सूक्ष्मपृथिवीकायपर्याप्तकेभ्यः सूक्ष्माग्नेयपर्याप्तका विशेषहीना इति ॥१२०॥ साम्प्रतमुपभोगद्वारमाह—

**डहणे पेयावणे[५] पगासणे य[६] भत्तकरणे य सेए य ।**
**बायरतेउक्काए उवभोगगुणा मणुस्साणं ॥१२१॥**

**दहणे**त्यादि । दहनं शरीरावयवस्य[७] वाताद्यपनयनार्थम्, प्रकृष्टं तापनं प्रतापनं शीतापनोदाय, प्रकाशकरणम् उद्द्योतकरणं प्रदीपादिना, भक्तकरणम् ओदनादिरन्धनम्, स्वेदः ज्वर-विसूचिकादीनाम्, इत्येवमादिष्वनेकप्रयोजनेषूपस्थितेषु मनुष्याणां बादरतेजस्कायविषया उपभोगरूपा गुणा उपभोगगुणा भवन्तीति ॥१२१॥ तदेवमेवमादिभिः कारणैरुपस्थितैः[८] सततमारम्भप्रवृत्ता गृहिणो यत्याभासा वा सुखैषिण[९]स्तेजस्कायजन्तून् हिंसन्तीति दर्शयितुमाह—

**एएहिँ कारणेहिं हिंसंते[१०] तेउकाइए जीवे ।**
**सायं गवेसमाणा परस्स दुक्खं उदीरेंति ॥१२२॥** दारं ॥

[११]**एए०** इत्यादि । **एतैः** दहनादिभिः **कारणैस्तेजस्कायिकान् जीवान् हिंसन्ति** इति[१२] सङ्घट्टन[१३]-परितापन-अपद्रावणानि कुर्वन्ति[१४], **सातं** सुखं तद्

१. उ छ विनाऽन्यत्र । २. **वीस** क । ३. **०प्ता अनल०** ग । ४. **०राशिपरिमाणा** ख ग च । ५. **पयावण** ख छ ज ठ । ६. **य सेए य भत्तकरणे य** ख ठ । ७. **शरीराद्यवयवस्य** ग । ८. **कारणैः समुपस्थितैः** च, **कारणैः सतत०** ख । ९. **सुखैक्षिण०** च । १०. **हिंसंती ते०** ख ञ, **हिंसंति** उ **ते०** ज झ ठ । ११. एएहीत्यादि क विना । १२. **इति** इति ख-चआदर्शयोर्नास्ति । १३. **सङ्घाटन०** घ । १४. **कुर्वन्तीति सातं** घ ङ ।

[1]आत्मनोऽन्विषन्तः **परस्य** बादराग्निकायस्य **दुःखम्** उदीरयन्ति उत्पादयन्तीति ॥१२२॥ साम्प्रतं शस्त्रद्वारम्, तच्च द्रव्य-[2]भावभेदाद् द्विधा । द्रव्यशस्त्रमपि [3]समास-विभागभेदाद् द्विधैव । तत्र समासतो द्रव्यशस्त्रप्रतिपादनायाह—

**[4]पुढवी य आउकाओ उल्ला [5]ये वणस्सई तसा पाणा ।**
**बायरतेउक्काए [6]एयं तु समासओ सत्थं ॥१२३॥**

**पुढवी**त्यादि । **पृथ्वी** धूलिः, **अप्कायश्च, [7]सार्द्रश्च वनस्पतिः, [8]त्रसाः प्राणिनः**, [9]एतद् बादरतेजस्कायजन्तूनां समासतः सामान्येन शस्त्रमिति ॥१२३॥ विभागतो द्रव्य[10]शस्त्रमाह—

**किंची सकायसत्थं किंची परकाय तदुभयं किंचि ।**
**एयं तु दव्वसत्थं [11]भावे अस्संजमो सत्थं ॥१२४॥** [12]दारं ॥

**किंची**त्यादि । किञ्चित् शस्त्रं स्वकाय एव, अग्निकाय एव अग्निकायस्य, तद्यथा—तार्णोऽग्निः पार्णाग्नेः शस्त्रमिति । किञ्चिच्च परकायशस्त्रम् उदकादि । उभयशस्त्रं पुनः तुष-करीषादिव्यतिमि[13]श्रोऽग्निरपराग्नेः । **तु**शब्दो भावशस्त्रापेक्षया विशेषणार्थः, एतत् तु पूर्वोक्तं समास-विभागरूपं पृथ्वी-स्वकायादि द्रव्यशस्त्रमिति । भावशस्त्रं दर्शयति—[14]भावशस्त्रम् असंयमः दुष्प्रणिहितमनोवाक्कायलक्षण इति ॥१२४॥ उक्तव्यतिरिक्तद्वारातिदेशद्वारेणोपसञ्जिहीर्षुर्निर्युक्तिकृदाह—

**सेसाइं दाराइं [15]ताइं जाइं हवंति पुढवीए ।**
**एवं तेउद्देसे निज्जुत्ती कित्तिया [16]एसा॥१२५॥**

---

१. **आत्मनोऽन्वेषयन्तः** क-गपुस्तकाभ्यामृते । २. ०**भावशस्त्रभेदाद्** क-खप्रती विना । ३. **समासवि[ भाग ]शस्त्रभेदाद्** क । ४. **पुढवी आउक्काए** ख ज ठ, **पुढवीए आउक्काए** क । ५. **त** ञ । ६. **एवं** ठ । ७. **आर्द्रश्च** ख घ ङ । ८. **त्रसाश्च प्राणिनः** ग च । ९. **एवं बादर**० च । १०. ०**शस्त्रप्रतिपादनायाह** ख । ११. **भावे य असंजमो** ठ । १२. **गाहा** ञ । १३. ०**श्रोऽग्निः पराग्नेः** ख । १४. **भावे शस्त्रम्** क-चपुस्तके ऋते । १५. **इमाइँ** ञ । १६. **एसा ॥१२५॥ प्रथमे चतुर्थोद्देशकनिर्युक्तिः** ।छ॥ झ, **एसा ॥१२५॥ अध्य०१ उद्दे० ४** ॥ठ॥

**सेसा**[१] इत्यादि । उक्तशेषाणि [२]द्वाराणि तान्येव यानि पृथिव्युद्देशकेऽभिहितानि । **एवम्** उक्तप्रकारेण **तेजस्कायोद्देशके निर्युक्तिः कीर्तिता** व्यावर्णिता भवतीति ॥१२५॥

साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम्, तच्चेदम्—

**[ सू०३२ ] से बेमि-णेव सयं लोगं अब्भाइक्खेजा, णेव अत्ताणं अब्भाइक्खेजा । जे लोगं अब्भाइक्खति से अत्ताणं अब्भाइक्खति, जे अत्ताणं अब्भाइक्खति से लोगं अब्भाइक्खति ।**

**जे दीहलोगसत्थस्स खेत्तण्णे से असत्थस्स खेत्तण्णे, जे असत्थस्स खेत्तण्णे से दीहलोगसत्थस्स खेत्तण्णे ।**

**से बेमी**त्यादि । अस्य च सम्बन्धः प्राग्वद् वाच्य इति । येन मया सामान्यात्मपदार्थ-पृथिव्यप्कायजीवप्रविभागव्यावर्णनमकारि स एवाहमव्यवच्छिन्नज्ञानप्रवाहस्तेजोजीवस्वरूपोपलम्भसमुपजनितजिनवचनसम्मदो ब्रवीमि। किं पुनस्तद् ? [३]इति दर्शयति—

**नेवे**त्यादि । इह हि प्रकरणसम्बन्धाद् लोकशब्देन [४]अग्निलोकोऽभिधित्सितः । अतस्तमग्निलोकं जीवत्वेन नैव स्वयम् आत्मनाऽभ्याचक्षीत नैवापह्नुवीतेत्यर्थः । एतदभ्याख्याने ह्यात्मनोऽपि ज्ञानादिगुणकलापानुमितस्याभ्याख्या[५]नमवाप्नोति, [६]अथ प्राक् प्रसाधितत्वाद् अभ्याख्यानं नैवात्मनो न्याय्यम् । एवं तेजस्कायस्यापि प्रसाधितत्वाद् अभ्याख्यानं क्रियमाणं न युक्तिपथमवतरति ।

एवं चास्य [७]युक्त्यागमबलप्रसिद्धस्याभ्याख्याने क्रियमाणे सत्यात्मनोऽप्यहं-

---

१. सेसाणीत्यादि ख च, सेसाईत्यादि ग, सेसाइं इत्यादि घ ङ । २. तेजस्कायाभिधानोद्देशके ख ग च । ३. इति एतत् ख-चआदर्शयोर्न वर्तते । ४. अग्निकायलोको० ख । ५. ०नमाप्नोति क । ६. अथ च प्राक् ग च । ७. युक्तागम० घ ङ ।

प्रत्ययसिद्धस्याभ्याख्यानं भवतः प्राप्तम् । 'एवमस्तु' इति चेत्, तन्नेति दर्शयति– **नेव अत्ताणं अब्भाइक्खेज्जा** नैव आत्मानं शरीराधिष्ठातारं [1]ज्ञानगुणं प्रत्यात्मसंवेद्यं प्रत्याचक्षीत, तस्य शरीराधिष्ठातृत्वेन 'आहृतमिदं शरीरं केनचिदभिसन्धिमता तथा त्यक्तमिदं शरीरं केनचिदभिसन्धिमतैव' इत्येवमादिभिर्हेतुभिः प्रसाधितत्वात्, न च प्रसाधित[2]साधनं पिष्टपेषणवद् विद्वज्जनमनांसि रञ्जयति । एवं च सत्यात्मवत्प्रसाधितमग्निलोकं यः प्रत्याचक्षीत सोऽतिसाहसिक आत्मानम् अभ्याख्याति निराकरोति । यश्चात्माभ्याख्यान[3]प्रवृत्तः स सदैवाग्निलोकमभ्याख्याति, सामान्यपूर्वकत्वाद् विशेषाणाम् । सति [4]ह्यात्मसामान्ये पृथिव्याद्यात्मविभागः सिद्ध्यति, नान्यथा, सामान्यस्य विशेषव्यापकत्वात्, व्यापकविनिवृत्तौ च व्याप्यस्याप्यवश्यम्भाविनी विनिवृत्तिरिति कृत्वा । एवमयमग्निलोकः सामान्यात्मवद् नाभ्याख्यातव्य इति प्रदर्शितम् ।

अधुना[5]ऽग्निजीवप्रतिपत्तौ सत्यां तद्विषयसमारम्भकटुकफलपरिहारोपन्यासाय सूत्रमाह–**जे दीहे**त्यादि । **य** इति मुमुक्षुः, **दीर्घलोकः** वनस्पतिः, यस्माद् असौ कायस्थित्या परिमाणेन शरीरोच्छ्रयेण च शेषैकेन्द्रियेभ्यो दीर्घो वर्तते, [6]तथाहि–कायस्थित्या तावत्–

**वणस्सइकाइए णं भंते ! वणस्सइ[7]काइए त्ति कालओ केवचिरं होइ ? गोयमा ! अणंतं कालं, अणंताओ उस्सप्पिणि-अवसप्पिणीओ[8], खेत्तओ [9]अणंता लोया, असंखेज्जा पोग्गलपरियट्टा, ते णं पुग्गलपरियट्टा आवलियाए असंखेज्जइभागे ।** [ ]

परिमाणतस्तु–

**पडुप्पन्नवणस्सइकाइया[10]णं भंते ! केवतिकालस्स [11]निल्लेवणा सिया ? गोयमा !**

---

१. ज्ञानगुणप्रत्या० क, ज्ञानमुख्यगुणप्रत्या० च । २. **०तप्रसाधनं** ख च । ३. **०प्रवृत्तः सदैवाग्नि०** क ग, **०प्रवृत्तः स एवाग्नि०** ख, **०प्रवृत्तः, स सदैवाग्नि०** च । ४. **ह्यात्मन्येव** क । ५. **०ग्निप्रति०** ख । ६. **तत्र हि** ख । ७. **०काइय त्ति** ख, **०कातिते त्ति** ग । ८. **०णि-ओसप्पिणीओ** च । ९. "**अणंता लोया** इति कोऽर्थः ? अनन्तलोकेषु ये प्रदेशास्तैस्तुल्यता समयानाम् एवं च एतावान् कालो भवति । एतावत्कालेन कियन्तः पुद्गलपरावर्ता भवन्ति ? इत्याह–**असंखेज्जा** इति । असङ्ख्यातं बहुधा इत्याह–**ते णं** इति ।" जै०वि०प० । १०. **०णं हं केव०** क । ११. "**निल्लेवणा** इति अस्माल्लोकादुद्धारः ।" जै०वि०प० ।

**पडुप्पण्णवणस्सइकाइयाणं नत्थि निल्लेवणा ।** [ ]

तथा शरीरोच्छ्रयाच्च दीर्घो वनस्पतिः—

**वणस्सइकाइयाणं भंते केमहालिया सरीरोगाहणा पण्णत्ता ? गोयमा ! साइरेगं जोयणसहस्सं सरीरोगाहणा ।** [ ]

न तथाऽन्येषामेकेन्द्रियाणाम् । अतः स्थितमेतत्—सर्वथा दीर्घलोको वनस्पतिरिति । अस्य च शस्त्रमग्निः, यस्मात् स हि प्रवृद्धज्वाला[1]कलापाकुलः सकलतरुगणप्रध्वंसनाय प्रभवति, अतोऽसौ तदुत्सादकत्वात् शस्त्रम् । ननु च सर्वलोकप्रसिद्ध्या कस्मादग्निरेव नोक्तः ? किं वा प्रयोजनमुररीकृत्योक्तं दीर्घलोकशस्त्रमिति ? अत्रोच्यते—प्रेक्षापूर्वकारितया, न निरभिप्रायमेतत् कृतमिति, यस्मादयमुत्पाद्यमानो ज्वाल्यमानो वा हव्यवाहः समस्तभूतग्रामघाताय प्रवर्तते, वनस्पतिदाहप्रवृत्तस्तु बहुविधसत्त्वसंहतिविनाशकारी विशेषतः स्यात्, यतो वनस्पतौ कृमि-पिपीलिका-भ्रमर-कपोत-श्वापदादयः सम्भवन्ति, तथा पृथिव्यपि तरुकोटरव्यवस्थिता स्यात्, आपोऽप्यवश्यायरूपाः, वायुरपीषच्चञ्चल-स्वभावकोमल[2]किशलयानुसारी सम्भाव्यते, तदेवमग्निसमारम्भप्रवृत्त [3]एतावतो जीवान् नाशयति, अस्यार्थस्य सूचनाय दीर्घलोकशस्त्रग्रहणमकरोत् सूत्रकार इति, तथा चोक्तम्—

**जायतेजं न इच्छंति, पावगं जलइत्तए ।**
**तिक्खमण्णयरं सत्थं, सव्वओ वि दुरासयं ॥**
**[4]पाईणं पडिणं वा वि, [5]उड्ढं अणुदिसामवि ।**
**अहे दाहिणओ [6]वा वि, दहे उत्तरओ वि य ॥**
**[7]भूयाणमेस माघाओ, हव्ववाहो न संसओ ।**
**तं [8]पईव-पयावट्ठा, संजया किंचि नारभे ॥** [ ]

अथवा बादरतेजस्कायाः पर्याप्तकाः स्तोकाः, शेषाः पृथिव्यादयो

---

१. ०ज्वालामालाकुलः च । २. ०किसलया० ख घ ङ । ३. एतान् जीवान् ख । ४. पातीणं च । ५. उड्ढमणु० क ग । ६. यावि क । ७. भूयाणं एस ख घ ङ भूयाण एस च । ८. पतीव० च ।

जीवकाया बहवः । [बादराग्नेः ?] भवस्थितिरपि त्रीण्यहोरात्राणि[1] स्वल्पा, इतरेषां[2] पृथिवी-अब्-वायु-वनस्पतीनां यथाक्रमं द्वाविंशति-सप्त-त्रि-दशवर्ष-सहस्रपरिमाणा दीर्घा अवसेयेति । अतो दीर्घलोकः पृथिव्यादिः, तस्य शस्त्रम् अग्निकायः, तस्य **क्षेत्रज्ञः** निपुणः अग्निकायं वर्णादितो जानातीत्यर्थः । **खेदज्ञो** वा, खेदः तद्व्यापारः सर्वसत्त्वानां दहनात्मकः पाकाद्यनेकशक्तिकलापोपचितः प्रवरमणिरिव जाज्वल्यमानो लब्धाग्निव्यपदेशो यतीनामनारम्भणीयः, तमेवंविधं खेदम् अग्निव्यापारं जानातीति खेदज्ञः । अतो य एव दीर्घलोकशस्त्रखेदज्ञः स एव अशस्त्रस्य सप्तदशभेदस्य संयमस्य खेदज्ञः, संयमो हि न कञ्चिज्जीवं व्यापादयति अतोऽशस्त्रम् । एवमनेन संयमेन सर्वसत्त्वाभयप्रदायिनाऽनुष्ठीय-मानेनाग्निजीवविषयः समारम्भः शक्यः परिहर्तुं पृथिव्यादिकायसमारम्भश्चेति, एवमसौ संयमे निपुणमतिर्भवति । ततश्च निपुणमतित्वाद् विदितपरमार्थो-ऽग्निसमारम्भाद् व्यावृत्य संयमानुष्ठाने प्रवर्तते ।

इदानीं गतप्रत्यागतलक्षणेनाविनाभावित्वप्रदर्शनार्थं विपर्ययेण सूत्रावयव-परामर्शं करोति—**जे असत्थस्से**त्यादि, यश्च अशस्त्रे संयमे निपुणः स खलु दीर्घलोकशस्त्रस्य अग्नेः क्षेत्रज्ञः खेदज्ञो वा । संयमपूर्वकं ह्यग्निविषय-खेदज्ञत्वम्, अग्निविषयखेदज्ञतापूर्वकं[3] च संयमानुष्ठानम्[4], अन्यथा तदसम्भव एव इत्येतद् गत-प्रत्यागतफलमाविर्भावितं[5] भवति ।

**[ सू०३३ ] वीरेहि एयं अभिभूय दिट्ठं संजतेहिं सता जतेहिं सदा अप्पमत्तेहिं । जे पमत्ते गुणट्ठिते से हु दंडे पवुच्चति । तं परिण्णाय मेहावी इदाणीं णो जमहं पुव्वम-कासी पमादेणं ।**

---

१. "ठिती त्ति अड्ढाइज्जा राइंदिया" इति चूर्णौ, "तिन्नेव अहोरत्ता उक्कोसेण वियाहिया । आउठिई तेऊणं अंतोमुहुत्तं जहन्नयं ॥" उ० अ० ३६ गा० ११३ ॥ २. **०षां तु पृ०** ख । ३. **०खेदज्ञानपूर्वकं** च । ४. **०ष्ठानं च, अन्य०** घ । ५. **०वितमिति । कैः** ग ।

कैः पुनरिदमेवमुपलब्धम् ? इत्यत आह—**वीरेही**त्यादि, [1]अथवा वक्तृप्रसिद्धौ सत्यां वाक्यप्रसिद्धिर्भवतीत्यतो[2]ऽपदिश्यते—**वीरेही**त्यादि । घनघातिकर्मसङ्घातविदारणानन्तरप्राप्तातुलकेवलश्रिया विराजन्त इति वीराः [3]तीर्थकृतस्तैर्वीरैरर्थतो दृष्टमेतद् गणधरैश्च [4]सूत्रतोऽग्निशस्त्रं दृष्टम् संयमस्वरूपं चेति । किं पुनरनुष्ठायेदं तैरुपलब्धम् ? [5]इत्यत्रोच्यते—[6]**अभिभूय** त्ति, अभिभवो नामादिश्चतुर्धा । द्रव्याभिभवो रिपुसेनादिपराजयः, आदित्यतेजसा वा चन्द्र-ग्रह-नक्षत्रादितेजोऽभिभवः । भावाभिभवस्तु परीषहोपसर्गानीक-ज्ञान-दर्शनावरण-मोहाऽन्तरायकर्मनिर्दलनम्, परीषहो[7]पसर्गादिसेनाविजयाद् विमलं चरणम्, चरणशुद्धेर्ज्ञानावरणादिकर्मक्षयः, तत्क्षयाद् निरावरणमप्रतिहतमशेषज्ञेयग्राहि [8]केवलज्ञानमुपजायते । इदमुक्तं भवति—परीषहोपसर्ग-ज्ञान-दर्शनावरणीय-मोहाऽन्तरायाण्य[9]भिभूय केवलमुत्पाद्य तैरुपलब्धमिति । यथाभूतै[10]स्तैरिदमुपलब्धं तद् दर्शय[11]ति—**संजएहिं** ति, सम्यग् यताः संयताः प्राणातिपातादिभ्यः तैः । तथा सदा सर्वकालं चरणप्रतिपत्तौ मूलोत्तरगुणभेदायां निरतिचार[12]त्वाद् यत्नवन्तस्तैः । [13]तथा सदा सर्वकालं न विद्यते प्रमादः मद्य-विषय-कषाय-विकथा-निद्राख्यो येषां तेऽप्रमत्तास्तैः । एवम्भूतै**र्महावीरैः** केवलज्ञानचक्षुषा [14]**इदं** दीर्घलोकशस्त्रम् अशस्त्रं च संयमः [15]**दृष्टम्** उपलब्धमिति । अत्र च [16]यत्नग्रहणाद् ईर्यासमित्यादयो गुणा गृह्यन्ते, [17]अप्रमादग्रहणात् तु मद्यादिनिवृत्तिरिति । तदेवमेतत् प्रधानपुरुषप्रतिपादितमग्निशस्त्रमपायदर्शनाद् अप्रमत्तैः साधुभिः परिहार्यमिति ।

एवं प्रत्यक्षीकृतानेकदोषजालमप्यग्निशस्त्रमुपभोगलोभात् प्रमादवशगा ये न परिहरन्ति तानुद्दिश्य विपाकदर्शनायाह—**जे [18]पमत्ते**त्यादि । यो हि प्रमत्तो भवति

---

१. **अथवा सद्वक्तृ०** घ ङ । २. **०त्यत उपदिश्यते** ग । ३. **तीर्थकरास्तै०** ख च । ४. **सूत्रतो दृष्टमग्निशस्त्रं संय०** ख च । ५. **इत्युच्यते** ख च । ६. **अभिभूयेति** घ ङ । ७. **०पसर्गसेना०** घ ङ च । ८. **केवलमुप०** क । ९. "सदेव-मणुया-ऽसुराए परिसाए मज्झयारे परतित्थिए अभिभूय" इति चूर्णावर्थाधिक्यम् । १०. **०स्तैरेवमुप०** च । ११. **०ति-सम्यग्** घ ङ । १२. **त्वाद् यता यत्न०** ग । १३. **तथा सर्वकालं** घ ङ च । १४. "एतं ति छज्जीवनिकायचक्कं अगणिजीवत्तं वा" इति चूर्णौ । १५. "**दिट्ठं दट्ठुं अक्खातं**" चूर्णौ । १६. **यतग्रहणाद्** ग । १७. "अप्पमत्तगहणा इंदियप्पमादे वज्जेति" चूर्णौ । १८. **पमत्ते इत्यादि** घ ङ ।

मद्य-विषयादिप्रमादैरसंयतः गुणार्थी रन्धन-पचन-[1]प्रकाश-तापना[2]द्यग्निगुण-प्रयोजन[3]वान् स दुष्प्रणिहितमनो-वाक्-कायोऽग्निशस्त्रसमारम्भतया प्राणिनां दण्डहेतुत्वाद् दण्डः प्रकर्षेणोच्यते **प्रोच्यते**, आयुर्घृतादिव्यपदेशवदिति । यतश्चैवं ततः किं कर्तव्यम् ? [4]इत्यत आह—**तं परिन्नाय मेहावी** । तम् [5]अग्निकायविषयं समारम्भं दण्डफलं परिज्ञाय ज्ञपरिज्ञा-प्रत्याख्यानपरिज्ञाभ्यां मेधावी मर्यादाव्यवस्थितो वक्ष्यमाणप्रकारेण व्यवच्छेदमात्मन्या[6]चिनोतीति । तमेव प्रकारं [7]दर्शयितुमाह—**इयाणी**मित्यादि **यमहम्** अग्निसमारम्भं विषयप्रमादेनाकुलीकृतान्तःकरणः सन् **पूर्वमकार्षं** तमिदानीं जिनवचनोपलब्धाग्निसमारम्भदण्डतत्त्वः नो करोमीति । अन्ये त्वन्यथावादिनोऽन्यथाकारिण इति दर्शयितुमाह—

**[ सू० ३४ ] लज्जमाणा पुढो पास । 'अणगारा मो' त्ति एगे पवदमाणा, जमिणं विरूवरूवेहिं सत्थेहिं अगणिकम्मसमारंभेणं अगणिसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ।**

**[ सू० ३५ ] तत्थ खलु भगवता परिण्णा पवेदिता । इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेतुं से सयमेव अगणिसत्थं समारभति, अण्णेहिं वा अगणिसत्थं समारभावेति, अण्णे वा अगणिसत्थं समारभमाणे समणुजाणति । तं से अहिताए, तं से अबोधीए ।**

**[ सू० ३६ ] से त्तं संबुज्झमाणे आयाणीयं समुट्ठाए**

---

१. ०प्रकाशा-ऽऽताप० घ ङ च । २. ०द्यग्निप्रयो० ख । ३. "अहवा नाणादि-गुणट्ठी" इति चूर्णौ । ४. इत्याह ख च । ५. अग्निकायसमारम्भं ग, अग्निकायविषयमारम्भं च । ६. ०चिनोतीत्यादि । ख, चिनोति । ग । ७. दर्शयन्नाह ग ।

**सोच्चा भगवतो अणगाराणं इहमेगेसिं णातं भवति-एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु निरए ।**

**इच्चत्थं गढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं अगणिकम्मसमारंभेणं अगणिसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ।**

**लज्जमाणे**त्यादि यावत् **अण्णे वऽणेगरूवे पाणे विहिंसइ**[1] त्ति । अस्य ग्रन्थस्योक्तार्थ[2]स्यायमर्थो लेशतः प्रदर्श्यते—लज्जमानाः स्वागमोक्तानुष्ठानं कुर्वाणाः सावद्यानुष्ठानेन वा लज्जां कुर्वाणाः पृथग् विभिन्नाः **शाक्या**दयः । पश्य इति संयमानुष्ठाने स्थिरीकरणार्थं [3]शिष्यस्य चोदना । अनगारा वयम् इत्येके प्रवदमानाः किं तैर्विरूपमाचरितं येनैवं प्रदर्श्यन्ते[4] ? इति दर्शयति—**यदिदं विरूपरूपैः शस्त्रै**रग्निकर्मसमारम्भेणाग्निशस्त्रं समारभमाणः सन् अन्याननेकरूपान् प्राणिनो[5] विविधं हिनस्ति विहिनस्ति, तत्र खलु भगवता परिज्ञा प्रवेदिता, यथा—[6]अस्य चैव परिफल्गुजीवितस्य परिवन्दन-मानन-पूजनार्थं [7]जाति-मरण-मोचनार्थं दुःख-प्रतिघातहेतुं यत् करोति तद् दर्शयति—स परिवन्दनाद्यर्थी स्वत एवाग्निशस्त्रं समारभते[8], अन्यैश्चाग्निशस्त्रं समारम्भयति, तथा-ऽन्यांश्चाग्निशस्त्रं समारभमाणान् समनुजानीते । [9]तच्चाग्निसमारम्भणं से तस्य सुखलिप्सोरमुत्रान्यत्र चाहिताय भवति, तथा [10]तदेव च तस्याबोधिलाभाय भवति । स इति [11]यस्येत्येतदसदाचरणं प्रदर्शितं स तु शिष्यः तद् अग्निसमारम्भणं पापायेत्येवं सम्बुध्यमानः आदानीयं ग्राह्यं सम्यग्दर्शनादि *[12]सम्यगुत्थाय अभ्युपगम्य श्रुत्वा भगवदन्तिकेऽनगाराणां वा* इहैकेषां साधूनां ज्ञातं भवति । किं तद् ? दर्शयति—एषः अग्निसमारम्भः ग्रन्थः कर्महेतुत्वात्, एष एव मोहः, एष एव मारः, एष एव नरकः, तद्धेतुत्वादिति

---

१. **विहिंसंति** ख ङ । २. **०र्थस्य लेशतोऽयमर्थः प्रद०** क-गप्रती विना । ३. **शिष्यचोदना** च । ४. **०न्त इति ? यदिदं** क घ ङ । ५. **प्राणिनो विहिनस्ति** क विना । ६. **अस्यैव परि०** घ ङ । ७. **जाति-जरा-मर०** घ ङ । ८. **०ते, तथाऽन्यैश्चा०** घ ङ च । ९. **तच्चाग्नेः समा०** कपुस्तकादृते । १०. **तदेव तस्या०** क घ ङ । ११. **यस्येति तदसदा०** क ख, **यस्यैतदसदा०** घ ङ च । १२. **समुत्थाय** घ ङ ।

भाव:[1] । इत्येवमर्थं च गृद्धो लोको यत् करोति तद् दर्शयति—यदिदं विरूपरूपैः शस्त्रैरग्निकर्म समारभते, तदारम्भेण चाग्निशस्त्रं समारभते[2], तच्चारभमाणोऽन्याननेकरूपान् प्राणिनो विहिनस्तीति । कथं पुनरग्निसमारम्भप्रवृत्ता नानाविधान् प्राणिनो विहिंसन्ति ? इति दर्शयितुमाह—

**[ सू०३७ ] से बेमि-संति पाणा पुढविणिस्सिता, तणणिस्सिता, पत्तणिस्सिता, कट्ठणिस्सिता, गोमयणिस्सिता, कयवरणिस्सिया । संति संपातिमा पाणा आहच्च संपयंति य ।**

**अगणिं च खलु पुट्ठा एगे संघातमावज्जंति । जे तत्थ संघातमावज्जंति ते तत्थ परियावज्जंति । जे तत्थ परियावज्जंति ते तत्थ उद्दायंति ।**

**[ सू०३८ ] एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाता भवंति । एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाता भवंति ।**

**[ सू०३९ ] जस्स एते अगणिकम्मसमारंभा परिण्णाता भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ।**

**[ सत्थपरिण्णाए चउत्थो उद्देसओ सम्मत्तो ]**

**से बेमी**त्यादि । तदहं ब्रवीमि यथा नानाविधजीवहिंसनमग्निकायसमारम्भेण भवतीति । यथाप्रतिज्ञातार्थं दर्शयति—सन्ति विद्यन्ते प्राणाः जन्तवः पृथिवीकायनिश्रिताः पृथ्वीकायत्वेन[3] परिणता इत्यर्थः, तदाश्रिता वा कृमि-कुन्थु-पिपीलिका-गण्डूपदा-ऽहि-मण्डूक-वृश्चिक-कर्कटकादयः[4], तथा

---

१. **भावः । एवमर्थं** घ ङ । २. **०ग्निकायसमा०** ख । ३. **०हि-माण्डूक**-क, **०हि-वृक्षिक**- ख । ४. **०कर्कटादयः** ख घ ङ ।

वृक्ष-गुल्म-लतावितानादयः, तथा तृण-पत्रनिश्रिता पतङ्गेलिकादयः, तथा काष्ठनिश्रिता घुणोद्देहिका-पिपीलिका-ऽण्डादयः, गोमयनिश्रिताः कुन्थु-[१]पनकादयः, कचवरः[२] पत्र-तृण-धूलिसमुदायः, तन्निश्रिताः कृमि-कीट-पतङ्गादयः । [३]तथा सन्ति विद्यन्ते सम्पतितुम् उत्प्लुत्योत्प्लुत्य गन्तुमागन्तुं वा शीलं येषां ते सम्पातिनः प्राणिनः जीवाः मक्षिका-भ्रमर-पतङ्ग-मशक-पक्षि-वातादयः, एते च सम्पातिनः आहत्य उपेत्य स्वत एव, यदि वा अत्यर्थं कदाचिद्वाऽग्निशिखायां सम्पतन्ति च[४] । तदेवं पृथिव्यादिनिश्रितानां जीवानां यद् भवति तद् दर्शयितुमाह—**अगणिं चे**त्यादि । रन्धन-पचन-तापनाद्यग्नि-गुणार्थिभिरवश्यमग्निसमारम्भो विधेयः, तत्समारम्भे च पृथिव्यादिनिश्रितानां जीवानामेता वक्ष्यमाणा अवस्था भवन्ति । छान्दसत्वात् तृतीयार्थे द्वितीया । ततश्चायमर्थः—अग्निना स्पृष्टाः छुप्ता [५]एके सङ्घातम् अधिकं गात्रसङ्कोचनं मयूरपिच्छवदापद्यन्ते, [६]चशब्दस्या[७]धिकार्थत्वात् । **खलु**शब्दोऽवधारणे, अग्नेरेवायं प्रतापो नापरस्येति । यदि वा सप्तम्यर्थे द्वितीया[८], स्पृष्टशब्दश्च पतितवचनः । ततश्चायमर्थो भवति—अग्नावेव स्पृष्टाः पतिताः एके शलभादयः सङ्घातं सम् एकी[९]भावेनाधिकं गात्र[१०]सङ्कोचनम् आपद्यन्ते प्राप्नुवन्ति । ये च तत्र अग्नौ पतिताः सङ्घातमापद्यन्ते ते प्राणिनः तत्र अग्नौ पर्यापद्यन्ते, पर्यापत्तिः सम्मूर्च्छनम्, ऊष्माभिभूता [११]मूर्च्छामापद्यन्ते इत्यर्थः । अथ किमर्थं सूत्रकृता विभक्ति-परिणामोऽकारि ? इत्युच्यते—**मागधदेशी**समनुवृत्तेः, व्याख्याविकल्प[१२]प्रदर्शनार्थं वा, अध्याहारादयोऽपि व्याख्याङ्गानीत्यनेन शिष्यो ज्ञापितो भवति । अथ के पुनस्तेऽध्याहारादय इति ? उच्यन्ते—अध्याहारो विपरिणामो व्यवहितकल्पना गुणकल्पना लक्षणा वाक्यभेदश्चेति । इह च द्वितीयाविभक्तेः सप्तमीपरिणामः कृत

---

१. **०पणकादयः** ख ग । २. **०रः तृण-पत्र-धूलि०** क-गपुस्तके ऋते । ३. **तथा विद्यन्ते** च । ४. "चसद्देण वाउजीवा तप्पेरिता वा मसगादि ।" इति चूर्णौ । ५. **एके केचन सङ्घा०** ग । ६. "चसद्दा जालं फुसित्ता वि । खलु पूरणे ।" इति चूर्णौ । ७. **०स्याधि-क्यार्थत्वात्** क-खआदर्शौ विना । ८. "अगणिं च खलु पुट्ठ ति अगणिणा पुट्ठा, अग्गिं वा फुसित्ता ।" इति सप्तमीमनादृत्य व्याख्यातमस्ति चूर्णिकृद्भिः । ९. **०भावेन गात्र०** ख । १०. **०सङ्कोचम्** च । ११. **मूर्छनामाप०** च । १२. **०प्रदर्शनाय वा** घ ङ ।

इति । ये च तत्र अग्नौ पर्यापद्यन्ते ते प्राणिनः कृमि-पिपीलिका-भ्रमर-नकुलादयः तत्र [1]अग्नौ अपद्रान्ति प्राणान्मुञ्चन्तीत्यर्थः । तदेवमग्निसमारम्भे सति न केवलमग्निजन्तूनां विनाशः किन्त्वन्येषामपि पृथ्वी-तृण-पत्र-काष्ठ-गोमय-कचवराश्रितानां सम्पातिनां च व्यापत्तिरवश्यम्भाविनीति । अत [2]एव च **भगवत्यां** भगवतोक्तम्—

**दो पुरिसा सरिसवया अन्नमन्नेहिं सद्धिं अगणिकायं समारंभंति, तत्थ णं एगे पुरिसे अगणिकायं समुज्जालेइ, एगे विज्झवेइ, तत्थ णं के पुरिसे महाकम्मयराए ? → के पुरिसे अप्पकम्मयराए ? ←गोयमा ! जे उज्जालेइ से महाकम्मयराए, जे विज्झवेइ से अप्पकम्मयराए । [ ]**

[4]तदेवं प्रभूतसत्त्वोप[5]मर्दनकरमग्न्यारम्भं विज्ञाय मनो-वाक्-कायैः कृत-कारिता-ऽनुमतिभिश्च तत्परिहारः कार्य इति दर्शयितुमाह—

**एत्थ सत्थे**त्यादि । अत्र अग्निकाये शस्त्रं स्वकाय-परकायभेदभिन्नं समारभमाणस्य व्यापारयत इत्येते आरम्भाः पचन-पाचनादयो बन्धहेतुत्वेनाऽपरिज्ञाता भवन्ति । तथा अत्रैव अग्निकाये शस्त्रमसमारभ[6]माणस्येत्येते [7]आरम्भाः परिज्ञाता भवन्ति । यस्यैतेऽग्निकायसमारम्भा ज्ञपरिज्ञया [8]ज्ञाता भवन्ति प्रत्याख्यानपरिज्ञया च परिहृता भवन्ति स एव मुनिः परमार्थतः परिज्ञातकर्मेति ब्रवीमि इति पूर्ववदिति ।

**शस्त्रपरिज्ञायां चतुर्थोद्देशकटीका [9]समाप्ता ॥ छ ॥ छ ॥**

● ● ●

१. **अग्नावुपद्रान्ति** च । २. **एव भगवत्यां** च, **एव भगवतो०** ग । ३. → ← एतच्चिह्नस्थः पाठो घ-ङआदर्शयोरेव । ४. **तत एवं प्र०** ख, **अत एव प्र०** च । ५. **०मर्दनमग्न्या०** च । ६. **०माणस्यैते** ख । ७. **आरम्भा ज्ञाता** क । ८. **परिज्ञाता** ख । ९. **समाप्तेति** ॥ ख च ।

उक्तश्चतुर्थ[1] उद्देशकः । साम्प्रतं पञ्चमः समारभ्यते[2] । अस्य चायमभिसम्बन्धः-इहानन्तरोद्देशके तेजस्कायः प्रतिपादितः, तदनन्तरमविकल[3]साधुगुणप्रतिपत्तये क्रमायातवायुकायप्रतिपादनावसरे वनस्पतिकायजीवस्वरूपमाविर्भाव्यते । किं पुनः क्रमोल्लङ्घनकारणम्[4] ? इत्युच्यते—एष हि वायुरचाक्षुषत्वाद् दुःश्रद्धानः, अतः समधिगताशेषपृथिव्याद्येकेन्द्रियप्राणिगणस्वरूपः शिष्यः सुखमेव वायुजीवस्वरूपं प्रतिपत्स्यते, स एव च[5] क्रमो येन शिष्या जीवादितत्त्वं प्रति प्रोत्सहन्ते यथावत् प्रतिपत्तुमिति, वनस्पतिकायस्तु समस्तलोकप्रत्यक्षपरिस्फुटजीवलिङ्गकलापः[6], अतः स एव तावत् प्रतिपाद्यते इति । अनेन सम्बन्धेनायातस्यास्य चत्वार्यनुयोगद्वाराणि वाच्यानि यावन्नामनिष्पन्ने निक्षेपे वनस्पत्युद्देशकः । तत्र वनस्पतेः स्वभेदकलापप्रतिपादनाय पूर्वप्रसिद्धार्थातिदेशद्वारेण **निर्युक्तिकृ**दाह—

**पुढवीए जे दारा वणप्फईए[7] वि होंति ते चेव ।**
**नाणत्ती उ[8] विहाणे परिमाणुवभोग-सत्थे य ॥१२६॥**

**पुढवीए**[9]त्यादि । यानि पृथ्वीकायसमधिगतये द्वाराण्युक्तानि तान्येव वनस्पतौ द्रष्टव्यानि, नानात्वं तु प्ररूपणा[10]-परिमाण-उपभोग-शस्त्रेषु **च**शब्दाद् लक्षणे च द्रष्टव्यमिति ॥१२६॥

तत्रादौ प्ररूपणास्वरूपनिर्ज्ञापनायाह[11]—

**दुविहा[12] वणस्सइजीवा सुहुमा तह बायरा य[13] लोयम्मि ।**
**सुहुमा य सव्वलोए दो[14] चेव य बायरविहाणा ॥१२७॥**

**दुविहे**त्यादि । वनस्पतयो द्विविधाः—सूक्ष्मा बादराश्च । सूक्ष्माः सर्वलोका-

---

१. **०चतुर्थोद्देशकः** कप्रतिमृते । २. **प्रारभ्यते** ख । ३. **०लसुसाधु०** ग । ४. **०णमिदम् ? उच्यते** च । ५. **च** इति ख-चपुस्तकयोर्न वर्तते । ६. **०कलापोपेतः, अतः** ङ । ७. **वणसइकाए वि हुंति ते** छ-जआदर्शयोर्विना । ८. **ए( य? )** झ । ९. **पुढवीए इत्यादि** ख, **पुढवीतेत्यादि** ग । १०. **प्ररूपण-परि०** ख, **प्ररूपणा-प्रमाण०** ग । ११. **०निर्ज्ञानायाह** ख । १२. दुविह **वणस्सइ०** ख छ ठ । १३. **वि** ञ, उ ठ । १४. **दो च्चेव य** ख ज झ, **दो य भवे बायर०** ञ ।

पन्नाश्चक्षुर्ग्राह्याश्च न भवन्ति एकाकारा एव । बादराणां पुनर्द्वे विधाने ॥१२७॥ के[१] पुनस्ते ? इत्यत आह—

**पत्तेया साहारण बायरजीवा समासओ दुविहा ।**
**बारसविह णेगविहा समासओ छव्विहा होंति ॥१२८॥**

**पत्तेया०** इत्यादि । बादराः समासतो द्विविधाः—प्रत्येकाः साधारणाश्च । तत्र[२] पत्र-पुष्प-मूल-फल-स्कन्धादीन् प्रति प्रत्येको जीवो येषां ते प्रत्येकजीवाः । साधारणास्तु परस्परानु[३]वेधादनन्तजीवसङ्घातरूपशरीरावस्थानाः । तत्र प्रत्येकशरीरा द्वादशविधानाः । साधारणास्त्वनेकभेदाः । सर्वेऽप्येते समासतः षोढा प्रत्येतव्याः ॥१२८॥ तत्र प्रत्येकतरुद्वादशभे[४]दप्रत्यायनायाह—

**रुक्खा गे[५]च्छा गुम्मा लया य वल्ली य पव्वगा चेव ।**
**तण वलय हरिय ओसहि जलरुह कुहणा य बोधव्[६]वा ॥१२९॥**

**रुक्खा०** इत्यादि । वृश्च्यन्त इति वृक्षाः । ते द्विविधाः—एकास्थिका बहुबीजकाश्च । तत्रैकास्थिकाः पिचुमन्दा-ऽऽम्र-को[७]शम्ब-शा[८]ला-ऽङ्कोल्ल-पीलु-स[९]ल्लक्यादयः । बहुबीजकास्तु उदुम्बर-कपित्था-ऽ[१०]स्थिक-ति[११]न्दुक-बिल्वा-ऽऽमलक-पनस-दाडिम-मातुलिङ्गादयः १। गे[१२]च्छास्तु वृन्ताकी-कर्पासी-जपा-आढकी-तुलसी-क[१३]स्तुम्भरी-पि[१४]प्पली-नील्यादयः २। गुल्मानि तु नवमालिका-से[१५]रियक-को[१६]रेण्टक-ब[१७]न्धुजीव-बाण-क[१८]रवीर-सिन्दुवार-वि[१९]चकिल-जाति-

१. **पुनस्ते बादरविधाने ? इत्यत** ख ङ। २. **त[ त्र ] पुष्प-पत्र-मूल०** ङ, **तत्र पत्र-पुष्प-फल-मूल-स्क०** ख च । ३. **०नुविद्धानन्त०** ग घ ङ च, **०नुवेधानन्त०** ख । ४. **०भेदप्रतिपादनायाह** ख । ५. **गुच्छा** क ञ ट । ६. अत आरभ्य १४३ गाथापर्यन्तं १३०-१४१-१४२ अङ्कात्मकगाथात्रयवर्जं द्वादश गाथाः क्वचिदल्प-बहुपाठभेदयुक्ताः **प्रज्ञापनोपाङ्ग-प्रथमपदे** क्रमशः १ (११?)४१-४२-४०-१०२-१०३-९७-९६-९३-८०-८१-९९ अङ्कभाजिन्यः समुपलभ्यन्ते । ७. **०कोशाम्ब०** क । ८. **०साला०** च । ९. **०शल्लक्या०** क ग घ ङ । १०. **०ऽच्छिक०** ख, **०ऽत्थिक०** घ ङ । ११. **०तन्दुक०** च, **०विन्दुक०** ख । १२. **गुच्छास्तु** घ ङ। १३. **०कसुम्भरी०** ग, **०कुस्तुम्भरी०** ङ, **०कुसुम्भरी०** च । १४. **०पिप्पलिनीत्यादयः** क, **०पिष्पली-नील्या०** ङ च । १५. **०सेरीक०** क, **०सेरयक०** ग । १६. **०कोरिण्टक०** ग, **०कोरण्टक०** घ ङ च । १७. **०बन्धुजीवक०** ख ग ङ च, **०बन्धुजीवा०** घ । १८. **०कणवीर०** घ ङ । १९. **०विचिकिल०** ख ।

यूथिकादयः ३। लतास्तु पद्मनागा-ऽशोक-चम्पक-चूत-वासन्ती-[1]अतिमुक्तक-कुन्दलताद्याः ४। वल्ल्यस्तु कुष्माण्डी-कालिङ्गी-त्रपुषी-[2]तुम्बिनी-[3]वालुङ्की-एलालुकी-पटोल्यादयः ५। पर्वगाः पुनः इक्षु-[4]वीरण-शुण्ठ-शर-वेत्र-[5]शतपर्व-वंश-नल-वेणुकादयः ६। तृणानि तु श्वेतिका-कुश-दर्भ-[6]पर्वका-ऽर्जुन-सुरभि-कुरुविन्दादीनि ७। वलयानि च ताल-तमाल-[7]तक्कली-[8]साल-[9]शरला-केतकी-कदली-कन्दल्यादीनि ८। हरितानि [10]तन्दुलीयका-ऽध्यारुह-[11]वस्तुल-बदरक-[12]मार्जारपादिका-चिल्ली-[13]पालक्यादीनि ९। औषध्यस्तु शालि-व्रीहि-गोधूम-यव-कलम-मसूर-तिल-मुद्ग-माष-[14]निष्पाव-कुलत्था-ऽतसी-कुसुम्भ-कोद्रव-कङ्ग्वादयः १०। जलरुहा उदका-ऽवक-पनक-शैवल-[15]कलम्बुका-[16]पाठा-[17]कसेरुका-उत्पल-पद्म-कुमुद-नलिन-[18]पुण्डरीकादयः ११। कुहु(ह?)णास्तु भूमिस्फोटकाभिधानाः आय-[19]काय-[20]कुहण-[21]कुण्डुक्कोदेहलिका-[22]सर्पक-च्छत्रादयः १२। एषां हि प्रत्येकजीवानां वृक्षाणां मूल-[23]स्कन्ध-कन्द-त्वक्-[24]साल-प्रवालादिष्वसङ्ख्येयाः प्रत्येकं जीवाः, पत्राणि पुष्पाणि चैकजीवानि मन्तव्यानि ॥१२९॥ साधारणास्त्वनेकविधाः, तद्यथा—लोही-निहू-[25]स्तुभायिका-अश्व[26]कर्णी-सिंहकर्णी-[27]शृङ्गबेरा-मालुका-[28]मूलक-कृष्ण[29]कन्द-सूरणकन्द-काकोली-[30]क्षीरकाकोलीप्रभृतयः । सर्वेऽप्येते सङ्क्षेपात् षोढा भवन्ति इत्युक्तम्, के पुनस्ते भेदाः ? [31]इत्याह—

---

१. ०अतिमुक्त-कु० घ । २. ०तुम्बी-वा० ख च । ३. वालुकी० च । ४. ०वीरणक-शु० ख । ५. ०शतपत्र-वं० च । ६. ०वर्वका० ख ग । ७. ०तत्कली० घ ङ । ८. ०शाल० ग, ०साला० च । ९. ०सरला० ख ग, ०शरल० घ ङ । १०. तन्दुलीका० च । ११. ०विस्तुल-बदरका० च । १२. ०मार्जारपल्लिका० ख । १३. ०पालिक्या० । १४. ०निष्पावा-कु० क, ०निष्पावक-कु० ग । १५. ०कलुम्बुका० घ, ०कलम्बका० च । १६. ०पाव(ठ)क-कसे० क । १७. ०कशेरुका० ख, ०कशेरुक० ग, ०काशेरुका० घ ङ । १८. ०पौण्डरीका० ख च । १९. ०कायकोण्डुक्कोद्वेहलिकाः सर्प० ख । २०. ०कुहुण० क-खपुस्तके विना । २१. कुन्दुक्कोदेह० ग ङ च, कण्टुक्वोदेह० घ । २२. सर्प-च्छ० ग च । २३. ०स्कन्ध-त्वक्० क, ०स्कन्ध-कन्दक-त्वक् ग । २४. ०शाल० ख ग । २५. ०सुभायिका क च । २६. ०कर्णी-वृन्ताबेरा० क, ०कर्णी-शृङ्ग-बेरा० घ ङ । २७. ०शृङ्गबेर० ग । २८. ०मूलका० च । २९. ०कन्दक-सू० ग । ३०. ०क्षीरकङ्कोली० ख । ३१. इत्याह च- क घ ङ ।

**[१]अग्गबीय मूलबीया खंधबीया चेव पोरबीया य ।**
**बीयरुहा सम्मुच्छिम [२]समासओ [३]वणप्फईजीवा ॥१३०॥**

**अग्ग[४]बी**त्यादि । तत्र [५]कोरेण्टकादयोऽग्रबीजाः । कदल्यादयो मूलबीजाः । निहू-[६]शल्यकी-अरणिकादयः स्कन्धबीजाः । इक्षु-वंश-वेत्रादयः पर्वबीजाः । बीजरुहाः शालि-व्रीह्यादयः । सम्मूर्च्छनजाः पद्मिनी-[७]शृङ्गाटक-पाठा-शैवलादयः । एवमेते समासात् तरुजीवाः षोढा कथिताः, नान्ये सन्तीति प्रतिपत्तव्यम् ॥१३०॥ किंलक्षणाः पुनः प्रत्येकतरवो भव[८]न्ति ? इत्यत आह—

**जह [९]सगल[१०]सरिसवाणं [११]सिले[१२]समिस्साण वत्तिया वट्टी ।**
**पत्तेयसरीराणं तह होंति सरीरसंघाया ॥१३१॥**

**जहे**त्यादि । यथा इति दृष्टान्तोपन्यासार्थः । यथा **सकलसर्षपाणाम्** श्लेषयतीति **श्लेषः** [१३]सर्जरसादिस्तेन मिश्रितानां **वर्तिता** वलिता **वर्तिः** तस्यां च वर्तौ प्रत्येकप्रदेशाः क्रमेण सिद्धार्थकाः स्थिताः, नान्योन्यानुवेधेन, चूर्णितास्तु कदाचिदन्योन्यानुवेधभाजोऽपि स्युरित्यतः सकलग्रहणम् । यथाऽसौ वर्तिस्तथा प्रत्येकतरुशरीरसङ्घातः, यथा च सर्षपास्तथा तदधिष्ठायिनो जीवाः, यथा श्लेषविमिश्रितास्तथा राग-द्वेषप्रचितकर्मपुद्गलोदयमिश्रिता जीवाः । पश्चिमार्द्धेन गाथाया उपन्यस्तदृष्टान्तेन सह साम्यं प्रतिपादितम्, **तथा** इति शब्दोपादानादिति ॥१३१॥ अस्मिन्नेवार्थे दृष्टान्तान्तरमाह—

**जह वा तिलसक्कुलिया बहुएहिँ तिलेहिँ [१४]मेलिदा संती ।**
**पत्तेयसरीराणं [१५]तह जाण सरीरसंघाया ॥१३२॥**

---

१. **अग्गबीया मूलबीया खंधबीया** कजआदर्शौ विना । २. **समासओ वणफतीजीवा** छ ज, **समासओ वणसईजीवा** ॥१३०॥ दा० ॥ ठ । ३. **वणस्सई०** झ । ४. **०बीआ इत्यादि** ख, **बीएत्यादि** ग घ ङ, **०बीयेत्यादि** च । ५. **कोरण्टादयो०** ख, **कोरिण्टका०** ख, ग घ ङ, **कोरण्टका०** च । ६. **०सल्यकी०** ख ग, **०शल्लकी०** घ ङ । ७. **०शृङ्गाटा-पाठ-शै०** क । ८. **०न्ति ? अत आह** ख घ ङ । ९. "अक्षत" ठप्रतौ टिप्पणी । १०. **०सरसवाणं** ज । ११. "लक्षादि" ठपुस्तके टिप्पणी । १२. **०मीसाण** ज । १३. **सर्ज्यरसादिस्नेहेन मि०** क । १४. **मेलिया** कप्रतेर्विना । १५. **तह हुंति स०** क-छपुस्तके विना ।

**जह[1] वे**त्यादि । यथा वा तिल[2]शष्कुलिका तिलप्रधाना पिष्टमयपोलिका बहुभिस्तिलैर्निष्पादिता सती भवति तथा प्रत्येकशरीराणां तरूणां शरीरसङ्घाता भवन्तीति द्रष्टव्यमिति ॥१३२॥ साम्प्रतं प्रत्येकशरीरजीवानामेका-ऽनेकाधिष्ठित-त्वप्रतिपिपादयिषयाह—

**णाणाविहसंठाणा दीसंती एगजीविया पत्ता ।**
**[3]खंधा वि एगजीवा ताल-सरल-[4]नालिएरीणं ॥१३३॥**

**णाणाविहे**त्यादि । नानाविधं भिन्नं संस्थानं येषां तानि नानाविध-संस्थानानि पत्राणि, यानि चैवंभूतानि दृश्यन्ते तान्येकजीवाधिष्ठितान्यवगन्तव्यानि । तथा स्कन्धा अप्येकजीवाधिष्ठितास्ताल-सरल-नालिकेर्यादीनाम्, नात्रानेक-जीवाधिष्ठितत्वं सम्भवतीति । अवशिष्टानां त्वनेकजीवाधिष्ठितत्वं सामर्थ्यात् प्रतिपादितं भवति ॥१३३॥ [5]सम्प्रति प्रत्येकतरुजीवराशिपरिमाणाभिधित्सया-ऽऽह—

**पत्तेया पज्जत्ता [6]सेढीएँ असंखभागमे[7]त्ताए ।**
**लोगाऽसंखाऽपज्जत्तगाण [8]साधारणाऽणंता[9] ॥१३४॥**

**पत्तेया॰** इत्यादि । प्रत्येकतरुजीवाः पर्याप्तकाः [10]संवर्तित[11]चतुरस्री-कृतलोकश्रेण्यसङ्ख्येयभागवर्त्याकाशप्रदेशराशि[12]तुल्यप्रमाणाः, एते च पुन-र्बादरतेजस्काय[13]पर्याप्तकराशेरसङ्ख्येयगुणाः । ये पुनर[14]पर्याप्तकाः [15]प्रत्येक-जन्तव[16]स्ते ह्यसङ्ख्येयानां लोकानां यावन्तः प्रदेशास्तावन्त इति, [17]एतेऽप्य-पर्याप्तकबादरतेजस्कायजीवराशेरसङ्ख्येयगुणाः । सूक्ष्मास्तु वनस्पतयः प्रत्येकशरीरिणः पर्याप्ता अपर्याप्तका वा न सन्त्येव । साधारणास्त्वनन्ता इति

---

१. **जहेत्यादि** ग ङ । २. **तिलसक्कलिया** ग, **तिलशक्कुलिया** घ ङ । ३. **खंधे य एगजीवो** ञ । ४. **॰नालिएराणं** ञ । ५. **साम्प्रतं** ग । ६. **सेढीय** ञ । ७. **॰मेत्ताते** ख ज ञ ठ, **॰मेत्तातो** छ । ८. **साधारणमणंता** ञ । ९. **॰ता॥१३४॥ दारं॥** क छ । १०. "**संवर्तित** इति सप्तरज्जुप्रमाणा" जै॰वि॰प॰ । ११. **॰चतुरश्री॰** क ग । १२. **॰तुल्यपरिमाणाः** ख । १३. **॰पर्याप्तराशे॰** घ ङ । १४. **॰पर्याप्ताः** ख घ ङ । १५. **प्रत्येकतरुजन्त॰** घ । १६. **॰स्तेऽसङ्ख्ये॰** क । १७. **एते ह्यपर्या॰** क ।

विशेषानुपादानात् साधारणाः सूक्ष्म-बादर-पर्याप्तका-ऽपर्याप्तकभेदेन चतुर्विधा अपि पृथक् पृथगनन्तानां लोकानां यावन्तः प्रदेशास्तावन्त इति, अयं तु विशेषः—साधारणबादरपर्याप्तकेभ्यो बादरा अपर्याप्तका असङ्ख्येयगुणाः, बादरा-पर्याप्तकेभ्यः सूक्ष्मा अपर्याप्तका असङ्ख्येयगुणाः, तेभ्योऽपि [१]सूक्ष्माः पर्याप्तका असङ्ख्येयगुणा इति ॥१३४॥ सम्प्रत्येषां तरूणां यो जीवत्वं नेच्छति तं प्रति जीवत्वप्रतिपादनेच्छया **निर्युक्तिकृदाह—**

**एएहिँ सरीरेहिं पच्चक्खं ते परूविया जीवा ।**
**सेसा आणागिज्झा [ य ] चक्खुणा जे न दीसंति ॥१३५॥** [दारं ?]

**एएहीत्यादि** । एतैः पूर्वप्रतिपादितैस्तरुशरीरैः प्रत्यक्षप्रमाण[२]विषयैः प्रत्यक्षं साक्षात् ते वनस्पतिजीवाः प्ररूपिताः प्रसाधिताः, तथाहि—न ह्येतानि शरीराणि जीवव्यापारमन्तरेणैवंविधाकारभाञ्जि [३]भवन्ति, तथा च प्रयोगः—जीवशरीराणि वृक्षाः, [४]अक्षाद्युपलब्धिभावात्, पाण्यादि[५]सङ्घातवत् । [६]तथा कदाचित् सचित्ता अपि वृक्षाः, जीवशरीरत्वात्, पाण्यादिसङ्घातवदेव । तथा मन्दविज्ञान-सुखादिमन्तस्तरवः, अव्यक्तचेतनानुगतत्वात्, सुप्तादिपुरुषवत् । तथा चोक्तम्—

**वृक्षादयो[७]ऽक्षाद्युपलब्धिभावात्, पाण्यादिसङ्घातवदेव देहाः ।**
**तद्वत् सजीवा अपि [८]देहतायाः, [९]सुप्तादिवद् ज्ञान-सुखादिमन्तः ॥ [ ]**

**शेषा** इति सूक्ष्माः ते च चक्षुषा नोपलभ्यन्त इत्याज्ञया [१०]ग्राह्याः, आज्ञा च भगवद्वचनमवितथमरक्तद्विष्टप्रणीतमिति [११]श्रद्धातव्यमिति ॥१३५॥ [१२]साम्प्रतं साधारणलक्षणमभिधित्सुराह—

**साहारणमाहारो [१३]साहारणमाणुपाणुगहणं च ।**
**साहारणजीवाणं साहारणलक्खणं एयं ॥१३६॥**

---

१. **सूक्ष्मपर्या०** ख ग च, **सूक्ष्मपर्याप्तकाः सङ्ख्ये०** घ ङ । २. **०विशेषैः प्र०** च । ३. **भवन्तीति** क-गप्रती ऋते । ४. **अक्ष्याद्युप०** क-च । ५. **०सङ्घातवदिति** । ख । ६. "**तथा कदाचिद्** इति तथा भवन्ति" जै०वि०प० । ७. **०ऽक्ष्याद्युप०** च । ८. "**देहताया** इति अयं हेतुरुभयथा सम्बध्यते" जै०वि०प० । ९. **सुप्तादिविज्ञान०** ख च । १०. **ग्राह्या इति, आज्ञा** कप्रतिमृते । ११. **श्रद्धातव्यमेव** । क-गआदर्शौ विना । १२. १३१-१३२ गाथाभ्यां प्रत्येकवनस्पतिकायलक्षणं प्रागुक्तम् । १३. **साहारण आणुपाणग०** ख झ ठ, **साहारण आणुपाणु०** ज ।

**साहारणे**त्यादि । समानम् एकं धारणम् अङ्गीकरणं शरीरा-ऽऽहारादेर्येषां [1]ते साधारणाः तेषां साधारणानाम् अनन्तकायानां जीवानां साधारणं सामान्य-[2]मेकमाहारग्रहणम्, तथा प्राणापानग्रहणं च [3]साधारणमेव, एतत् साधारण[4]लक्षणम्, एतदुक्तं भवति—एकस्मिन्नाहारितवति सर्वेऽप्याहारितवन्तः, तथैकस्मिन्नुच्छ्वसिते निःश्वसिते वा सर्वेऽप्युच्छ्वसिता निःश्वसिता वेति ॥१३६॥ अमुमेवार्थं स्पष्टयितुमाह—

**[5]एगस्स आणुगहणं बहूण साहारणाण तं चेव ।**
**जं बहुयाणं गहणं समासओ तं पि एगस्स ॥१३७॥**

**एगस्से**त्यादि । एको यद् उच्छ्वास-निःश्वासयोग्यपुद्गलोपादानं विधत्ते बहूनामपि साधारणजीवानां तदेव भवति, तथा यच्च बहवो ग्रहणमकार्षुरेकस्यापि [6]तदेवेति ॥१३७॥ अथ ये बीजात् प्ररोहन्ति वनस्पतयस्तेषां कथमाविर्भावः ? [7]इत्यत आह—

**[8]जोणीभूए बीए जीवो वक्कमइ सो व अन्नो वा ।**
**जो वि य मूले जीवो सो [9]चिय [10]पत्ते पढमयाए ॥१३८॥**

**[11]जोणीभूए०** इत्यादि । अत्र भूतशब्दः अवस्थावचनः, योन्यवस्थे बीजे, योनिपरिणाममजहतीत्यर्थः । बीजस्य हि द्विविधा अवस्था—योन्यवस्था अयोन्यवस्था च । यदा योन्यवस्थां न जहाति बीजम् [12]उज्झितं च जन्तुना तदा योनिभूतमुच्यते । योनिस्तु जन्तोरुत्पत्तिस्थानमविनष्टमिति । तस्मिन् बीजे योनिभूते जीवः व्युत्क्रामति उत्पद्यते, स एव पूर्वको बीजजीवोऽन्यो [13]वाऽऽगत्य तत्रोत्पद्यते, एतदुक्तं भवति—यदा जीवेना[14]ऽऽयुष्कक्षयाद् बीजपरित्यागः कृतो

---

१. **ते तथा तेषां** क ग । २. **०मेकाहार०** ग । ३. **साधारणमिहैतत् सा०°** ख । ४. **०लक्षणमिति** । ए० क-गपुस्तके ऋते । ५. **एगस्स उ जइ गहणं** ख, **एगस्स उ जं गहणं** ज ठ । ६. **तदेव भवति । अथ** ङ । ७. **इत्यत्राह** ख । ८. **जोणिब्भूए** क-जप्रतिभ्यां विना । ९. **च्चिय** क-जआदर्शौ विना । १०. "जो पुण मूले जीवो सो निव्वत्तेइ जा पढमपत्तं । कंदाइ जाव बीयं सेसं अन्ने पकुव्वंति ॥ दशवैकालिकनिर्युक्तौ (गा० )" ज-ठप्रत्योष्टिप्पणी । ११. **जोणीत्यादि** ख च, **जोणिब्भूए बीए० इत्या०** ग । १२. **समुज्झितं** ङ । १३. **वा तत्रागत्योत्पद्यते** ख । १४. **०ऽऽयुषः क्ष०** च ।

भवति, तस्य च यदा बीजस्य क्षित्युदकादिसंयोगस्तदा कदाचित् स एव प्राक्तनो जीवस्तत्रागत्य [1]परिणमते, कदाचिदन्य इति । यश्च मूलतया जीवः [2]परिणमते स [3]एव प्रथमपत्रतयाऽपीति, एकजीवकर्तृके मूल-पत्रे इति यावत् । प्रथमपत्रकं च याऽसौ बीजस्य समुच्छूनावस्था भू-जल-[4]कालापेक्षा सैवोच्यत इति नियमप्रदर्शनमेतत्, शेषं तु [5]किशलयादि सकलं न मूलजीवपरिणामाविर्भावितमेवेत्यव[6]गन्तव्यमिति, यत उक्तम्—

**सव्वो वि किसलओ खलु उग्गममाणो अणंतओ भणिओ** । [प्रज्ञा० प० १ गा० ९४ ] इत्यादि ॥१३८॥

[7]तथाऽपरं साधारणलक्षणमभिधित्सुराह—

**चक्कागं भज्जमाणस्स गंठी चुण्णघणो भवे ।**
**पुढवि[8]सरिसभेदेणं अणंतजीवं [9]वियाणाहि ॥१३९॥**

**चक्कागमित्यादि** । यस्य मूल-कन्द-त्वक्-पत्र-पुष्प-फलादेर्भज्यमानस्य चक्रकं भवति, चक्राकारः समच्छेदो भङ्गो भवतीति यावत्, यस्य च ग्रन्थिः पर्व भङ्गस्थानं वा चूर्णेन रजसा घनः व्याप्तो भवति, यो वा भिद्यमानो वनस्पतिः पृथिवीसदृशेन भेदेन केदारोपरिशुष्कतरिकावत् पुटभेदेन भिद्यते तमनन्तकायं विजानीहि ॥१३९॥ तथा लक्षणान्तरमाह—

**[10]गूढसिरागं पत्तं सच्छीरं जं च होइ निच्छीरं ।**
**[11]जं पिय पणट्ठ[12]संधिं अणंतजीवं वियाणाहि ॥१४०॥**

**गूढसिरागमित्यादि** । स्पष्टार्था ॥१४०॥ एवं साधारणजीवान् लक्षणतः प्रतिपाद्य सम्प्रति नामग्राहमनन्तान् वनस्पतीन् दर्शयितुमाह—

---

१. **परिणमति** ख घ ङ । २. **परिणमति** घ ङ । ३. **एष** ग । ४. **०कालापेक्ष्या सैषोच्यत** ग । ५. **किसलयादि** ख । ६. **०गन्तव्यम्, यत** ख च । ७. **साम्प्रतं साधा०** ख, **साम्प्रतमपरं साधा०** च, **तथा साम्प्रतमपरं साधा०** ग । ८. **सरिसेण भेएण** छ ज झ, **०सिरिसेण भेतेण** ज । ९. **वियाणाहिं** ज । १०. **गूढच्छिरागपत्तं** छ । ११. **जं पुण पण०** ख ठ । १२. **०संधि अणं०** ज, **संधि य अणं०** ठ ।

**सेवाल कच्छ[१]भाणिय [२]अवए पणए य किन्नए य हढे ।**
**एए [३]अणंतजी[४]वा भणिया [५]अण्णे अणेगविहा ॥१४१॥**

**सेवाल०** इत्यादि । शैवल-कच्छभाणिका-ऽवक-पनक-किण्व-[६]हठादयोऽनन्तजीवा गदिताः, अनेकप्रकाराश्चान्येऽपीत्थमवगन्तव्या इति ॥१४१॥ सम्प्रति प्रत्येकतरूणामेकादिजीवपरिगृहीतशरीरदृश्यत्वप्रतिपि[७]पादयिषयाह—

**[८]एक्कस्स दोण्ह तिण्ह व संखेज्जाण [९]व तहा असंखाणं ।**
**पत्तेयसरीराणं दीसंति सरीरसंघाया ॥१४२॥**

**एगस्से**त्यादि । एकजीवपरिगृहीतशरीरं ताल-सरल-नालिकेर्यादिस्कन्धः, स [१०]च चक्षुर्ग्राह्यः, तथा बिस-मृणाल-कर्णिका-कुणक-कटाहानामेक[११]जीव-परिगृहीतत्वं चक्षुर्दृश्यत्वं च । द्वि-त्रि-सङ्ख्येया-ऽसङ्ख्येयजीवपरिगृहीत[१२]त्व-मप्येवं दृश्यतया भावनीयमिति ॥१४२॥ किमनन्तानामप्येवम् ? नेत्यत आह—

**[१३]एगस्स दोण्ह तिण्ह व[ ऽ ]संखेज्जाण व ण पासिउं सक्का ।**
**दीसंति सरीराइं णिओयजीवाणऽणंताणं ॥१४३॥ दा० ॥**

**एगस्से**त्यादि । नैकादीनामसङ्ख्येयावसानानामनन्ततरुजीवानां शरीरा-ण्युपलभ्यन्ते, कुतः ? [१४]असम्भवात्, न ह्येकादिजीवपरिगृहीतान्यनन्तानां शरीराणि सन्ति, अनन्तजीवपिण्डत्वादेव । कथं तर्ह्युपलभ्यास्ते भवन्ति ? इति दर्शयति—दृश्यन्ते शरीराणि बादरनिगो[१५]दानां जीवानामनन्तकायिकानाम्, सूक्ष्मनिगोदानां तु नोपलभ्यन्ते, अनन्तजीवसङ्घात[१६]त्वेऽपि सत्यतिसूक्ष्मत्वादिति भावः, निगोदास्तु नियमत एवानन्तजीवसङ्घाता भवन्तीति, उक्तं च—

---

१. ०भाणीय अ० ख ज, ०हाणीय अ० झ, ०भाणी अ० क ञ । २. अवते पणते य किन्नते य हदे ञ । ३. अणेगजीवा अ भणि० ख । ४. ०वा जे आऽवण्णे तहाविहा ॥१४१॥ ञ । ५. चण्णे झ । ६. ०हढादयो० च । ७. ०पिपादयिषुराह च । ८. एकस्स ञ । ९. वि क छ ज । १०. च इति ग-घ-ङ प्रतिषु नास्ति । ११. ०जीवत्वं च । १२. ०त्वमित्येवं घ ङ । १३. एक्कस्स ख । १४. अभावात् कपुस्तकेन विना । १५. ०दानामनन्तजीवानाम्, सूक्ष्म० ख च, ०दानामनन्तकायिकानां जीवानाम्, सूक्ष्म० ग, ०दानां स( सं )ख्येवा( या )नामनन्त-कायिकानाम्, सूक्ष्म० ङ घप्रतौ पाठत्रुटिः । १६. ०त्वे सत्यप्यतिसूक्ष्म० ख च ।

**गोला य असंखेज्जा होंति णिओया असंखया गोले ।**
**[1]एगेगो य निओओ अणंतजीवो मुणेयव्वो ॥ [ ]**

एवं वनस्पतीनां वृक्षादिप्रत्येकादिभेदात् तथा वर्ण-गन्ध-रस-स्पर्शभेदात् सहस्राग्रशो विधानानि सङ्ख्येयानि योनिप्रमुखानि शतसहस्राणि भेदानामवसे[2]यानीति, तथाहि—वनस्पतीनां संवृता योनिः, सा च सचित्ताऽचित्तमिश्रभेदात् त्रिधा, तथा शीतोष्णमिश्रभेदाच्च, तथा प्रत्येकतरूणां दश लक्षा योनिभेदानाम्, साधारणानां च चतुर्दश, कुलकोटीनां द्वयोरपि पञ्चविंशतिकोटिशतसहस्राणीति ॥१४३॥ उक्तं विधानद्वारम् । इदानीं [3]परिमाणमभिधीयते, [4]तच्च प्रथमं सूक्ष्मानन्तजीवानां दर्शयितु[5]माह—

**[6]पत्थेण व [7]कुडएण व जह कोइ मिणिज्ज सव्वधन्नाइं ।**
**एवं मविज्जमाणा हवंति लोया अणंता उ ॥१४४॥**

**पत्थेणे**त्यादि । प्रस्थ-कुडवादिना यथा कश्चित् सर्वधान्यानि प्रमिणुयात्, मित्वा चान्यत्र प्रक्षिपेत् एवं यदि नाम कश्चित् साधारणजीवराशिं लोककुडवेन मित्वाऽन्यत्र प्रक्षिपेत्, तत एवं मीयमा[8]ना अनन्ता लोका भवन्तीति ॥१४४॥ इदानीं बादरनिगोदपरिमाणाभिधित्सयाऽऽह—

**जे बायरपज्जत्ता पयरस्स असंखभागमेत्ता ते ।**
**[9]सेसा असंखलोया तिन्नि वि [10]साहारणाऽणन्ता ॥१४५॥** दारं ॥

**जे बायरे**त्यादि । ये [11]पर्याप्तकबादरनिगोदास्ते [12]संवर्तित[13]चतुरस्रीकृतसकललोकप्रतरासङ्ख्येयभागवर्तिप्रदेशराशिपरिमाणा भवन्ति, एते पुनः प्रत्येकशरीबादरवनस्पतिपर्याप्तकजीवेभ्योऽसङ्ख्येय[14]गुणाः । शेषास्त्रयोऽपि राशयः

---

१. **एक्कक्को** ख, **एक्केक्के य णिओए अणंतजीवा मुणेयव्वा** ग च । २. **०यानि, तथा** ख च । ३. **परिमाणद्वारमभि०** ख । ४. **तत्र** ग ङ । ५. प्रत्येकतरुजीवपरिमाणं प्राक् १३४ गाथयोक्तम् । ६. **पत्थेणं कु०** छ । ७. **कुलएण** ख, **कुडवेण** ज ठ । ८. **०ना भवन्ति लोका अनन्ता इति** ख च । ९. **सेसा तिन्नि वि रासी असंख साहारणमणंता** ज । १०. ***साहारणमणंता*** ज, *"एते च क्रमशो बहु-बहुतरकाः, साधा०जीवास्तेभ्योऽप्यनन्तगुणाः, एतज्जीवप्रमाणम्"* ठटिप्पणी । ११. **पर्याप्तका बा०** घ । १२. **संवृतच०** च । १३. **०चतुरश्री०** क ग । १४. **गुणा इति । शे०** ग घ ।

प्रत्येकमसङ्ख्येयलोकाकाशप्रदेशपरिमाणाः । के पुनस्त्रयः ? [1]इत्युच्यते– अपर्याप्तकबादरनिगोदा अपर्याप्तकसूक्ष्मनिगोदाः पर्याप्तकसूक्ष्मनिगोदाः । एते च क्रमशो बहुतरका द्रष्टव्या इति । [2]साधारणजीवास्तेभ्योऽनन्तगुणाः । एतच्च जीवपरिमाणम्, प्राक्तनं तु राशिचतुष्टयं निगोदपरिमाणमिति ॥१४५॥ परिमाणद्वारानन्तरमुपभोग[3]द्वारमभिधित्सुराह–

**आहारे उवगरणे सयणा-ऽऽ[4]सण जाण जुग्गकरणे य ।**
**[5]आवरण पहरणेसु य [6]सत्थविहाणेसु य [7]बहूसु ॥१४६॥**

**[8]आहारेत्यादि** । आहारः फल-पत्र-[9]किशलय-मूल-कन्द-त्वगादि-निर्वर्त्यः । उपकरणं व्यजन-कटक-वलका-ऽर्गलादि । शयनं खट्वा-फलकादि। आसनम् [10]आसन्दकादि । यानं शिबिकादि । युग्यं गन्त्रिकादि । आवरणं [11]फलकादि । प्रहरणं लकुट-[12]मुसुण्ढ्यादि । शस्त्रविधानानि च बहूनि तन्निर्वर्त्यानि शर-दात्र-खड्ग-क्षुरिकादिग[13]ण्डोपयोगि[14]त्वादिति ॥१४६॥ तथाऽपरोऽपि परिभोगविधिः, तद्दर्शनायाह–

**आउज्ज कट्ठकम्मे [15]गंधंगे वत्थ [16]मल्लजोए य ।**
**[17]झावण-वियावणेसु य तेल्लविहाणे अ [18]उज्जोवे ॥१४७॥**

**आउज्जेत्यादि** । आतोद्यानि पटह-भेरी-वंश-वीणा-झल्लर्यादीनि । काष्ठकर्म प्रतिमा-स्तम्भ-द्वार[19]शाखादीनि । गन्धाङ्गानि वालक-प्रियङ्गु-[20]पत्रक-दमनक-त्वक्-चन्दन-उशीर-देवदार्वादीनि । वस्त्राणि वल्कल-कर्पासमया-दीनि। माल्ययोगाः [21]नवमालिका-बकुल-चम्पक-पुन्नागा-ऽशोक-मालती-[22]विचकिलादयः । ध्यापनं दाहो भस्मसात्करणमिन्धनैः । वितापन[23]ं शीताभ्यर्दितस्य

---

१. इत्युच्यन्ते ग । २. साधरण( णा )स्त्वेभ्यो० ग । ३. ०द्वारम( द्वारा )भिधित्सयाह क । ४. "पाटला" ठटिप्पणी । ५. "खेटका" ठटिप्पणी । ६. "खड्गक्षुरिकादिदण्ड" ठटिप्पणी । ७. बहुस्सु छ, बहुसु य झ । ८. आहारे इत्यादि ख । ९. ०किसलय० घ ङ । १०. आसिन्दिकादि ग । ११. फरकादि ख घ ङ । १२. ०मुसलादि ग च । १३. ०दण्डोप० ख, ०षण्डोप० ग च । १४. ०त्वादीनि घ । १५. गंधग्गे छ । १६. मल्ले जोए झ । १७. झामण-वियामणेसु ज, झावण-सियावणेसु झ । १८. उज्जोए ख ज झ । १९. ०शाखादि । ग० ख च । २०. ०पत्र-द० च । २१. वनमालिका० क । २२. ०विचिकिला० ख ङ । २३. ०नं शीतापन० क च ।

शीतापनयनाय काष्ठप्रज्वालनात् । तैलविधानं तिला-ऽतसी-सैर्षप[1]-इङ्गुदी-ज्योतिष्मती-करञ्जादिभिः । उद्द्योतः वर्ति-तृण-चूडा-काष्ठादिभिरिति ॥१४७॥ एवमेतान्युपभोगस्थानानि प्रतिपाद्य तदुपसंञ्जिहीर्षुराह[2]—

**एएहिं कारणेहिं हिंसंति[3] वणस्सई बहू जीवे ।**
**सायं गवेसमाणा परस्स दुक्खं उदीरेंति[4] ॥१४८॥** दारं ॥

**एएही**त्यादि । **एतैः** गाथाद्वयोपात्तैः **कारणैः** प्रयोजनैः **हिंसन्ति** व्यापादयन्ति प्रत्येक-साधारणवनस्पतिजीवान् **बहून्** वनस्पतिसमारम्भिणः पुरुषाः, किम्भूतास्ते ? इति दर्शयति-सातं सुखं तदन्वेषिणः परस्य च वनस्प[5]-त्याद्येकेन्द्रिय-द्वीन्द्रियादेः[6] दुःखं बाधामुत्पादयन्तीति[7] ॥१४८॥ साम्प्रतं शस्त्रमुच्यते, तच्च द्विधा, द्रव्य-भावभेदात् । द्रव्यशस्त्रमपि समास-विभागभेदाद् द्विधैव । तत्र समासद्रव्यशस्त्राभिधित्सयाह—

**कप्पणि कुहाडि[8] असियग[9] दत्तिय कुद्दाल वासि परसू[10] अ ।**
**सत्थं[11] वणस्सईए हत्था पाया मुहं अग्गी ॥१४९॥**

**कप्पणी**त्यादि । कल्प्यते छिद्यते यया सा **कल्पनी** शस्त्रविशेषः, **कुठारी** प्रसिद्धैव, **असियगं** दात्रम्, **दात्रिका** प्रसिद्धैव[12], **कुद्दालक-वासि-परशवश्च,** एतद् वनस्पतेः शस्त्रम्, तथा हस्त-पाद-मुखा-ऽग्नयश्च इत्येतत् सामान्य-शस्त्रमिति ॥१४९॥ विभागशस्त्राभिधित्सयाह—

**किंची[13] सकाय०** गाहा ॥१५०॥ दा० ॥

---

१. ०सर्षपा-ऽङ्गुदी० ख, "अङ्गुदी इति इंगोरी, ज्योतिष्कानी ( ष्मती? ) इति कंगुणी" जै०वि०प०, "उद्दे० ५-ज्योतिष्मती कांगुणी" स०वि०प० । २. ०सञ्जिहीर्षयाह ख च । ३. हिंसंती वणस्स( स )ई क ञ । ४. उदीरंति ठ । ५. वनस्पाता( त्या )द्येकेन्द्रियादेः दुःखं क, वनस्पत्यादि-द्वीन्द्रियादेर्वा [ दुःखं बा ? ] धा० ख, वनस्पत्यादिद्व्येकेन्द्रियादेर्दुःखं ग, वनस्पत्यादि-द्वीन्द्रियादेर्दुःखं च । ६. ०द्वीन्द्रियदो( यो? )र्दुःखं घ । ७. ०मुत्पादयन्ति ग । ८. कुहड्डि ञ । ९. यसियग क ञ । १०. परुसू क, फरसू ख ठ, फरुसू ज झ । ११. सत्था ज झ । १२. प्रसिद्धा, कुर्दालक० ख, प्रसिद्धा, कुद्दा० ग, प्रसिद्धा, कुद्दालिका० च । १३. किंची स० गाहा ञ ।

**किंची**त्यादि । किञ्चित् स्वकाय[1]शस्त्रं लकुटादि, किञ्चिच्च परकायशस्त्रं पाषाणा-ऽग्न्यादि, तथा उभयशस्त्रं दात्र-दात्रिका-कुठारादि । एतद् द्रव्यशस्त्रम् । भावशस्त्रं पुनर् असंयमः दुष्प्रणिहितमनो-वाक्-कायलक्षण इति ॥१५०॥ [2]सकलनिर्युक्त्यर्थपरिसमाप्तिप्रचिकटयिषयाह—

**[3]सेसाणि उ दाराइं ताइं जाइं हवंति पुढवीए ।**
**एवं वणस्सईए निज्जुत्ती कित्तिया [4]एसा ॥१५१॥** छ ॥ दारं ॥

**[5]सेसा०** इत्यादि । उक्तव्यतिरिक्तशेषाणि तान्येव द्वाराणि यानि पृथिव्यामभिहितानि । ततस्तद्द्वाराभिधानाद्वनस्पतौ निर्युक्तिः कीर्तिता व्यावर्णितेति ॥१५१॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम् , तच्चेदम्—

**[ सू०४० ] तं णो करिस्सामि समुट्ठाए मत्ता मतिमं अभयं विदित्ता तं जे णो करए एसोवरते, एत्थोवरए, एस अणगारे त्ति पवुच्चति ।**

**तन्नो करिस्सामि [6]समुट्ठाए** । अस्य चानन्तर-परम्परादिसूत्रैः सम्बन्धः प्राग्वद् वाच्यः । उक्तं प्राक् 'सातान्वेषिणो हि वनस्पतिजन्तूनां दुःखमुदीरयन्ति, ततश्च तन्मूलमेव दुःखगहने संसारसागरे भ्राम्यन्ति सत्त्वाः' इति । एवं विदितकटुकविपाकः समस्तवनस्पतिसत्त्व[7]विषयविमर्दनिवृत्तिमात्यन्तिकीमात्मनि दर्शयन्नाह—**तत्** वनस्पतीनां दुःखमहं दृष्टप्रत्यपायो **न करिष्ये** । यदि वा **तत्** दुःखोत्पत्तिनिमित्तभूतं वनस्पतावारम्भं छेदन-भेदनादिरूपं **नो करिष्ये** मनो-वाक्-कायैः, तथा परैर्न **कारयिष्ये**, [8]तथा कुर्वतश्चान्यान् **नानुमंस्ये** । किं कृत्वा ? इति दर्शयति—सर्वज्ञोपदिष्टमार्गानुसृत्या सम्यक् प्रव्रज्योत्थानेनोत्थाय **[9]समुत्थाय**, प्रव्रज्यां प्रतिपद्येत्यर्थः । तदेवं वर्जितसकलसावद्यारम्भकलापः सन्

---

१. ०शस्त्रं कुठारादि, किञ्चिच्च ख । २. सर्वनिर्यु० ख । ३. सेसाइं दा० क-छप्रती विना । ४. एसा ॥१५१॥ समाप्ता पञ्चमोद्देशकनिर्युक्तिः ॥छ॥ झ, एसा ॥१५१॥ अध्य० १ उद्दे० ५॥ ठ । ५. सेसाइं दाराइं० इत्यादि च, सेसाइं० इत्यादि ग । ६. समुट्ठाय ङ । ७. ०तिविषय० क । ८. तथा इति ख-चपुस्तकयोर्न विद्यते । ९. समुत्थाय, सम्यक् प्रव्रज्यां ग ।

तत् वनस्पतिदुःखं तदारम्भं वा नो करिष्यामीति, अनेन च संयमक्रिया दर्शिता। न च क्रियात एव मोक्षावाप्तिः । किं तर्हि ? ज्ञान-क्रियाभ्याम्, तदुक्तम्—

**नाणं किरियारहियं किरियामित्तं च [1]दो वि [2]एगंता ।**
**न समत्था दाउं जे जम्म-[3]मरणदुक्खमोहाइं ॥ [ ]**

यत एवमतो विशिष्टमोक्षकारणभूतज्ञानप्रतिपिपादयिषयाऽऽह—**मत्ता मइमं** मत्वा ज्ञात्वा [4]अवबुध्य यथावद् जीवान् । [5]मतिरस्यास्तीति [6]मतिमान् । स एवोपदेशार्हो भवतीत्यतस्तद्द्वारेणैव शिष्यामन्त्रणं हे [7]मतिमन् ! । जीवादिपदार्थांश्च ज्ञात्वा प्रव्रज्यां [8]च प्रतिपद्य मोक्षमवाप्नोतीति, सम्यग्ज्ञान[9]पूर्विका हि क्रिया फलवतीति दर्शितं [10]भवति ।

पुनरत्रैवाह—[11]**अभयं विदित्ता** अविद्यमानं भयमस्मिन् सत्त्वानामिति **अभयः** संयमः, स च सप्तदशविधानस्तं चाभयं सर्वभूतपरिपालनात्मकं संसारसागरान्निर्वाहकं विदित्वा वनस्पत्यारम्भान्निवृत्तिर्विधेयेति ।

एतदेव दर्शयितुमाह—**तं जे नो [12]करए०** इत्यादि । [13]**तं** वनस्पत्यारम्भं यः विदिततदारम्भकटुकविपाको नो कुर्यात् तस्य [14]प्रतिविशिष्टेष्टफलावाप्तिः,

---

१. **दोन्नि ए०** ख । २. "**एगंता** इति केवली" जै०वि०प० । ३. **०मरणदुक्खदाहाइं** ख, **०मरणदुक्खमाभाइं** ग घ ङ **०मरणदुक्खमाहाइं** च. "**मरणदुक्खमाभाइं** ति अभयमित्यर्थः" स०वि०प०, "**मोहाइं**" इति भ्रंसा(शा)दि । ४. **अनुबुध्य** क । ५. "मती से अत्थि **मतिमं** । आभिनिबोहियनाणं घेप्पति । सुत्तं तत्थेव । अहवा मइग्गहणा सव्वनाणाइं गहियाइं" चूर्णौ । ६. **०मान् । मतिमानेवोपदेशार्हो** ख ग च । ७. **०मन् ! प्रव्रज्यां प्रतिपद्य जीवादिपदार्थांश्च ज्ञात्वा मोक्ष०** ख । ८. **च** इति घ—चप्रत्योर्नास्ति । ९. **०पूर्वका** ग च । १०. **भवतीति** ग । ११. **अभयं विदित्ता** इति पाठः कआदर्शे न वर्तते, **अभयं विइत्ता** च. "कायाणं अधिकयस्स वा **अभयं विदित्ता,** अभयं सत्तरसविहो संयमो । अहवा सातं ति वा सुहं ति वा परिणिव्वाणं ति वा अभयं ति वा एगट्ठा । तव्विवक्खो असातं ति वा दुक्खं ति अपरिणिव्वाणं ति वा भयं ति वा एगट्ठा । ते साताऽसाते अप्पाेवमेणं जाणित्ता जं अप्पणो अणिट्ठं ण तं परस्स कुज्जा,—जह मम ण पियं दुक्खं, जाणिय एमेव सव्वजीवाणं-गाहा ( )" चूर्णौ । १२. **करएत्यादि** ख ग । १३. "**तदिति** तं भयं जो जेण **णो** पडिसेहे **करए** कुज्जा, किं तं ? छज्जीवनिकायआरंभं अधिकियं वा **एत्थोवरते** त्ति वणस्सइकायसमारंभो (भे?), **एसोवरए** त्ति गुरुसमीवं धम्मं वा उवेच्चे(च्चो)वरतो उवरतो, स एव अणगारा भवति, सेसा दव्वअणगारा ।" चूर्णौ । १४. **०विशिष्टफला०** क ।

नान्यस्यान्धमूढ्या[1] प्रवर्तमानस्य, अभिलषितविप्रकृष्टस्थानप्राप्तिप्रवृत्तान्धक्रिया[2]व्याघातवदिति मन्तव्यम् । ज्ञानमपि क्रियाहीनं न मोक्षाय, गृहान्तर्दह्यमाननिनङ्क्षुपङ्गुचक्षुर्ज्ञानवदिति । एवं च ज्ञात्वाऽभ्युपेत्य च तत्परिहारः कर्तव्य इति दर्शितं भवति ।

एवं यः सम्यग्ज्ञानपूर्विकां निवृत्तिं करोति स एव समस्तारम्भनिवृत्त[3] इति दर्शयति—**एसोवरए** त्ति, एष एव सर्वस्मादारम्भाद् वनस्पतिविषयादुपरतो यो यथावज्ज्ञात्वाऽऽरम्भं न करोतीति । स पुनरेवंविधनिवृत्तिभाक् किं **शाक्या**दिष्वपि सम्भवति ? उत[4] न ? इहैव प्रवचने इति दर्शयति—**एत्थोवरए** त्ति एतस्मिन्नेव[5] जैनेन्द्रे प्रवचने परमार्थत उपरतः, नान्यत्र । यथाप्रतिज्ञातनिरवद्यानुष्ठायित्वाद् उपरतव्यपदेशभाग् भवति, न शेषाः **शाक्या**दयः, तद्विपरीतत्वाद् । एष एव च सम्पूर्णानगारव्यपदेशमश्नुते इति दर्शयति[6]—

**एस[7] अणगारे त्ति पव्वुच्चइ** त्ति **एषः** अतिक्रान्तसूत्रार्थव्यवस्थितः अविद्यमानागारः अनगारः प्रकर्षेण उच्यते प्रोच्यते इति । किंकृतः प्रकर्षः ? अनगार[8]व्यपदेशकारणभूतगुणकलापसम्बन्धकृतः प्रकर्षः । **इति**शब्दः अनगारव्यपदेशकारणपरिसमाप्तिद्योती, एतावदनगारलक्षणम्, नान्यदिति ।

ये पुनः *प्रोज्झितपारमार्थिकानगारगुणाः शब्दादीन् विषयानङ्गीकृत्य प्रवर्तन्ते* ते तु नापेक्षन्ते वनस्पतीन् जीवान्, यतो[9] भूयांसः शब्दादयो गुणा वनस्पतिभ्य एव निष्पद्यन्ते, शब्दादिगुणेष्वेव वर्तमाना राग-द्वेष[10]विषमविष[11]विघूर्णमानलोललोचना नरकादिचतुर्विधगत्यन्तःपातिनो बोद्धव्याः, तदन्तःपातिन एव च शब्दादि[12]विषयाभिष्वङ्गिणो भवन्तीति । अस्यार्थस्य प्रसिद्धये गतप्रत्यागतलक्षणमितरेतरावधारणफलं सूत्रमाह—

---

१. "**अन्धस्तद्योति ( मूढ्येति)** यथा कथञ्चित्" जै०वि०प० । २. **०क्रियासङ्घातवदिति** ख । ३. **०निवृत्तिं करोति इति** ङ । ४. **उत इहैव प्रवचने ? इति** ख ग घ ङ च । ५. **०व प्रव०** ख, **०व जैनेन्द्रप्रव०** ग, **०व जिनेन्द्रप्रव०** घ । ६. **प्रदर्शयति** घ । ७. **एसऽणगारे** ख, **एस अणगार इति पवु०** क, **एस अणगार त्ति पव्वुच्चई एषः** ग । ८. **०व्यपदेशभूत०** ख । ९. **यतो** इति खआदर्शे नास्ति । १०. **०द्वेषविघूर्ण०** घ, **०द्वेषविषविघूर्ण०** ङ । ११. **०विषघूर्ण०** ख । १२. **०विषयाभिषङ्गिणो** क-गप्रती ऋते ।

**[ सू०४१ ] जे गुणे से आवट्टे, जे आवट्टे से गुणे ।**

**उड्ढं अहं तिरियं पाईणं पासमाणे रूवाइं पासति, सुणमाणे सद्दाइं सुणेति । उड्ढं अहं तिरियं पाईणं मुच्छमाणे रूवेसु मुच्छति, सद्देसु यावि ।**

**एस लोगे वियाहिते । एत्थ अगुत्ते अणाणाए पुणो पुणो गुणासाते वंकसमायारे पमत्ते गारमावसे ।**

**जे गुणे से आवट्टे जे आवट्टे से गुणे** । यो गुणः शब्दादिकः स आवर्तः, आवर्तन्ते परिभ्रमन्ति प्राणिनो यत्र स आवर्तः संसारः । इह च[1] कारणमेव कार्यत्वेन व्यपदिश्यते यथा नड्वलोदकं पादरोगः । एवं य एते शब्दादयो गुणाः स आवर्तः तत्कारणत्वात् । अथवैकवचनोपादानात् पुरुषोऽभिसम्बध्यते, यः शब्दादिगुणे वर्तते स आवर्ते वर्तते, यश्चावर्ते वर्तते[2] स गुणे वर्तत इति । अत्र[3] कश्चिच्चोद्यचञ्चुराह[4]—'यो गुणे[5] वर्तते स आवर्ते वर्तते इति साधु । यः पुनरावर्ते वर्तते नासौ नियमत एव गुणेषु वर्तते, यस्मात् साधवो वर्तन्त आवर्ते, न गुणेषु । तद् एतत् कथमिति ? अत्रोच्यते—सत्यम्, आवर्ते यतयो वर्तन्ते, न गुणेषु[6], किन्तु राग-द्वेषपूर्वकं गुणेषु वर्तनमिहाधिक्रियते, तच्च साधूनां न सम्भवति, तदभावात्। आवर्तोऽपि संसरणरूपो दुःखात्मको न सम्भवति । सामान्यतस्तु संसारान्तः-पातित्वं सामान्यशब्दादिगुणोपलब्धिश्च सम्भवत्येव । अतो नोपलब्धिः प्रतिषिध्यते, रागपरिणामो[7] द्वेषपरिणामो वा यस्तत्र स प्रतिषिध्यते, तथा चोक्तम्—

**कण्णसोक्खेहिं[8] सद्देहिं पेम्मं नाभिनिवेसए । [ ]** इत्यादि ।

तथा[9]—

---

१. च इति घप्रतौ नास्ति । २. **वर्तते** क-ग-चपुस्तकेषु न वर्तते । ३. **अथ** घ ङ । ४. **कश्चिन्नोद्यचञ्चु०** ख । ५. **गुणेषु** कप्रतिमृते । ६. **गुणे किन्तु** घ । ७. **रागद्वेषपरिणामो** ख । ८. **कण्णसुक्खेहिं** घ ङ । ९. **तथा** इति कआदर्शे नास्ति, **तथा चोक्तम्** च ।

न शक्यं रूपमद्रष्टुं, चक्षुर्गोचरमागतम् ।
राग-द्वेषौ तु यौ तत्र, तौ बुधः परिवर्जयेत्[1] । [ ]'

कथं पुनर्गुणभूयस्त्वं वनस्पतिभ्यः ? इति प्रदर्श्यते—वेणु-वीणा-पटह-मुकुन्दादीनामातोद्यविशेषाणां वनस्पतेरुत्पत्तिः । ततश्च मनोहराः शब्दा निष्पद्यन्ते । प्राधान्यमत्र वनस्पतेर्विवक्षितम्, अन्यथा तु तन्त्री-चर्म-पाण्यादिसंयोगात् शब्दनिष्पत्तिरिति । रूपं पुनः काष्ठकर्मस्त्रीप्रतिमादिषु गृह-तोरण-वेदिका-स्तम्भादिषु च चक्षूरमणीयम् । गन्धा अपि हि कर्पूर-[2]पाटल-लवली-लवङ्ग-[3]केतकी-सरस-चन्दना[4]-ऽगरु-कक्कोलक-एला-[5]जातिफल-पत्रिका-केसर-[6]मांसी-त्वक्-पत्रादीनां सुरभयो गन्धेन्द्रियाह्लादकारिणः प्रादुर्भवन्ति । रसास्तु [7]बिश-मृणाल-मूल-कन्द-पुष्प-फल-पत्र-[8]कण्टक-[9]मञ्जरी-त्वग-ऽङ्कुर-किशलया-ऽरविन्द-केसरादीनां जिह्वेन्द्रि[10]यप्रह्लादिनो निष्पद्यन्ते अतिबहव इति । तथा स्पर्शाः पद्मिनीपत्र-कमलदल-मृणाल-वल्कल-दुकूल-शाटक-उपधान-[11]तूलिक-[12]प्रच्छादनपटादीनां स्पर्शनेन्द्रियसुखाः प्रादुःषन्ति । एवमेतेषु वनस्पतिनिष्पन्नेषु शब्दादिगुणेषु यो वर्तते स आवर्ते वर्तते, यश्चाऽऽवर्तवर्ती स राग-द्वेषात्मकत्वाद् गुणेषु वर्तत [13]इति ।

[14]स आवर्तो नामादिभेदात् चतुर्धा । नाम-स्थापने क्षुण्णे । द्रव्यावर्तः स्वामित्व-करणा-ऽधिकरणेषु यथासम्भवं योज्यः । स्वामित्वे नद्यादीनां क्वचित्प्रविभागे जलपरिभ्रमणं द्रव्यस्यावर्तः, द्रव्याणां [15]वा हंस-[16]कारण्डव-चक्रवाकादीनां व्योम्नि क्रीडतामावर्तनाद् आवर्तः । करणे [17]तु तेनैव जलद्रव्येण भ्रमता यदन्य[18]दावर्त्यते तृण-[19]कलिञ्जादि स द्रव्येणावर्तः, तथा त्रपु-सीसक-लोह-

---

१. ०येत् ॥ इति । कथं घ ङ च । २. पाटला० ङ, ०पाट्टल० च । ३. केतकी-रसचन्दना० क । ४. ०ना-ऽगुरु० घ । ५. जातीफल० ग घ ङ । ६. ०मांसि० ख ङ । ७. बिस० ग घ । ८. ०कन्दक० ख ग च । ९. ०मञ्जरि० च । १०. ०यह्लादिनो निष्पद्यन्ते बहव इति घ । ११. ०तूलि-प्र० घ ङ । १२. ०प्रच्छदपटा० च । १३. इति ख पुस्तके नास्ति । १४. स चावर्तो ग च । १५. वा इति चप्रतौ न विद्यते । १६. ०कारण्ड-चक्र० ग, ०कारण्डक-चक्र० त । १७. तु इति कपुस्तके नास्ति, तु तेनैव द्रव्येण ख । १८. ०दावर्तते खप्रतिमृतं । १९. "कलिंच इति वंशखण्डम्" जै०वि०प० ।

रजत-सुवर्णै[१]रावर्तमानैर्यदन्यत् तदन्तःपा[२]त्यावर्त्यते स द्रव्यैरावर्त इति । अधिकरणविवक्षायामेकस्मिन् जलद्रव्ये आवर्तः, तथा रजत-सुवर्ण-रीतिका-त्रपु-सीसकेष्वेकस्थीकृतेषु बहुषु द्रव्येष्वावर्तः । भावावर्तो नाम अन्योन्यभाव-सङ्क्रान्तिः, औदयिकभावोदयाद् वा नरकादिगतिचतुष्टयेऽसुमानावर्तते । इह [३]च भावावर्तेनाधिकारः, न शेषैरिति ।

अथ य एते गुणाः संसारावर्तकारणभूताः शब्दादयो वनस्पतेरभिनिर्वृत्तास्ते किं नियतदिग्देशभाज उत सर्वदिक्षु ? इत्यत आह–

**उड्ढं [४]अव**मित्यादि । प्रज्ञापकदिगङ्गीकरणाद् [५]ऊर्ध्वदिग्व्यवस्थितं रूपगुणं पश्यति प्रासादतल-हर्म्यादिषु । **[६]अव**मिति [७]अवाङ् अधस्ताद् गिरिशिखर-प्रासा[८]दाधिरूढोऽधोव्यवस्थितं रूपगुणं पश्यति, अधःशब्दार्थेऽ[९]वाङ् इत्ययं वर्तते। गृहभित्यादि[१०]व्यवस्थितं रूपगुणं [११]च तिर्यक् पश्यति । तिर्यक्शब्देन चात्र दिशोऽनुदिशश्च परिगृह्यन्ते, ताश्चेमाः–**प्राचीनम्** इति पूर्वा [१२]दिग् । एतच्चोप-लक्षणम्, अन्या अप्येतदाद्यास्तिर्यग्दिशो द्रष्टव्या इति । एतासु दिक्षु पश्यन् चक्षुर्ज्ञानपरिणतो रूपाणि द्रव्याणि चक्षुर्ग्राह्यतया परिणतानि पश्यति, उपलभत इत्यर्थः । तथा तासु च शृण्वन् शृणोति शब्दान् उपयुक्तः श्रोत्रेण, नान्यथेति ।

अत्रोपलब्धिमात्रं प्रतिपादितम् न चोपलब्धिमात्रात् संसारप्रपातः, किन्तु यदि मूर्च्छां रूपादिषु करोति ततोऽस्य बन्ध इति दर्शयितुमाह–

**उड्ढ**मित्यादि । पुन[१३]रूर्ध्वादिर्मूर्च्छासम्बन्धार्थमुपादानम् । **मच्छंन् रूपेषु मूर्च्छति,** राग[१४]परिणामं [१५]यान् [१६]रज्यते रूपादिष्वित्यर्थः । एवं शब्देष्वपि मूर्च्छति । **अपि**शब्दः सम्भावनायां समुच्चये वा । रूप-शब्दविषयग्रहणाच्च शेषा अपि गन्ध-रस-स्पर्शा गृहीता भवन्ति । एकग्रहणे [१७]तज्जातीयानां ग्रहणात्, आद्यन्त-

---

१. **०रावर्त्यमानै०** ख च, गपुस्तके पाठभङ्गः । २. **०त्यावर्तते** घ ङ च, गपुस्तके पाठत्रुटिः । ३. **च** इति क-घप्रत्योर्न विद्यते । ४. **अधमित्यादि** ख च, **अहमित्यादि** ग ५. **ऊर्द्धदि०** कपुस्तकादृते । ६. **अधमिति** ग च । ७. **अवा अध०** क च। ८. **०दारूढो,** ख च। ९. **अधादित्ययं** क । १०. **०व्यवस्थितरूप०** क ख । ११. **च** इति कप्रतिं विना नान्यत्रास्ति । १२. **दिगिति** ख । १३. **०रूर्द्धादि०** कआदर्शेन विना । १४. **०परिणामवान्** च । १५. "**यान्** इति गच्छन्" जै०वि०प० । १६. **युज्यते** ख । १७. **तज्जातीयग्रहणात्** ख ।

ग्रहणाद्वा तन्मध्यग्रहणमवसेयमिति । एवं विषयलोकमाख्याय विवक्षितमाह—

**एस लोए वियाहिए, एत्थ अगुत्ते अणाणाए । एष** इति रूप-रस-गन्ध-स्पर्श-शब्दविषयाख्यो **लोको व्याख्यातः**, लोक्यते परिच्छिद्यते इति कृत्वा । **एतस्मिंश्च** प्रस्तुते शब्दादिगुणलोके **अगुप्तः** यो मनो-वाक्-कायैः, मनसा द्वेष्टि रज्यते वा, वाचा प्रार्थनं शब्दादीनां करोति, कायेन शब्दादिविषयदेशमभिसर्पति । एवं यो ह्यगुप्तो भवति सः अनाज्ञायां वर्तते, न भगवत्[1]प्रणीतप्रवचनानुसारीति यावद् इति । एवंगुणश्च यत् कुर्यात् तदाह—

[2]**पुणो पुणो** इत्यादि । ततश्चासावसकृच्छब्दादिगुणलुब्धो न शक्नोत्यात्मानं शब्दादिगृद्धेर्निवर्तयितुम्, अनिवर्तमानश्च **पुनः पुनर्गुणास्वादो** भवति, क्रियासातत्येन पुनः पुनः शब्दादिगुणानास्वादयतीत्यर्थः । तथा च यादृशो भवति तद् दर्शयति—

**वक्रः** असंयमः कुटिलो नरकादिगत्याभिमुख्यप्रवणत्वात्, समाचरणं **समाचारः** अनुष्ठानम्, वक्रः समाचारो [3]यस्य स तथा, असंयमानुष्ठायीत्यर्थः । अवश्यमेव शब्दादिविषयालिाषी भूतोपमर्दकारीत्यतो **वक्रसमाचारः** । प्राक् शब्दादिविषयलवसमास्वादनाद् गृद्धः पुनरात्मान[4]मावारयितुमसमर्थत्वाद् [5]**अपथ्याम्रफलभोजिराजवद्** विनाशमाशु संश्रयत इति । एवं चासौ नितरां जितः

---

१. **०त्प्रणीतवचना०** घ । २. **पुणो इत्यादि** क । ३. **यस्यासौ वक्रसमाचारः असंय०** ख च । ४. **०माचारयितु०** घ ङ विना । ५. "**जहा कागणिए हेउं, सहस्सं हारए नरो । अपत्थं अंबगं भुच्चा, राया रज्जं तु हारए ॥ उत्तराध्यय० ७।११॥**

तथा अपथ्यमाम्रफलं **भुक्त्वा** अभ्यवहृत्य **राजा** नृपतिः **राज्यं** पृथिवीपतित्वं **तुः** अवधारणे भिन्नक्रमश्च, तेन हारयेदेव, सम्भवत्येव अस्याऽपथ्यभोजिनो राज्यहारणमित्यक्षरार्थः । भावार्थस्तु वृद्धसम्प्रदायादवसेयः । स चायम्—

जहा कस्सइ रन्नो अंबाजिन्नेण विसूइया जाया । सा तस्स वेज्जेहिं महया किच्छेण विचिकिच्छिया । भणिओ य—जइ पुणो अंबाणि खायसि तो विणस्ससि । तस्स य पियाणि अईव अंबाणि । तेण सदेसे सव्वे उच्छाया अंबया । अन्नया आसवाहणियाए निग्गओ सह अमच्चेण अस्सेण अवहरिओ । अस्सो दूरं गन्तूण परिस्संतो ठिओ । एगम्मि वणसंडे चूयच्छायाए अमच्चेण वारिज्जमाणो वि निविट्ठो । तस्स य हेट्ठे *अंबाणि पडियाणि । सो ताणि परामुसइ, पच्छा अग्घाइ,* पच्छा चक्खिउं निट्ठुहइ । अमच्चो वारेइ । पच्छा भक्खेउं मओ । इति सूत्रगर्भार्थः ॥७।११॥" इति **उत्तराध्ययनस्य** सप्तमेऽध्ययने सुखबोधावृत्तौ ॥

शब्दादिविषयसमास्वादनात् खन्तपुत्तो[1] व्व इदमाचरति–

१. ''उदाहरणं–तगरा नाम नयरी, तत्थ अरहमित्तो नामाऽऽयरिओ । तस्स समीवे दत्तो नाम वाणियगो भद्दाए भारियाए पुत्तेण य अरहन्नएण सद्धिं पव्वइओ । सो तं खुड्डुगं पुत्तनेहेण न कयाइ भिक्खाए हिंडावेइ । पढमालियाईहिं किमिच्छिएण पोसेइ । साहूणं अप्पत्तियं-किमेस एवं पोसिज्जइ ? किं समत्थो वि भिक्खं न हिंडइ ? । तहा वि दक्खिन्नेण न तरंति किंचि भणिउं । अन्नया खंतो भवियव्वयावसेण कालगओ । अद्धिइं पगओ खुड्डओ साहूहिं दो तिन्नि दिवसाइं दाउं भिक्खस्स ओयारिओ । तया य खरो निदाहो वट्टइ । सो सुकुमालसरीरो उवरिं हिट्ठा य उण्हेण डज्झंतो पस्सेयतण्हाभिभूओ घरच्छायाए वीसमंतो दिट्ठो पउत्थवइयाए धणड्ढवरियभारियाए । 'उरालसुकुमालसरीरो'त्ति काउं तीसे तहिं अज्झोववाओ जाओ । चेडीमुहेण सद्दाविओ आगओ सो पुच्छिओ तीए–किं मग्गसि ? । तेण भणियं-भिक्खं, तो तीए चिंतियं–'जं इच्छसि घेत्तुं जे, पुव्विं तं आमिसेण गिण्हाहि । आमिसपासनिबद्धो काही कज्जमकज्जं वा ॥१॥ इइ परिभावितीए दिन्ना पहाणमोयगा पज्जत्तीए । अवलोइओ ससणिद्धाए दिट्ठीए भणिओ य-कीस तुमे दुक्करं वयं गहियं ?। भणइ–सुहनिमित्तं । सा भणइ–ता मए भावाणुरत्ताए समं भोगे भुंजाहि, अलं ते दरिद्ददुब्भगकढिणसरीरजणोचियाए इमाए कट्ठकिरियाए, पच्छिमवए करेज्जासु पव्वज्जं । सो एवमुवसग्गिज्जंतो उण्हेण तज्जिओ पडिभग्गो । पडिवन्नं तव्वयणं । उक्तञ्च-दृष्टाश्चित्रेऽपि चेतांसि हरन्ति हरिणीदृशः । किं पुनस्ताः स्मितस्मेरविभ्रमभ्रमितेक्षणाः ? ॥२॥ भोगं भुंजंतो चिट्ठइ । साहूहिं सव्वत्थ सव्वायरेण गविट्ठो न दिट्ठो 'अप्पसागारियं पविट्ठो'त्ति । माया वि पुत्तपउत्तिं अयाणंती अइमोहेण उम्मत्तिया जाया । अरहन्नयं विलवंती चेडवंदवेढिया, उवहसिज्जमाणा लुंठगलोएण अणुकंपिज्जंती धम्मियजणेण भमइ तियचउक्कचच्चराइसु । जं जं पासइ तं तं भणइ–दिट्ठो ते कत्थइ अरहन्नओ ?। एवं विलवंती रुयंती जं किंचि दट्ठुं एस अरहन्नउ'त्ति हरिसमुव्वहंती दिट्ठा अन्नया तेण ओलोयणगएण अरहन्नएण पच्चभिन्नाया । तयवत्थं पेच्छिऊण संवेगमुवगओ । चिंतियं च णेण–अहो मे अहन्नया! अहो मे अकज्जकारित्तणं । जं एरिसम्मि वसणे पाडिया जणणी, वयलोवेणं संसारभायणं कओ अप्पा। किञ्च–हियए जिणाण आणा चरियं मम एरिसं अहन्नस्स । एयं आलप्पालं, अव्वो दूरं विसंवयइ ॥३॥ तहेव ओयरित्ता पाएसु पडिओ, बाहोल्ललोयणेणं सगग्गयक्खरं भणियं–अंबे ! एस अहं कुलपंसणो मायाए उव्वेयकारओ दुप्पुत्तो तुह अरहन्नगो त्ति । पेच्छिऊण जाया समासत्थचित्ता । पुच्छिओ वइयरं। निवेइओ तेण जहट्ठिओ । तीए भणियं–पुत्त ! पव्वयाहि पुणो, मा खंडियवओ संसारं भमिहिसि । सो भणइ–अंब ! पावकम्मो अहं न तरामि संजमं काउं, जइ परमणसणं करेमि । ताए भन्नइ–एवं करेहि । मा असंजओ होउ तुच्छविसयसुहहेउमणंतं दुक्खसंघायमावज्जसु । किञ्च–वरं प्रवेष्टुं ज्वलितं हुताशनं, न चापि भग्नं चिरसंचितं व्रतम् । वरं हि मृत्युः सुविशुद्धकर्मणो न चापि शीलस्खलितस्य जीवितम् ॥४॥ पच्छा सो सव्वं सावज्जं जोगं पच्चक्खित्ता कयदुक्कडगरिहो खामियसयलसत्तो कयचउसरणगमणो वोसिरियसव्वसंगो पुणो पुणो कयपंचनमोक्कारो काऊणमणसणं सुहज्झाणोवगओ तत्तसिलाए पाओवगमणेणं ठिओ मुहुत्तेण सुकुमालसरीरो नवणीयपिंडो व्व उण्हेण विलीणो गओ सुरलोयं । पुव्विं तेण नाहियासियं । पच्छा अहियासियं इति उत्तराध्ययनस्य द्वितीयेऽध्ययने सुखबोधावृत्तौ गा० ९ ॥'' ।

[1]**पमत्ते गारमावसे**, प्रमत्तः विषयविषमूर्छितः अगारं गृहमावसति । योऽपि द्रव्यलिङ्गसमन्वितः शब्दादिविषयप्रमादवान् असावपि विरतिरूपभावलिङ्गरहितत्वाद् गृहस्थ एवेति । अन्यतीर्थिकाः पुनः सर्वदा सर्वथाऽन्यथावादिनोऽन्यथाकारिण इति दर्शयितुमाह—

**[ सू०४२ ] लज्जमाणा पुढो पास । 'अणगारा मो' त्ति एगे पवदमाणा, जमिणं विरूवरूवेहिं सत्थेहिं वणस्सतिकम्मसमारंभेणं वणस्सतिसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ।**

**[ सू०४३ ] तत्थ खलु भगवता परिण्णा पवेदिता— इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेतुं से सयमेव वणस्सतिसत्थं समारभति, अण्णेहिं वा वणस्सतिसत्थं समारभावेति, अण्णे वा वणस्सतिसत्थं समारभमाणे समणुजाणति । तं से अहियाए, तं से अबोहीए ।**

**[ सू०४४ ] से त्तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णायं भवति— एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु णिरए ।**

**इच्चत्थं गढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं वणस्सतिकम्मसमारंभेणं वणस्सतिसत्थं समारभमाणे अण्णे**

---

१. पमत्ते अगार० ख घ ङ ।

**वऽणेगरूवे पाणे विहिंसति ।**

**लज्जमाणा** इत्यादि यावत् **अण्णे वऽणेगरूवे पाणे विहिंसइ**[1] त्ति प्रागवद् ने[2]यम्, नवरं वनस्पत्यालापो विधेय इति । साम्प्रतं वनस्पतिजीवास्तित्वे लिङ्गमाह—

**[ सू०४५ ] से बेमि—इमं पि जातिधम्मयं, एयं पि जातिधम्मयं, इमं पि वुड्ढिधम्मयं, एयं पि वुड्ढिधम्मयं, इमं पि चित्तमंतयं, एयं पि चित्तमंतयं, इमं पि छिण्णं मिलाति, एयं पि छिण्णं मिलाति, इमं पि आहारगं, एयं पि आहारगं,**

**इमं पि अणितियं, एयं पि अणितियं, इमं पि असासयं, एयं पि असासयं, इमं पि चयोवचइयं, एयं पि चयोवचइयं, इमं पि विप्परिणामधम्मयं, एयं पि विप्परिणामधम्मयं ।**

**से बेमी**त्यादि । सोऽहमुपलब्धतत्त्वो ब्रवीमि । अथवा वनस्पतिचैतन्यं प्रत्यक्ष[3]प्रमाणसमधिगम्यमान[4]स्वरूपं य[5]त् तदहं ब्रवीमि । यथाप्रतिज्ञातमर्थं दर्शयति— **इमं पि जाइधम्मयं** ति । इहोपदेशदानाय सूत्रारम्भः, तद्योग्यश्च पुरुषो भवति, अतस्तस्य सामर्थ्येन सन्निहितत्वात् [6]तच्छरीरं प्रत्यक्षासन्नवाचिनेदमा परामृशति । **इदमपि** [7]पुरुषशरीरं [8]जननं जातिरुत्पत्तिः **तद्धर्मकम्, [9]एतदपि** वनस्पतिशरीरं **तद्धर्मकं** तत्स्वभावमेवेति । पूर्वकः अपिशब्दः [10]सर्वत्र यथा[11]शब्दार्थे, द्वितीयस्तु [12]समुच्चये व्याख्येयः । ततश्चायमर्थः—यथा [13]पुरुषशरीरं बाल-कुमार-युव-

१. विहिंसंति त्ति ग । २. नेयमिति, नवरं च । ३. ०प्रमाणं सम० ख । ४. ०स्वरूपं यावत् तावदहं ख । ५. यच्च तदहं ग । ६. तच्छरीरप्रत्य० ख । ७. मनुष्यशरीरं ख ग च । ८. जननं इति ख पुस्तके नास्ति । ९. एतदिति वन० ख । १०. सर्वत्र वा शब्दार्थे च । ११. ०शब्दार्थः द्वि० क । ११. समुच्छ्रये च । १३. मनुष्यशरीरं ख ग च ।

वृद्धतापरिणामविशेषवच्चेतनावत्सदाधिष्ठितं प्रस्पष्टचेतनाकमुपलभ्यते [1]तथा एतदपि वनस्पतिशरीरम्, यतो जातः केतकतरुर्बालको युवा वृद्धश्च संवृत्त इति । अतस्तुल्यत्वाद् एतदपि जातिधर्मकम्, न [2]च कश्चिद् विशेषोऽस्ति येन सत्यपि जातिधर्मत्वे मनुष्यादिशरीरमेव सचेतनं न [3]वनस्पतिशरीरमिति । ननु च जातिधर्मत्वं केश-नख-दन्तादिष्वप्यस्ति, अव्यभिचारि च लक्षणं भवति, अस्ति च व्यभिचारः, तस्माद् अयुक्तं कल्पयितुं जातिधर्मत्वं जीवलिङ्गमिति । उच्यते– सत्यम्, अस्ति जननमात्रम्, किन्तु मनुष्यशरीरप्रसिद्धबाल-[4]कुमार-युव-वृद्धावस्थानामसम्भवः केशादिष्वस्ति स्फुटः, तस्माद् असमञ्जसमेतत् । अपि च केश-नखं चेतनावत्पदार्थाधिष्ठितशरीरस्थं जातमित्युच्यते, वर्धते इति वा, न पुनस्त्वयैवं [5]तरवोऽपि चेतनावत्पदार्थाधारस्था इष्यन्ते, त्वन्मते भुवोऽचेतनत्वात्, तस्माद् अयुक्तमिति । अथवा जातिधर्मत्वादीनि समुदितानि सूत्रोक्तान्येक एव हेतुः, न पृथग्घेतुता, न च समुदायहेतुः केशादिष्वस्ति, तस्माद् अदोष इति ।

तथा यथेदं मनुष्य[6]शरीरमनवरतं बाल-कुमाराद्यवस्थाविशेषैर्वर्धते तथा एतदपि वनस्पतिशरीरमङ्कुर-किशलय-शाखा-प्रशाखादिभिर्विशेषैर्वर्धत इति ।

तथा यथा इदं मनुष्यशरीरं [7]चेतनावद् एवं [8]वनस्पतेरपि । कथम् ? चेतयति येन तत् चित्तं ज्ञानम्, ततश्च यथा मनुष्य[9]शरीरं ज्ञानेनानुगतमेवं वनस्पतिशरीरमपि यतो धात्री-प्रपुना(न्ना?)टादीनां स्वाप-[10]विबोधतस्तद्भावः, तथाऽधोनिखात-द्रविणराशेः स्वप्ररोहेणावेष्टनम्, प्रावृड्जलधरनिनाद-शिशिरवायुसंस्पर्शाद् अङ्कुरोद्भेदः, तथा मदमदनसङ्गस्खलद्गतिविघूर्णमानलोल-लोचनविलासिनी-[11]सनूपुरसुकुमारचरणताडनाद् अशोकतरोः पल्लव-[12]कुसुमोद्भेदः, तथा सुरभि-सुरागण्डूषसेकाद् बकुलस्य [13]स्पृष्टप्ररोदिकादीनां च हस्तादिसंस्पर्शात् सङ्कोचादिका

---

१. तथेदमपि कप्रतिं विना । २. च घ-ङपुस्तकयोर्नास्ति । ३. वनस्पतेरिति क । ४. ०कुमारकाद्यवस्थाना० ख ग च । ५. "तरवोऽपि इति केशादयस्तावदिष्यन्त एव चेतनावत्पदार्थाधारस्थाः" जै०वि०प० । ६. ०शरीरकमन० ग च । ७. चित्तवद् कपुस्तकाद्विना । ८. वनस्पतिशरीरमपि चित्तवत् । कथं कप्रतेर्विना । ९. ०शरीरं चित्तवत्, एवं च ज्ञानेना० ङ । १०. ०विबोधसद्भावः ख । ११. ०सन्नूपुर० ख । १२. ०कुसुमोद्गमः, तथा ख च । १३. स्पृष्टप[रो?]दिकादीनां क, स्पृष्टप्ररोहिकादीनां घ ङ "स्पृष्टपरोदिकाः इति छिन्नपरोदिकाः" जै०वि०प० ।

परिस्फुटा क्रियोपलब्धि[१]: । न चैतद् अभिहिततरुसम्बन्धि क्रियाजालं ज्ञानमन्तरेण घटते, तस्मात् सिद्धं चित्तवत्त्वं वनस्पतेरिति ।

तथा यथेदं छिन्नं म्लायति त[२]थैतदपि छिन्नं म्लायति । मनुष्यशरीरं हि हस्तादि छिन्नं म्लायति शुष्यति [३]तथा तरुशरीरमपि पल्लव-फल-कुसुमादि छिन्नं शोषमुपगच्छद् दृष्टम्, न चाचेतनानामयं धर्म इति ।

तथा यथा इदं मनुष्यशरीरं स्तनक्षीर-व्यञ्जन-[४]ओदनाद्याहाराभ्यवहाराद् आहारकं तथा एतदपि वनस्पतिशरीरं भू-जलाद्याहाराभ्यवहारकम्, न चैतदाहारकत्वमचेतनानां दृष्टम्, अतस्तद्भावात् सचेतनत्वमिति ।

तथा यथा इदं [५]मनुष्यशरीरकम् **अनित्यकं** न सर्वदाऽवस्थायि तथा एतदपि वनस्पतिशरीरमनित्यं नियतायुष्कत्वात्, तथाहि—अस्य दश वर्षसहस्राण्युत्कृष्टमायुः ।

तथा यथा इदं मनुष्यशरीरम् अशाश्वतं प्रतिक्षणमावीचीमरणेन मरणात् तथा एतदपि वनस्पति[६]शरीरमिति ।

तथा यथेदमिष्टा-ऽनिष्टाहारादिप्राप्त्या चया-ऽपचयिकं वृद्धि-हान्यात्मकं तथैतदपीति ।

तथा यथा इदं मनुष्यशरीरं [७]विविधः परिणामः तत्तद्रोगसम्पर्कात् पाण्डुत्व-उदरवृद्धि-शोफ-कृशत्वा-ऽङ्गुलि-नासिकाप्रवेशादिरूपो बालादिरूपो वा तथा रसायन-स्नेहाद्युपयोगाद् विशिष्टकान्ति-बलो[८]पचयादिरूपो विपरिणामः तद्धर्मकं तत्स्वभावकं तथा एतदपि वनस्पतिशरीरं तथाविधरोगोद्भवात् [९]पुष्प-फल-पत्र-त्वगाद्यन्यथाभवनात् [१०]तथाविधदौहृदप्रदानेन पुष्प-फलाद्युपचयाद् विपरिणाम-धर्मकम् । एवमनन्तरोक्तधर्मकलाप[११]सम्भवाद् असंशयं गृहाणैतत् 'सचेतनास्तरवः'

१. ०लब्धिर्भवेत् । न ग । २. तथेदमपि ख ग च । ३. तथा इति ग-चप्रत्योर्न वर्तते । ४. ०ओदनाद्याहारकं ग च । ५. मनुष्यशरीरम् ख ग च । ६. ०शरीरमपि ग । ७. विविधपरिणामं क ग च, विविधपरिणामः ख । ८. ०पचयतिरूपो ङ । ९. पुष्प-पत्र-फल-त्व० ख च । १०. तथा विशिष्टदौ० ख, तथा विशिष्टाहारदौ० ग, तथा विशिष्टदोहदप्रदा० च । ११. ०सद्भावात् ख च ।

इति । एवं वनस्पते[१]श्चैतन्यं प्रदर्श्य तदारम्भे [२]बन्धं तत्परिहाररूपविरत्यासेवनेन च मुनित्वं प्रतिपादयन्नुपसञ्जिहीर्षुराह–

**[ सू०४६ ] एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाता भवंति । एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाया भवंति ।**

**[ सू०४७ ] तं परिण्णाय मेहावी णेव सयं वणस्सतिसत्थं समारभेज्जा, णेवऽण्णेहिं वणस्सतिसत्थं समारभावेज्जा, णेवऽण्णे वणस्सतिसत्थं समारभंते समणुजाणेज्जा ।**

**[ सू०४८ ] जस्सेते वणस्सतिसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ।**

॥ [ सत्थपरिण्णाए ] ★ पंचमो उद्देसओ सम्मत्तो ★ ॥

**एत्थ सत्थमि**त्यादि । एतस्मिन् वनस्पतौ शस्त्रं द्रव्य-भावाख्यमारभमाणस्येत्येते आरम्भा अपरिज्ञाताः अप्रत्याख्याता भवन्ति । एतस्मिंश्च वनस्पतौ शस्त्रमसमारभमाणस्येत्येते आरम्भाः परिज्ञाताः प्रत्याख्याता भवन्तीति पूर्ववच्चर्चः यावत् **स एव मुनिः परिज्ञातकर्मेति ब्रवी**मि पूर्ववदिति ।

[३]इति शस्त्र[४]परिज्ञाध्ययने [५]पञ्चमोद्देशकटीका समाप्तेति ।छ॥

• • •

१. ०तेश्चेतनां प्र० ख ग च । २. बन्धपरिहार० च । ३. इति इति ख च आदर्शयोर्नास्ति । ४. ०परिज्ञायां प० ख ङ । ५. पञ्चमोद्देशकः ।छ॥ घ ।

उक्तः पञ्चमोद्देशकः । साम्प्रतं षष्ठः [१]समारभ्यते । अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके वनस्पतिकायः प्रतिपादि[२]तः, तदनन्तरं च त्रसकायस्यागमे परिपठितत्वात् तत्स्वरूपाधिगमायायमुद्देशकः समारभ्यते । [३]तस्य चोपक्रमादीनि चत्वार्यनुयोगद्वारा[४]णि वाच्यानि यावद् नामनिष्पन्ने निक्षेपे त्रसकायोद्देशकः । तत्र त्रसकायस्य पूर्वप्रसिद्धद्वारक्रमातिदेशाय तद्विभिन्नलक्षणद्वाराभिधानाय च **निर्युक्तिकृ**दाह—

**तसकाए दाराइं ताइं जाइं हवंति पुढवीए ।**
**[५]णाणत्ती उ विहाणे परिमाणुवभोग सत्थे य ॥१५२॥**

**तसकाये** इत्यादि । त्रस्यन्तीति त्रसाः, तेषां कायः त्रसकायः, [६]तस्मिन् [७]तान्येव द्वाराणि भवन्ति यानि पृथिव्यां प्रतिपादितानि । नानात्वं तु विधानपरिमांण-उपभोग-शस्त्रद्वारेषु, चशब्दाद् लक्षणे च प्रतिपत्तव्यमिति ॥१५२॥ तत्र विधानद्वारमाह—

**दुविहा खलु तसजीवा लद्धि[८]तसा चेव गइतसा चेव ।**
**[९]लद्धीय तेउ-वाऊ तेणऽहिगारो इहं नत्थि ॥१५३॥**

**दुविहे**त्यादि । द्विविधाः द्विभेदाः, **खलुः** अवधारणे, त्रसत्वं प्रति द्विभेदत्वमेव । त्रसनात् स्पन्दनात् त्रसाः, जीवनात् प्राणधारणाद् जीवाः, त्रसा एव जीवाः त्रसजीवाः—लब्धित्रसा गतित्रसाश्च । [१०]लब्ध्या तेजो-वायू त्रसौ, लब्धिः तच्छक्तिमात्रम् । लब्धित्रसाभ्यामिहाधिकारो नास्ति, तेजसोऽभिहितत्वाद् वायोश्चाभिधास्यमानत्वात् । अतः सामर्थ्याद् गतित्रसा एवाधिक्रियन्ते ॥१५३॥ के पुनस्ते कियद्भेदा वा ? [११]इत्याह—

**नेरइय तिरिय मणुया सुरा य [१२]गइओ चउव्वि[१३]हा [१४]उ तसा ।**
**पज्जत्ता-ऽपज्जत्ता नेरइयाई उ [१५]नायव्वा ॥१५४॥**

---

१. प्रारभ्यते ख ग । २. ०तः, अनन्तरं ग । ३. अस्य ग । ४. ०णि भवन्ति यावद् ख चप्रती विना । ५. णाणत्तिओ वि० ख झ । ६. तस्मिंश्च ता० ग । ७. तान्येवानुयोगद्वाराणि भ० ख । ८. ०तसा तह य गइ० ञ । ९. लद्धीय वाउ-तेऊ ख ठ । १०. "लब्ध्य( ब्ध्या ) इति शक्त्या" जै०वि०प० । ११. इत्यत आह ख च । १२. गईउ क छ, गईय ख ज झ, गतीतो ञ "गतितस्त्रसाः" ठटिप्पणी । १३. ०हा चेव । ख ठ । १४. य ञ । १५. णेयव्वा ञ ।

**नेरइए**त्यादि । नारकाः [१]रत्नप्रभादि-महातमःपृथिवीपर्यन्त[२]नरकवासिनः सप्तभेदाः । तिर्यञ्चोऽपि द्वि-त्रि-चतुः-पञ्चेन्द्रियाः । मनुष्याः सम्मूर्छनजा गर्भव्युत्क्रान्तयश्च । [३]सुराः [४]भवनपति-व्यन्तर-[५]ज्योतिष्क-वैमानिकाः । एते गतित्रसाश्चतुर्विधाः । नामकर्मोदयाभिनिर्वृत्तगतिलाभाद् गतित्रसत्वम् । एते च नारकादयः पर्याप्ता-ऽ[६]पर्याप्तकभेदेन [७]द्विधा ज्ञातव्याः । तत्र पर्याप्तिः पूर्वोक्तैव षोढा, तया यथासम्भवं निष्पन्नाः पर्याप्ताः, तद्विपरीतास्त्वपर्याप्तका [८]अन्तर्मुहूर्तकालमिति ॥१५४॥ इदानीमुत्तरभेदानाह—

**तिविहा तिविहा जोणी अंडा पोया जराउया चेव ।**
**बेइंदिय तेइंदिय चउरो पंचिंदिया चेव ॥१५५॥** दारं ॥

**तिविहे**त्यादि । [९]अत्र हि शीतोष्ण-मिश्रभेदात्, तथा सचित्ता-ऽचित्त-मिश्रभेदात्, [१०]तथा संवृत-विवृत-तदुभयभेदात्, [११]तथा स्त्री-पुं-नपुंसक-भेदाच्चेत्यादीनि बहूनि योनीनां त्रिकाणि [१२]सम्भवन्तीति । तेषां सर्वेषां सङ्ग्रहार्थं 'त्रिविधा त्रिविधा' इति वीप्सानिर्देशः । तत्र नारकाणामाद्यासु तिसृषु [१३]भूमिषु शीतैव योनिः, चतुर्थ्यामुपरितननरकेषु शीता, अधस्तननरकेषूष्णा, पञ्चमी-षष्ठी-सप्तमीषूष्णैव, नेतरे । गर्भव्युत्क्रान्तिकतिर्यङ्-मनुष्याणामशेषदेवानां च शीतोष्णा योनिः, नेतरे । द्वि-त्रि-[१४]चतुः-पञ्चेन्द्रिय-सम्मूर्छनज-तिर्यङ्-मनुष्याणां त्रिविधाऽपि योनिः शीता उष्णा शीतोष्णा चेति ।

तथा नारक-देवानामचित्ता, नेतरे । द्वीन्द्रियादि-सम्मूर्छनजपञ्चेन्द्रिय-तिर्यङ्-मनुष्याणां त्रिविधाऽपि योनिः [१५]सचित्ता-ऽचित्त-मिश्रा । गर्भव्युत्क्रान्तिक-तिर्यङ्-मनुष्याणां मिश्रा योनिः, नेतरे ।

---

१. **रत्न-शर्करादि-महा०** क ग । २. **०नरकावासिनः** ग च । ३. **अमराः** ख च । ४. **भवन-व्यन्तर०** क घ ङ । ५. **०ज्योतिषिक-वै०** ख च । ६. **०पर्याप्तभेदेन** कप्रतिमृते । ७. **द्विविधा** ग, **द्विधा भवन्ति । तत्र** क ग । ८. **अन्तर्मुहूर्त काल०** क घ ङ । ९. **तत्र** च । १०. **तथा** इति क खपुस्तकयोर्नास्ति । ११. **तथा** इति घ-ङप्रत्योर्न वर्तते । १२. **सम्भवन्ति । तेषां** कआदर्शाद्विना । १३. **भूमिषूष्णैव योनिः, चतुर्थ्यामुपरितननरकेषूष्णा, अधस्तननरकेषु शीता, पञ्चमी-षष्ठी-सप्तमीषु शीतैव, नेतरे ।** ख । १४. **०चतुरिन्द्रिय-पञ्चे०** ख ग च । १५. **सचित्ताऽचित्ता मिश्रा च । गर्भ०** च ।

[1]तथा नारक-देवानां संवृता योनिः, नेतरे । द्वि-त्रि-चतुरिन्द्रिय-सम्मूर्छनजपञ्चेन्द्रियतिर्यङ्-मनुष्याणां विवृता योनिः, नेतरे । गर्भव्युत्क्रान्तिकतिर्यङ्-मनुष्याणां संवृतविवृता योनिः, नेतरे ।

तथा नारका नपुंसकयोनय एव । तिर्यञ्चस्त्रिविधाः—स्त्री-पुं-नपुंसकयोनयोऽपि । मनुष्या अप्येवं त्रैविध्यभाजः । देवाः स्त्री-पुंयोनय एव । तथाऽपरं [2]मनुष्ययोनेस्त्रैविध्यम्, तद्यथा—कूर्मोन्नता, तस्यां चार्हत्-चक्रवर्त्यादिसत्पुरुषाणामुत्पत्तिः । तथा शङ्खावर्ता, सा च स्त्रीरत्नस्यैव, तस्यां च प्राणिनां [3]सम्भवोऽस्ति, न निष्पत्तिः । तथा वंशीपत्रा, सा च प्राकृतजनस्येति ।

तथाऽपरं त्रैविध्यं **निर्युक्तिकृद्** दर्शयति, तद्यथा—[4]अण्डजा पोतजा जरा[5]युजा चेति । तत्राण्डजाः पक्ष्यादयः । पोतजाः वल्गुली-गज-[6]कलभादयः । जरायुजा गो-महिषी-मनुष्यादयः । तथा द्वि-त्रि-चतुः-पञ्चेन्द्रियभेदाच्च भिद्यन्ते । एवमे[7]ते त्रसास्त्रिविधयोन्यादिभेदेन प्ररूपिताः । **एतद्योनि-[8]सङ्ग्राहिण्यौ** च गाथे—

**पुढवि-दग-अगणि-मारुय-पत्तेय-निओयजीवजोणीणं ।**
**सत्तग सत्तग सत्तग सत्तग दस चोद्दस य लक्खा ॥**
**[9]विगलिंदिएसु दो दो चउरो चउरो य नारय-सुरेसु ।**
**[10]तिरियाण होंति चउरो [11]चोद्दस मणुयाण लक्खाइं ॥ [ ]**

एवमेते चतुरशीतियोनिलक्षा भवन्ति । तथा कुलपरिमाणम्—

**कुलकोडिसयसहस्सा बत्तीसऽट्ठऽट्ठ नव य पणुवीसा ।**
**एगिंदिय-बि-तिइंदिय-चउरिंदिय-हरियकायाणं ॥**
**[12]अट्ठत्तेरस बारस [13]दस नव नव चेव कोडिलक्खाइं ।**
**जलयर-पक्खि-चउप्पय-उर-भुयपरिसप्पजीवाणं ॥**
**पणुवीसं छव्वीसं च सयसहस्साइँ नारय-सुराणं ।**
**बारस य सयसहस्सा कुलकोडीणं मणुस्साणं ॥**

---

१. **तथा देव-नारकाणां सं०** ग । २. **मनुष्याणां योने०** च । ३. **सम्भवः, नास्ति निष्पत्तिः** ख । ४. **अण्डजाः** ख घ च । ५. **०युजाश्चेति** क-ङप्रती ऋते । ६. **०कलभकादयः** च । ७. **०ते त्रिधा त्रसा योन्यादि०** ग । ८. **०सङ्ग्राहिण्योऽथ गाथाः** ग घ । ९. **विगलिंदियाण दो** ख च । १०. **तिरिएसु हुंति** ख । ११. **चउदस** ख ग, **चुद्दस** घ ङ । १२. **अद्धत्तेरस०** ग च । १३. **दस दस नव चेव** क-घपुस्तके विना ।

[1]एगा कोडाकोडी सत्ताणउइं च सयसहस्साइं ।
पंचासं च सहस्सा कुलकोडीणं मुणेयव्वा ॥ [ ]

[2]अङ्कतः १९७५०००००००००००० सकलकुलसङ्ग्रहोऽयं बोद्धव्य [3]इति ॥१५५॥ उक्ता प्ररूप[4]णा । तदनन्तरं लक्षणद्वारमाह—

**दंसण णाण चरित्ते चरिताऽचरिते य दाण लाभे य ।**
**उवभोग भोग वीरियं इंदियविसए य [5]लद्धी अ ॥१५६॥**
**उवओग जोग अज्झवसाणे वीसुं च [6]लद्धिओ उदया ।**
**अट्ठविहोदय [7]लेसा सण्णुस्सासे कसाए य ॥१५७॥**

**दंसणे**त्यादि, **उवओगे**त्यादि । दर्शनं सामान्योपलब्धिरूपं चक्षुरचक्षुरवधि-केवलाख्यम् । मत्यादीनि ज्ञानानि स्व-परपरिच्छेदिनो जीवस्य परिणामा ज्ञानावरणविगमव्यक्तास्तत्त्वार्थपरिच्छेदाः । सामायिक-छेदोपस्थाप्य-परिहार-विशुद्धि-सूक्ष्मसम्पराय-यथाख्यातानि चारित्रम् । चारित्राचारित्रं देशविरतिः स्थूलप्राणाति[8]पातादिनिवृत्तिलक्षणं श्रावकाणाम् । तथा दान-लाभ-भोग-उपभोग-वीर्य-श्रोत्र-चक्षुः-घ्राण-रसन-स्पर्शनाख्या दश लब्धयो जीवद्रव्याव्यभिचारिण्यो लक्षणं भवन्ति ॥

तथोपयोगः साकारोऽनाकारश्चाष्ट-चतुर्भेदः । योगो मनो-वाक्-काया-ख्यस्त्रिधा । अध्यवसायाश्चानेकविधाः सूक्ष्माः [9]मनःपरिणामसमुत्थाः । विष्वक् पृथग् लब्धीनामुदयाः प्रादुर्भावाः क्षीरमध्वास्रवादयः । ज्ञानावरणाद्यन्तरायावसानकर्मा[10]ष्टकस्य स्वशक्तिपरिणाम उदयः । [11]लेश्याः कृष्णादिभेदाः शुभा अशुभाश्च कषाय-योग[12]परिणामविशेषसमुत्थाः । संज्ञास्त्वाहार-भय-परिग्रह-मैथुनाख्याः, अथवा दशभेदाः, अनन्तरोक्ताश्चतस्रः, क्रोधाद्याश्च चतस्रः,

---

१. एक्का च । २. अङ्कतोऽपि ख च । ३. इति इति गप्रतौ नास्ति । ४. ०णा । साम्प्रतं लक्षण० ख । ५. लद्धीए छ ज झ, लद्धी य ठ । ६. लद्धिओदइया क ख झ ठ, लद्धिओवइया छ, लद्धिओ उदइया ज । ७. लेस्सा क-छप्रतौ ऋते । ८. ०पातादिविरति-लक्षणं ख । ९. चेतःपरिणामविशेषाः । वि० ख च, मनःपरिणामविशेषाः । वि० घ ङ । १०. ०ष्टकस्वशक्ति० ख । ११. लेश्या उत्कृष्टादिभेदाः शुभाशुभाश्च ख । १२. ०परिणति-विशेषाः । संज्ञा० ख घ ङ च ।

तथौघसंज्ञा लोकसंज्ञा च । उच्छ्वास-निःश्वासौ प्राणापानौ । कषाया: कष: संसारस्तस्य आया: क्रोधादय: अनन्तानुबन्ध्यादिभेदात् षोडशविधा: । एतानि गाथाद्वयोपन्यस्तानि द्वीन्द्रियादीनां लक्षणानि यथासम्भवमवगन्तव्यानीति[१] नैवंविधलक्षणकलाप-समन्वयो घटादिष्वस्ति, तस्मात् तत्राचैतन्यमध्यवस्यन्ति विद्वांस: ॥१५६-१५७॥ अभिहितलक्षणकलापोपसञ्जिहीर्षया तथा परिमाण-प्रतिपादनार्थं च गाथामाह—

**[२]लक्खणमेयं चेव उ पयरस्स असंखभागमेत्ता[३] ते ।**
**निक्खमणे य पवेसे एगाईया वि एमेव ॥१५८॥**

**लक्खण**मित्यादि । तुशब्द: पर्याप्तिवचन:, द्वीन्द्रियादिजीवानां लक्षणं लिङ्गमेतावदेव दर्शनादि परिपूर्णम्, [४]नातोऽन्यदधिकमस्तीति ।

परिमाणं पुन: क्षेत्रत: [५]संवर्तितलोकप्रतरासङ्ख्येयभागवर्तिप्रदेशराशि-परिमाणास्त्रसकायपर्याप्तका: । एते च बादरतेजस्कायपर्याप्तकेभ्योऽसङ्ख्येय-गुणा: । त्रसकायपर्याप्तकेभ्यस्त्रसकायिका[६] अपर्याप्तका असङ्ख्येयगुणा: । तथा कालत: प्रत्युत्पन्नत्रसकायिका: सागरोपमलक्षपृथक्त्वसमयराशिपरिमाणा जघन्यपदे, उत्कृष्टपदेऽपि सागरोपमलक्षपृथक्त्वपरिमाणा एवेति, तथा **चागम:—**

**[७]पडुप्पन्नतसकाइया केवइकालस्स निल्लेवा सिया ? गोयमा ! जहन्नपए सागरोवमसयसहस्सपुहत्तस्स[८], उक्कोसपदे [९]वि सागरोवमसयसहस्सपुहत्तस्स[१०] । [ ]**

उद्वर्तनोपपातौ गाथाशकलेनाभिदधाति—**निष्क्रमणम्** उद्वर्तनं **प्रवेश:** उपपात: जघन्येनैको द्वौ त्रयो वा, [११]उत्कृष्टतश्च एवमेव इति प्रतरस्या-सङ्ख्येयभागवर्तिप्रदेशपरिमाणा एवेत्यर्थ: ॥१५८॥ साम्प्रतमविरहितप्रवेश-निर्गमाभ्यां परिमाणविशेषमाह—

---

१. ०ति । **न चैवंविध०** क-गप्रती विना । २. **लक्खणमेवं** ठ । ३. **०मेत्तातो** क ठ. **०मेत्ता उ** ख ज । ४. **नातोऽधिक०** क । ५. ''**संवर्तितलोकप्रतरासङ्ख्येयभागवर्ति-प्रदेशराशिपरिमाणास्त्रस[ काय ]पर्याप्ता:** एतच्च मानं स्वावगाहनया द्रष्टव्यम्, अन्यथा विरोधप्रसङ्गात् ।'' स०वि०प० । ६. **०काऽपर्या०** ख च । ७. **पडुप्पन्ना तस०** घ ङ । ८. **०पुहुत्तस्स** घ । ९. **वि शि ( सि ) या सागरो** क, **वि य सागरो०** घ । १०. **०पुहुत्तस्स** घ । ११. **उत्कृष्टतस्तु** कप्रतेर्विना ।

**[१]निक्खम-पवेसकालो समयादी एत्थ आवलियभागो ।**
**अंतोमुहुत्तऽविरहो उयहिसहस्[२]साहिया दोण्णि ॥१५९॥** दारं ॥

**निक्खमे**त्यादि । जघन्येन अविरहिता सन्तता त्रसेषु उत्पत्तिर्निष्क्रमो वा जीवानामेकं समयं द्वौ त्रीन् वेत्यादि, उत्कृष्टेनात्रावलिकाऽसङ्ख्येयभाग[३]मात्रं कालं सन्ततमेव निष्क्रमः प्रवेशो वा । एकजीवाङ्गी[४]करणेनाविरहश्चिन्त्यते गाथापश्चिमार्धेन—अविरहः सातत्येनावस्थानम्, एकजीवो हि त्रसभावेन जघन्यतोऽन्तर्मुहूर्तमासित्वा पुनः पृथिव्याद्येकेन्द्रियेषूत्पद्यते, प्रकर्षेणाधिकं सागरोपमसहस्रद्वयं त्रसभावेनावतिष्ठते सन्ततमिति ॥१५९॥ [५]उक्तं प्रमाणम् । साम्प्रतमुपभोग-शस्त्र-वेदनाद्वारत्रयप्रतिपादनायाह—

**मंसादीपरिभोगो सत्थं [६]सत्थादियं अणेगविहं** । दारं ।
**सारीर माणसा वेयणा य दुविहा बहुविहा य ॥१६०॥** दारं ॥

**मंसा** इत्यादि । मांस-चर्म-केश-रोम-नख-[७]पिच्छ-दन्त-स्नाय्व-ऽस्थि-विषाणादिभि[८]स्त्रसकायसम्बन्धिभिरुपभोगो भवति ।

**शस्त्रं** पुनः **[९]शस्त्रादिकम्** इति, **[१०]शस्त्रं** खड्ग-तोमर-क्षुरिकादि तदादिर्यस्य जला-ऽनलादेस्तत् शस्त्रादिकम्, अनेकविधं स्वकाय-परकाय-उभय-द्रव्य-भावभेदभिन्नमनेकप्रकारं त्रसकायस्येति ।

वेदना चात्र प्रसङ्गेनोच्यते—सा च [११]शरीरोत्था मनःसमुत्था च द्विविधा यथासम्भवम् । तत्राद्या शल्य-शलाकादिभेदजनिता । इतरा प्रियविप्रयोगाऽप्रियसम्प्रयोगादिकृता । बहुविधा च ज्वरा-ऽतीसार-कास-श्वास-भगन्दर-शिरोरोग-शूल-[१२]गुदकीलकादिसमुत्था तीव्रेति ॥१६०॥ पुनरप्युपभोगप्रपञ्चाभिधित्सयाऽऽह—

---

१. **निग्गम०** क छ । २. **०स्साहिए** कप्रतिमृते । ३. **०मात्रकालं** घ ङ । ४. **०करणेन वाऽविरह०** ख । ५. **उक्तं परिमाणद्वारम् । सा०** ख च, **उक्तं प्रमाणद्वारम् । सा०** ग । ६. **सत्थातियं** ज, "त्रिशूलादि" ठटिप्पणी । ७. **०पिच्छ०** क ग । ८. **०स्त्रसजीवसम्बन्धि०** ख च, **०स्त्रसकायजीवसम्बन्धि०** ग । ९. **शस्त्र्यादिकम्** ख । १०. **शस्त्रं** इति ख-घप्रत्योरेव । ११. **शरीरसमुत्था** कप्रत्या विना । १२. "**गुदकीलिका** हरिस" स०वि०प० ।

**मंसस्स केइ अट्ठा केई चम्मस्स केइ रोमाणं ।**
**[१]पिच्छाणं [२]पुच्छाणं दंताणट्ठा वहिज्जंति ॥१६१॥**

**केई वहंति अट्ठा केइ अणट्ठा पसंगदोसेणं ।**
**कम्मपसंगपसत्ता बंधंति [३]वहंति मारेंति ॥१६२॥** दारं ॥

**मंसस्सेत्यादि** । **केई** इत्यादि । मांसार्थं मृग-शूकरादयो [४]वध्यन्ते । चर्मार्थं चित्रकादयः । रोमार्थं [५]मूषिकादयः । पिच्छार्थं मयूर-गृद्ध-कपिञ्जुरुडुकादयः । [६]पुच्छार्थं चमर्यादयः । दन्तार्थं वारण-वराहादयः । [७]वध्यन्त इति सर्वत्र [८]सम्बध्यते ॥१६१॥

तत्र केचन पूर्वोक्तं प्रयोजनमुद्दि[९]श्य, केचिच्च प्रयोजनमन्तरेणापि क्रीडया[१०], तथाऽपरे **प्रसङ्गदोषाद्** मृगलक्षक्षिप्तेषु-लेलुकादिना तदन्तरालव्यवस्थि[११]ता अनेके कपोत-कपिञ्जल-शुक-सारिकादयो हन्यन्ते । तथा **कर्म** कृष्याद्यनेकप्रकारं तस्य **प्रसङ्गः** अनुष्ठानम्, तत्र **प्रसक्ताः** तन्निष्ठाः सन्त्-त्रसका[१२]यिकाननेकान् **बध्नन्ति** रज्ज्वादिना, **घ्नन्ति** कश-लकुटादिभि-स्ताडयन्ति, **मारयन्ति** प्राणैर्वियोजयन्तीति ॥१६२॥ एवं विधानादिद्वारकलापमुपवर्ण्य सकलनिर्युक्त्यर्थोपसंहारायाऽऽह–

**सेसाइं दाराइं ताइं जाइं हवंति पुढवीए ।**
**[१३]एवं तसकायम्मी निज्जुत्ती कित्तिया [१४]एसा ॥१६३॥** ॥छ॥ फा॥

**[१५]सेसाइ**मित्यादि । उक्तव्यतिरिक्तानि शेषाणि द्वाराणि तान्ये[१६]व यानि पृथिवीस्वरूपसमधिगमे निरूपितानि । अत एवमशेषद्वाराभिधानात् त्रसकाये

---

१. पिंच्छाणं ख ठ । २. पुंच्छाणं ख । ३. हणंति झ ञ । ४. बध्यन्ते घ ङ च । ५. मूषकादयः ख । ६. पुंच्छार्थं ख । ७. बध्यन्त ग घ ङ । ८. सम्बध्यत इति । ख च । ९. ०श्य घ्नन्ति, केचित् पुनः प्रयो० ख च, ०श्य हन्यन्ते, केचिच्च ग घ ङ । १०. ०या घ्नन्ति, तथा० क-घपुस्तके विना । ११. ०ताऽनेककपोत० । १२. ०कायिकान् बहून् बध्नन्ति ख ग च । १३. तेवं ख । १४. एसा ॥१६३॥ छट्ठओ तसकायउद्देसओ ॥छ॥ झ ञ. एसा ॥१६३॥ अध्य०१ उद्दे० ६ ॥ ठ । १५. सेसा० इत्यादि ख-चपुस्तके ऋते । १६. ०व वाच्यानि यानि ख च ।

निर्युक्तिः कीर्तितैषा सकला[१] भवतीत्यवगन्तव्येति ॥१६३॥ साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम्, तच्चेदम्—

**[ सू०४९ ] से बेमि—संतिमे तसा पाणा, तं जहा—अंडया पोतया जराउया रसया संसेयया सम्मुच्छिमा उब्भिया उववातिया । एस संसारे त्ति पवुच्चति मंदस्स अवियाणओ ।**

**णिज्झाइत्ता पडिलेहित्ता पत्तेयं परिणिव्वाणं सव्वेसिं पाणाणं सव्वेसिं भूताणं सव्वेसिं जीवाणं सव्वेसिं सत्ताणं अस्सातं अपरिणिव्वाणं महब्भयं दुक्खं ति बेमि ।**

**तसंति पाणा पदिसो दिसासु य ।**

**तत्थ तत्थ पुढो पास आतुरा परितावेंति ।**

**संति पाणा पुढो सिता ।**

**से बेमी**त्यादि । अस्य चानन्तर-परम्परादिसूत्रसम्बन्धः प्राग्वद् वाच्यः । सोऽहं ब्रवीमि येन मया भगवद्वदनारविन्दविनिसृतार्थजातावधारणाद्[२] यथावदुपलब्धं तत्त्वमिति । **सन्ति** विद्यन्ते त्रस्यन्तीति **त्रसाः**, **प्राणिनः** द्वीन्द्रियादयः । ते च कियद्भेदाः किम्प्रकाराश्च ? इति दर्शयति—

**तद्यथा** इति वाक्योपन्यासार्थः । यदि वा तत् प्रकारान्तरमर्थतो यथा भगवताऽभिहितं तथाऽहं [३]भणामीति । अण्डाज्जाता अण्डजाः पक्षि-गृह[४]कोकिलादयः । पोता एव जायन्ते पोतजाः '**अन्येष्वपि दृश्यते**' [पा० ३-२-१०१] इति [५]जैनेर्डप्रत्ययः,

---

१. **सकलाऽभ्युपगन्तव्येति** ख । २. **०न्दनिसृष्टार्थजाता०** ख, **०न्दविनिःसृतार्थ०** ङ, **०न्दविनिसृतार्थज्ञानावधारणाद्** च । ३. **भणामि** । **अण्डा०** ख । ४. **०कोकिलकादयः** ग । ५. जनेर्डः, **ते च** ख, जनेर्डः **प्रत्ययः**, ग ।

ते च हस्ति-वल्गुली-चर्म[१]जलूकादयः । जरायुवेष्टिता जायन्त इति जरायुजाः [२]पूर्ववत् डप्रत्ययः, गो-महिष्य[३]जाविक-मनुष्यादयः । रसाज्जाता रसजाः, तक्रा-ऽऽरनाल-दधि-तीमनादिषु [४]पायुकृम्याकृतयोऽतिसूक्ष्मा भवन्ति । [५]संस्वेदाज्जाताः संस्वेदजाः, मत्कुण-यूका-शतपदिकादयः । सम्मूर्छनाज्जाताः सम्मूर्छनजाः शलभ-पिपीलिका-मक्षिका-ऽऽ[६]शालिकादयः । उद्भेदनम् उद्भित्, ततो जाता उद्भिजाः, पृषोदरादित्वाद् [७]दलोपः, पतङ्ग-[८]खञ्जरीटक-पारिप्लवादयः। उपपाताज्जाता उपपातजाः अथवा उपपाते भवा औपपातिकाः देवा नारकाश्च। एवमष्टविधं जन्म यथासम्भवं संसारिणो नातिवर्तन्ते। एतदेव शास्त्रान्तरे त्रिविधमुपन्यस्तम्—'**सम्मूर्छ[९]न-गर्भ-उपपाताज्जन्म**' [तत्त्वार्थ० २। ३२]। रसज-संस्वेदज-उद्भिजानां सम्मूर्छनजान्तःपातित्वात्, अण्डज-पोतज-जरायुजानां गर्भजान्तःपातित्वात्, देव-नारकाणामौपपातिकान्तःपातित्वात् इति त्रिविधं जन्मेति। इह चाष्टविधं सोत्तरभेदत्वादिति । एवमेतस्मिन्नष्टविधे जन्मनि [१०]सर्वे [११]त्रसा जन्तवः संसारिणो निपतन्ति, नैतद्व्यतिरेकेणान्ये सन्ति, एते चाष्टविधयोनिभाजोऽपि सर्वलोकप्रतीता बाला-ऽङ्गनादिजनप्रत्यक्षप्रमाण-समधिगम्याः । '**सन्ति च**' अनेन शब्देन त्रैकालिकमस्तित्वं प्रतिपाद्यते त्रसानाम्, न कदाचिदेतैर्विरहितः संसारः सम्भवतीति । [१२]एतदेव दर्शयति—

**एस [१३]संसारे त्ति पवुच्चइ** [१४]त्ति । एषः अण्डजादिप्राणिकलापः संसारः प्रोच्यते, नातोऽन्यस्त्रसानामुत्पत्तिप्रकारोऽस्तीत्युक्तं भवति । कस्य पुनरत्राष्ट-विधभूतग्रामे उत्पत्तिर्भवति ? इत्याह—

**मंदस्सावियाणओ** । मन्दो द्विधा- द्रव्य-भावभेदात् । तत्र द्रव्यमन्दो-

---

१. ०जलुका० ङ । २. **पूर्वप्रत्ययः** ख, **पूर्ववत् प्रत्ययः** च । ३. ०जा-च्चि( चि )त्रक-मनु० घ । ४. "पायुः इति अविधिष्ठानिका" जै०वि०प० । ५. **संस्वेदनाज्जाताः संस्वेदनजाः** ख । ६. "**आसाली ( आशालिका ? )** इति चक्रवर्तिकटकाधस्तादू द्वादश-योजनप्रमाणा" जै०वि०प०, एते उरःपरिसर्पतिर्यग्जीवविशेषा ज्ञेयाः । ७. **तलोपः** ग ङ । ८. ०**खञ्जरीट-परि०** ग ङ च । ९. ०**न-जन्म-उप०** ख । १०. **सर्वेऽपि त्र०** ख । ११. **त्रसजन्तवः** कप्रतेर्विना । १२. **एतदपि दर्श०** क ग । १३. **संसारो** ग। १४. **त्ति** इति क-गप्रत्योर्नास्ति ।

ऽतिस्थूलोऽतिकृशो वा । भावमन्दोऽ[1]प्यनुपचितबुद्धिर्बालः, कुशास्त्र-वासित-बुद्धिर्वा, अयमपि सद्बुद्धेरभावाद् बाल एव । इह भावमन्देनाधिकारः । **मन्दस्य** इति बालस्याविशिष्टबुद्धेः अत एव **[2]अविजानतः** हिता-ऽहितप्राप्ति-परिहारशून्यमनसः इत्येषोऽनन्तरोक्तः संसारो भवतीति । यद्येवं ततः किम् ? इत्यत आह—

**निज्झाइए**त्यादि । एवमिमं त्रस[3]कायमागोपाला-ऽङ्गनादिप्रसिद्धं निश्चयेन ध्यात्वा निर्ध्याय, चिन्तयित्वेत्यर्थः । क्त्वाप्रत्ययस्योत्तर[4]क्रियापेक्षित्वाद् ब्रवीमीत्युत्तरक्रिया सर्वत्र योजनीयेति । पूर्वं च मनसाऽऽलोच्य ततः प्रत्युपेक्षणं भवतीति दर्शयति[5]**पडिलेहित्ते**(त्त?)त्ति प्रत्युपेक्ष्य दृष्ट्वा यथावदुपलभ्येत्यर्थः । किं तद् ? इति दर्शयति **प्रत्येकम्** इत्येकमेकं त्रसकायं प्रति **परिनिर्वाणं** सुखम्, प्रत्येकसुखभाजः सर्वेऽपि प्राणिनः, नान्यदीयमन्य उपभुङ्क्ते सुखमित्यर्थः । एष च सर्वप्राणिधर्म इति दर्शयति—**सर्वेषां प्राणिनां** द्वि-त्रि-चतुरिन्द्रियाणाम्, तथा **सर्वेषां भूतानां** प्रत्येक-साधारण-सूक्ष्म-बादर-पर्याप्तका-ऽपर्याप्तकत-रूणामिति, तथा **सर्वेषां [6]जीवानां** गर्भव्युत्क्रान्तिक-सम्मूर्छनज-औपपातिक-पञ्चेन्द्रियाणाम्, तथा **सर्वेषां [7]सत्त्वानां** पृथिव्याद्येकेन्द्रियाणामिति । इह च प्राणादिशब्दानां यद्यपि परमार्थतोऽभेदस्तथापि उक्तन्यायेन भेदो [8]द्रष्टव्यः, उक्तं च—

**प्राणा द्वि-त्रि-चतुः प्रोक्ताः, भूतास्तु तरवः स्मृता ।**
**जीवाः पञ्चेन्द्रि[9]याः प्रोक्ताः, शेषाः सत्त्वाः इतीरिताः ।** [ ]

यदि वा शब्दव्युत्पत्तिद्वारेण समभिरूढनय[10]मतेन भेदो द्रष्टव्यः, तद्यथा सततप्राणधारणात् प्राणाः, कालत्रयभवनाद् भूताः, त्रिकालजीवनाद् जीवाः, सदाऽस्तित्वात् सत्त्वा इति । तदेवं विचिन्त्य प्रत्युपेक्ष्य च [11]यथा सर्वेषां जीवानां प्रत्येकं परिनिर्वाणं सुखं तथा प्रत्येकमसात**मपरिनिर्वाणं महाभयं दुःख**महं

---

१. ०प्यनुचित० ग घ । २. अजानतः च । ३. ०कायमाबाल-गोपाला० घ । ४. ०क्रियापेक्षया ब्रवी० ग । ५. पडिलेहित्ति त्ति ख ग । ६. जीवानामिति गर्भ० च । ७. सत्त्वानामिति पृ० ख च । ८. द्रष्टव्य इति, उक्तं ख च । ९. ०याः ज्ञेयाः, शेषाः सत्त्वाः प्रकीर्तिताः च । १०. ०मताद् भेदोऽभ्युपगन्तव्यः, तद्यथा ख च । ११. यथा इति चपुस्तके नास्ति ।

ब्रवीमि। तत्र दुःखयतीति दुःखम्, तद्विशेष्यते—किंविशिष्टम् ? **असातम्** असद्वेद्यकर्मांशविपाकजमित्यर्थः, तथा **अपरिनिर्वाणम्** इति समन्तात् सुखं परिनिर्वाणम्, न परिनिर्वाणमपरिनिर्वाणं समन्तात् शरीर-मनःपीडा[1]करमित्यर्थः, तथा **महाभयम्** इति महच्च तद् भयं च महाभयम्, नातः परमन्यदस्तीति महाभयम् तथाहि—सर्वेऽपि शारीरान्मानसाच्च दुःखादुद्विजन्ते प्राणिन इति[2] । **इति**शब्द एवमर्थे, एवमहं ब्रवीमि सम्यगुप[3]लब्धतत्त्वो यत् प्रागुक्तमिति । एतच्च ब्रवीमीत्याह छ ॥—

**तसंती**त्यादि । एवंविधेन चासातादिविशेषणविशिष्टेन दुःखेनाभिभूताः [4]**त्रस्यन्ति** उद्विजन्ते, **प्राणा** इति प्राणिनः, कुतः पुन[5]रुद्विजन्ते ? इत्याह—प्रगता दिक् **प्रदिग्** [6]विदिगित्यर्थः, ततः प्रदिशः सकासा[7]दुद्विजन्ते । तथा प्राच्यादिषु च दिक्षु व्यवस्थितास्त्रस्यन्ति । एताश्च प्रज्ञापकविधिविभक्ता दिशो[8]ऽनुदिशश्च गृह्यन्ते, जीवव्यवस्थानश्रवणात् । ततश्चायमर्थः प्रतिपादितो भवति काक्वा न काचिद् दिग् अनुदिग् वा यस्यां न सन्ति त्रसाः, त्रस्यन्ति वा न यस्यां स्थिताः कोशिकारकीटवत् । कोशिकारकीटो हि सर्वदिग्भ्योऽनुदिग्भ्यश्च बिभ्यदात्मसंरक्षणार्थं वेष्टनं करोति शरीरस्येति । भावदिगपि न काचित् तादृश्यस्ति यस्यां वर्तमानो जन्तुर्न त्रस्येत्, शारीर-मानसाभ्यां दुःखाभ्यां सर्वत्र नरकादिषु जङ्घन्यन्ते प्राणिनः, अतस्त्रासपरिगतमनसः सर्वदाऽवगन्तव्याः । एवं सर्वत्र दिक्ष्वनुदिक्षु च त्रसाः सन्तीति गृह्णीमः । दिग्-विदिग्व्यवस्थितास्त्रसा[9]स्त्रस्यन्तीत्युक्तम्, कुतः पुनस्त्रस्यन्ति ? यस्मात् तदारम्भवद्भिस्ते व्यापाद्यन्ते । किं पुनः कारणं ते तानारभन्ते ? इत्याह—

**तत्थ तत्थे**त्यादि । तत्र तत्र तेषु तेषु कारणेषूत्पन्नेषु वक्ष्यमाणेषु [10]अर्चाऽजिन-शोणितादिषु च पृथग् विभिन्नेषु प्रयोजनेषु, **पश्य** इति शिष्यचोदना । [11]किं तद् ? इति दर्शयति—मांसभक्षणादिगृद्धा **आतुराः** अस्वस्थमनसः परि समन्तात्

१. ०**करणमि**० क । २. **इति** इति ख-घ-ङपुस्तकेषु न वर्तते । ३. ०**लब्धसत्त्वो** क । ४. **त्रसन्ति** च । ५. ०**रुद्विजन्तीति दर्शयति-प्रगता** ख ग च । ६. **विदिश इत्य**० ग । ७. ०**दुद्विजन्ति** ग च । ८. ०**नुदिशो वा गृ**० च । ९. ०**स्त्रसन्ती**० ग ङ । १०. **अस्थ्यजिन**० घ, "**अर्चा** इति शरीरम्" जै०वि०प० । ११. **किं तत् पश्य ? इति दर्श**० कप्रतिमृते ।

तापयन्ति पीडयन्ति नानाविधवेदनोत्पादनेन प्राणव्यापादनेन[१] वा तदारम्भिणस्त्रसानिति । येन केनचिदारम्भेण प्राणिनां सन्तापनं भवतीति दर्शयन्नाह—

**[सू०५०] लज्जमाणा पुढो पास । 'अणगारा मो'त्ति एगे पवदमाणा, जमिणं विरूवरूवेहिं सत्थेहिं तसकायसमारंभेणं तसकायसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ।**

**[सू०५१] तत्थ खलु भगवता परिण्णा पवेदिता— इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघायहेतुं से सयमेव तसकायसत्थं समारभति, अण्णेहिं वा तसकायसत्थं समारभावेति, अण्णे वा तसकायसत्थं समारभमाणे समणुजाणाति । तं से अहिताए, तं से अबोधीए ।**

**[सू०५२] से त्तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णातं भवति—एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु निरए ।**

**इच्चत्थं गढिए लोए, जमिणं विरूवरूवेहिं सत्थेहिं तसकायकम्मसमारंभेणं तसकायसत्थं समरभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ।**

**से बेमि—अप्पेगे अच्चाए वधेंति, अप्पेगे अजिणाए**

---

१. प्राणिव्या० ग ।

**वधेंति, अप्पेगे मंसाए वहेंति, अप्पेगे सोणिताए वधेंति, अप्पेगे हिययाए वहिंति, एवं पित्ताए वसाए पिच्छाए पुच्छाए वालाए सिंगाए विसाणाए दंताए दाढाए नहाए ण्हारुणीए अट्ठिए अट्ठिमिंजाए अट्ठाए अणट्ठाए ।**

**अप्पेगे हिंसिंसु मे त्ति वा, अप्पेगे हिंसंति वा, अप्पेगे हिंसिस्संति वा णे वधेंति ।**

**संतीत्यादि** । **सन्ति** विद्यन्ते प्रायः सर्वत्रैव प्राणाः **प्राणिनः पृथग्** विभिन्नाः द्वि-त्रि-चतुः-पञ्चेन्द्रियाः **श्रिताः** पृथिव्यादिश्रिताः । एतच्च ज्ञात्वा निरवद्यानुष्ठायिना भवितव्यमित्यभिप्रायः ।।छ।। अन्ये पुनरन्यथावादिनोऽन्यथाकारिणः ? इति दर्शयन्नाह—

**लज्जमाणे**त्यादि । पूर्ववद् व्याख्येयम् यावत् **अण्णे वऽणेगरूवे पाणे विहिंसइ** त्ति । यानि कानिचित् कारणान्युद्दिश्य त्रसवधः क्रियते तानि दर्शयितुमाह—

**से बेमी**त्यादि । तदर्थमहं ब्रवीमि यदर्थं[1] प्राणिनस्तदारम्भप्रवृत्तै[2]र्व्यापाद्यन्त इति । अप्येकेऽर्चायै घ्नन्ति । अपिः उत्तरापेक्षया समुच्चयार्थः । **एके** केचन तदर्थित्वेनातुराः अर्च्यतेऽसावाहारा-ऽलङ्कार[3]विधानैरिति अर्चा देहस्तदर्थं व्यापादयन्ति, तथाहि—लक्षणवत्पुरुष[4]मक्षतमव्यङ्गं व्यापाद्य तच्छरीरेण विद्या-मन्त्रसाधनानि कुर्वन्ति, उपयाचितं वा यच्छन्ति दुर्गादीनामग्रतः, अथवा विषं येन भक्षितं स हस्तिनं मारयित्वा तच्छरीरे प्रक्षिप्यते पश्चाद् विषं जीर्यति । तथाऽजिनार्थं चित्रक-व्याघ्रादीन् व्यापादयन्ति । एवं **मांस**-शोणित-हृदय-पित्त-वसा-पिच्छ-पु[5]च्छ-वाल-शृङ्ग-विषाण-दन्त-दंष्ट्रा-नख-स्नायु-अस्थि-

१. **यदर्थमहं प्राणि०** क । २. **०प्रवृत्तौ व्यापा०** च । ३. **०लङ्कारैरिति** ग घ ङ । ४. **०षमव्यङ्गं** क घ ङ **०षमक्षतव्यङ्गं** ख । ५. **०पुंच्छ०** ख ।

अस्थिमिञ्जास्वपि[1] वाच्यम् । मांसार्थं सूकरादयः[2], त्रिशूलालेखार्थं[3] शोणितं गृह्णन्ति, हृदयानि साधका गृहीत्वा[4] मथ्नन्ति, पित्तार्थं मयूरादयः, वसार्थं व्याघ्र-मकर-वराहादयः, पिच्छार्थं[5] मयूर-गृद्धादयः, पुच्छार्थं रोज्झादयः[6], वालार्थं चमर्यादयः, शृङ्गार्थं रुरु-खड्गादयः, तत् किल शृङ्गं[7] पवित्रमिति याज्ञिका गृह्णन्ति, विषाणार्थं हस्त्यादयः, दन्तार्थं शृगालादयः तिमिरापहारित्वात्[8] तद्दन्तानाम्, दंष्ट्रार्थं वराहादयः, नखार्थं व्याघ्रादयः, स्नाय्वर्थं गो-महिष्यादयः[9], अस्थ्यर्थं शङ्ख-शुक्त्यादयः, अस्थिमिञ्जार्थं महिष-वराहादयः । एवमेके यथोपदिष्टप्रयोजनकलापापेक्षया घ्नन्ति । अपरे तु कृकलास-गृहकोकिलिकादीन्[10] विना प्रयोजनेन व्यापादयन्ति। अन्ये पुनः **हिंसिंसु मि[11] त्ति वे**ति हिंसितवानेषोऽस्मत्स्वजनान्[12] सिंहः सर्पोऽरिर्वाऽतो घ्नन्ति, मम वा पीडां कृतवन्त इत्यतो हन्ति । तथाऽन्ये वर्तमानकाल एव हिनस्ति अस्मान् सिंहोऽन्यो वेति घ्नन्ति । तथाऽन्येऽस्मानयं हिंसिष्यतीत्यनागतमेवं[13] सर्पादिकं व्यापादयन्ति । एवमनेकप्रयोजनोपन्यासेन हननं त्रसविषयं प्रदर्श्योद्देशकार्थमुपसञ्जिहीर्षुराह—

**[ सू०५३ ] एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाया भवंति । एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाया भवंति ।**

**[ सू०५४ ] तं परिण्णाय मेधावी णेव सयं तसकायसत्थं समारभेज्जा, णेवऽण्णेहिं तसकायसत्थं समारभावेज्जा, णेवऽण्णे तसकायसत्थं समारभंते समणुजाणेज्जा ।**

---

१. ०मिञ्जादिष्वपि ग च । २. शूकरा० ङ च । ३. ०लेख्यार्थं ग । ४. ०त्वा समश्नन्ति ख । ५. पिंच्छार्थं क । ६. रोज्जादयः घ ङ । ७. शृङ्गं याज्ञिकाः पवित्रमिति गृ० च । ८. तिमिरापहत्वात् कप्रतेर्विना । ९. ०महिषादयः ग । १०. ०कोकिलकादीन् ग । ११. मे त्ति हिंसित० ख ग च । १२. ०त्स्वजनकान् ख च । १३. ०व केसर्यादिकं ग, ०व सर्पादि व्या० घ ङ ।

**[सू०५५] जस्सेते तसकायसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णातकम्मे त्ति बेमि ।**

॥ ११ सत्थपरिण्णाए छट्ठो उद्देसओ सम्मत्तो ★ ॥

**एत्थ सत्थ**मित्यादि [1]प्रागवद् वाच्यम्, यावत् **स एव मुनिः** त्रसकायसमारम्भविरतत्वात् [2]परिज्ञातकर्मत्वात् प्रत्याख्यातपापकर्मत्वादिति **ब्रवीमि**, भगवतस्त्रिलोकबन्धोः परमकेवलालोकसाक्षात्कृतसकलभुवनप्रपञ्चस्योपदेशादिति ॥छ॥

**[3]षष्ठोद्देशकः [4]समाप्तः ॥छ॥**

● ● ●

---

१. प्राग्वद् भावनीयम् या० ख च । २. परिज्ञातदोषत्वात् ख । ३. इति शस्त्रपरिज्ञाषष्ठोद्देशकः ॥छ॥ ङ । ४. परिसमाप्तः ॥छ॥ ख ।

उक्तः षष्ठोद्देशकः । साम्प्रतं सप्तमः समारभ्यते । अस्य चायमभिसम्बन्धः—अभिनवधर्माणां दुःश्रद्धानत्वाद् अल्पपरिभोगत्वाद् उत्क्रमायातस्योक्तशेषस्य वायोः स्वरूपनिरूपणार्थमिदमुपक्रम्यते । तदनेन सम्बन्धेनायातस्यास्योद्देशकस्योपक्रमादीनि चत्वार्यनुयोगद्वाराणि वाच्यानि यावद् नामनिष्पन्ने निक्षेपे वायूद्देशक इति । तत्र वायोः स्वरूपनिरूपणाय कतिचिद्द्वारातिदेशगर्भां **निर्युक्तिकृद्** गाथामाह—

**[1]वाउस्स वि दाराइं ताइं जाइं हवंति पुढवीए ।**
**णाणत्ती उ विहाणे परिमाणुवभोग सत्थे य ॥१६४॥**

**वाउस्स वी**त्यादि । वातीति वायुः, तस्य वायोरपि तान्येव द्वाराणि यानि पृथिव्यां प्रतिपादितानि । नानात्वं भेदः, तच्च विधान-परिमाण-उपभोग-शस्त्रेषु, चशब्दाद् लक्षणे च [2]द्रष्टव्यमिति ॥१६४॥ तत्र विधानप्रतिपादनायाह—

**दुविहा [3]य वाउजीवा सुहुमा तह बायरा [4]य लोयम्मि ।**
**सुहुमा य सव्वलोए पंचेव य बायरविहाणा ॥१६५॥**

**दुविहे**त्यादि । वायुरेव जीवा वायुजीवाः । ते च [5]द्विविधाः—सूक्ष्मबादरनामकर्मोदयात् सूक्ष्मा बादराश्च । तत्र सूक्ष्माः सकललोकव्यापि[6]तयाऽवतिष्ठन्ते, दत्तकपाटसकलवातायनद्वारगेहान्तर्धूमवद् व्याप्त्या स्थिताः । बादरभेदास्तु पञ्चैव अनन्तरगाथया वक्ष्यमाणा [7]इति ॥१६५॥ बादरभेदप्रतिपादनायाह—

**उक्कलिया मंडलिया गुंजा-घणवाय-सुद्धवाया य ।**
**बायरवाउविहाणा पंचविहा वण्णिया एए ॥१६६॥** दारं ॥

**उक्कलिए**त्यादि । स्थित्वा स्थित्वोत्कलिकाभिर्यो वाति स उत्कलिकावातः । मण्डलिकावातस्तु वातोली । गुञ्जा भम्भा, तद्वद् गुञ्जन् यो वाति स गुञ्जावातः । घनवातः अत्यन्तघनः पृथिव्याद्याधारतया व्यवस्थितो

---

१. **वायुस्स** क-खप्रती विना । २. **द्रष्टव्यम्** ॥१६४॥ क घ ङ । ३. उ क ठ । ४. उ ठ । ५. **द्विधा-सूक्ष्म०** ग । ६. **०तया तिष्ठन्ति** ख । ७. **इति** इति कपुस्तके नास्ति ।

हिमपटलकल्पः । मन्दस्तिमितः [1]शीतिकादिषु शुद्धवातः । ये त्वन्ये [2]**प्रज्ञापना**दौ प्राच्यादिवाता अभिहितास्तेषामेष्वेव यथायोगमन्तर्भावो द्रष्टव्य इति । [3]एवम् **एते बादरवायु[4]विधाना** भेदाः **पञ्चविधाः** पञ्चप्रकारा **व्यावर्णिता** इति ॥१६६॥ लक्षणद्वाराभिधित्सयाऽऽह–

**जह देवस्स सरीरं अंतद्धाणं च अंजणादीसु ।**
**[5]एओवम आएसो वाएऽसंते वि रूवम्मि ॥१६७॥** दारं ॥

**जह देवस्से**त्यादि । यथा देवस्य शरीरं चक्षुषाऽनुपलभ्यमानमपि विद्यते, चेतनावच्चाध्यवसीयते, देवाः स्वशक्तिप्रभावात् तथाभूतं रूपं कुर्वन्ति यत् चक्षुषा नोपलभ्यते, न चैतद् वक्तुं शक्यते–'नास्ति, अचेतनं च' इति, तद्वद् वायुरपि चक्षुषो विषयो न भवति, अस्ति च चित्तवांश्चेति । [6]यथा चाऽन्तर्धानमञ्जन-विद्या-मन्त्रैर्भवति मनुष्याणाम्, न च नास्तित्वमचेतनत्वं चेति, [7]**एतदुपमानो** वायावपि भवति **आदेशः** व्यपदेशोऽ**सत्यपि रूप** इति । अत्र चाऽसच्छब्दो नाऽभाववचनः, किन्त्वसद्रूपं वायोरिति, चक्षुर्ग्राह्यं तद्रूपं न भवति सूक्ष्म-[8]परिणामात् परमाणोरिव, रूप-रस-गन्ध-स्पर्शात्मकश्च वायुरिष्यते, न यथाऽन्येषां वायुः स्पर्शवानेवेति । प्रयोगार्थश्च गाथया प्रदर्शितः । प्रयोगश्चायम्–चेतनावान् वायुः, अपरप्रेरिततिर्यगनियमितदिग्गतिमत्त्वाद्, गवाश्वादिवत् । तिर्यगेव गमन-नियमाभावाद् अनियमितविशेषणोपादानाच्च परमाणुनाऽनैकान्तिकासम्भवः, तस्य नियमितगतिमत्त्वात्, जीव-पुद्गलयोः '**अनुश्रेणि गतिः**' [तत्त्वार्थ० २।२७] इति वचनात् । एवमेष वायुः घन-शुद्धवातादिभेदोऽशस्त्रोपहतश्चेतनावानवगन्तव्य इति ॥१६७॥ परिमाणद्वारमाह–

---

१. **शीतकादिषु** क, **शीतकालादिषु** ग ङ च, "**शीतिका** झटिका" स०वि०प० । २. "से किं तं बादरवाउकाइया ? बादरवाउकाइया अणेगविहा पण्णत्ता, तं जहा–पाईणवाए पडीणवाए दाहिणवाए उदीणवाए उड्ढवाए अहोवाए तिरियवाए विदिसीवाए वाउब्भामे वाउक्कलिया वायमंडलिया उक्कलियावाए मंडलियावाए गुंजावाए झंझावाए संवट्टवाए घणवाए तणुवाए सुद्धवाए, जे यावण्णे तहप्पगारा ।" [प्रज्ञा० सू० १९] ३. **एवमित्येते बादर०** ग । ४. **०विधानानि भेदाः** ख च । ५. **एतोवमयाएसो** ञ । ६. **यथा वाऽन्त०** चपुस्तकमृते । ७. **एतदुपमानेन वाया०** ख । ८. **०परिमाणात्** ख ग ङ ।

**जे बायरपज्जत्ता पयरस्स असंखभागमेत्ता[1] ते ।**
**सेसा तिन्नि वि रासी वीसुं[2] लोया असंखेज्जा ॥१६८॥** दारं ॥

**जे बायरे**त्यादि । ये बादरपर्याप्तका वायवस्ते संवर्तितलोकप्रतरासङ्ख्येयभागवर्तिप्रदेशपरिमाणाः[3] । शेषास्त्रयोऽपि राशयः विष्वक् पृथगसङ्ख्येयलोकाकाशप्रदेशपरिमाणा भवन्ति । विशेषश्चायमत्रावगन्तव्यः[4]— बादराप्कायपर्याप्तकेभ्यो बादरवायुपर्याप्तका असङ्ख्येयगुणाः, बादराप्कायापर्याप्तकेभ्यो बादरवायुकायापर्याप्तका[5] असङ्ख्येयगुणाः, सूक्ष्माप्कायापर्याप्तकेभ्यः सूक्ष्मवाय्वपर्याप्तका विशेषाधिकाः, सूक्ष्माप्कायपर्याप्तकेभ्यः सूक्ष्मवायुपर्याप्तका विशेषाधिकाः ॥१६८॥ उपभोगद्वारमाह—

**वियण धमणाऽहिधारण[6] उस्सिंघण[7] फूसणा[8]ऽऽणुपाणू य ।**
**बायरवाउक्काये उवभोगगुणो[9] मणुस्साणं ॥१६९॥** दारं ॥

**वियणे**त्यादि । व्यजन-भस्त्राध्माना[10]-ऽभिधारणा-उत्सिङ्घन[11]-फूत्कार-प्राणापानादिभिर्बादरवायुकायेन[12] उपभोग एव गुण उपभोगगुणो मनुष्याणामिति ॥१६९॥ शस्त्रद्वाराभिधित्सयाऽऽह । तत्र शस्त्रं-द्रव्य-भावभेदाद् द्विविधम् । द्रव्यशस्त्राभिधित्सयाऽऽह—

**वियणे य तालवेंटे सूप्प[13] सिए पत्त चेलकन्ने य ।**
**अभिधारणा[14] य बाहिं गंधऽग्गी वाउ सत्थाइं ॥१७०॥**

**किंची[15] सकाय०** गाहा ॥१७१॥

१. **०मेत्तातो** छ, **०मेत्ताए** झ । २. **वीसं** झ, "**वीसं** विष्वक् पृथक्" झप्रतेरवचूरौ । ३. **प्रदेशराशिपरिमाणाः** ग च । ४. **०मवगन्तव्यः** क ग । ५. **०वाय्वपर्याप्तका** ख । ६. **धमणाधिधारण** ख, **धमणाभिधारण** झ ञ ठ । ७. **ओसिंघण** छ । ८. **फुंसणा०** ञ । ९. **उवभोगगुणा** ख ठ । १०. **०भस्त्राध्माता०** च । ११. **०उत्सिङ्घन-पूत्कार०** घ ङ । १२. **०कायेनोपभोगविधिमनुष्याणामिति** ख । १३. **सुव सिए** ख ज झ ठ विना **सूय सिए** छ । १४. **अभिधारणाहिं बाहिं** क । १५. **किंची स०** ॥१७१॥ ठ, झ-ञ प्रत्योरियं पङ्क्तिर्नास्ति, एतत्प्रत्यन्तरानुसारेणैव टीका । यद्यपि १७१ गाथासंसूचकैतत्पाठानुपलम्भात् टीकाकृद्भिरेतत्पूर्वगाथान्तवर्ति 'वाउसत्थाइं' इति सामासिकं पदं विभज्य स्वकायादिशस्त्रम् अध्याहारेण च भावशस्त्रं सूचितं परम् 'उद्देशषट्के विलिख्य लाघवार्थमन्त्योद्देशके न रचयेदेतां गाथाम्'

**वियणे**त्यादि । व्यजन-तालवृन्त-सूर्प-सित-पत्र-चेलकर्णादय: द्रव्यशस्त्रमिति । तत्र सितम् इति चामरम् । प्रस्विन्नो यद् बहिरवतिष्ठते वातागमनमार्गे साऽभिधारणा । तथा गन्धा: चन्दनोशीरादीनाम् । अग्नि[:] ज्वाला प्रतापश्च । तथा प्रतिपक्षवातश्च शीतोष्णादिक: । [1]प्रतिपक्षवायुग्रहणेन स्वकायादि शस्त्रं सूचितमिति । एवं भावशस्त्रमपि दुष्प्रणिहितमनो-वाक्-कायलक्षण-मवगन्तव्यमिति ॥१७०॥ अधुना सकलनिर्युक्त्यर्थोप[2]संञ्जिहीर्षयाऽऽह—

**सेसाइं दाराइं ताइं जाइं हवंति पुढवीए ।**
**एवं वाउद्देसे निज्जुत्ती कित्तिया [3]एसा ॥१७२॥ प्रथमाध्ययनम् ।।छ।।**

[4]**सेसाइ**मित्यादि । शेषाणि उक्तव्यतिरिक्तानि तान्येव द्वाराणि पृथिवी-समधिगमे यान्यभिहितानीति । एवं सकलद्वारकलापव्यावर्णनाद् वायुकायोद्देशके निर्युक्ति: कीर्तितैषाऽवगन्तव्येति ॥१७२॥

गतो नामनिष्पन्नो निक्षेप: । साम्प्रतं सूत्रानुगमेऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम्, तच्चेदम्—

**[ सू०५६ ] पभू एजस्स दुगुंछणाए आतंकदंसी अहियं ति णच्चा ।**

**जे अज्झत्थं जाणति से बहिया जाणति, जे बहिया जाणति से अज्झत्थं जाणति । एतं तुलमण्णेसिं ।**

**इह संतिगता दविया णावकंखंति जीविउं ।**

---

इत्येतस्यायुक्तियुक्तत्वात्, भावशस्त्रानध्याहार्यं च सुष्ठु इति कृत्वा, अस्मादुपयुक्तासु झ-जप्रतिवर्जासु पञ्चस्वपि प्रतिष्वेतद्गाथाखण्डोपलब्धेश्च टीकाकृदव्याख्यातोऽप्येष पाठो मूले स्थापित: । अनेन च १७० गाथान्तर्वर्तिन: 'वाउसत्थाइं' इत्यस्य वायो: शस्त्राणि वायुशस्त्राणि इतार्थोऽधिगम्य: । १. **प्रतिपक्षिवायु०** क । २. **०सञ्जिहीर्षुराह** ग । ३. एसा ॥१७२॥ **प्रथममध्ययनम्** ख, एसा ॥१७२॥छ॥ **आयारस्स पढमज्झयणणिज्जुत्ती सम्मत्ता** ।।छ।। ज । ४. **सेसा०** **इत्यादि** ख ।

**पहू [1]ऐजस्स दुगुंच्छणाए** त्ति । अस्य चायमभिसम्बन्धः—इहानन्त[2]रोद्देशके पर्यन्तसूत्रे त्रसकायपरिज्ञानं [3]तदारम्भवर्जनं च मुनित्वकारणमभिहितम्, इहापि तदेव द्वयं वायुकायविषयं मुनित्वकारणमेवोच्यते । तथा परम्पर*सूत्रसम्बन्धः*—***[4]इहमेगेसिं णायं भवइ*** *त्ति, किं तद् ज्ञातं भवति ?* **पहू एजस्स दुगुंछणाए** त्ति। तथाऽऽदिसूत्रसम्बन्धश्च **सुयं मे [5]आउसंतेणे**त्यादि, किं तत् श्रुतम् ? यत् प्रागुपदिष्टं तथैतच्च **पहू एजस्स [6]दुगुंछणाए** त्ति । **दुगुंछण** त्ति जुगुप्सा । प्रभवतीति प्रभुः समर्थो योग्यो वा । कस्य वस्तुनः समर्थ इति ? **एजृ कम्पने** [पा०धा० २३४] एजतीति एजः वायुः कम्पनशीलत्वात्, तस्यैजस्य जुगुप्सा निन्दा तदासेवनपरिहारो निवृत्तिरिति यावत्, तस्यां तद्विषये प्रभुर्भवति, वायुकायसमारम्भनिवृत्तौ[7] शक्तो भवतीति यावत् । पाठान्तरं वा **पभू य एगस्स दुगुंछणाए** उद्रेकावस्थावर्तिनैकेन गुणेन [8]स्पर्शाख्येनोपलक्षित इति एकः वायु[9]स्तस्यैकविधस्य एकगुणोपलक्षितस्य वायोर्जुगुप्सायां प्रभुः । **च**शब्दात् श्रद्धाने च [10]प्रभुर्भवति[11], श्रद्धाय च [12]जीवतया जुगुप्सते, ततः योऽसौ [13]वायुकायसमारम्भनिवृत्तौ प्रभुरुक्तस्तं दर्शयति—

**आयंके**त्यादि । **तकि कृच्छ्रजीवने** [पा०धा० ११८] इत्यातङ्कनम् आतङ्कः, कृच्छ्रजीवनं दुःखम् । तच्च द्विविधम्—शारीरं मानसं च । तत्राद्यं [14]कण्टक-क्षार-शस्त्र-गण्ड-लूतादिसमुत्थम्, मानसं प्रियविप्रयोगा-ऽप्रियसम्प्रयोगेप्सितालाभ-दारिद्र्य-दौर्मनस्यादिकृतम् । एतदुभयमातङ्कः, [15]एनमातङ्कं पश्यति तच्छीलश्चेत्यात**ङ्कदर्शी,** अवश्यमेतदुभयमपि दुःखमापतति मय्यनिवृत्तवायुकायसमारम्भे । [16]ततश्चैतद्वायुकायसमारम्भणमातङ्कहेतुभूतमहितमिति [17]ज्ञात्वैतस्माद् [18]निवर्तने

---

१. **एज्जस्स** च । २. **०रोद्देशकपर्यन्त०** च । ३. **तदारम्भपरिवर्जनं** ख च । ४. **इहमेगेसिं नो णयं भवइ त्ति, किं न ज्ञातं भवति ?** ख । ५. **आउसंतेणं इत्यादि** ग । ६. **दुगंछणाए** घ च । ७. **०निवृत्तो भवतीति** क, **०निवृत्तौ समर्थो भवतीति** ग घ ङ । ८. **स्पर्शनाख्येनो०** घ ङ । ९. **०स्तस्यैकगुणोप०** ग घ च । १०. **प्रभुर्भवतीति** ख च । ११. **०ति, अर्थाद् यदि श्रद्धाय जी०** कप्रतिमृते । १२. **जीविताय** ख । १३. **वायुकायारम्भ०** घ ङ च । १४. **कटुकक्षार-शस्त्र०** ग च । १५. **एतमातङ्कं** ग ङ । १६. **ततश्च तद्वायु०** ग । १७. **ज्ञात्वैतस्मिन् नि०** घ ङ । १८. **निवर्तते** ख च ।

[1]प्रभुर्भवतीति । यदि वाऽऽतङ्को [2]द्वेधा—द्रव्य-भावभेदात् । तत्र द्रव्यातङ्के इदमुदाहरणम्—

जंबुद्दीवे दीवे [3]भारहवासम्मि अत्थि सुपसिद्धं ।
बहुणयर[4]गुणपसिद्धं रायगिहं नाम नयरं ति ॥१॥
तत्थासि गरुयदरियारिमद्दणो [5]भुयणनिग्गयपयावो ।
अहिगयजीवा-ऽजीवो राया नामेण जियसत्तू ॥२॥
अणवरयगरुयसंवेगभाविओ [6]धम्मघोसपामूले ।
सो अण्णया कयाई पमादिणं पासए सेहं ॥३॥
चोइज्जंतमभिक्खं अवराहं तं पुणो वि कुणमाणं ।
तस्स हियऽट्ठं राया सेसाण य रक्खणट्ठाए ॥४॥
आयरियाणुन्नाए आणावइ सो उ णिययपुरिसेहिं ।
तिव्वुक्कडदव्वेहिं संधियपुव्वं तहिं खारं ॥५॥
पक्खित्तो जत्थ णरो णवरं गोदोहमेत्तकालेण ।
निज्जिन्नमंस-सोणिय अट्ठियसेसत्तणमुवेइ ॥६॥
दो ताहे पुव्वमए पुरिसे आणावए तहिं राया ।
एगं गिहत्थवेसं बीयं [7]पासंडिणेवच्छं ॥७॥
पुव्वं चिय सिक्खविए [8]ते पुरिसे पुच्छए [9]तहिं राया ।
[10]को अवराहो एसिं ? भणंति आणं अइक्कमइ ॥८॥
[11]पासंडी य जहुत्ते न वट्टए अत्तणो [12]उ आयारे ।
पक्खिवह खारमज्झे खित्ता गोदोहमेत्तस्स ॥९॥
दट्ठूणऽट्ठिवसेसे ते पुरिसे अलियरोसरत्तच्छो ।
सेहं [13]अवलोएंतो राया तो भणइ [14]आयरियं ॥१०॥

---

१. प्रभुर्भवति क ग । २. द्वेधा-द्रव्यातङ्को भावातङ्कश्च । तत्र क गपुस्तके विना । ३. भरहे वा० ग, भारहे वा० ङ । ४. ०गुणसमेयं रा० ख घ ङ च, ०गुणसमिद्धं रा० ग । ५. भुवण० ख ग घ ङ भुअण० च । ६. धम्मघोसपयमूले ख । ७. पासंडणेवच्छं ग घ ङ पासंडिणेवत्थं च । ८. दो ख । ९. तओ राया ख च । १०. को वऽवराहो ख च । ११. पासंडी उ ज० ग, पासंडिओ जहुत्ते न पवट्टइ अत्तणो ख च । १२. य ग घ ङ । १३. अवलोयंतो ग, अवलोएत्ता घ । १४. आयरिये च ।

तुम्ह वि [१]कोइ पमादी ? सासेमि य तं पि, नत्थि भणइ गुरू ।
[२]जइ होही तो साहे [३]तुम्हि च्चिय [४]तत्थ [५]जाणेह ॥११॥

सेहो गए [६]निवम्मी [७]भणाइ ते साहुणो उ न [८]पुणो त्ति ।
होहं पमायसीलो [९]तुम्हं सरणागओ धणियं ॥१२॥

जइ पुण होज्ज पमाओ पुणो ममं [१०]सद्भावरहियस्स ।
[११]तुम्हं गुणेहिं सुविहिय ! तो सावगरक्खसा मुच्चे ॥१३॥

आयंक[१२]भयुव्विग्गो ताहे सो णिच्च[१३]उज्जओ जाओ ।
कोवियमती य [१४]समए रण्णा मरिसाविओ पच्छा ॥१४॥

दव्वायंकादंसी अत्ताणं सव्वहा णियत्तेइ ।
अहियारंभाउ सया जह सीसो धम्मघोसस्स ॥१५॥ [ ]

[१५]भावातङ्कदर्शी तु नरक-तिर्यङ्-मनुष्या-ऽमरभवेषु प्रियविप्रयोगादि-शारीर-मानसातङ्कभीत्या न प्रवर्तते वायुसमारम्भे, अपि तु अहितमेतद्वायुसमारम्भणमिति मत्वा परिहरति । अतो य आतङ्कदर्शी भवति विमल-वि[१६]वेकत्वात् स वायुसमारम्भस्य जुगुप्सायां प्रभुः, हिता-ऽहितप्राप्ति-परिहारानुष्ठानप्रवृत्तेः, तदन्यैवंविधपुरुषवदिति । वायुकायसमारम्भनिवृत्तेः कारणमाह—

**जे अज्झत्थ**मित्यादि । आत्मानमधिकृत्य यद् वर्तते तद् **अध्यात्मम्,** तच्च सुख-दुःखादि, तद् यो **जानाति** अवबुध्यते स्वरूपतोऽवगच्छतीत्यर्थः स बहिरपि प्राणिगणं वायुकायादिकं जानाति । यथैषोऽपि हि सुखाभिलाषी [१७]दुःखाच्चोद्विजते यथा मयि दुःख[१८]मापतितमति[१९]कटुकमसद्वेद्य[२०]कर्मोदयाद् अशुभफलं स्वानुभवसिद्धम् एवं यो वेत्ति, स्वात्मनि सुखं च सद्वेद्यकर्मोदयात्

---

१. **कोवि** ख ग च । २. **जो होही** ग । ३. **तुब्भे** ख च । ४. **तस्स** ख ग च । ५. **जाणिहिह** क-गप्रती विना । ६. **निवम्मि** च । ७. **भणती** ग घ ङ । ८. **पुण त्ति** च । ९. **तुब्भं** च । १०. **सट्टभाव०** च । ११. **तुब्भं** ख च । १२. **०भउव्विग्गो** कप्रतिं विना । १३. **०उज्जुओ** ग । १४. **समते** ग । १५. **भावातङ्कादर्शी** खप्रतिं विना । १६. **०विवेकभावात् स वायोः जुगु०** ख च, **०विवेकभाग् स वायुस०** घ ङ । १७. **दुःखादुद्विजते** ग । १८. **०मापतितं कटुक०** ख । १९. **०कटुकासद्वेद्य०** क ग । २०. **०द्यस्वकर्मोदयाद्** घ ङ ।

शुभफलमेवं च [1]यो वेत्ति स खल्वध्यात्मं जानाति । एवं च योऽध्यात्मवेदी स बहिर्व्यवस्थितवायु[2]कायादिप्राणिगणस्यापि नानाविधोपक्रमजनितं स्व-परसमुत्थं च शरीर-मनःसमाश्रयं दुःखं सुखं वा वेत्ति, स्वप्रत्यक्षतया परत्राप्यनुमिमीते । यस्य पुनः स्वात्मन्येव विज्ञानमेवंविधं न समस्ति कुतस्तस्य बहिर्व्यवस्थितवायु[3]कायादिव्यपेक्षा ? यश्च बहिर्जानाति सोऽध्यात्मं यथावदवैति, इतरेतराव्यभिचारादिति । [4]परात्मविज्ञानाच्च यद् विधेयं तद् दर्शयितुमाह—

**एयं तुलमण्णेसि**मित्यादि । **एतां तुलां** यथोक्तलक्षणाम् **अन्वेषयेद्** गवेषयेदिति । का पुनरसौ तुला ? यथाऽऽत्मानं सर्वथा सुखाभिलाषितया रक्षसि तथा परमपि रक्ष, यथा परं तथाऽऽत्मानमिति । [5]एतां तुलां तुलितस्व[6]परसुखदुःखानुभवोऽन्वेषयेद्, एवं कुर्यादित्यर्थः, उक्तं च—

**कट्ठेण कंटएण व पाए विद्धस्स वेयणट्टस्स ।**
**[7]जा होइ अणिव्वाणी [8]सव्वत्थ जिएसु [9]तं जाण ॥ [ ]**

तथा—

**मरिष्यामीति यद् दुःखं पुरुषस्योपजायते ।**
**शक्यस्तेनानुमानेन परोऽपि परिरक्षितुम् ॥ [ ]**

अतश्च यथाऽभिहिततुलातुलितस्व-परान्तराः स्थावर-जङ्गमजन्तु[10]सङ्घातसंरक्षणायैव प्रवर्तन्ते । कथमिति दर्शयति—

**इहे**त्यादि । **इह** एतस्मिन् दयैक[11]रसे जिनप्रवचने । शमनं **शान्तिः** उपशमः, प्रशम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्याभिव्यक्तिलक्षणसम्यग्दर्शन-ज्ञान-चरणकलापः शान्तिरुच्यते, निराबाधमोक्षाख्यशान्तिप्राप्तिकारणत्वात्, तामेवंविधां शान्तिं गताः प्राप्ताः **शान्तिगताः**, शान्तौ वा स्थिताः **शान्तिगताः** । **द्रविका** नाम राग-[12]द्वेषविनिर्मुक्ताः, द्रवः संयमः सप्तदशविधानः कर्मकाठिन्य-

---

१. **योऽवगच्छति स** ख ग च । २. **०कायप्राणि०** ख । ३. **०कायादिष्वपेक्षा** कप्रतेर्विना । ४. **परात्मपरिज्ञानाच्च** ख च । ५. एनां ग । ६. **०परदुःखा०** क । ७. जह ग । ८. ''णायव्वा सव्वजीवाणं'' इति चूर्णौ गाथातुर्यांशः । ९. **तह** खप्रत्या विना । १०. ०सङ्घातरक्षणाय० ग । ११. ०रसे **प्रवचने** ख । १२. **०द्वेषनिर्मुक्ताः** क घ ङ ।

द्रवणकारित्वाद् विलयहेतुत्वात्, स[1] येषां विद्यते ते द्रविकाः **नावकाङ्क्षन्ति** न वाञ्छन्ति नाभिलषन्तीत्यर्थः । किं **नावकाङ्क्षन्ति** ? **जीवितुं** प्राणान् धारयितुम्। केनोपायेन जीवितुं नाभिकाङ्क्षन्ति ? वायुजीवोपमर्दनेनेत्यर्थः, शेषपृथिव्यादिजीव[2]कायसंरक्षणं तु पूर्वोक्तमेव । समुदायार्थस्त्वयम्—इहैव जैने प्रवचने यः संयमस्तद्व्यवस्थिता एवोन्मूलितातितुङ्गराग-द्वेषद्रुमाः परभूतोपमर्दनिष्पन्नसुखजीविकानिरभिलाषाः साधवः, नान्यत्र, एवंविधक्रियावबोधाभावादिति । [3]एवं च स्थिते—

**[ सू०५७ ] लज्जमाणा पुढो पास । 'अणगारा मो' त्ति एगे पवदमाणा, जमिणं विरूवरूवेहिं सत्थेहिं वाउकम्मसमारंभेणं वाउसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ।**

**[ सू०५८ ] तत्थ खलु भगवता परिण्णा पवेदिता— इमस्स चेव जीवियस्स परिवंदण-माणण-पूयणाए जाती-मरण-मोयणाए दुक्खपडिघातहेतुं से सयमेव वाउसत्थं समारभति, अण्णेहिं वा वाउसत्थं समारभावेति, अण्णे वा वाउसत्थं समारभंते समणुजाणति । तं से अहियाए, तं से अबोधीए ।**

**[ सू०५९ ] से त्तं संबुज्झमाणे आयाणीयं समुट्ठाए सोच्चा भगवतो अणगाराणं इहमेगेसिं णातं भवति—एस खलु गंथे, एस खलु मोहे, एस खलु मारे, एस खलु णिरए ।**

---

१. किं ? जीवितुं क । २. ०कायरक्षणं ख च । ३. एवं व्यवस्थिते ख, एवं च स्थिते सति- ग घ ङ एवं व्यवस्थिते सति—च ।

**इच्चत्थं गढिए लोगे, जमिणं विरूवरूवेहिं सत्थेहिं वाउकम्मसमारंभेणं वाउसत्थं समारभमाणे अण्णे वऽणेगरूवे पाणे विहिंसति ।**

**[ सू०६० ] से बेमि—संति संपाइमा पाणा आहच्च संपतंति य ।**

**फरिसं च खलु पुट्ठा एगे संघायमावज्जंति । जे तत्थ संघायमावज्जंति ते तत्थ परियाविज्जंति । जे तत्थ परियाविज्जंति ते तत्थ उद्दायंति ।**

**एत्थ सत्थं समारभमाणस्स इच्चेते आरंभा अपरिण्णाता भवंति । एत्थ सत्थं असमारभमाणस्स इच्चेते आरंभा परिण्णाता भवंति ।**

**[ सू०६१ ] तं परिण्णाय मेहावी णेव सयं वाउसत्थं समारभेज्जा, णेवऽण्णेहिं वाउसत्थं समारभावेज्जा, णेवऽण्णे वाउसत्थं समारभंते समणुजाणेज्जा ।**

**जस्सेते वाउसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ।**

**लज्जमाणा पुढो पासे**त्यादि पूर्ववन्नेयं यावत् **से हु मुणी परिन्नायकम्मे त्ति बेमि ।**

सम्प्रति षड्जीवनिकायविषयवधकारिणामपायदिदर्शयिषया तन्निवृत्तिकारिणां च सम्पूर्णमुनित्व[१]प्रदर्शनाय सूत्राणि प्रक्रम्यन्ते—

---

१. *०मुनिभावप्रद० ख च, ०मुनित्वभावप्रद० ग ।*

**[ सू०६२ ] एत्थं पि जाण उवादीयमाणा, जे आयारे ण रमंति**

**आरंभमाणा विणयं वयंति**
**छंदोवणीया अज्झोववण्णा**
**आरंभसत्ता पकरेंति संगं ।**

**से वसुमं सव्वसमण्णागतपण्णाणेणं अप्पाणेणं अकरणिज्जं पावं कम्मं णो अण्णेसिं ।**

**तं परिण्णाय मेहावी णेव सयं छज्जीवणिकायसत्थं समारभेज्जा, णेवऽण्णेहिं छज्जीवणिकायसत्थं समारभावेज्जा, णेवऽण्णे छज्जीवणिकायसत्थं समारभंते समणुजाणेज्जा ।**

**जस्सेते छज्जीवणिकायसत्थसमारंभा परिण्णाया भवंति से हु मुणी परिण्णायकम्मे त्ति बेमि ।**

॥ सत्थपरिण्णा समत्ता ॥

[1]**एत्थं पि जाणे**त्यादि । **एतस्मिन्नपि** प्रस्तुते वायुकाये, [2]अपिशब्दात् पृथिव्यादिषु च समाश्रितमारम्भं ये कुर्वन्ति ते उपादीयन्ते कर्मणा बध्यन्त इत्यर्थः । एकस्मिन् जीवनिकाये [3]वधप्रवृत्तः शेषनिकायवधजनितेन कर्मणा [4]बध्यते । किमिति ? यतो न ह्येकजीवनिकायविषय आरम्भः शेषजीवनिकायोपमर्दमन्तरेण कर्तुं शक्यत इत्यतस्त्वमेवं **जानीहि** श्रोतुरनेन परामर्शः । अत्र च द्वितीयार्थे प्रथमा । ततश्चैवमन्वयो लगयितव्यः—पृथिव्याद्यारम्भिणः शेषकायारम्भकर्मणा उपादीयमानान् जानीहि । के पुनः पृथिव्याद्यारम्भिणः कर्मणोपादीयन्ते ? इत्याह—

---

१. **एत्थं वि जा०** ख च । २. "**अपि** पदत्थे" चूर्णौ । ३. **वधप्रवृत्ताः** ख च । ४. **बध्यन्ते** ख च ।

**जे आयारे न रमंति,** ये ह्यविदितपरमार्था ज्ञान-दर्शन-चरण-तपो-वीर्याख्ये [1]पञ्चप्रकारे आचारे **न रमन्ते**[2] न धृतिं कुर्वन्ति, तदधृत्या च पृथिव्याद्यारम्भिणः तान् कर्मभिरुपादीयमानान् जानीहि । के पुनराचारे न रमन्ते ? **शाक्य-दिगम्बर-पार्श्वस्था**दयः । किमिति ? यत आह—

**आरंभमाणा विणयं वयंति,** आरम्भमाणा अपि पृथिव्या[3]दीन् जीवान् **विनयं** संयममेव भाषन्ते । कर्माष्टकविनयनाद् **विनयः** संयमः । **शाक्या**दयो हि वयमपि विनयव्यवस्थिता इत्येवं भाषन्ते, न च पृथिव्यादिजीवाभ्युपगमं कुर्वन्ति, तदभ्युपगमे वा तदाश्रितारम्भित्वाद् ज्ञानाद्याचारविकलत्वेन नष्टशीला इति । किं पुनः कारणं येनैवं ते दुष्टशीला अपि विनयव्यवस्थितमात्मानं भाषन्ते ? [4]इत्यत आह—

**छंदोवणीया अज्झोववन्ना,** छन्दः स्वाभिप्राय इच्छामात्रमनालोचित-पूर्वाऽपरं विषयाभिलाषो वा तेन [5]छन्देन उपनीताः प्रापिता आरम्भमार्गमविनीता अपि विनयं भाषन्ते । **अधिकम्** अत्यर्थम् **उपपन्नाः** तच्चित्तास्तदात्मका **अध्युपपन्ना** विषयपरिभोगायत्तजीविता इत्यर्थः । य एवं विषयाशाकर्षितचेतसस्ते किं कुर्युः ? इत्याह—

**आरंभसत्ता [6]पगरंति संगं,** आरम्भणमारम्भः सावद्यानुष्ठानं तस्मिन् **सक्ताः** तत्पराः प्रकर्षेण कुर्वन्ति, [7]सज्यते येन संसारे जीवः स सङ्गः अष्टविधं कर्म विषयसङ्गो वा तं सङ्गं प्रकुर्वन्ति, सङ्गाच्च पुनरपि [8]संसारः, [9]आजवंजवी-भावरूपः, एवम्प्रकार[10]मपायमवाप्नोति षड्जीवनिकायघातकारीति । अथ यो निवृत्तस्तदारम्भात् स किंविशिष्टो भवति ? [11]इत्यत आह—

**से वसुम**मित्यादि । स इति पृथिव्युद्देशकाद्यभिहितनिवृत्तिगुणभाक्

---

१. **पञ्चप्रकाराचारे** ख ग च । २. **०न्ते निवृत्तिं कुर्वन्ति** क । ३. **०दीन् विनयं** क ग । ४. **इत्याह** ख । ५. **छन्दे( न्द )सोपनीताः** च । ६. **पकरेंति** ख ग च, **पकरंति** घ । ७. **सज्यन्ते येन संसारे जीवाः स** ङ । ८. **संसारः, पुनस्तत्रैवोत्पत्तिः आजवं०** ग, **संसारः, पुनरपि तत्रैवोत्पत्तिः आजवं०** घ ङ । ९. "**अजीव( आजवं० ? )** इति तत्रैव पुनः पुनर्भवनम्" जै०वि०प० । १०. **०मपायमाप्नोति** ख च । ११. **इत्याह** घ ङ ।

षड्[1]जीवनिकायहनननिवृत्तः । **वसुमान्**-वसूनि द्रव्य-भावभेदाद् द्विधा, द्रव्यवसूनि मरकतेन्द्र[2]नील-वज्रादीनि भाववसूनि सम्यक्त्वा[3]दीनि, तानि यस्य यस्मिन् वा सन्ति स **वसुमान्** द्रव्यवानित्यर्थः । इह च भाववसुभिर्वसुमत्त्वमङ्गीक्रियते। प्रज्ञायन्ते यैस्तानि प्रज्ञानानि यथावस्थितविषयग्राहीणि ज्ञानानि, सर्वाणि समन्वागतानि प्रज्ञानानि यस्यात्मनः स सर्वसमन्वागतप्रज्ञानः सर्वावबोधविशेषानुगतः, सर्वेन्द्रियज्ञानैः पटुभिर्यथावस्थितविषयग्राहिभिरविपरीतैरनुगत इति यावत्, तेन सर्वसमन्वागतप्रज्ञानेनात्मना । अथवा सर्वेषु द्रव्य-पर्यायेषु सम्यगनुगतं प्रज्ञानं यस्यात्मनः स सर्वसमन्वागतप्रज्ञान [4]आत्मा, 'भगवद्वचनप्रामाण्यादेवमेतद् द्रव्य-पर्यायजालं नान्यथा' इति सामान्य-विशेषपरिच्छेदाद् निश्चिताशेषज्ञेयप्रपञ्चस्वरूपः सर्वसमन्वागतप्रज्ञान आत्मेत्युच्यते, अथवा शुभाऽशुभफलसकलकलापपरिज्ञानाद् [5]नरक-[6]तिर्यङ्-नरा-ऽमर-[7]मोक्षसुख-स्वरूपपरिज्ञानाच्च, अपरितुष्यन्ननैकान्तिकादिगुणयुक्ते संसारसुखे, मोक्षानुष्ठानमाविः-कुर्वन् सर्वसमन्वागतप्रज्ञान आत्माऽभिधीयते, तेनैवंविधेनात्मना । **अकरणीयम्** अकर्तव्यमिह-परलोकविरुद्धत्वाद् अकार्यमिति मत्वा **[8]नान्वेषयेत्** न तदुपादानाय यत्नं कुर्यादित्यर्थः । किं पुनस्तदकरणीयं [9]नान्वेषणीयम् ? इत्युच्यते--**पापं कर्म,** अधःपतनकारित्वात् पापम्, क्रियत इति कर्म । तच्चाष्टा[10]दशविधं प्राणातिपात-मृषावादा-ऽदत्तादान-मैथुन-परिग्रह-क्रोध-मान-माया-लोभ-प्रेम-द्वेष-कलहा-ऽभ्याख्यान-पैशून्य-परपरि[11]वाद-रत्यरति-माया-मृषा-मिथ्यादर्शनशल्याख्यमिति । एवमेतत् पाप[12]मष्टादशभेदं **नान्वेषयेत्** न कुर्यात् स्वयम्, न चान्यं कारयेत्, न कुर्वाणमन्यमनुमोदेत । एतदेवाह—

**तं परिन्नाय मेहावी**त्यादि । तत् पापमष्टा[13]दशप्रकारं [14]परि समन्ताद् ज्ञात्वा

---

१. ०जीवकाय० च । २. ०नील-वैडूर्य-वज्रा० ख । ३. ०दीनि यस्य क । ४. आत्मेत्युच्यते, अथवा शुभाशुभफले भागवद्वचन० च । ५. नारक० ख-ङप्रतिभ्यामृते । ६. ०तिर्यङ्-मनुष्या-ऽमर० ख च । ७. ०मोक्षस्वरूप० च । ८. नोऽन्वेषयेत् ख । ९. नान्वेषितव्यम् ख च । १०. ०दशभेदं ख च । ११. ०वाद-मायामृषा-रत्यरति-मिथ्या० च ङ ०वाद-रति-अरति-मिथ्या० (?) क । १२. ०मष्टादशविधं नान्वेषयेत् नो कुर्यात् स्वयम्, न कारयेदन्यम्, न कुर्वाणमप्यनुमोदेत ख । १३. ०दशधा परिः-सर्वतो ज्ञात्वा ख च । १४. परिः ग ।

मेधावी [1]मर्यादावर्ती नैव स्वयं षड्जीवनिकायशस्त्रं स्वकाय-परकायादिभेदं समारभेत, नैवान्यैः समारम्भयेत्, न चान्यान् समारभमाणान् समनुजानीयात्। एवं यस्यैते सुपरीक्ष्यकारिणः षड्[2]जीवनिकायशस्त्रसमारम्भास्तद्विषयाः [3]पापकर्मविशेषाः परिज्ञाता ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च स एव मुनिः, प्रत्याख्यात[4]कर्मत्वात् प्रत्याख्याताशेषपापागमत्वात्, तदन्यैवंविधपुरुषवदिति। **इति**शब्दः अध्ययनपरिसमाप्ति[5]प्रदर्शनाय । **ब्रवीमि** इति **सुधर्मस्वाम्याह** स्वमनीषिकाव्यावृत्तये, भगवतोऽप[6]नीतघनघातिकर्मचतुष्टयस्य समासादिताशेषपदार्थाविर्भावकदिव्यज्ञानस्य प्रणताशेषगीर्वाणाधिपतेश्चतुस्त्रिंशदतिशयसमन्वितस्य श्री**वर्धमानस्वामिन** उपदेशात् सर्वमेतदाख्यातं यदतिक्रान्तं मयेति।

उक्तः सूत्रानुगमो निक्षेपश्च ससूत्रस्पर्शनिर्युक्तिः। सम्प्रति नया नैगमादयः, ते चान्यत्र सुविचारिताः। सङ्क्षेपतस्तु [7]सर्वेऽप्येते [8]द्वेधा—ज्ञाननयाश्चरणनयाश्च। तत्र ज्ञाननया ज्ञानमेव प्रधानं मोक्षसाधनमित्यध्यवस्यन्ति, हिता-ऽहितप्राप्ति-परिहारकारित्वाद् ज्ञानस्य, तत्पूर्वकसकलदुःखप्रहाणाच्च ज्ञानमेव, न तु क्रिया। चरणनयास्तु चरणस्य प्राधान्यमभिदधति, अन्वय-व्यतिरेकसमधिगम्यत्वात् [9]सकलपदार्थानाम्, तथाहि—सत्यपि ज्ञाने सकलवस्तुग्राहिणि समुल्लसिते न चरणमन्तरेण भवधारणीयकर्मोच्छेदः, तदनुच्छेदाच्च मोक्षालाभः, तस्माद् न ज्ञानं प्रधानम्, चरणे पुनः [10]सति मूलोत्तरगुणाख्ये घातिकर्मोच्छेदः, तदुच्छेदात् केवलावबोधप्राप्तिः, ततश्च यथाख्यातचारित्रवह्निज्वालाकलापप्रतापितसकलकर्मकन्दोच्छेदः, तदुच्छेदाद् अव्याबाधसुख[11]लक्षणमोक्षावाप्तिरिति, तस्मात् चरणं [12]प्रधानमित्यध्यवस्यामः। [13]अत्रोच्यते—[14]उभयमप्येतन्मिथ्यादर्शनम्, यत उक्तम्—

---

१. **मर्यादावान्** ख च। २. **०जीवकाय०** क घ ङ। ३. **पापक्रियाविशेषाः** ख ग च। ४. **०कर्मकत्वात्** ग। ५. **प्रदर्शनार्थः** ख। ६. **०नीतघाति०** ग। ७. **सर्वेऽप्येते द्वेधा भवन्ति-ज्ञान०** ख च। ८. **द्वेधीभवन्ति-ज्ञान०** ग। ९. **सर्वपदा०** ख च। १०. **सति सर्वमूलोत्तर०** ग च। ११. **०लक्षणा मोक्षा०** ख ग। १२. **प्रधानमध्य०** ख। १३. **तत्रोच्यते** क ङ। १४. **उभयमेतन्मि०** ख।

**हयं नाणं कियाहीणं, हया अण्णाणओ किया ।**
**पासंतो पंगुलो दड्ढो, धावमाणो वि[1] अंधओ ॥ [ ]**

तदेवं सर्वेऽपि नयाः परस्परनिरपेक्षा मिथ्यारूपतया[2] न सम्यग्भावमनुभवन्ति, समुदितास्तु यथावस्थितार्थप्रतिपादनेन सम्यक्त्वं भवन्ति, यत उक्तम्—

**एवं सव्वे वि नया मिच्छादिट्ठी[3] सपक्खपडिबद्धा ।**
**अन्नोन्नमीसिया[4] उण[5] हवंति ते[6] चेव सम्मत्तं ॥ [ ]**

तस्माद् उभयं परस्परसापेक्षं मोक्षप्राप्तयेऽलम्, न प्रत्येकं ज्ञानं चरणं चेति। निर्दोषः खल्वेष पक्ष इति व्यवस्थितम् । तथा चोभयप्राधान्यदिदर्शयिषयाऽऽह—

**सव्वेसिं पि नयाणं बहुविधवत्तव्वयं निसामेत्ता ।**
**तं सव्वनयविसुद्धं जं चरण-गुणट्ठिओ[7] साहू ॥ [ ]**

चरणं च गुणश्च चरण-गुणौ, तयोः[8] स्थितश्चरण-गुणस्थितः । गुणशब्दोपादानाद् ज्ञानमेव परिगृह्यते, यतो न कदाचिदात्मनो गुणिनस्तेन ज्ञानाख्येन गुणेन वियोगोऽस्ति, ततोऽसौ सहभावी गुणः । अतो बहुविधवक्तव्यं नयमार्गमवधार्यापि सङ्क्षेपाद् ज्ञान-चरणयोरेव स्थातव्यमिति निश्चयो विदुषाम् । न चाभिलषितप्राप्तिः केवलेन चरणेन, ज्ञानहीनत्वात्, अन्धगतिक्रियाप्रति[9]विशिष्टप्रदेशप्राप्तिवत्, न च ज्ञानमात्रेणाभीष्टप्राप्तिः, क्रियाहीनत्वात्, चक्षुर्ज्ञानसमन्वितपङ्गु[10]पुरुष[11]सामिदग्धनगरमध्यव्यवस्थितयथावस्थितदर्शि[12]ज्ञानवत् । तस्मादुभयं प्रधानम्, नगरदाहनिर्गमे पङ्ग्वन्धसंयोगक्रिया-ज्ञानवत् ।

एवमिदमाचाराङ्गसन्दोहभूतं प्रथमाध्ययनं षड्जीव[13]निकायस्वरूपरक्षणा[14]-

---

१. **य** ख घ ङ, **उ** ग, **अ** च । २. **मिथ्यात्वरूप०** ख ग च । ३. **मिच्छदिट्ठी** ख च । ४. **मिस्सिया** ख, **०निरिसया** च । ५. **पुण** घ ङ । ६. **त च्चेव** च । ७. **०गुणे ट्ठिओ** क । ८. **तयोर्व्यवस्थितश्चर०** ख । ९. **अन्धगमिक्रिया०** घ ङ च, **अन्धगामिक्रिया** ग । १०. **०पुरुषअर्धदग्ध०** ख घ ङ च । ११. **०सामिऽर्धदग्ध०** क, अत्र टिप्पणीभूतः ऽर्ध इति पाठः कप्रतिलेखकेन भ्रान्त्या मूले लिखितः प्रतिभाति, "**सामि** इति अर्धम्" जै०वि०प०, "**सामि दग्धनगरम्** अर्धनगरं दग्धम्" स०वि०प० । १२. **०दर्शितज्ञान०** ग ङ । १३. **०जीवकाय०** ख । १४. **०रक्षणोपाय०** क-खप्रती विना ।

ऽपायगर्भमादि-मध्या-ऽवसानेषु दयैकरसमेकान्तहितापत्तिकारि मुमुक्षुणा यदाऽधीतं भवति सूत्रतः, शिक्षकेणा[1]र्थतश्चावधृतं भवति, श्रद्धान[2]-संवेगाभ्यां च यथावदा[3]त्मीकृतं भवति ततोऽस्य महाव्रतारोपणमुपस्थापनं[4] परीक्ष्य[5] निशीथाद्यभिहितक्रमेण सचित्तपृथिवीमध्यगमना[6]दिना श्रद्दधानस्य सर्वं यथाविधि कार्यम्।

कः पुनरुपस्थापने[7] विधिः ? इत्यत्रोच्यते—शोभनेषु तिथि-करण[8]-नक्षत्र-मुहूर्तेषु द्रव्य-क्षेत्र-भावेषु च भगवतां प्रतिकृतीरभिवन्द्य[9] प्रवर्धमानाभिः स्तुतिभिः, अथ पादपतितोत्थितः सूरिः सह शिष्येण[10] महाव्रतारोपण[11]प्रत्ययं कायोत्सर्गमुत्सार्यैकैकं महाव्रतमादित आरभ्य त्रिरुच्चारयेद्[12] यावद् निशिभक्तविरतिरविकला त्रिरुच्चरिता[13]। पश्चादिदं त्रिरुच्चरितव्यम्—इच्चेइयाइं[14] पंच महव्वयाइं राईभोयणविरमण[15]छट्ठाइं अत्तहियट्ठाए[16] उवसंपज्जित्ता णं विहरामि। पश्चाद्वन्दनकं दत्त्वोत्थितोऽभिधत्तेऽवनताङ्गयष्टिः 'संदिशत किं भणामि ?' इति। सूरिः प्रत्याह—वन्दित्वाऽभिधत्स्वेति। एवमुक्तो[17]ऽभिवन्द्योत्थितो भणति—युष्माभिर्मम महाव्रतान्यारोपितानि, इच्छाम्यनुशिष्टिमिति। आचार्योऽपि प्रणिगदति—निस्तारकपारगो[18] भवाचार्यगुणैर्वर्धस्व, वचनविरतिसमनन्तरं च सुरभिवास[19]चूर्णमुष्टिं[20] शिष्यशिरसि किरति। पश्चाद्वन्दनकं दत्त्वा प्रदक्षिणीकरोत्याचार्यं नमस्कारमावर्तयन्, पुनरपि वन्दते, तथैव च करोति सकलक्रियानुष्ठानम्, एवं त्रिः प्रदक्षिणीकृत्य विरमति[21] शिष्यः[23]। साध्वश्चास्य मूर्ध्नि युगपद्वासमुष्टी[22]र्विमुञ्चन्ति सुरभिपरिमलाः, यतिजनसुलभकेसराणि वा। पश्चात् कारितकायोत्सर्गः सूरि-

---

१. शिष्यकेणा० च। २. श्रद्धा-सं० ग। ३. ०दात्मीभूतं क। ४. ०स्थापनां च। ५. परीक्ष्य निरीक्ष्य निशी० ग। ६. ०मध्ये गमना० ख। ७. ०स्थापनविधिः क। ८. ०ण-नक्षत्रेषु मुहू० ग, ०ण-मुहूर्त-नक्षत्रेषु द्र० च। ९. ०वन्द्य वर्ध० क। १०. शिक्षकेण ख च। ११. ०व्रताधिरोपण० ख। १२. त्रिरुच्चार्य या० ख, त्रिरुच्चारयन् यावद् निशिभुक्तिविरति० ग। १३. त्रिरुच्चारिता ग। १४. इच्चेयाइं घ ङ च। १५. ०णवेरमण० कप्रतिमृते। १६. अत्तहियट्ठयाए क चपुस्तके विना। १७ एव[ मुक्तो ]व( वं )दित्वाऽभिवन्द्यो० ङ। १८. ०पारको क। १९. ०वासपूर्णमुष्टिं च। २०. ०मुष्टिं च शिष्यस्य शिरसि ग। २१. विरमति शेषाः साधव० च। २२. ०मुष्टिं विमुचन्ति सुरभिपरिमलाम्, ख ग च, ०मुष्टीर्मुञ्चन्ति घ ङ। २३. "केशराणि इति पद्मकेशराणि" जै०वि०प०. "केसराणि कुंकुमकेसरव्यतिरिक्तं हट्टे द्रव्यम्। समाप्तं प्रथमाध्ययनम्॥" स०वि०प०।

रभिदधाति—गणस्तव कोटिकः, स्थानीयं कुलम्, [1]वैरा शाखा, [2]अमुकाभिधान आचार्य उपाध्यायश्च, साध्व्याः प्रवर्तिनी तृतीयोद्देष्टव्या, यथाऽऽसन्नं चोपस्थाप्यमाना [3]रत्नाधिका भवन्ति । पश्चादाचाम्लं [4]निर्विकृतं वा स्वगच्छसन्तति-समायातमा[5]चरन्तीति ।

एवमेतदध्ययनमादि-मध्या-ऽन्तकल्याणकलापयोगि भव्य[6]जनमनः-समाधानाधायि प्रियविप्रयोगादिदुःखावर्त[7]बहुलकषाय[8]झषादिकुलाकुल-[9]विषमसंसृतिसरित्तारणसमर्थममलदयैकरसमसकृदभ्यसितव्यं मुमुक्षुणा ।

इति आचार्यश्री**शीलाङ्क**[10]विरचिता शस्त्रपरिज्ञाध्ययन[11]टीका [12]समाप्ता ।।छ।। ग्रन्थाग्रे[13]ण द्वाविंसतिशतान्येकविंशत्यधिकानि, अङ्कतोऽपि २२२१ ।।छ।।

● ● ●

१. वैराख्या शाखा कपुस्तकेन विना । २. अमुकाभिध आ० ख । ३. रत्नाधिकी-भवन्ति च । ४. निर्विकृतिकं ख ग । ५. ०चरतीति ङ च । ६. ०जनतामनः० ख ग च । ७. ०बहल० ख । ८. ०झषादिकुलवि० च । ९. ०विषयसं० क । १०. ०विरचितशस्त्र० क च ङ । ११. ०टीका परिसमाप्तेति ।।छ।। ग्रन्थाग्रम् २२२१ ।।छ।। ख । १२. समाप्तेति ।।छ।। श्री।। ग्रन्था० ङ समाप्तेति ।।छ।। ग्रन्थाग्रम् २३२१ ।। च । १३. ०ण पञ्चविंश-[ तिशतान्येकविंश ] त्यधिकानि, अङ्कतोऽपि २५२१ ।।छ।। ग ।

## द्वितीयमध्ययनं लोकविजयः ।

### [ प्रथम उद्देशकः ]

[१]जयति समस्तवस्तुपर्यायविचारापास्ततीर्थिकं,
विहितैकैकतीर्थ[२]नयवादसमूहवशात् प्रतिष्ठितम् ।
[३]बहुतिथभङ्गिसिद्धसिद्धान्तविधूनितमलमलीमसं,
तीर्थमनादिनिधनगतमनुपममादिनतं जिनेश्वरैः ॥१॥

नमः श्री**वर्द्धमानाय**, वर्धमानाय [४]पर्ययैः ।
उक्ताचारप्रपञ्चाय, निष्प्रपञ्चाय तायिने ॥२॥

**शस्त्रपरिज्ञा**विवरणमतिगहनमितीव किल [५]वृताः पूज्याः ।
श्री**गन्धहस्तिमिश्रा** विवृणोमि [६]ततोऽहमवशिष्टम् ॥३॥

उक्तं [७]प्रथममध्ययनम् । साम्प्रतं द्वितीयमारभ्यते । अस्य चायमभिसम्बन्धः—इह हि मिथ्यात्वोपशम-क्षय-क्षयोपशमान्यतरावाप्तसम्यग्दर्शन-ज्ञानकार्यस्याऽऽत्यन्तिकैकान्तानाबाधपरमानन्द[८]स्वतत्त्वसुखानावरणज्ञान-दर्शन-लक्षणलक्षितमोक्षकारणस्याऽऽश्रवनिरोधनिर्जरारूपस्य मूलोत्तरगुणभेदभिन्न[९]स्य चारित्रस्य [१०]अपराशेषव्रतवृतिकल्पनिष्पादितनिष्प्रत्यूहसकलप्राणिगणसङ्घट्टन-परितापनाऽपद्रावणनिवृत्तिरूपस्य संसिद्धये मरणाभावप्रसङ्गादभूत[११]गुणात्मधर्म-ज्ञानोपलब्धे**र्बार्हस्पत्यमत**निरासेन सामान्यतो जीवास्तित्वं प्रतिपाद्य विशेषतश्च **बौद्धा**दिमतनिरासेनैकेन्द्रियावनि-वना-ऽनल-पवन-वनस्पतिभेदांश्च जीवान् प्रकटय्य यथाक्रमं समानजातीयाश्मलताद्युद्भेददर्शनाद् अर्शोमांसाङ्कुरवत्, [१२]अविकृतभूमिखननोपलब्धेर्मण्डूकवत्, विशिष्टाहारोपचया-ऽपचयशरीराभिवृद्धि-

---

१. वृत्तमिदं ख-चआदर्शयोर्नास्ति । २. ०**नववाद**० क । ३. **बहुविधभङ्गि**० घ । ४. "**पर्या( र्य )यैः** इति ज्ञानादिकैः ॥छ॥ प्रथमम् ॥छ॥" जै०वि०प० । ५. "**वृताः** इति वृतवन्तः" जै०वि०प०. **वृतं पूज्यैः** । **श्रीगन्धहस्तिमिश्रैर्विवृणोमि** च । ६. "**ततः** इति गन्धहस्तिविवरणविशेषात्" जै०वि०प०. **ततोऽहमविशिष्टम्** क-खप्रती ऋते । ७. **प्रथमाध्ययनम्** ख च । ८. "**स्वतत्त्व** इति आत्मपरिज्ञाने" जै०वि०प० । ९. ०**स्य च चारि**० च । १०. "**अपर** इति मृषावादादि" जै०वि०प० । ११. ०**गुणात्मज्ञानो**० ख । १२. **अधिकृत**० घ ङ च ।

क्षयान्वयव्यतिरेकगतेरर्भकशरीरवत्, अपरप्रेरिताप्रतिहतानियततिरश्चीनगमनाद् गवाश्वादिवत्, सालक्तकनूपुरालङ्कारकामिनीचरणताडनविकाराधिगतेः कामुकवत्, इत्यादिभिः प्रयोगैः, तथोच्चैः शिर उद्घाट्य सूक्ष्म-बादर-द्वि-त्रि-चतुः-पञ्चेन्द्रियसंज्ञीतर-पर्याप्तका-ऽपर्याप्तकभेदांश्च प्रदर्श्य, शस्त्रं च स्वकाय-परकायभेदभिन्नं तद्वधे बन्धं विरतिं च प्रतिपाद्य, पुनरपि तदेव चारित्रं यथा सम्पूर्णभावमनुभवति तथाऽनेनाध्ययनेनोपदिश्यते, तथाहि—अधिगतशस्त्र-परिज्ञासूत्रार्थस्य तत्प्रतिपादितैकेन्द्रियपृथिवीकायादि श्रद्दधानस्य सम्यक् तद्रक्षापरिणामवतः सर्वोपाधिविशुद्धस्य[1] तद्योग्यतया[2]रोपितपञ्चमहाव्रतभारस्य साधोर्यथा रागादिकषायलोकस्य शब्दादिविषयलोकस्य वा विजयो भवति तथाऽनेनाध्ययनेन प्रतिपाद्यते । तथा च **निर्युक्तिकारे**णाध्ययनार्थाधिकारः **शस्त्रपरिज्ञा**यां प्राग् निरदेशि—"लोगो जह बज्झइ जह य तं[3] विजहियव्वं[4]" (गा० २३) इत्यनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि भवन्ति । तत्र सूत्रार्थकथनम् अनुयोगः, तस्य द्वाराणि उपायाः व्याख्याङ्गानीत्यर्थः, तानि चोपक्रमादीनि । तत्रोपक्रमो द्वेधा—शास्त्रानुगतः शास्त्रीयः, लोकानुगतो लौकिक इति । निक्षेपस्त्रेधा[5]—ओघ-नाम-सूत्रालापकनिष्पन्न[6]भेदात् । अनुगमो द्वेधा—सूत्रानुगमो[7] निर्युक्त्यनुगमश्च । नया नैगमादयः । तत्र शास्त्रीयोपक्रमान्त-र्गतोऽर्थाधिकारो द्वेधा—अध्ययनार्थाधिकार उद्देशार्था[8]धिकारश्च । तत्राध्ययनार्था-धिकारोऽध्ययनसम्बन्धे **शस्त्रपरिज्ञा**यां प्रागेव निरदेशि, उद्देशार्थाधिकारं तु स्वयमेव **निर्युक्तिकारः** प्रचिकटयिषुराह—

**सयणे[9] अदढत्तं बीयगम्मि[10] माणो य अत्थसारो य[12] ।**
**भोगेसु लोगणिस्साए[11] लोगे अममिज्जता चेव ॥१७३॥**

**सयणे** त्ति० गाहा । तत्र प्रथमोद्देशकार्थाधिकारः स्वजने माता-पित्रादिके अभिष्वङ्गोऽधिगतसूत्रार्थेन न कार्यः इत्यध्याहारः, तथा च सूत्रम्[13]—**माया मे**

१. ०धिशुद्धस्य ख च । २. तद्योगतया० क च । ३. तं पि जहियव्वं क ग । ४. ०व्वं तीत्यनेन ख च । ५. निक्षेपस्त्रिधा ग घ ङ च । ६. ०निष्पत्तिभे० ख । ७. ०गमः सूत्रस्पर्शिकनिर्युक्त्य० ख । ८. उद्देशकार्था० ग । ९. सयणे य अद० झ । १०. बिइयगम्मि ठ । ११. ०णिस्सा लोगे झ-अप्रतौ विना । १२. चेय क । १३. सूक्तम् ङ ।

**पिया** [1]**मेत्यादि** । **अदढत्तं बीयगम्मि** त्ति [2]द्वितीयोद्देशके अदृढत्वं संयमे न कार्यमिति [3]शेषः, विषय-[4]कषायादौ चादृढत्वं कार्यमिति, वक्ष्यति च—[5]**अरइमाउट्टे मेहावी** । [6]तृतीयोद्देशके **माणो य अत्थसारो य** त्ति जात्याद्युपेतेन साधुना कर्मवशाद् विचित्रतामवगम्य सर्वमदस्थानानां मानो न कार्यः, आह [7]च—**के गोआवादी के माणावादी**त्यादि, अर्थसारस्य च निस्सारता वर्ण्यते, तथा च **तिविहेण जा वि से मत्ता अप्पा वा बहुगा वे**त्यादि । चतुर्थे [8]तु **भोगेसु** त्ति भोगेष्वभिष्वङ्गो न कार्य इति शेषः, यतो भोगिनामपायान् वक्ष्यति, सूत्रं च—[9]**थीहिं लोए** [10]**पव्वहिए** । पञ्चमे तु **लोगणिस्साए** त्ति त्यक्तस्वजन-धन-मान-भोगेनापि साधुना संयम[11]देहप्रतिपालनाय स्वार्थारम्भप्रवृत्तलोकनिश्रया विहर्तव्यमिति शेषः, तथा च सूत्रम्—**समुट्ठिए अणगारे**[12] इच्चाइ जाव **परिव्वये** । षष्ठोद्देशके तु **लोए अममिज्जया चेव** लोकनिश्रयाऽपि विहरता साधुना तस्मिन् लोके पूर्वाऽपरसंस्तुतेऽसंस्तुते च न ममत्वं कार्यम्, पङ्कजवत् तदाधारस्वभावाऽनभिष्वङ्गिणा भाव्यमिति, तथा च सूत्रम्—**जे ममाइय**[13]**मइं** [14]**जहाइ से** [15]**जहाइ ममाइयं** गाथातात्पर्यार्थः ॥१७३॥

नामनिष्पन्ने [16]तु निक्षेपे लोकविजय इति द्विपदं नाम । [17]तत्र लोक-विजययोर्निक्षेपः कार्यः । सूत्रालापकनिष्पन्ने च निक्षेपे यानि निक्षेपार्हाणि सूत्रपदानि तेषां च निक्षेपः कार्यः । सूत्रपदोपन्यस्तमूलशब्दस्य च कषायाभि-धायकत्वात् [18]कषाया निक्षेप्तव्याः । तदेवं नाम[19]निष्पन्नं भविष्यत्सूत्रालापक-निष्पन्न[20]निक्षेपाक्षिप्तं सामर्थ्यायातं च यद् निक्षेप्तव्यं तद् **निर्युक्तिकारो** गाथया सम्पिण्ड्याचष्टे—

---

१. **मे इत्यादि** घ ङ च । २. **द्वितीय उद्दे०** ख च । ३. **०मिति सम्बन्धः, विषय०** क घ ङ **०मिति सम्बन्धः, शेषविषय०** ग च । ४. **०कषायादावदृढत्वं** क ग च । ५. **अरइं आउट्टे** ख च, **अरइमाउट्ट** ग घ ङ । ६. **तृतीय उद्दे०** च । ७. **च** इति क-खप्रत्योरेव । ८. **च** ग घ ङ । ९. **थीहिं** ग, **थीभि** च । १०. **पवहिए** क । ११. **०देहपरिपालनाय** घ ङ । १२. **०रे त्ति इच्चाइ** क ग घ ङ । १३. **०मइं से** क ध । १४. **जहाय** ग । १५. **जहाय** घ । १६. **च** क ग । १७. **ततो** ख । १८. **कषायाश्च निक्षे०** च । १९. **०निष्पन्न-भवि०** घ ङ । २०. **०निक्षेपोक्षिप्तं** ग, **०निक्षेपोपक्षिप्तं** च ।

**लोगस्स य विजयस्स य गुणस्स मूलस्स तह य ठाणस्स ।**
**निक्खेवो कायव्वो जम्मूलागं च संसारो ॥१७४॥**

**लोगस्स य०** गाहा कण्ठ्या, केवलं[1] **जम्मूलागं च संसारो**[2] इति यन्मूलकः संसारस्तस्य च निक्षेपः कार्यः । तच्च मूलं कषायाः, यतो नारक-तिर्यङ्-नरा-ऽमरगतिस्कन्धस्य गर्भनिषेक-कलला-ऽर्बुद[3]-मांसपेश्यादि-जन्म-जरा-मरणशाखस्य दारिद्र्याद्यनेक[4]व्यसनो[5]पनिपातपत्रगहनस्य प्रियविप्रयोगा-ऽप्रियसम्प्रयोगा-ऽर्थनाशा-ऽनेकव्याधिशतपुष्पोपचितस्य शारीर-मानसो-पचिततीव्रतरदुःखोपनिपातफलस्य संसारतरोः[6] मूलम्[7] आद्यं कारणं कषायाः, कषः संसारः तस्याऽऽयाः इति कृत्वा ॥१७४॥ तदेवं यान्यत्र नामनिष्पन्ने यानि च सूत्रालापकनिष्पन्ने निक्षेप्तव्यपदानि सम्भवन्ति तानि **निर्युक्तिकृत्**[8] सुहृद् भूत्वा विवेकेनाचष्टे—

**लोग[9] त्ति य विजउ[10] त्ति य अज्झयणे[11] लक्खणं तु निप्फण्णं ।**
**गुण मूल ट्ठाणं ति[12] य सुत्तालावेण[13] निप्फण्णं ॥१७५॥**

**लोगो त्ति य विजयो त्ति य०** गाहा कण्ठ्या ॥१७५॥ तत्र यथोद्देश-स्तथा निर्देशः इति न्यायाद् लोक-विजययोर्निक्षेपमाह—

**लोगस्स य[14] निक्खेवो अट्ठविहो छव्विहो य[15] विजयस्स ।**
**भावे कसायलोगो अहिगारो तस्स विजएणं ॥१७६॥**

**लोगस्स य०** गाहा । तत्र लोक्यत इति लोकः, लोकृ दर्शने [पा०धा० ७६] इत्येतस्य[16] धातोः '**अकर्तरि च कारके संज्ञायाम्**' [पा० ३-३-१९] इति घञ् । स च धर्मा-ऽधर्मास्तिकाय[17]व्यवच्छिन्नमशेषद्रव्याधारं वैशाखस्थानस्थ[18]कटिन्यस्तकर-

---

१. **नवरं** च । २. **संसार** खप्रतेर्विना । ३. "**अर्बुद** इति स्त्यानम्" जं०वि०प० । ४. **दारिद्राद्यनेक०** ग । ५. **०व्यसनोपात्तपत्र०** घ ङ । ६. **संसारमहातरोः** ख । ७. **मूलकम्** घ । ८. **निर्युक्तिकारः** ख च । ९. **लोगो** ख ज ठ । १०. **विजय** ठ । ११. **अज्झयणस्स** क । १२. **चिय** ख । १३. **सुत्तालावे य नि०** ख ज ठ । १४. **वि** जपुस्तकमृते । १५. **उ** ख । १६. **इत्यस्माद्धातोः** ख च, **इत्यस्य धातोः** ग । १७. **०व्यवस्थितमशेष०** ख । १८. **०कटिस्थकर०** क घ ङ ।

युग्मपुरुषोपलक्षितमाकाशखण्डं पञ्चास्तिकायात्मको वेति । तस्य निक्षेपोऽष्टधा नाम-स्थापना-द्रव्य-क्षेत्र-काल-भव-भाव-[1]पर्यवभेदात् । **छव्विहो य विजयस्स** त्ति विजयः अभिभवः पराभवः पराजय इति पर्यायाः, तस्य निक्षेपः षड्विधो वक्ष्यते । तत्राष्टप्रकारे लोके येनात्राधिकारस्तमाह–**भावे कसायलोगो** त्ति भावलो[2]केनात्राऽधिकारः । स च भावः षट्प्रकारः औदयिकादिः । तत्राप्यौदयिकभावकषायलोकेनाधिकारः, तन्मूलत्वात् संसारस्य । यद्येवं ततः किम् ? अत आह–**अहिगारो तस्स विजएणं** ति अधिकारः व्यापारः तस्य औदयिकभावकषायलोकस्य विजयेन पराजयेनेति गाथार्थः ॥१७६॥ तत्र लोकोऽष्टधा निक्षेपार्थं [3]प्रागुददेशि । विजयश्च षोढा, तन्निक्षेपार्थमाह–

**लोगो भणिओ, दव्वं खेत्तं कालो य भावविजओ य ।**
**भवलोग भावविजओ पगयं जह [4]बज्झई लोगो ॥१७७॥**

**लोगो भणिओ०** गाहा । तत्र लोकः **चतुर्विंशतिस्तवे** विस्तरतोऽभिहितः । 'ननु च केयं वाचोयुक्तिः 'लोक**श्चतुर्विंशतिस्तवे**ऽभिहितः' इति ? किमत्रानुपपन्नमुच्यते ? इह ह्यपूर्वकरण[5]प्रक्रियाधिरूढक्षपकश्रेणिध्यानाग्निदग्धघातिकर्मेन्धनेनोत्पन्ननिरावरणज्ञानेन विपच्यमानतीर्थकरनामाविर्भूतचतुस्त्रिंशदतिशयोपेतेन श्री**वर्धमानस्वामि**ना हेयोपादेयार्थाविर्भावनाय सदेव-मनुजायां परिषद्याचारार्थो बभाषे, गणधरैश्च महामतिभिरचिन्त्यशक्त्युपेतै**र्गौतमा**दिभिः प्रवचनार्थमशे[6]षासुभृदुपकाराय स एवाचाराङ्गतया दद्दभे, **आवश्यका**न्तर्भूत**श्चतुर्विंशतिस्तव**स्त्वारातीयकालभाविना **भद्रबाहुस्वामि**नाऽकारि, ततश्चायुक्तः पूर्वकालभावि**न्याचाराङ्गे** व्याख्यायमाने पश्चात्कालभाविना **चतुर्विंशतिस्तवेना**तिदेशः' इति कश्चित् सुकुमारमतिः [7]अत्राह । नैष दोषः, यतो **भद्रबाहु[8]स्वामि**नैवाऽयमतिदेशोऽभ्यधायि, स च **पूर्वमावश्यकनिर्युक्तिं** विधाय पश्चाद् **आचाराङ्गनिर्युक्तिं** चक्रे, तथा चोक्तम्–

---

१. **०पर्ययभेदात्** क, **०पर्यायभेदात्** ग घ ङ । २. **०नाधिकारः** ग ङ । ३. **प्रागुपादेशि** ख । ४. **बज्झए** ञ । ५. **०प्रक्रमाधिरूढ०** ख ग च । ६. **०षासुमदुप०** ख । ७. **तत्राह** क, **आह** ख । ८. **०स्वामिनाऽयमति०** च ।

**आवस्सयस्स [१]दसयालियस्स तह उत्तरज्झमायारे । त्ति [२]सूक्तम् ।**

विजयस्य तु निक्षेपं नाम-स्थापने क्षुण्णत्वाद् अनादृत्य द्रव्यादिकमाह— **दव्वं खेत्त**मित्यादिना—द्रव्यविजयो व्यतिरिक्तो द्रव्येण द्रव्याद् द्रव्ये वा विजयः कटु-तिक्त-कषायादिना श्लेष्मादेर्नृपतिमल्लादेर्वा । क्षेत्रविजयः षट्खण्डभरतादेः, यस्मिन् वा क्षेत्रे विजयः प्ररूप्यते । कालविजय इति कालेन विजयः, यथा— षष्टिभिर्वर्षसहस्रैर्भरते[३]न जितं भरतम्, कालस्य प्राधान्यात्, भृतककर्मणि वा मासोऽनेन जित इति, यस्मिन् वा काले विजयो व्याख्यायत इति । भावविजय औदयिकादेर्भावस्य भावान्तरेण औपशमिकादिना विजयः ।

तदेवं लोक-विजययोः स्वरूपमुपदर्श्य प्रकृतोपयोग्याह—**भवे**त्यादि, [४]अत्र हि भवलोकग्रहणेन भावलोक एवाभिहितः, छन्दोभङ्गभीत्या ह्रस्व एवोपादायि, तथा चावाचि—**भावे कसायलोगो अहिगारो तस्स विजएणं** [गा० १७६] ति, तस्य औदयिकभावकषायलोकस्य औपशमिकादिभावलोकेन [५]विजयो यत एतदत्र प्रकृतम्, इदमत्र हृदयम्—अष्टविधलोक-षड्विधविजययोः प्राग्व्यावर्णित-स्वरूपयोर्भावलोक-भावविजयाभ्यामत्रोपयोग इति, यथा चाष्टप्रकारेण कर्मणा लोकः प्राणिगणो बध्यते, बन्धस्योपलक्षणत्वाद् यथा च मुच्यत [६]इत्येत-दप्यत्राध्ययने प्रकृतमिति गाथार्थः ॥१७७॥ तेनैव भावलोकविजयेन किं फलम् ? इत्याह—

**विजिओ कसायलोगो सेयं खु तओ [७]नियत्तिउं होइ ।**
**कामणियत्तमई खलु संसारा [८]मुच्चई खिप्पं ॥१७८॥** सूत्रम्

**[९]विजिओ०** गाहा । विजितः पराजितः, कोऽसौ ? कषायलोकः औदयिकभावकषायलोक इति यावत् । विजितकषायलोकः सन् किमवाप्नोति ? इत्याह—**संसारान्मुच्यते क्षिप्रम्** । अतस्तस्माद् **निवर्तितुं श्रेयः**, खुः वाक्या-

---

१. दसकालियस्स ख ग । २. सूत्रम् च । ३. ०न भरतं जितम् ख । ४. अत्र भव० ख । ५. विजययोगत एतदत्र च । ६. इति तदप्य० क । ७. नियत्तिओ ख ज झ । ८. मुच्चाए ज । ९. विज( जि )ओ कसाएत्यादि । विजितः ख ।

लङ्कारे अवधारणे वा, निवर्तितुं श्रेय एव । किं कषायलोकादेव निवृत्तः संसारान्मुच्यते आहोश्विदन्यस्मादपि पापोपादानहेतोः ? इति दर्शयति—**कामे**त्यादि गाथार्धं सुगमम् ॥१७८॥ गतो नामनिष्पन्नो निक्षेपः । साम्प्रतं सूत्रालापकनिष्पन्ननिक्षेपावसरः, स च सूत्रे सति भवति । तत्रास्खलितादिगुणोपेतं सूत्रानुगमे सूत्रम्[1]उच्चारणीयम्, तच्चेदम्—

**[ सू०६३ ] जे गुणे से मूलट्ठाणे, जे मूलट्ठाणे से गुणे । इति से गुणट्ठी महता परितावेण वसे पमत्ते । तं जहा—माता मे, पिता मे, भाया मे, भगिणी मे, भज्जा मे, पुत्ता मे, धूता मे, सुण्हा मे, सहि-सयण-संगंथ-संथुता मे, विवित्तोवकरण-परियट्टण-भोयण-अच्छायणं मे ।**

**इच्चत्थं गढिए लोए वसे पमत्ते अहो य राओ य परितप्पमाणे कालाकालसमुट्ठायी संजोगट्ठी अट्ठालोभी आलुंपे सहसक्कारे विणिविट्ठचित्ते एत्थ सत्थे पुणो पुणो ।**

**जे गुणे से मूलट्ठाणे**[2]त्यादि सूत्रम् । अस्य च निक्षेपनिर्युक्त्यनुगमेन प्रतिपदं निक्षेपः क्रियते, तत्र गुणस्य पञ्चदशधा निक्षेपः—

**दव्वे खेत्ते काले फल पज्जव गणण करण अब्भासे ।**
**गुणअगुणे अगुणगुणे भव सीलगुणे य भावगुणे ॥१७९॥**

**दव्वे खेत्ते०** गाहा । नामगुणः स्थापनागुणः द्रव्यगुणः क्षेत्रगुणः कालगुणः फलगुणः पर्यवगुणो गणनागुणः करणगुणः अभ्यासगुणः गुणागुणः अगुणगुणः भवगुणः शीलगुणः भावगुणश्चेति गाथासमासार्थः ॥१७९॥ तदेवं सूत्रानुगमेन सूत्रे

---

१. ०मुच्चारयितव्यम् ग च । २. ०ट्ठाणे इत्यादि घ ङ ।

[१]समुच्चारिते निक्षेपनिर्युक्त्यनुगमेन तदवयवे निक्षिप्ते सति उपोद्घात-निर्युक्तेरवसरः, सा च **उद्देसे**त्यादिना द्वारगाथाद्वयेनानुगन्तव्या । साम्प्रतं सूत्र[२]स्पर्श-निर्युक्तेरवसरः, तत्रापि सुगमनाम-स्थापनाव्युदासेन द्रव्यादिकमाह—

**दव्वगुणो [३]दव्वं चिय गुणाण जं तम्मि संभवो होइ ।**
**सच्चित्ते अच्चित्ते मीसम्मि य होइ दव्वम्मि ॥१८०॥**

**दव्वगुणो०** गाहा । तत्र द्रव्यगुणो नाम द्रव्यमेव । किमिति ? गुणानां यतो गुणिनि तादात्म्येन सम्भवात् । ननु च द्रव्य-गुणयोर्लक्षण-विधानभेदाद् भेदः, [४]तथा च द्रव्यलक्षणम्- गुण-पर्यायवद् द्रव्यम्, विधानमपि धर्मा-ऽधर्मा-ऽऽकाश-जीव-पुद्गलादिकमिति । गुणलक्षणम्- द्रव्याश्रयिणः सहवर्तिनो निर्गुणा गुणा इति, विधानमपि ज्ञानेच्छा-द्वेष-रूप-रस-गन्ध-स्पर्शादयः स्वगतभेदभिन्ना इति । नैष दोषः, यतो द्रव्ये सचित्ता-ऽचित्त-मिश्रभेदभिन्ने स गुणस्तादात्म्येन स्थितः । तत्राचित्तद्रव्यं द्विधा—अरूपि रूपि च । [५]अरूपिद्रव्यं त्रिधा—धर्मा-ऽधर्मा-ऽऽकाशभेदभिन्नम्, तच्च गति-स्थित्यवगाहदानलक्षणम्, गुणोऽप्यस्यामूर्तत्वाऽगुरुलघुपर्यायलक्षणः, तत्रामूर्तत्वं त्रयस्यापि [६]स्वं रूपम्, न भेदेन व्यवस्थितम्, अगुरुलघुपर्यायोऽपि तत्पर्यायत्वादेव मृदो मृत्पिण्ड-स्थास-कोश-कुशूल-पर्यायवत् । रूपिद्रव्यमपि स्कन्ध-तद्देश-प्रदेश-परमाणुभेदम्, तस्य च रूपादयो गुणा अभेदेन व्यवस्थिता भेदेनानुपलब्धेः, संयोग-[७]विभागाभावात् स्वात्मवत् ।

तथा सचित्तमप्युपयोगलक्षणलक्षितं जीवद्रव्यम्, न च तस्माद्भिन्ना ज्ञानादयो गुणाः, [८]तद्भेदे जीवस्याचेतनत्वप्रसङ्गात् । तत्सम्बन्धाद्भविष्यतीति [९]चेत्, अनुपासितगुरोरिदं वचः, यतः—

**न हि स्वतोऽसती शक्तिः कर्तुमन्येन [१०]पार्यते ।** [ मी०श्लो०वा०४७ ]

---

१. **समुच्चरिते** च । २. **०स्पर्शिकानिर्यु०** च । ३. **दव्व च्चिय** छ । ४. **तथाहि** ख ग च । ५. **तत्रारूपिद्रव्यं** च । ६. **स्वरूपम्** घ-ङप्रती विना । ७. **०वियोगाभावात्** ख । ८. **ततो भेदे** घ ङ , **तद्भेदेन जी०** च । ९. **चे[ दे ]तद् अनु०** क । १०. "स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम् । न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते ।" इति संपूर्णः श्लोकः ।

न ह्यन्धः प्रदीपशतसम्बन्धेऽपि रूपावलोकनायालमिति ।

अनयैव दिशा मिश्रद्रव्येऽप्येकत्वसंयोजना स्वबुद्ध्या कार्येति गाथार्थः ॥१८०॥

तदेवं द्रव्य-गुणयोरेकान्तेनैकत्वे प्रतिपादिते सत्याह शिष्यः—तत् किमिदानीमभेदोऽस्तु ? नैतदप्यस्ति, यतः सर्वथाऽभेदेऽभ्युपगम्यमाने सत्येकेनैवेन्द्रियेण गुणान्तरस्याप्युपलब्धेरपरेन्द्रियवैफल्यं स्यात्, तथाहि—चूतफलरूपादौ चक्षुराद्युपलभ्यमाने रूपाद्यात्मभूतावयविद्रव्याव्यतिरिक्तरसादेरप्युपलब्धिः स्याद् रूपादिस्वरूपवद्, एवं ह्यभेदः स्याद् यदि रूपादौ समुपलभ्यमानेऽन्येऽपि समुपलभ्येरन्, अन्यथा विरुद्धधर्माध्यासाद् भिद्येरन् घट-पटवदिति । तदेवं भेदाऽभेदो[1]पपत्तिव्याकुलितमतिः शिष्यः पृच्छति—उभयथाऽपि [2]दोषोपपत्तिदर्शनात् कथं गृह्णीमः ? आचार्य आह—अत एव भेदाभेदोऽस्तु, तत्राभेदपक्षे द्रव्यं गुणो भेदपक्षे तु भावो गुण इति, तथाहि—गुण-गुणिनोः पर्याय-पर्यायिणोः सामान्य-विशेषयोरवयवा-ऽवयविनोर्भेदा-ऽभेदव्यवस्थानेनै[3]वात्मभावसद्भावात्, [4]आह हि—

दव्वं पज्जवविजुयं दव्वविउत्ता य पज्जवा नत्थि ।
[5]उप्पाय-ट्ठिइ-[6]भंगा हंदि दवियलक्खणं एयं ॥ [ ]

नयास्तव [7]स्यात्पदसत्त्वलाञ्छिता, रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतफला यतस्ततो, भवन्तमार्याः प्रणता हितैषिणः ॥

[ बृहत्स्वयम्भूस्तोत्रे ]

इत्यादि । स्वयूथ्यैरत्र बहु विजृम्भितमित्यलं विस्तरेण । [8]एनमेव **निर्युक्तिकारः** समस्तद्रव्यप्रधाने जीवद्रव्ये गुणमभेदेन व्यवस्थितमाह—

**संकुचिय-वियसियत्तं एसो जीवस्स होइ जीवगुणो ।**
**पूरेइ हंदि लोगं बहुप्पएसत्तणगुणेणं ॥१८१॥**

---

१. ०दोपपत्तिभिर्व्याकु० ख ग च । २. दोषापत्तिदर्शनात् च । ३. ०वात्मसद्भावात् ख । ४. आह हि इति गआदर्शे नास्ति । ५. उप्पायठिईभंगा ख ग । ६. ०भंगा इई हंदि( ?) ग । ७. स्यात्पदलाञ्छना इमे, रसो० ख, स्यात्पदलाञ्छिता इमे ग घ ङ च. ''द्वितीयाध्ययने ३०१-स्यात्पदरूपं यत् सत्यं(त्त्वं?) तेन लाञ्छिताः'' स०वि०प० । ८. एवमेव घ ङ ।

**संकुचिय०** गाहा । जीवो हि स[1]योगिवीर्यसद्द्रव्यतया प्रदेशसंहार-विसर्गाभ्यामाधारवशात् प्रदीपवत् सङ्कुचति विकसति च । एष जीवस्यात्मभूतो गुणः, भेदं विनाऽपि षष्ठ्युपलब्धेः, तद्यथा—राहोः शिरः, शिलापुत्रकस्य शरीरमिति । तद्भव एव वा सप्तसमुद्घातवशात् सङ्कुचति विकसति च । **सम्यक्** समन्ततः **उत्** प्राबल्येन हननम् इतश्चेतश्चात्मप्रदेशानां प्रक्षेपणं समुद्घातः । स च कषाय-वेदना-मारणान्तिक-वैक्रिय-तैजसा-ऽऽहारक-केवलिसमुद्घातभेदात् सप्तधा । तत्र कषायसमुद्घातोऽनन्तानुबन्धिक्रोधाद्युपहतचेतस आत्मप्रदेशाना-मितश्चेतश्च प्रक्षेप इति । एवं तीव्रतरवेदनोपहतस्यापि वेदनासमुद्घातः । मारणान्तिकसमुद्घातो हि मुमूर्षोरसुमत आदित्सि[3]तोत्पत्तिप्रदेशे आ लोकान्ता-दात्मप्रदेशानां भूयो भूयः प्रक्षेप-संहाराविति । वैक्रियसमुद्घातो वैक्रियलब्धिमतो वैक्रियोत्पादनाय बहिरात्मप्रदेशप्रक्षेपः । तैजससमुद्घातस्तैजसशरीर[4]निमित्त-तेजोलेश्यालब्धिमतस्तेजोलेश्याप्रक्षेपावसरे इति । आहारकसमुद्घातश्चतुर्दश-पूर्वविद आहारकलब्धिमतः क्वचित् सन्देहापग[5]मनाय तीर्थकरान्तिकगमनार्थ-माहारक[6]शरीरमुपादातुं बहिरात्मप्रदेशप्रक्षेपः । केवलिसमुद्घातं तु समस्तलोक-व्यापितयाऽन्तर्नीतान्यसमुद्घातं **निर्युक्तिकारः** स्वत एवाचष्टे—पूरयति व्याप्नोति, **हन्दि** इत्युपप्रदर्शने, किम् ? लोकं चतुर्दशरज्ज्वात्मकमाकाशखण्डम्, कुतः ? बहुप्रदेशगुणत्वात्, तथाहि—उत्पन्नदिव्यज्ञान आयुषोऽल्पत्वमवधार्य वेदनीयस्य च [7]प्राचुर्यं दण्डादिक्रमेण लोकप्रमाणत्वादात्मप्रदेशानां लोकमापूर[8]यति, तदुक्तम्—दंड कवाडे [9]मंथंतरए [ ] त्ति गाथार्थः ॥१८१॥ गतो द्रव्यगुणः । क्षेत्रादिकमाह—

**देवकुरु सुसमसुसमा सिद्धी णिब्भय [10]दुगादिया चेव ।**
**कल [11]भोयणुज्ज( ज्जु ) वंके जीवमजीवे य भावम्मि ॥१८२॥**

---

१. "**सयोगिवीर्य०** इति सयोगीनि सचेष्टानि वीर्येण कृत्वा(ता)नि सन्ति विद्यमानानि द्रव्याणि मनो-वाक्-कायपरिणतपुद्गलस्कन्धलक्षणानि यस्य तथा, तद्भावः तत्ता, तया ।" जै०वि०प० । २. **०पि लब्ध्युपलब्धेः** ख । ३. **०तोत्पत्तिप्रदेशेन आ०** ग । ४. **०निमित्तं तेजो०** क-खपुस्तके विना । ५. **०गमाय** ग । ६. **०शरीरं समुपादातुं** ङ । ७. **प्राचुर्याद् दण्डादि०** ग च । ८. **०ति व्याप्नोति तदु०** ग । ९. **मंथंतरय त्ति** क च, **मंथंतरे य त्ति** ग घ ङ । १०. **दुगातिया** छ । ११. **भोउणज्ज** ख, **भोअणऽज्ज** छ ठ ।

**देवकुरु०** गाहा । क्षेत्रगुणे देवकुर्वादि । कालगुणे सुषमसुषमादिः । फलगुणे सिद्धिः । पर्यवगुणे [1]निर्भजना । गणनागुणे द्विकादि । करणगुणे कलाकौशल्यम् । अभ्यासगुणे भोजनादि । गुणागुणे ऋजुता । अगुणगुणे वक्रता । [2]भवगुण-शीलगुणयोर्भावगुणार्थमुपात्तेन जीवग्रहणेन गतार्थत्वाद् गाथायां पृथगनुपादानम् । भवगुणो जीवस्य नारकादिर्भवः । शीलगुणो जीव एव क्षान्त्याद्युपेतः । भावगुणो जीवा-ऽजीवयोरिति । एवं [3]संयोज्यैकैकं [4]व्याख्यायते—

तत्र देवकुरूत्तरकुरु-हरिवर्ष-रम्यक-हैमवत-[5]हैरण्यवत-षट्पञ्चाश-दन्तर[6]द्वीपका-ऽकर्मभूमीनामयं गुणः, यदुत तत्रत्यमनुजा देवकुमारोपमाः सदा-ऽवस्थितयौवना निरुपक्रमायुषो मनोज्ञशब्दादिविषयोपभोगिनः स्वभावमार्दवा-ऽऽर्जव-प्रकृतिभद्रकगुणासन्नदेवलोकगतयश्च भवन्ति ।

कालगुणोऽपि भरतैरावतयोस्तिसृष्वप्येकान्तसुषमादिषु समासु स एव सदाऽवस्थितयौवनादिरिति ।

फलमेव गुणः फलगुणः । फलं च क्रियाया भवति, तस्याश्च क्रियायाः सम्यग्दर्शन-ज्ञान-चारित्ररहिताया ऐहिका-ऽऽमुष्मिकार्थं प्रवृत्ताया अनात्यन्तिको-ऽनैकान्तिको भवन् फलगुणो[7]ऽप्यगुण एव भवति, सम्यग्दर्शन-ज्ञान-चारित्रक्रियायास्त्वैकान्तिका-ऽऽत्यन्तिका-ऽनाबाधसुखाख्यसिद्धिफल-गुणोऽवाप्यते, [8]एतदुक्तं भवति—सम्यग्दर्शनादिकैव क्रिया सिद्धिफलगुणेन फलवती, अपरा तु सांसारिक[9]सुखफलाभास एव फलाध्यारोपाद् निष्फले-त्यर्थः ।

[10]पर्यायगुणो नाम द्रव्यस्यावस्थाविशेषः पर्यायः, स एव गुणः पर्यायगुणः, गुण-पर्याययोर्नयवादान्तरेणाभेदाभ्युपगमात् । स च निर्भजनारूपः, निश्चिता भजना निर्भजना, निश्चितो भाग इत्यर्थः, तथाहि—स्कन्धद्रव्यं देश-प्रदेशेन भिद्यमानं

---

१. "**निर्भजनां( ना )** निरंशोऽंशः सत्कर्म" जै०वि०प० । २. **भव-शील०** ख । ३. **संयोज्यैकैको** च । ४. **व्याख्यायन्ते** क । ५. **०ऐरण्यवत०** ख च । ६. **०द्वीपा-ऽकर्म०** ख । ७. **०प्यगुणो भवति** क घ ङ । ८. **एतदुक्तं भवति** इति पाठः कआदर्शे नास्ति । ९. **०सुखाभास** ख । १०. **पर्यवगुणो** क ।

परमाण्वन्तं भेदं ददाति, परमाणुरप्येकगुणकृष्णाद्विगुणकृष्णादिनाऽनन्तशोऽपि भिद्यमानो भेददायीति ।

गणनागुणो नाम [1]द्विकादिकः, तेन च सुमहतोऽपि राशेर्गणनागुणेनेयत्ताऽव[2]धार्यते ।

करणगुणो नाम कलाकौशलम्, तथाहि—उदकादौ करणपाटवार्थं [3]गात्रोत्क्षेपादिकां क्रियां [4]कुर्वन्तीति ।

अभ्यासगुणो नाम भोजनादिविषयः, तद्यथा—तदहर्जातबालकोऽपि [5]भवान्तराभ्यासात् स्तनादिकं मुख एव प्रक्षिपति उपरतरुदितश्च भवति, यदि [6]वाऽभ्यासवशात् सन्तमसेऽपि कवलादेर्मुखविवरप्रक्षेपाद् [7]व्याकुलितचेतसोऽपि च तुददृगात्रकण्डूयनमिति ।

गुणागुणो [8]नाम गुण एव कस्यचिदगुणत्वेन विपरिणमते, यथा—आर्जवोपेतस्य ऋजुत्वाख्यो गुणो मायाविनः प्रत्यगुणो भवति, उक्तं च—

**शाठ्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवम्,**
**शूरे [9]निर्घृणताऽऽर्जवे विमतिता दैन्यं प्रियाभाषिणि ।**
**तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे,**
**तत् को नाम गुणो भवेत् स विदुषां यो दुर्जनैर्नाङ्कितः ॥** [ नीतिशतक-५४ ]

अगुणगुणो नाम अगुण [10]एव कस्यचिद् गुणत्वेन विपरिणमते । स च वक्रविषयः, [11]यथा—गौर्गलिरसञ्जात[12]किणस्कन्धो गोगणस्य मध्ये सुखेनैवास्ते, तथा च—

**गुणानामेव [13]दौरात्म्याद् धुरि धुर्यो नियुज्यते ।**
**असञ्जातकिणस्कन्धः सुखं जीवति गौर्गलिः ॥** [ ]

---

१. द्विकादिरूपः, तेन ख ग च । २. ०धार्यत इति ख । ३. गात्रोपक्षेपादिकां ग च । ४. कुर्वन्ति ख ग च । ५. भवाभ्यासात् ख, भवान्तराभ्यासतः घ ङ । ६. वाऽभ्यासात् ख । ७. व्याकुलीकृतचेतसोऽपि ख । ८. नाम तत्र गुण क ग च । ९. निर्घृणता ऋजौ विम० ग च । १०. एव च कस्यचिद् घ ङ । ११. यथा इति कप्रतौ न वर्तते । १२. किणो गोगणस्य ख । १३. दौर्जन्याद् ख ग च ।

भवगुणो नाम भवन्ति उत्पद्यन्ते तेषु तेषु स्थानेष्विति नारकादिर्भवः, तत्र तस्य वा गुणो भवगुणः । स च जीवविषयः, तद्यथा—नारकास्तीव्रतरवेदना-सहिष्णवस्तिलशश्छिन्नसन्धानिनोऽवधिमन्तश्च भवगुणादेव भवन्ति, तिर्यञ्चश्च सदसद्विवेकविकला अपि सन्तो गगनगमनलब्धिमन्तः, गवादीनां च[1] तृणादि-कमप्यशनं शुभानुभावेनापद्यते[2], मनुजानां चाशेषकर्मक्षयः, देवानां च सर्व-[3]शुभानुभावो भवगुणादेवेति ।

शीलगुणो नाम परैराक्रुश्यमानोऽपि[4] शीलगुणादेव न क्रोधवशो[5] भवति, अथवा शब्दादिके शोभनेऽशोभने वा स्वभावादेव विदितवेद्यवन्माध्य-स्थ्यमवलम्बते ।

भावगुणो नाम भावाः औदयिकादयः तेषां गुणो[6] भावगुणः । स च जीवा-ऽजीवविषयः । तत्र जीवविषय औदयिकादिः षोढा । तत्रौदयिकः प्रशस्तोऽप्रशस्तश्च, तीर्थकरा-ऽऽहारकशरीरादिः प्रशस्तः, अप्रशस्तस्तु शब्दादि-विषयोपभोग-हास्य-रत्यरतीत्यादिः । औपशमिक उपशमश्रेण्यन्तर्गता-युष्कक्षयानुत्तरविमानप्राप्तिलक्षणः तथा सत्कर्मानुदयलक्षणश्चेति । क्षायिक-भावगुणश्चतुर्धा, तद्यथा—क्षीणसप्तकस्य पुनर्मिथ्यात्वाऽगमनम् १ क्षीणमोहनीय-स्यावश्यम्भाविशेषघातिकर्मक्षयः २, क्षीणघातिकर्मणोऽनावरणज्ञान-दर्शनाविर्भावः ३, अपगताशेषकर्मणोऽपुनर्भवस्तथाऽऽत्यन्तिकैकान्तिकानाबाधपरमानन्दलक्षण-सुखावाप्तिश्चेति ४। क्षायोपशमिकः क्षायोपशमिकदर्शनाद्यवाप्तिरिति । पारिणामिको भव्यत्वादिरिति[7] । सान्निपातिकस्त्वौदयिकादिपञ्चभावसमकाल-निष्पादितः, तद्यथा—मनुष्यगत्युदयाद् औदयिकः, सम्पूर्णपञ्चेन्द्रियत्वावाप्तेः क्षायोपशमिकः, दर्शनसप्तकक्षयात् क्षायिकः, चारित्रमोहनीयोपशमाद् औप-शमिकः, भव्यत्वात् पारिणामिक इति ।

उक्तो जीव[भाव]गुणः । साम्प्रतम[8]जीवभावगुणः, स चौदयिक-

---

१. **च** इति कपुस्तके नास्ति । २. **शुक्लभावे०** घ । ३. **सर्वे शुभानुभावा** घ ङ । ४. **परैराक्रम्यमानोऽपि** क । ५. **क्रोधवशगो** ख घ ङ । ६. **गुणो नाम भाव०** ग च । ७. **भव्यत्वादिः । सान्नि०** ख । ८. **०मजीवगुणः** क ।

पारिणामिकयोरेव सम्भवति, नान्येषाम् । तत्रौदयिकस्तावद् उदये भव औदयिकः, स चाजीवाश्रयोऽनया विवक्षया, यदुत काश्चित् प्रकृतयः पुद्गलविपाकिन्य एव [1]भवन्ति, काः पुनस्ताः ? उच्यन्ते—औदारिकादीनि शरीराणि पञ्च, षट् संस्थानानि, त्रीण्यङ्गोपाङ्गानि, षट् संहननानि, वर्णपञ्चकम्, गन्धद्वयम्, पञ्च रसाः, अष्टौ स्पर्शाः, अगुरुलघुनाम उपघातनाम पराघातनाम उद्योतनाम आतपनाम निर्माणनाम प्रत्येकनाम साधारणनाम स्थिरनाम अस्थिरनाम शुभनाम अशुभनाम[2], एताः सर्वा अपि पुद्गलविपाकिन्यः सत्यपि जीवसम्बन्धित्वे पुद्गलविपाकित्वादासामिति । [3]पारिणामिकोऽजीवगुणस्तु द्वेधा—अनादिपारिणामिकः सादिपारिणामिकश्चेति । तत्रानादिपारिणामिको धर्मा-ऽधर्मा-ऽऽकाशानां गतिस्थित्यवगाहलक्षणः, सादिपारिणामिकस्त्वभ्रेन्द्रधनुरादीनां परमाणूनां च वर्णादिगुणान्तरापत्तिरिति गाथातात्पर्यार्थः ॥१८२॥ उक्तो गुणः । मूलनिक्षेपार्थमाह[4]—

**मूले छक्कं [5]दव्वे ओदइ-उवएस-आइमूलं च ।**
**खेत्ते काले मूलं भावे मूलं भवे तिविहं ॥१८३॥**

**मूले छक्कं०** गाहा । मूलस्य षोढा निक्षेपः—नाम-स्थापना-द्रव्य-क्षेत्र-काल-भावभेदात् । नाम-स्थापने [6]क्षुण्णे । द्रव्यमूलं ज्ञशरीर-भव्यशरीरव्यतिरिक्तं त्रिधा—औदयिकमूलमुपदेशमूलमादिमूलं चेति । [7]तत्रौदयिकद्रव्यमूलं वृक्षादीनां मूलत्वेन परिणतानि यानि द्रव्याणि । उपदेशमूलं [8]यत् चिकित्सको [9]रोगप्रतिघातसमर्थं मूलमुपदिशत्यातुरायेति, तच्च [10]पिप्पलीमूलादिकम् । आदिमूलं नाम यद् वृक्षादिमूलोत्पत्तावाद्यं कारणम्, [11]तद् यत् स्थावरनामगोत्रप्रकृतिप्रत्ययाद् मूलनिर्वर्तनो[12]त्तरप्रकृतिप्रत्ययाच्च मूलमुत्पद्यते, एतदुक्तं भवति—तेषामौदारिकशरीरत्वेन मूलनिर्वर्तकानां पुद्गलानामुदयिष्यतां [13]कार्मणं शरीरमाद्यं कारणम् । क्षेत्रमूलं यस्मिन् क्षेत्रे मूलमुत्पद्यते व्याख्यायते वा । एवं कालमूलमपि, यावन्तं

---

१. **सम्भवन्ति** ख । २. **०नाम च, एताः** घ ङ । ३. **पारिणामिकाऽजीव०** ख घ ङ । ४. **०निक्षेपमाह** ख । ५. **दव्वे उदए उव०** ख ठ, **दव्वे उदइय उव०** ञ । ६. **गतार्थे** ख ग च । ७. **तच्चौदयिक०** क । ८. **यत्** इति कप्रतौ नास्ति । ९. **०प्रतिरोत(ध)समर्थं** क । १०. **पिप्पली०** ङ च । ११. **यद् यत्** ख । १२. **०त्तरोत्तरप्रकृति०** कप्रतेर्विना । १३. **कार्मणशरीर०** ख ।

वा कालं मूलमास्ते । भावमूलं तु[1] त्रिधेति गाथार्थः ॥१८३॥ तदाह[2]–

**उदइय[3] उवदिट्ठाई[4] आईयं[5] मूलजीव ओदइयं ।**
**आयरिओ उवइट्ठा विणय-कसायादओ[6] आदी ॥१८४॥** दारं ॥

**ओदइय०**[7] गाहा । भावमूलं त्रिविधम्–औदयिकभावमूलम् उपदेष्टृमूलम् आदिमूलं चेति । तत्रौदयिकभावमूलं वनस्पतिकायमूलत्वमनुभवन् नामगोत्रकर्मोदयाद् मूलजीव एव । उपदेष्टृभावमूलं त्वाचार्य उपदेष्टा, यैः कर्मभिः प्राणिनो मूलत्वेनोत्पद्यन्ते तेषामिति[8] । मोक्ष-संसारयोर्वा यदादिभावमूलं तस्य चोपदेष्टेति । एतदेव दर्शयति–**विणय-कसायाइओ[9] आई,** तत्र मोक्षस्यादिमूलं ज्ञान-दर्शन-चारित्र-तप-औपचारिकरूपः पञ्चधा विनयः, तन्मूलत्वाद् मोक्षावाप्तेः, तथा चाह–

**विणया नाणं नाणाउ दंसणं दंसणाहि[10] चरणं च[11] ।**
**चरणाहिंतो मोक्खो[12] मोक्खे[13] सोक्खं अणाबाहं ॥**

**विनयफलं शुश्रूषा[14] गुरुशुश्रूषाफलं श्रुतज्ञानम् ।**
**ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ॥**

**संवरफलं तपोबलमथ तपसो निर्जरा फलं दृष्टम् ।**
**तस्मात् क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ॥**

**योगनिरोधाद् भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः ।**
**तस्मात् कल्याणानां सर्वेषां भाजनं विनयः ॥** [प्रशम० गा० ७२-७३-७४]

इत्यादि । संसारस्य त्वादिमूलं विषय-कषाया इति ॥१८४॥ मूलमुक्तम् । इदानीं स्थानस्य पञ्चदशधा निक्षेपमाह–

---

१. तु इति खपुस्तके न वर्तते । २. **तथा हि** ग च । ३. **ओदइओ उवइट्ठा आतियं मूल०** क, **ओदइओ उवएसे आइ तियं मूल०** छ, **ओदइओ उवदिट्ठो आइ तियं मूलजीवि ओदइगं** ञ । ४. **०ट्ठा आइ तियं मूल०** झ । ५. **आईयं जीव मूलओ उदयं** ख, "तत्थ उदइअभावमूलं जेवो मूलणाम-गोयवेयगो घेप्पइ ।" चूर्णौ । ६. **०कसायादिओ** झ । ७. **ओदयिय०** कआदर्शं विना । ८. **तेषामपि** ग च । ९. **०कसायातिओ** क ख च । १०. **दंसणादि** क । ११. **ति** ख ग च, **तु** घ ङ । १२. **मुक्खो** घ ङ । १३. **मुक्खो सुक्खं** कप्रतौ ऋते । १४. **०षा शुश्रूषायाः फलं** ग च ।

**नामं ठवणा दविए खेत्तऽद्धा उड्ढ उवरई वसही ।**
**संजम पग्गह जोहे[१] अचल गणण[२] संधणा भावे ॥१८५॥**

**नामं ठवणा०** गाहा । तत्र द्रव्यस्थानं ज्ञशरीर-भव्यशरीरव्यतिरिक्तं द्रव्याणां सचित्ता-ऽचित्त-मिश्राणां स्थानम् आश्रयः ।

क्षेत्रस्थानं **भरतादि**, ऊर्द्ध्वा[३]-ऽधः-तिर्यग्लोकादि वेति[४], यत्र वा क्षेत्रे स्थानं व्याख्यायत इति[५] ।

अद्धा कालः, तत्स्थानं द्विधा—कायस्थिति-भवस्थितिभेदात् । तत्र कायस्थितिः पृथिव्यप्-तेजो-वायूनामसङ्ख्येया उत्सर्पिण्यवसर्पिण्यः, वनस्पतेस्तु ता एवानन्ताः, विकलेन्द्रियाणां[६] सङ्ख्येया वर्षसहस्राः, पञ्चेन्द्रिय-तिर्यङ्-मनुजानां सप्ताऽष्टौ वा भवाः । भवस्थितिस्तु वायूदक-वनस्पति-पृथिवीनां त्रि-सप्त-दश-द्वाविंशतिवर्षसहस्रात्मिका, तेजसस्त्रीण्यहोरात्राणि, द्वीन्द्रियाणां शङ्खादीनां द्वादश वर्षाणि, त्रीन्द्रियाणां पिपीलिकादीनामेकोन-पञ्चाशदहोरात्राणि, चतुरिन्द्रियाणां भ्रमरादीनां षण्मासाः, पञ्चेन्द्रियतिर्यङ्-मनुष्याणां त्रीणि पल्योपमानि, देवानां नारकाणां[७] च कायस्थितेरभावाद् भवस्थितिः त्रयस्त्रिंशत्सागरोपमाणीति । इयमुत्कृष्टा द्विरूपाऽपि । जघन्या तु सर्वेषामन्त-र्मुहूर्तात्मिका, नवरं देव-नारकयोर्दश[८] वर्षसहस्राणीति । अथवा अद्धास्थानं समया-ऽऽवलिका[९]-मुहूर्ता-ऽहोरात्र-पक्ष-मास-ऋतु-अयन-संवत्सर-युग-पल्योपम-सागरोपम-उत्सर्पिणी-अवसर्पिणी-पुद्गलपरावर्ता-ऽतीता-ऽनागत-सर्वाद्धारूपमिति ।

ऊर्द्ध्वस्थानं[१०] तु कायोत्सर्गादिकम्, अस्योपलक्षणत्वाद् निषण्णाद्यपि गृह्यते । उपरतिः विरतिः, तत्स्थानं देशे सर्वत्र च श्रावक-साधुविषयम् ।

वसतिस्थानं यो यत्र ग्राम-गृहादौ वसति ।

---

१. जोए ख झ । २. गणणें क । ३. ०उर्द्धा० ख ग च । ४. चेति कप्रतिमृते । ५. इति इति क-खआदर्शयोरेव । ६. ०याणामसङ्ख्येया ख-ङ-प्रती विना । ७. देव-नारकाणां ख । ८. ०नारकाणां दश ख । ९. ०वलिक-मु० क । १०. उर्द्ध० ख ग च ।

संयमस्थानं संयमः सामायिक-च्छेदोपस्थापनीय-परिहार[1]विशुद्धि-सूक्ष्मसम्पराय-यथाख्यात[2]रूपः, तस्य पञ्चविधस्याप्यसङ्ख्येयानि संयमस्थानानि। [3]कियदसङ्ख्यम् ? इति चेत्, अतीन्द्रियत्वादर्थस्य न साक्षान्निर्देष्टुं शक्यते, आगमानुसारोपमया तूच्यते—इहैकसमयेन सूक्ष्माग्निजीवा असङ्ख्येयलोकाकाशप्रदेशप्रमाणा उत्पद्यन्ते, तेभ्योऽग्निकायत्वेन परिणता असङ्ख्येयगुणाः, ततोऽपि तत्कायस्थितिरसङ्ख्येयगुणा, ततोऽप्यनुभागबन्धाध्यवसायस्थानान्यसङ्ख्येयगुणानि, संयमस्थानान्यप्येतावन्त्येवेति सामान्यतः, [4]विशेषतस्तूच्यते—सामायिक-च्छेदोपस्थापनीय-परिहार[5]विशुद्धीनां प्रत्येकमसङ्ख्येयलोकाकाशप्रदेशतुल्यानि संयमस्थानानि, सूक्ष्मसम्प[6]रायस्य त्वान्तर्मौहूर्तिकत्वाद् अन्तर्मुहूर्तसमयतुल्यान्यसङ्ख्येयानि संयमस्थानानि, [7]यथाख्यातस्य त्वेकमेवाजघन्योत्कृष्टं संयमस्थानम् । [8]अथवा संयमश्रेण्यन्तर्गतानि संयमस्थानानि ग्राह्याणि, सा चानेन क्रमेण भवति, तद्यथा—अनन्तचारित्रपर्यायनिष्पादितमेकं संयमस्थानम्, असङ्ख्येयसंयमस्थाननिर्वर्तितं कण्डकम्, तैश्चासङ्ख्येयैर्जनितं षट्स्थानकम्, तदसङ्ख्येयात्मिका श्रेणीति ।

प्रग्रहस्थानं [9]तु प्रकर्षेण गृह्यते वचोऽस्येति प्रग्रहः ग्राह्यवाक्यो नायक इत्यर्थः, स च लौकिको लोकोत्तरश्च, तस्य स्थानं प्रग्रहस्थानम् । [10]लौकिकं तावत् पञ्चविधम्, तद्यथा—राजा युवराजो महत्तरोऽमात्यः कुमारश्चेति । लोकोत्तरमपि [11]पञ्चविधम्, तद्यथा—आचार्योपाध्याय-[12]प्रवर्ति-स्थविर-[13]गणावच्छेदकभेदादिति ।

योधस्थानं पञ्चधा, [14]तद्यथा—आलीढ-प्रत्यालीढ-वैशाख-मण्डल-समपादभेदात् ।

---

१. ०विशुद्धिक-सू० ख, ०विशुद्धीय-सू० ङ । २. रूपः पञ्चविधः, तस्य पञ्च० ख । ३. किं तदसङ्ख्यम् ? ग च, कियदसङ्ख्येयम् ? ङ । ४. विशेषस्तूच्यते ङ । ५. ०विशुद्धीयानां ख घ ङ । ६. ०रायस्यान्तर्मौ० क, ०रायस्यान्तर्मुहूर्तिकत्वाद् ग च । ७. यथाख्यातचारित्रस्य ख । ८. अथ संयम० क । ९. तु इति खप्रतौ नास्ति । १०. "लोइयं पंचविहं—राय-जुवराय-सेणावइ-महत्तर-अमच्च-कुमारा [?]" चूर्णौ । ११. पञ्चविधमेव, तद्यथा ख । १२. ०प्रवृत्ति० ग च । १३. ०गणावच्छेदिभेदादिति ग च । १४. तद्यथा—लीढ-प्रत्या० क ग च ।

अचलस्थानं तु[१] चतुर्धा सादिसपर्यवसानादिभेदात्, तद्यथा—सादिसपर्यवसानं परमाण्वादेर्द्रव्यस्यैकप्रदेशादाववस्थानं जघन्यत एकं समयमुत्कृष्टतश्चासङ्ख्येयकालमिति[२], साद्यपर्यवसानं सिद्धानां[३] भविष्यदद्धारूपम् वा[४], अनादिसपर्यवसानमतीताद्धारूपस्य[५], शैलेश्यवस्थान्त्यसमये कार्मण-तैजसशरीर-भव्यत्वानां[६] चेति[७], अनाद्यपर्यवसानं धर्मा-ऽधर्मा-ऽऽकाशानामिति।

गणनास्थानम् एक-द्व्यादिकं[८] शीर्षप्रहेलिकापर्यन्तम् ।

सन्धानस्थानं द्विधा—द्रव्यतो भावतश्च । पुनरपि[९] प्रत्येकं द्विधा—छिन्नाऽच्छिन्नभेदात् । तत्र द्रव्यच्छिन्नसन्धानं कञ्चुकादेः, अच्छिन्नसन्धानं तु पक्ष्मोत्पद्यमानतन्त्वादेरिति । भावसन्धानमपि प्रशस्ता-ऽप्रशस्तभेदाद् द्वेधा । तत्र प्रशस्ताच्छिन्नभावसन्धानमुपशम-क्षपकश्रेण्यावारोहतो[१०] जन्तोरपूर्वसंयमस्थानान्यच्छिन्नान्येव[११] भवन्ति, श्रेणिव्यतिरेकेण वा प्रवर्धमानकण्डकस्येति, छिन्नप्रशस्तभावसन्धानं पुनरौपशमिकादिभावादौदयिकादिभावान्तरगतस्य पुनरपि शुद्धपरिणामवतः तत्रैव[१२] गमनम् । अप्रशस्ताच्छिन्नभावसन्धानमुपशमश्रेण्याः[१३] प्रतिपततोऽविशुद्ध्यमानपरिणामस्यानन्तानुबन्धिमिथ्यात्वोदयं यावत्, उपशमश्रेणिमन्तरेणापि कषायवशाद् बन्धाध्यवसायस्थानान्युत्तरोत्तराण्यवगाहमानस्य[१४][१५] वा इति । अप्रशस्तच्छिन्नभावसन्धानं[१६] पुनरौदयिकभावाद् औपशमिकादिभावान्तरसङ्क्रान्तौ सत्यां पुनस्तत्रैव[१७] गमनमिति । इह द्वारद्वयं यौगपद्येन व्याख्यातम् । तत्र सन्धानस्थानं[१८] द्रव्यविषयम्, इतरत्[१९] तु भावविषयमिति, उक्तं स्थानम् ॥१८५॥ अथवा भावस्थानं कषायाणां यत् स्थानम् तदिह परिगृह्यते, तेषामेव जेतव्यत्वेनाधिकृतत्वात् । तेषां किं स्थानम् ? यदाश्रित्य[२०] ते भवन्ति ।

---

१. तु इति कपुस्तके नास्ति । २. ०मुत्कृष्टतस्त्वसङ्ख्येयं कालमिति ख । ३. सिद्धानाम्, अनादि० क । ४. वा इति ख-चप्रत्योर्न । ५. ०रूपं शैले० ख । ६. ०भव्यसत्त्वानां ग च । ७. वेति ख-गप्रती ऋते । ८. ०द्व्यादि शी० ख । ९. पुनरप्येकैकं द्विधा ग घ च । १०. ०श्रेण्यामारोहतो ग च । ११. ०स्थानान्येव भव० क । १२. तत्रैवागमनम् घ ङ । १३. ०मुपशमक्षपकश्रेण्याः( ण्योः )[ ? ] ख । १४. ०स्थानान्युत्तराण्यव० च । १५. ०ण्यवगाहत इति क, ०ण्यवगाहमानस्येति ख । १६. ०च्छिन्नसन्धानं ग च । १७. पुनरत्रैव क । १८. सन्धनास्थानं ख, सन्धानं द्रव्य० च । १९. इतरं तु ग । २०. यदाश्रित्य च ते भवन्तीति । तद् दर्शयति ग च ।

शब्दादिविषयानाश्रित्य च ते भवन्तीति दर्शयति—

**पंचसु काणगुणेसु[1] य सद्द-प्फरिस-रस-रूव-गंधेसुं ।**
**जस्स कसाया वट्टंति[2] मूलठाणं[3] तु संसारे ॥१८६॥**

**पंचसु०** गाहा । तत्रेच्छानङ्गरूपः कामः, तस्य गुणा यानाश्रित्यासौ[4] चेतसो विकारमादर्शयति, ते च शब्द-स्पर्श-रस-रूप-गन्धाः, तेषु पञ्चस्वपि व्यस्तेषु समस्तेषु वा[5] विषयभूतेषु यस्य जन्तोर्विषयसुखपिपासोन्मुखस्याऽपरमार्थदर्शिनः संसाराभिष्वङ्गिणो राग-द्वेषतिमिरोपप्लुतदृष्टेर्मनोज्ञेतरविषयोपलब्धौ सत्यां **कषायाः वर्तन्ते** प्रादुर्भवन्ति, तन्मूलश्च संसारपादपः प्रादुर्भवतीति, अतः शब्दादिविषयोद्भूतकषायाः संसारे[6] संसारविषयं मूलस्थानमेवेति, एतदुक्तं[7] भवति— रागाद्युपहतचेताः परमार्थमजानानोऽतत्स्वभावेऽपि तत्स्वभावारोपणेनान्धादप्यन्धतमः कामी मोदते, यत आह—

**दृश्यं वस्तु परं न पश्यति जगत्यन्धः पुरोऽवस्थितं,**
**रागान्धस्तु यदस्ति तत् परिहरन् यन्नास्ति तत् पश्यति ।**
**कुन्देन्दीवर-पूर्णचन्द्र-कलश-श्रीमल्लतापल्लवा-**
**नारोप्याशुचिराशिषु प्रियतमागात्रेषु यन्मोदते [ ]**

द्वेषं वा कर्कशशब्दादौ व्रजतीति । ततश्च मनोज्ञेतरशब्दादिविषयाः कषायाणां मूलस्थानम्, ते च संसारस्येति गाथातात्पर्यार्थः ॥१८६॥

यदि नाम शब्दादिविषयाः कषायाः कथं तेभ्यः संसार इति ? उच्यते— यतः कर्मस्थितेः कषाया मूलम्, साऽपि संसारस्य, संसारिणश्चावश्यम्भाविनः कषाया इति । एतदेवाह—

**जह सव्वपायवाणं भूमीएँ पतिट्ठिताणि[8] मूलाणि ।**
**इय कम्मपायवाणं संसारपइट्ठिया[9] मूला ॥१८७॥**

---

१. ०गुणेसू सद्द० ख छ ज झ, ०गुणेसुं सद्द० ज । २. **वड्ढंति** ख, **वट्टति मूलट्ठाणं** छ । ३. **मूलट्ठाणं** क ख ज झ ठ । ४. **यानाश्रित्य चासौ** ग च । ५. **वा** इति खपुस्तके नास्ति । ६. **संसारे** इति ङ-चप्रत्योर्न । ७. **एतदुक्तं भवति** इति पाठः चआदर्शे न वर्तते । ८. **पयट्ठियाणि** क, **पइट्ठियाणि** छ ज झ ठ, **पडिट्ठियाइँ मूलाइं** ज । ९. **पयट्ठिया** ज ।

**जह सव्वपायवाणं०** गाहा । यथा सर्वपादपानां भूमौ [1]प्रतिष्ठितानि मूलानि एवं कर्मपादपानां संसारे कषायरूपाणि मूलानि प्रतिष्ठितानीति गाथार्थः ॥१८७॥

ननु च कथमेतत् श्रद्धेयं 'कर्मणः कषाया मूलम्' इति ? उच्यते—यतो मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगा बन्धहेतवः, तथा चागमः—

**जीवे णं भंते ! कइहिं ठाणेहिं णाणावरणिज्जं कम्मं बंधइ ? गोयमा ! दोहिं ठाणेहिं, तंजहा—रागेण य दोसेण य, रागे दुविहे—माया लोभे य, दोसे दुविहे—[2]कोहे माणे य, एएहिं [3]चउहिं ठाणेहिं [4]वीरिओवगूहिएहिं णाणावरणिज्जं कम्मं बंधइ । [ ]**

एवमष्टानामपि कर्मणां योज्यमिति । ते च कषाया मोहनीयान्तः-पातिनोऽष्टप्रकारस्य [5]च कर्मणः कारणम्, मोहनीयं कामगुणानां च दर्शयति—

**अट्ठविहकम्मरुक्खा सव्वे ते [6]मोहणिज्जमूलागा ।**
**कामगुण[7]मूलिया वा तम्मूलागं च संसारो ॥१८८॥**

***अट्ठविहकम्मरुक्खा०*** *गाहा ।* [8]*यदवाचि प्राक्*—**इय कम्मपादवाणं,** तत्र कतिप्रकारास्ते कर्मपादपाः [9]किंकारणाश्चेति ? [10]उच्यते—अष्टविधकर्मवृक्षाः, ते सर्वेऽपि मोहनीयमूलाः । न केवलं कषायाः, [11]कामगुणा अपि मोहनीयमूलाः, यस्माद् वेदोदयात् [12]कामाः, वेदश्च मोहनीयान्तःपातीति, अतस्तन्मोहनीयं **मूलम्** [13]आद्यं कारणं यस्य संसारस्य स तथा इति गाथार्थः ॥१८८॥

तदेवं पारम्पर्येण संसार-कषाय-कामानां कारणत्वाद् मोहनीयं [14]प्रधानभावमनुभवति, तत्क्षये चावश्यम्भावी कर्मक्षयः, तथा चाभाणि—

**जह मत्थयसूईए, हयाए हम्मई [15]तैलो ।**
**[16]तह कम्माणि हम्मंति मोहणिज्जे खयं गए ॥ [ ]**

---

१. **प्रतिष्ठानि** क । २. **कोहे य माणे य** च । ३. **चउट्ठाणेहिं** ख । ४. **वीरिओवग्गहिएहिं** ग घ ङ । ५. **च** इति चप्रतौ नास्ति । ६. **मोहणीयमूलागा** ज । ७. **०मूलगं वा** ख, **०मूलियं वा** छ ज, **०मूलियागं( वा? )** क झ ञ ठ । ८. **यदवादि** च । ९. **किंकारणास्ते इति** ग । १०. **उच्यन्ते** घ । ११. **कामगुणाश्च मोह०** चपुस्तकमृते । १२. **कामः** क । १३. **आद्यकारणं** ग । १४. **प्रधानभावं भवति** क । १५. **तले** ख । १६. **तहा** ग च ।

तच्च द्विधा—दर्शन-चारित्रमोहनीयभेदात् । एतदेवाह—

**दुविहो य[1] होइ मोहो दंसणमोहो चरित्तमोहो य ।**
**कामा चरित्तमोहो[2] तेणऽहिगारो इहं सुत्ते ॥१८९॥**

**दुविहो य होइ मोहो०** गाहा । मोहनीयं कर्म द्विधा भवति—दर्शनमोहनीयं चारित्र[3]मोहनीयं चेति, बन्धहेतोर्द्वैविध्यात् । तथाहि—अर्हत्-सिद्ध-चैत्य-तपः-श्रुत-गुरु-साधु-सङ्घप्रत्यनीकतया दर्शनमोहनीयं कर्म बध्नाति, येन चासावनन्त-संसारसमुद्रान्तःपात्येवावतिष्ठते, तथा तीव्रकषाय[4]बहुमोहराग-द्वेषाभिभूतः सन्[5] देश-सर्व[6]विरत्युपघाति चारित्रमोहनीयं कर्म बध्नाति । तत्रा[7]ऽनन्तानुबन्धि-मिथ्यात्व-सम्यग्मिथ्यात्व-सम्यक्त्व[8]भेदात् दर्शनमोहनीयं सप्तधा, तथा द्वादशकषाय-नवनोकषायभेदात् चारित्रमोहनीयमेकविंशतिधा । तत्र कामाः शब्दादयः पञ्च चारित्रमोहः, तेन चात्र सूत्रेऽधिकारः, यतः कषायाणां स्थानमत्र प्रकृतम्, तच्च शब्दादिक[9]पञ्चगुणात्मकमिति गाथार्थः ॥१८९॥

तत्र चारित्रमोहनीयोत्तरप्रकृतिस्त्री-पुं-नपुंसकवेद-हास्य-रति[10]-लोभा-श्रितकामाश्रयिणः[11] कषायाः संसारमूलस्य च कर्मणः प्रधानं कारणमिति प्रचिकटयिषुराह—

**संसारस्स उ मूलं कम्मं तस्स वि य होंति य कसाया ।**

**संसारस्य उ मूलमित्यादि । संसारस्य** नारक-तिर्यङ्-नरा-ऽमरगति-संसृतिरूपस्य कारणमष्टप्रकारं कर्म, तस्यापि कर्मणः कषायाः क्रोधादयो निमित्तं भवन्ति । १९० पूर्वार्द्धम् । तेषां च प्रतिपादितशब्दादिस्थानानां प्रचुरस्थानप्रति-

---

१. इ झ । २. चरित्तमोहा ख ञ । ३. ०मोहनीयं च, बन्ध० ख च । ४. ०बहुराग-द्वेषमोहाभिभूतः: ख च । ५. सन् इति खआदर्शे नास्ति । ६. ०विरतेरुपघाति घ ङ । ७. तत्र मिथ्यात्व-सम्यग्मिथ्यात्व-सम्यक्त्वभेदात् त्रिधा दर्शनमोहनीयम्, तथा षोडशकषाय-नवनोकषायभेदात् पञ्चविंशतिः (तिधा ?) चारित्रमोहनीयम् । तत्र कामाः च । ८. ०भेदात् सप्तधा दर्शनमोहनीयम्, तथा द्वादशकषाय-नवनोकषायभेदाद् एकविंशतिः(तिधा ?) चारित्रमोहनीयम् । तत्र कामाः ख । ९. शब्दादिपञ्च० ग । १०. ०रति-अरति-लोभा० ग । ११. ०श्रयिणः षे(षो?)[डश?] कषायाः संसारमूलस्य च कर्मणो नव नोकषाय (याः?) प्रधानं ग ।

पादनाय पुनरपि स्थानविशेषं गाथाशकलेनाह–

**ते सयण-पेस-अत्थाइएसु अज्झत्थओ य ठिया ॥१९०॥**

**ते सयणे**त्यादि । स्वजनः पूर्वा-ऽपरसंस्तुतो माता-पितृ-श्वशुरादिकः, प्रेष्यः भृत्यादिः, अर्थः धन-धान्य-कुप्य-वास्तु-रत्नभेदरूपः, [1]ते स्वजनादयः कृतद्वन्द्वा आदिर्येषां मित्रादीनां तेषु स्थिताः कषाया विषयरूपतया, अध्यात्मनि च विषयिरूपतया **प्रसन्नचन्द्रै**केन्द्रियादीनामिति गाथार्थः ॥१९०॥

तदेवं कषायस्थानप्रदर्शनेन सूत्रपदोपात्तं स्थानं [2]परिसमापय्य तेषामेव कषायाणां सूत्रमूलपदोपात्तानां जेतव्यत्वाधिकृतानां निक्षेपमाह–

**नामं ठवणा दविए उप्पत्ती पच्चए य [3]आएसे ।**
**रस भावकसाए [4]या को णय? कोहाइया चउरो ॥१९१॥**

**नामं ठवणा०** गाहा । यथा भूतार्थनिरपेक्षमभिधानमात्रं नाम । सद्भावा-ऽसद्भावरूपा प्रतिकृतिः स्थापना कृत[5]भीमभृकुट्युत्कटललाटघटितत्रिशूल-रक्तास्यनयनसन्दष्टाधरस्पन्दमानस्वेद[6]सलिलचित्र-[7]पुस्ताद्यक्ष-वराटकादिगतेति ।

द्रव्यकषाया ज्ञशरीर-भव्यशरीराभ्यां व्यतिरिक्ताः [द्वेधा] कर्मद्रव्यकषाया नोकर्मद्रव्यकषायाश्चेति । [8]तत्राऽऽदित्सितात्तानुदीर्णोदीर्णाः पुद्गला [9]द्रव्यप्राधान्यात् कर्मद्रव्यकषायाः । नोकर्मद्रव्यकषायास्तु बिभीतकादयः ।

उत्पत्तिकषायाः शरीरोपधि-क्षेत्र-[10]वास्तु-स्थाण्वादयो यदाश्रित्य तेषामुत्पत्तिः, तथा चोक्तम्–

**किं एत्तो कट्ठयरं [11]जं मूढो [12]थाणुयम्मि आवडिओ ।**
**[13]थाणुस्स तस्स रूसई न अप्पणो [14]दुप्पओगस्स ॥** [ ]

---

१. **ते च स्वजना०** घ ङ । २. **परिसमाप्य** ख । ३. **आएसो** ज ठ । ४. **या तेण य** क ठ । ५. **भीमभ्रुकुट्यु०** ग ङ च, **०भीमभ्रकुट्यु०** घ । ६. **०सलिलवित्तपुस्ता०** घ, "**सलिलवित्त( चित्र? )** इति सद्भावस्थापना" जै०वि०प० । ७. **०पुस्तकाद्यक्ष०** ख, "**पुस्तादि** इति असद्भावस्थापना" जै०वि०प० । ८. **तत्रादित्सितानुदीर्णोदीर्णपुद्गला** ख । ९. **द्रव्यप्राध( थ? )म्यात्** क । १०. "**वास्तु** इति गृहम्" जै०वि०प० । ११. **जह** ख । १२. **खाणुयम्मि** ग घ ङ । १३. **खाणुस्स** घ । १४. **दुव्वतोगस्स** ग ।

प्रत्ययकषायाः कषायाणां ये प्रत्ययाः यानि बन्धकारणानि, ते चेह मनोज्ञेतरभेदाः शब्दादयः, अत एवोत्पत्ति-प्रत्यययोः कार्य-कारणगतो भेदः । आदेशकषायाः कृत्रिमकृत[1]भृकुटीभङ्गादयः । रसतो [2]रसकषायः कटु-तिक्त-कषायपञ्च[3]कान्तर्गतः ।

भावकषायाः शरीरोपधि-क्षेत्र-वास्तु-स्वजन-प्रेष्या-ऽर्थादिनिमित्providing:शब्दादिकामगुणकारणकार्यभूतकषायकर्मोदयादात्मपरिणामविशेषाः क्रोध-मान-माया-लोभाः । ते चैकैकशोऽनन्तानुबन्धि-[4]अप्रत्याख्यान-प्रत्याख्यानावरण-सञ्ज्वलनभेदेन भिद्यमानाः षोडशविधा भवन्ति । तेषां च स्वरूपा-ऽनुबन्धफलानि गाथाभिरभिधीयन्ते, ताश्चेमाः—

**जल-रेणु-पुढवि-पव्वय[5]राईसरिसो चउव्विहो [6]कोहो ।**
**तिणिसलया-कट्ठ-ऽट्ठिय[7]सेलयथंभोवमो माणो ॥**

**मायावलेहि-गोमुत्ति-[8]मिंढसिंग-[9]घणवंसमूलसमा ।**
**लोहो [10]हलिद्द-खंजण-कद्दम-किमिरायसामाणो ॥**

**पक्ख-चउमास-वच्छर-जावज्जीवाणु[11]गामिणो कमसो ।**
**देव-नर-तिरिय-नारयगतिसाहणहेयवो भणिया ॥** [ ]

एषां च नामाद्यष्टविधकषायनिक्षेपाणां कतमो नयः [12]कमिच्छतीति ? एतदभिधीयते—तत्र [13]नैगमस्य सामान्य-विशेषरूपत्वाद् नैकगमत्वाच्च तदभि-प्रायेण सर्वेऽपि साधवो नामादयः, सङ्ग्रह-व्यवहारौ तु कषायसम्बन्धाभावाद् आदेश-समुत्पत्ती नेच्छतः, ऋजुसूत्रस्तु वर्तमानार्थनिष्ठत्वाद् आदेश-समुत्पत्ति-स्थापना नेच्छति, शब्दस्तु नाम्नोऽपि कथञ्चिद् भावान्तर्भावाद् नाम-भावाविच्छतीति गाथातात्पर्यार्थः ॥१९१॥

---

१. ०भ्रुकुटी० ग । २. रसकषायाः ग । ३. ०कान्तर्गताः ग । ४. ०अप्रत्याख्याना-वरण-प्रत्या० च । ५. ०राती० ख च । ६. कोधो ग च । ७. ०सेलत्थंभो० कप्रतेर्विना । ८. ०मेंढसिंग० ख च, ०मेंढिसिंग० ग । ९. ०घणवंसि० घ ङ । १०. हलिद्द-कद्दम-खंजण-किमि० खपुस्तकमृते । ११. ०गामिणो भणिया । ख । १२. किमिच्छतीति ग । १३. नैकगमकत्वाच्च ख, नैकगमत्वात् तद० घ ङ ।

तदेवं कषाया: कर्मकारणत्वेनोक्ता:, तदपि संसारस्य, स च कतिविधः ? इति दर्शयति—

**दव्वे खेत्ते काले भवसंसारे य भावसंसारे ।**
**पंचविहो संसारो [1]जत्थेते [2]संसरे जीवा ॥१९२॥**
**[3]दव्व खेत्ते काले भवसंसारे य भावसंसारे ।**
**कम्मेण य संसारो तेणऽहिगारो इहं सुत्ते ॥१९३॥**

**दव्वे खेत्ते०** गाहा । द्रव्यसंसारो व्यतिरिक्तो द्रव्यसंसृतिरूपः । क्षेत्रसंसारो येषु क्षेत्रेषु द्रव्याणि संसरन्ति । कालसंसारः यस्मिन् काल इति । [4]नारक-तिर्यङ्-नरा-ऽमरगति-चतुर्विधानुपूर्व्युदयाद् [5]भवान्तरसङ्क्रमणं भवसंसारः । भावसंसारस्तु संसृतिस्वभाव औदयिकादिभावपरिणतिरूपः, तत्र च प्रकृति-स्थिति-अनुभाव-प्रदेशबन्धानां प्रदेशविपाकानुभवनम् । एवं द्रव्यादिकः पञ्चविधः संसारः । अथवा द्रव्यादिकश्चतुर्धा संसारः, तद्यथा—अश्वाद् हस्तिनम्, ग्रामाद् नगरम्, वसन्ताद् ग्रीष्मम्, औदयिकाद् औपशमिकम् । इति गाथार्थः ॥१९२॥

तस्मिंश्च संसारे कर्मवशगाः प्राणिनः संसरन्तीत्यतः कर्मनिदर्शनार्थमाह—

**णामं ठवणा[6]कम्मं च दव्वकम्मं पओगकम्मं च ।**
**[7]समुयाण रियावहियं आहाकम्मं तवोकम्मं ॥१९४॥**
**किइकम्म भावकम्मं [8]दसविह कम्मं समासओ होइ ।**
**अट्ठविहेण उ कम्मेण एत्थ [9]होई अहीयारो ॥१९५॥**

**नामं ठवणा०** गाहा । **किइकम्म०** गाहा । नामकर्म कर्मार्थशून्यमभिधानमात्रम् । स्थापनाकर्म पुस्तक-पत्रादौ कर्मवर्गणानां सद्भावा-ऽसद्भाव[10]रूपा स्थापना ।

द्रव्यकर्म व्यतिरिक्तं द्विधा—द्रव्यकर्म नोद्रव्यकर्म च । तत्र द्रव्यकर्म

---

१. **जत्थ य ते सं०** ज । २. **संसरंति जिया** ख ज झ ठ । ३. गाथेयं क-छप्रत्योर्नोपलभ्यते । ४. **नरक०** ग । ५. **भवान्तरसंसरणं** ख । ६. **०कम्मं दव्वं कम्मं** ज झ । ७. **समुयाणिरियावहियं** ज । ८. **दसविहमेयं समा०** ज । ९. होही ज । १०. **०रूपस्थापना** क ।

कर्मवर्गणान्तःपातिनः पुद्गलाः बन्धयोग्या बध्यमाना बद्धाश्चानुदीर्णा इति । नोद्रव्यकर्म कृषीवलादिकर्म । अथ कर्मवर्गणान्तःपातिनः पुद्गला द्रव्यकर्मेत्यवाचि, काः पुनस्ता वर्गणा इति सङ्कीर्त्यन्ते ? इह वर्गणाः सामान्येन चतुर्विधाः—द्रव्य-क्षेत्र-काल-भावभेदात् । तत्र द्रव्यत एक-द्व्यादिसङ्ख्येया-ऽसङ्ख्येया-ऽनन्तप्रदेशिकाः, क्षेत्रतोऽवगाढद्रव्यैक-द्व्यादि-सङ्ख्येया-ऽसङ्ख्येयप्रदेशात्मिकाः, कालत एक-द्व्यादिसङ्ख्येया-ऽसङ्ख्येयसमयस्थितिकाः, भावतो रूप-रस-गन्ध-स्पर्शस्वगतभेदात्मिकाः, सामान्यतः । विशेषत[1]स्तूच्यन्ते—तत्र परमाणूनामेका वर्गणा, एवमेकैकपरमाणूपचयात् सङ्ख्येयप्रदेशिकानां स्कन्धानां सङ्ख्येयाः, असङ्ख्येय-प्रदेशिकानामसङ्ख्येयाः, एताश्चौदारिकादिपरिणामाग्रहणयोग्याः । अनन्तप्रदेशिकानामप्यनन्ता अग्रहणयोग्याः, [2]ता उल्लङ्घ्य औदारिकग्रहणयोग्यास्त्वनन्तानन्तप्रदेशिकाः खल्वनन्ता एव भवन्ति । तत्रा[3]योग्योत्कृष्टवर्गणायां रूपे प्रक्षिप्ते औदारिकशरीर[4]ग्रहणयोग्या [5]जघन्या वर्गणा [6]भवति, पुनरेकैकप्रदेशवृद्ध्या प्रवर्धमाना औदारिकयोग्योत्कृष्ट[7]वर्गणा यावदनन्ता भवन्ति । अथ जघन्योत्कृष्टयोः को विशेषः ? जघन्यात उत्कृष्टा विशेषाधिकाः, विशेषस्त्वस्या एवौदारिकजघन्यवर्गणाया अनन्तभागः, तस्य चानन्तपरमाणुमयत्वाद् एकैकोत्तरप्रदेशोपचये सत्यप्यौदारिकयोग्य[8]वर्गणानां जघन्योत्कृष्टमध्यवर्तिनीनामानन्त्यम् ।

तत औदारिकयोग्योत्कृष्टवर्गणायां रूपप्रक्षेपे[9]णायोग्यवर्गणा जघन्या [10]भवति, एता अप्येकैकप्रदेशवृद्ध्योत्कृष्टान्ता अनन्ता भवन्ति । जघन्योत्कृष्टवर्गणानां को विशेषः ? जघन्याभ्योऽसङ्ख्येयगुणा उत्कृष्टाः, ताश्च बहुप्रदेशत्वाद् अतिसूक्ष्म[11]परिणामत्वाच्च औदारिकस्यानन्ता एवाग्रहणयोग्या भवन्ति, अल्पप्रदेशत्वाद् बादरपरिणामत्वाच्च वैक्रियस्यापीति । अत्र च यथा यथा प्रदेशोपचयस्तथा तथा विश्रसापरिणामवशाद् वर्गणानां सूक्ष्मतरत्वमवसेयम् ।

---

१. **०स्तूच्यते** ख ङ । २. **ता** इति क-घ-ङपुस्तकेषु न वर्तते । ३. "**अयोग्य** इति ग्रहणयोग्यवर्गणाभावात्" जै०वि०प० । ४. **ग्रहणा ज०** क । ५. **जघन्यवर्गणा** घ । ६. **भवन्ति** घ । ७. **०वर्गणा** ख । ८. **०वर्गणानामजघन्यो०** ख । ९. **०णायोग्या वर्गणा** ङ । १०. **भवन्ति** ग च । ११. **परिणामत्वाद् औदा०** ख ।

एतदेवोत्कृष्टोपरि रूपप्रक्षेपयोग्यायोग्यादिकं वैक्रियशरीरवर्गणानां जघन्योत्कृष्ट-विशेषलक्षणं चावसेयम्, तथा वैक्रिया-ऽऽहारकान्तरालवर्त्ययोग्यवर्गणानां जघन्योत्कृष्ट[१]विशेषासङ्ख्येयगुणत्वमिति । पुनरप्ययोग्यवर्गणोपरि रूपप्रक्षेपाद् जघन्याहारकशरीरयोग्यवर्गणा भवन्ति, ताश्च प्रदेशवृद्ध्या वर्धमाना [२]उत्कृष्टां यावदनन्ता भवन्ति । अथ जघन्योत्कृष्टयोः कियदन्तरमिति ? उच्यते—जघन्याभ्य उत्कृष्टा विशेषाधिकाः । को विशेषः ? इति चेत्, जघन्यवर्गणाया एवानन्तभागः, तस्याप्यनन्तपरमाणुत्वाद् आहारक[३]शरीरयोग्यवर्गणानां प्रदेशोत्तरवृद्धानामानन्त्यमिति भावना । तस्यामेवोत्कृष्टवर्गणायां रूपे प्रक्षिप्ते [४]जघन्या आहारकाग्रहणवर्गणाः, ततः प्रदेशवृद्ध्या वर्धमाना [५]उत्कृष्टां यावदनन्ता एव, आहारकस्य सूक्ष्मत्वाद् [६]बहुप्रदेश[७]त्वाच्चायोग्या भवन्ति, बादरत्वाद् अल्पप्रदेशत्वाच्च तैजसस्येति । जघन्योत्कृष्टयोः कियदन्तरमिति ? उच्यते—जघन्याभ्य उत्कृष्टा अनन्तगुणाः, केन गुणकारेण ? इति चेत्, अभव्येभ्योऽनन्त[८]गुणाः सिद्धानामनन्तभाग इति । तदुपरि रूपे प्रक्षिप्ते तैजसशरीरवर्गणा जघन्याः, एता अपि प्रदेशवृद्ध्या वर्धमाना [९]उत्कृष्टां यावदनन्ता भवन्ति । अथ जघन्योत्कृष्टयोः [१०]कियदन्तरम् ? जघन्याभ्य उत्कृष्टा विशेषाधिकाः, विशेषस्तु जघन्यवर्गणानन्तभागः, [११]तस्याप्यनन्तप्रदेशत्वाद् [१२]जघन्योत्कृष्टान्तरालवर्गणानामानन्त्यं भवति । तैजसोत्कृष्टवर्गणोपरि रूपे प्रक्षिप्ते सत्यग्रहणवर्गणा भवन्ति । एवमेकादिवृद्ध्योत्कृष्टान्ता अनन्ताः,ताश्चातिसूक्ष्मत्वाद् बहुप्रदेशत्वाच्च तैजसस्याग्रहणयोग्याः, बादरत्वाद् अल्पप्रदेशत्वाच्च भाषा-द्रव्यस्यापीति । जघन्योत्कृष्टयोरनन्तगुणत्वेन विशेषः, गुणकारश्चाभव्येभ्यो-ऽनन्त[१३]गुणः सिद्धानामनन्तभाग इति । तस्यामयोग्योत्कृष्टवर्गणायां रूपे प्रक्षिप्ते जघन्या भाषाद्रव्यवर्गणा [१४]भवति । तस्याश्च प्रदेशवृद्ध्या उत्कृष्टवर्गणा-पर्यन्तान्यनन्तानि स्थानानि भवन्ति । जघन्योत्कृष्टयोर्विशेषो जघन्य-

---

१. ०विशेषानामसङ्ख्येय० ग । २. उत्कृष्टा क घ । ३. ०शरीरवर्गणानां क । ४. जघन्याहारकग्रहणवर्गणा, ततः ख, जघन्याहारकाग्रहणायोग्यवर्गणा, ततः ग घ ङ । ५. उत्कृष्टा क घ । ६. बहुतरप्रदेशत्वा० घ ङ । ७. ०त्वादयोग्या क, ०त्वाच्चायोग्या एव भवन्ति च । ८. ०गुणः ख । ९. उत्कृष्टा घ च । १०. कियदन्तरं भवति ? जघ० घ ङ । ११. तस्यानन्त० च । १२. जघन्योत्कृष्टवर्गणाना० ख । १३. ०गुणाः क-खपुस्तके विना । १४. भवन्ति ग घ ङ ।

वर्गणानन्तभागाधिकोत्कृष्टवर्गणा भवति । अत्राप्यनन्तभागस्यानन्तपरमाण्वात्मकत्वाद् भाषाद्रव्ययोग्यवर्गणानामानन्त्यमवसेयम्, तदनेनैकादि[1]प्रदेशवृद्धिप्रक्रमेणायोग्यवर्गणानां जघन्योत्कृष्टादिकं ज्ञातव्यम्, नवरं जघन्योत्कृष्टयोर्भेदोऽयम्—अभव्यानन्तगुणः सिद्धानन्तभागात्मकः। तासां च पूर्वहेतुकदम्बकादेव भाषाद्रव्या-ऽऽनापानद्रव्ययोरयोग्यत्वमवसेयम् । अयोग्योत्कृष्टवर्गणायां रूपे प्रक्षिप्ते आनापानवर्गणा जघन्या । [3]ततो रूपोत्तरवृद्ध्योत्कृष्टवर्गणान्ता अनन्ता भवन्ति । जघन्यात उत्कृष्टा जघन्यानन्तभागाधिका । तदुपरि रूपोत्तरवृद्ध्या जघन्योत्कृष्टभेदेनाग्रहणवर्गणा, विशेषस्त्वभव्येभ्योऽनन्त[4]गुणाः सिद्धानामनन्तभागः । पुनरप्ययोग्योत्कृष्टवर्गणोपरि [5]प्रदेशादिवृद्ध्या जघन्योत्कृष्टभेदा मनोद्रव्यवर्गणा, जघन्यवर्गणानन्तभागो विशेषः । पुनरपि [6]प्रदेशोत्तरवृद्ध्या क्रमेणाग्रहणवर्गणा, विशेषश्चाभव्यानन्तगुणादिकः । ताश्च प्रदेशबहुत्वाद् अतिसूक्ष्मत्वाच्च मनोद्रव्यायोग्याः, अल्पप्रदेशत्वाद् बादरत्वाच्च कार्मणस्यापि । तदुपरि रूपे प्रक्षिप्ते जघन्याः कार्मणशरीरवर्गणाः । पुनरप्येकैकप्रदेशवृद्ध्या [7]वर्धमाना [8]उत्कृष्टां यावदनन्ता भवन्ति । अथ जघन्योत्कृष्टयोः कः प्रतिविशेष इति ? उच्यते—जघन्यवर्गणानन्तभागाधिकोत्कृष्टवर्गणा, स चानन्तभागोऽनन्तानन्तपरमाण्वात्मकः अत [9]एवानन्तानन्तभेदभिन्नाः कर्मद्रव्यवर्गणा एवं भवन्ति । आभिश्चात्र प्रयोजन[10]म्, द्रव्यकर्मणो व्याचिख्यासितत्वादिति ।

शेषा अपि वर्गणाः क्रमायाता विनेयजनानुग्रहार्थं व्युत्पाद्यन्ते—पुनरप्युत्कृष्टकर्मवर्गणोपरि [11]रूपादिप्रक्षेपेण जघन्योत्कृष्टभेदभिन्ना ध्रुववर्गणाः, [12]जघन्याच्च उत्कृष्टाः सर्वजीवेभ्योऽनन्तगुणाः । तदुपरि रूपप्रक्षेपादिक्रमेणानन्ता एव जघन्यो[13]त्कृष्टभेदा अध्रुववर्गणाः, अध्रुवत्वाद् अध्रुवाः, पाक्षिकसद्भावाद् अध्रुवत्वम् । जघन्योत्कृष्टभेदोऽनन्तरोक्त एव । तदुत्कृष्टोपरि [14]रूपादिप्रवृद्ध्या

---

१. ०प्रदेशविधिप्रक्रमणा० क । २. सिद्धानामनन्त० ख । ३. तत्तो क । ४. ०गुणः ख । ५. प्रदेशवृद्ध्या ग । ६. प्रदेशोत्तरक्रमेणा० खप्रतिमृते । ७. वर्धमाना इति खआदर्शे नास्ति। ८. उत्कृष्टा घ ङ च । ९. एवानन्तभेद० ग च । १०. ०म्, कर्मद्रव्यस्या( स्य?) व्याचि० ग । ११. रूपादिक्षेपेण क । १२. जघन्यात ग । १३. ०त्कृष्टभेदभिन्ना अध्रु० ङ। १४. रूपादिवृद्ध्या ख ।

जघन्योत्कृष्टभेदा अनन्ता एव [1]शून्यवर्गणा भवन्ति । जघन्यो[2]त्कृष्टविशेषः पूर्ववत् । तासां संसारेऽप्यभावात् शून्यवर्गणा इत्यभिधानम्, एतदुक्तं भवति–अध्रुववर्गणोपरि प्रदेशवृद्ध्याऽनन्ता अपि न [3]सम्भवन्तीति [4]प्रथमा शून्यवर्गणा । तदुपरि रूपादिवृद्ध्या जघन्योत्कृष्टभेदाः प्रत्येकशरीरवर्गणा भवन्ति, जघन्यातः क्षेत्रपल्योपमासङ्ख्येय[5]भागगुणोत्कृष्टा । तदुपरि रूपोत्तरादिवृद्ध्या जघन्योत्कृष्टभेदा अनन्ता एव [6]शून्यवर्गणा भवन्ति, जघन्य[7]वर्गणात उत्कृष्टा त्वसङ्ख्ये[8]य-लोकासङ्ख्येयभागप्रदेशगुणा, तदसङ्ख्येयभागोऽप्यसङ्ख्ये[9]यलोकात्मक इति द्वितीया शून्यवर्गणा । तदुपरि रूपादिवृद्ध्या बादरनिगोदशरीरवर्गणा, जघन्यातः क्षेत्रपल्योपमासङ्ख्येयभागप्रदेशगुणोत्कृष्टा । तदुपरि [10]रूपादिवृद्ध्या जघन्योत्कृष्टभेदा तृतीया शून्यवर्गणा, उत्कृष्टा [11]जघन्यातोऽसङ्ख्येयगुणा । को गुणकार इति ? उच्यते–अङ्गुलासङ्ख्येयभागप्रदेशराशेरावलिकाकालसङ्ख्येय-भागसमयप्रमाणकृतपौनःपुन्यवर्गमूलस्यासङ्ख्येयभाग[12]प्रदेशप्रमाण इति । तदुपरि रूपोत्तरवृद्ध्या जघन्योत्कृष्टभेदा सूक्ष्मनिगोदशरीरवर्गणा, जघन्यात उत्कृष्टा-ऽऽवलिका[13]कालासङ्ख्येयभागसमयगुणा । तदुपरि रूपोत्तरवृद्ध्या जघन्योत्कृष्टभेदा चतुर्थी [14]शून्यवर्गणा, जघन्यात उत्कृष्टा चतुरस्त्रीकृतलोकस्यासङ्ख्येयाः श्रेण्यः, ताश्च प्रतरासङ्ख्येयभागतुल्या इति । तदुपरि रूपादिवृद्ध्या जघन्योत्कृष्टभेदा महास्कन्धवर्गणा, जघन्यात उत्कृष्टा क्षेत्रपल्योपमस्यासङ्ख्येयगुणा सङ्ख्येयगुणा [15]वेति । उक्ताः समासतो वर्गणाः, विशेषार्थिना तु **कर्मप्रकृति**रवलोकनीयेति ।

साम्प्रतं प्रयोगकर्म, वीर्यान्तरायक्षयोपशमाविर्भूतवीर्येणात्मना प्रकर्षेण युज्यत इति प्रयोगः । स च मनो-वाक्-कायलक्षणः पञ्चदशधा, कथमिति ? उच्यते–तत्र मनोयोगः सत्या-ऽसत्य-मिश्रा-ऽनुभयरूपश्चतुर्धा, एवं वाग्योगोऽपि,

---

१. **शून्या वर्गणा** क च, "**शून्यवर्गणा** इति परिणामपरिणताः कदाचिन्न प्राप्यन्ते" जै०वि०प० । २. **०त्कृष्टभेदः पू०** ख । ३. **सम्भवतीति** ग ङ **भवन्तीति** च । ४. **प्रथमशून्य०** क ख । ५. **०भागप्रदेशगुणो०** ग ङ च, घप्रतौ पाठत्रुटिः । ६. **शून्या वर्गणा** ग । ७. **०वर्गणा तदुत्कृष्टा** क । ८. **०यभाग०** घ च । ९. **०यप्रदेशात्मक इति** ग । १०. **रूपोत्तरादिवृद्ध्या** ग । ११. **जघन्यतो०** च । १२. **०प्रदेशपरिमाण** ख । १३. **०काल-सङ्ख्येय०** घ ङ । १४. **शून्यैव वर्गणा** ख । १५. **चेति** क ख ग ।

काययोगः सप्तधा—औदारिक-औदारिकमिश्र-वैक्रिय-वैक्रियमिश्रा-ऽऽहारका-ऽऽहारकमिश्र-कार्मणयोगभेदात् । तत्र मनोयोगो मनःपर्याप्त्या पर्याप्तस्य मनुष्यादेः । [१]वाग्योगो द्वीन्द्रियादीनाम् । औदारिकयोगः तिर्यङ्-मनुजयोः शरीरपर्याप्ते[२]रूर्ध्वम् । तदारतस्तु मिश्रः, केवलिनो वा समुद्घातगतस्य द्वितीय-षष्ठ-सप्तमसमयेषु । वैक्रियकाययोगो देव-नारक-बादरवायूनाम्, अन्यस्य वा वैक्रियलब्धिमतः । तन्मिश्रस्तु देव-नारकयोरुत्पत्तिसमये, अन्यस्य वा वैक्रियं निर्वर्तयतः । आहारककाययोगश्चतुर्दशपूर्वविद आहारकशरीरस्थस्य । तन्मिश्रस्तु निर्वर्तनाकाले । कार्मणयोगो विग्रहगतौ केवलिसमुद्घाते वा तृतीय-चतुर्थ-पञ्चम-समयेष्विति । तदनेन पञ्चदशविधेनापि योगेनात्माऽष्टौ प्रदेशान् विहायोत्तप्तभाजनोदकवदुद्वर्तमानैः सर्वैरेवात्मप्रदेशैरात्मप्रदेशावष्टब्धाकाशदेशस्थं कार्मणशरीरयोग्यं कर्मदलिकं यद् बध्नाति तत् प्रयोगकर्मेत्युच्यते, उक्तं च—

**जाव णं एस जीवे एयइ [३]वेयइ चलइ फंदईत्यादि ताव णं अट्ठविहबंधए वा सत्तविहबंधए वा [४]छव्विहबंधए वा एगविहबंधए वा, नो णं अबंधए ।** [ ]

समुदानकर्म सम्पूर्वाद् आङ्पूर्वाच्च ददातेर्ल्युडन्तात् पृषोदरादिपाठेन आकारस्योकारादेशेन रूपं भवति । तत्र प्रयोगकर्मणैकरूपतया गृहीतानां कर्मवर्गणानां सम्यग् मूल-उत्तरप्रकृति-स्थिति-अनुभव-प्रदेशबन्धभेदेन आङ् मर्यादया देश-सर्वोपघाति[५]रूपया तथा स्पृष्ट-निधत्त-निकाचितावस्थया च स्वीकरणं समुदानम्, तदेव कर्म समुदानकर्म । तत्र मूलप्रकृतिबन्धः ज्ञाना-वरणीयादिः । उत्तरप्रकृतिबन्धस्तूच्यते—उत्तरप्रकृतिबन्धो ज्ञानावरणीयं पञ्चधा मति-श्रुता-ऽवधि-मनःपर्याय-केवलावरणभेदात्, तत्र केवलावारकं सर्वघाति, [६]शेषाणि [७]देशघातीन्यपि । दर्शनावरणीयं नवधा—निद्रापञ्चक-दर्शनचतुष्टयभेदात्, तत्र निद्रापञ्चकं प्राप्तदर्शनलब्ध्युपयोगोपघातकारि, दर्शनचतुष्टयं तु दर्शनलब्धि-

---

१. **वाग्योगोऽपि द्वी०** क-खपुस्तके विना । २. **०रूर्द्धम्** ख ग च । ३. **चेयइ वलइ फं०** ग । ४. **छहव्विह०** क । ५. **०रूपतया** क-चप्रती ऋते । ६. **शेषाणि सर्वाणि तु देश०** ख । ७. **देश-सर्वघातीन्यपि** ग च ।

प्राप्तेरेव, अत्रापि केवलदर्शनावरणं सर्वघाति, शेषाणि तु देशतः । वेदनीयं द्विधा—साता-ऽसातभेदात् । मोहनीयं द्विधा—दर्शन-चारित्रभेदात् । तत्र [१]दर्शनमोहनीयं सप्तधा—अनन्तानुबन्धि-मिथ्यात्वादिभेदात्, बन्धतस्तु [२]पञ्चधा । चारित्रमोहनीयं द्वादशकषाय-नवनोकषायभेदाद् एकविंशतिविधम् । [३]अत्रापि मिथ्यात्वं सञ्ज्वलन[४]वर्जा द्वादशकषायाश्च सर्वघातिन्यः, शेषास्तु देशघातिन्य इति । आयुष्कं चतुर्धा—नारकादिभेदात् । नाम द्विचत्वारिंशद्भेदं गत्यादिभेदात्, त्रिनवतिभेदं [५]चोत्तरोत्तरप्रकृतिभेदात् । गतिश्चतुर्धा । जातिरेकेन्द्रियादिभेदात् पञ्चधा । शरीराणि औदारिकादिभेदात् पञ्चधा । औदारिक-वैक्रिया-ऽऽहारकभेदाद् अङ्गोपाङ्गं त्रिधा । निर्माणनाम सर्वजीवशरीरावयवनिष्पादकमेकधा । बन्धननाम औदारिकादि-कर्मवर्गणैकत्वापादकं पञ्चधा । सङ्घातनाम औदारिकादिकर्मवर्गणा-रचना[६]विशेषसंस्थापकं पञ्चधा । संस्थाननाम समचतुरस्रा[७]दि षोढा । संहनननाम [८]वज्रऋषभनाराचा[९]दि षोढैव । स्पर्शोऽष्टधा । रसः पञ्चधा । गन्धो द्विधा । वर्णः पञ्चधा । आनुपूर्वी [१०]नरकादिश्चतुर्धा । विहायोगतिः प्रशस्ता-ऽप्रशस्तभेदाद् द्विधा । अगुरुलघु-उपघात-पराघाता-ऽऽतप-उद्द्योत-उच्छ्वास-प्रत्येक-साधारण-त्रस-स्थावर-शुभा-ऽशुभ-सुभग-दुर्भग-सुस्वर-दुःस्वर-सूक्ष्म-बादर-पर्याप्तका-ऽ[११]पर्याप्तक-स्थिरा-ऽ[१२]स्थिरा-ऽऽदेया-ऽनादेय-यशःकीर्ति-अयशःकीर्ति-तीर्थकरनामानि प्रत्येकमेकविधानीति । गोत्रम् उच्च-नीचभेदाद् द्विधा । अन्तरायं दान-[१३]लाभ-भोग-उपभोग-वीर्यभेदात् पञ्चधेति । उक्तः प्रकृतिबन्धः । बन्धकारणानि [१४]तु गाथाभिरुच्यन्ते—

---

१. **दर्शनमोहनीयं त्रिधा-मिथ्यात्वादिभेदात्, बन्धतस्त्वेकविधम् । चारित्रमोहनीयं षोडशकषाय-नवनोकषायभेदात् पञ्चविंशतिविधम् । अत्रापि** ख च, "पाठान्तरे—**दर्शनमोहनीयं सप्तधा-अनन्तानुबन्धिमिथ्यात्वादिभेदात्, बन्धतस्तु पञ्चधा । चारित्रमोहनीयं द्वादशकषाय-नवनोकषायभेदाद् एकविंशतिविधम् ।**" ख पुस्तके टिप्पणी । २. "**पञ्चधि( धा? )** रि(इ)ति सम्यक्त्व-मिश्रयोर्बन्धाभावात्" जै०वि०प० । ३. **तत्रापि** ग ङ । ४. **०वर्जद्वादश०** क-घआदर्शौ ऋते । ५. **चोत्तरोत्तरभेदात्** च । ६. **०विशेषस्थापकं** ख । ७. **०दिभेदात् षो०** ख । ८. **वज्रर्षभ०** ग । ९. **०दिभेदात् षो०** ख । १०. **नारकादि०** च । ११. **०पर्याप्तास्थिरा०** क घ । १२. **०स्थिरत्वा-ऽऽदे०** च । १३. **०लाभ-वीर्य-भोग-उपभोगभेदात्** ख । १४. **तु** इति खप्रतौ नास्ति ।

[1]पडणीय[2]मंतराए [3]उवघाए तप्पओस निण्हवणे ।
आवरण[4]दुगं बंधइ भूओ अच्चासणाए य ॥
भूयाणुकंप-वय-[5]जोगउज्जओ खंति-दाण-गुरुभत्तो ।
बंधइ [6]भूओ सायं विवरीए [7]बंधए इयरं ॥
अरहंत-सिद्ध-चेइय-तव-सुय-गुरु-संघ-साहुपडणीओ ।
बंधइ दंसणमोहं अणंतसंसारिओ जेण ॥
तिव्व[8]कसाओ बहुमोह[9]परिणाओ राग-दोससंजुत्तो ।
बंधइ चरित्तमोहं दुविहं पि चरित्तगुण[10]घाइं ॥
मिच्छद्दिट्ठी महरंभपरिगहो तिव्वलोभ [11]णिस्सीलो ।
निरयाउयं निबंधइ पावमई रोद्दपरिणामो ॥
उम्मग्गदेसओ मग्ग[12]णासओ गूढहियय माइल्लो ।
सढसीलो य ससल्लो तिरियाउं [13]बंधए जीवो ॥
[14]पयईएँ तणुकसाओ दाणरओ सील-संजमविहूणो ।
मज्झिमग[15]णेहिँ जुत्तो मणुयाउं [16]बन्धए जीवो ॥
अणुवय-[17]महव्वएहिं [18]बालतवाऽकाम[19]निज्जराए य ।
[20]देवाउयं निबंधइ सम्मद्दिट्ठी [21]उ जो जीवो ॥
मण-वयण-कायवंको [22]माइल्लो गारवेहिँ पडिबद्धो ।
असुहं बंधइ नामं तप्पडिवक्खेहिँ सुहनामं ॥
[23]अरहंताइसु भत्तो सुत्तरुई पयणुमाण गुणपेही ।
बन्धइ उच्चागोयं विवरीए [24]बंधए इयरं ॥

---

१. पडिणीय० ग घ ङ । २. ०मंतराइय उव० ख घ च । ३. उवघाइय तप्प० ख । ४. ०दुगं भूओ बंधइ अच्चा० ग । ५. जोगमुज्जओ ख च । ६. भूयो ग । ७. बंधती ख ग च । ८. ०कसातो ग । ९. ०परिगओ क । १०. ०घाई क-घप्रती विना । ११. मस्सीलो क । १२. ०णासतो ग । १३. बंधई ख च । १४. पयतीतें ग । १५. ०गुणेसु क । १६. बंधती ख घ ङ च । १७. ०महव्वएहिँ य बाल० घ ङ च । १८. बालतवोऽकाम० च । १९. ०निज्जराते या ग । २०. देवातुयं ग । २१. य ग । २२. मातिल्लो ग । २३. अरिहंतादिसु च । २४. बंधती ख च ।

**[1]पाणवहादीसु रत्तो जिणपूया-मोक्खमग्ग[2]विग्घयरो ।**
**अज्जेइ अंतरायं ण लहइ जेणिच्छियं लाभं ॥ [ ]**

स्थितिबन्धो मूलोत्तरप्रकृतीनामुत्कृष्ट-जघन्यभेदः । तत्रोत्कृष्टो मूलप्रकृतीनां ज्ञानावरणीय-दर्शनावरणीय-वेदनीया-ऽन्तरायाणां त्रिंशत्सागरोपम[3]कोटीकोट्यः । यस्य [4]च यावन्त्यः कोटीकोट्यः स्थितिस्तस्य तावन्त्येव वर्षशतान्यबाधा, तदुपरि प्रदेशतो विपाकतो वाऽनुभवः । एतदेव प्रतिकर्मस्थिति [5]योजनीयम्—सप्ततिर्मोहनीयस्य, नाम-गोत्रयोर्विंशतिः, त्रयस्त्रिंशत्सागरोपमाण्यायु[6]षः पूर्वकोटीत्रिभागोऽबाधा । जघन्यः—ज्ञान-दर्शनावरण-मोहनीया-ऽन्तरायाणा-[7]मन्तर्मुहूर्तः, नाम-गोत्रयोरष्टौ मुहूर्ताः, वेदनीयस्य द्वादश, आयुषः क्षुल्लकभवः, स चानापानसप्तदशभागः । साम्प्रतमेतदेव बन्धद्वयमुत्तरप्रकृतीनामुच्यते—तत्रोत्कृष्टो मति-श्रुता-ऽवधि-[8]मनःपर्याय-केवलावरण-निद्रापञ्चक-चक्षुर्दर्शनादिचतुष्का-ऽसद्वेद्य-दानाद्यन्तरायपञ्चकभेदानां विंशतेरुत्तरप्रकृतीनां त्रिंशत्सागरोपम-कोटीकोट्यः, स्त्रीवेद-सातवेदनीय-मनुजगत्यानुपूर्वीणां चतसृणां पञ्चदश, मिथ्यात्वस्यौघिकमोहनीयवत्, कषायषोडशकस्य चत्वारिंशत् कोटीकोट्यः, नपुंसकवेदा-ऽरति-शोक-भय-जुगुप्सा-नरक-तिर्यग्गति-एकेन्द्रिय-पञ्चेन्द्रिय-जाति-औदारिक-[9]वैक्रियशरीर-तदङ्गोपाङ्गद्वय-तैजस-कार्मण-हुण्डसंस्थाना-ऽन्त्यसंहनन-वर्ण-गन्ध-रस-स्पर्श-[10]नरकानुपूर्वी-तिर्यगानुपूर्वी-अगुरुलघु-उपघात-पराघात-उच्छ्वासा-ऽऽतप-उद्द्योता-ऽप्रशस्तविहायोगति-त्रस-स्थावर-बादर-पर्याप्तक-प्रत्येका-ऽस्थिरा-ऽशुभ-दुर्भग-दुःस्वरा-ऽनादेया-ऽयशः-कीर्ति-नीचैर्गोत्र-निर्माणरूपाणां त्रिचत्वारिंशत उत्तरप्रकृतीनां विंशतिः, पुंवेद-हास्य-रति-देवगत्यानुपूर्वीद्वया-ऽऽद्यसंस्थान-संहनन-प्रशस्तविहायोगति-स्थिर-शुभ-सुभग-सुस्वरा-ऽऽदेय-यशःकीर्ति-उच्चैर्गोत्ररूपाणां पञ्चदशानामुत्तर-प्रकृतीनां दश, न्यग्रोधसंस्थान-द्वितीयसंहननयोर्द्वादश, तृतीयसंस्थान-नाराच-

---

१. **पाणवहाइसु रत्तो** क । २. ०**विग्घपरो** ग । ३. **कोटिकोट्यः** ङ । ४. **च** इति ख-चप्रत्योर्न । ५. **योजनीयमिति** । **सप्त०** ख च । ६. "**आयुषः** इति पूर्वकोटीत्रि भाग-समन्वितानि" जै०वि०प० । ७. ०**मन्तर्मुहूर्तम्** ख ग च । ८. ०**मनःपर्यय०** च । ९. ०**वैक्रिय-तद०** ग । १०. ०**नरक-तिर्य०** ग च ।

संहननयोश्चतुर्दश, कुब्जसंस्थाना-ऽर्धनाराचसंहननयोः षोडश, वामनसंस्थान-कीलिकासंहनन-द्वि-त्रि-चतुरिन्द्रियजाति-सूक्ष्मा-ऽपर्याप्तक-साधारणानाम-ष्टानामुत्तरप्रकृतीनामष्टादश, आहारक-तदङ्गोपाङ्ग-तीर्थकरनाम्नां सागरोपम-[1]कोटीकोटिः भिन्ना[2]ऽन्तर्मुहूर्तमबाधा, देव-नारका[3]युषोरौघिकवत्, तिर्यङ्-मनुष्यायुषः पल्योपमत्रयम् [4]पूर्वकोटी[5]त्रिभागोऽबाधा । उक्त [6]उत्कृष्टः स्थितिबन्धः । जघन्य उच्यते—मत्यादिपञ्चक-चक्षुर्दर्शनाद्यावरणचतुष्क-सञ्ज्वलनलोभ-दानाद्यन्त-रायपञ्चकभेदानां पञ्चदशानामन्तर्मुहूर्तम् अन्तर्मुहूर्तमेवाबाधा, निद्रापञ्चका-[7]ऽसातवेदनीयानां षण्णां सागरोपमस्य त्रयः सप्तभागाः पल्योपमा-सङ्ख्येयभागन्यूनाः, [8]सातावेदनीयस्य द्वादश मुहूर्ताः अन्तर्मुहूर्तमबाधा, मिथ्यात्वस्य सागरोपमं पल्योपमासङ्ख्येयभागन्यूनम्, आद्यकषायद्वादशकस्य चत्वारः सप्तभागाः [9]सागरोपमस्य पल्योपमासङ्ख्येयभागन्यूनाः, सञ्ज्वलन-क्रोधस्य मासद्वयम्, मानस्य मासः, तदर्धं मायायाः, पुंवेदस्याष्टौ संवत्सराः, सर्वत्रान्तर्मुहूर्तमबाधा, शेषनोकषाय-मनुष्य-तिर्यग्गति-पञ्चेन्द्रियजाति-औदारिक-तदङ्गोपाङ्ग-तैजस-कार्मण-षट्संस्थान-षट्संहनन-वर्ण-गन्ध-रस-स्पर्श-तिर्यङ्-मनुजानुपूर्वी-अगुरुलघु-उपघात-पराघात-उच्छ्वास-ऽऽतप-उद्द्योत-प्रशस्ता-ऽप्रशस्तविहायोगति-यशःकीर्ति[10]वर्जत्रसादि[11]विंशतिकर्म-निर्माण-[12]नीचैर्गोत्र-देवगत्यानुपूर्वीद्वय-नरकगत्यानुपूर्वीद्वय-वैक्रियशरीर-तदङ्गोपाङ्ग-रूपाणामष्टषष्ट्युत्तर[13]प्रकृतीनां सागरोपमस्य द्वौ सप्तभागौ [14]पल्योपमासङ्ख्येय-भागन्यूनौ अन्तर्मुहूर्तमबाधा, वैक्रियषट्कस्य [15]तु सागरोपमसहस्रस्य द्वौ सप्तभागौ [16]पल्योपमस्यासङ्ख्येयभागन्यूनौ अन्तर्मुहूर्तमबाधा, आहारक-तदङ्गोपाङ्ग-

१. ०**कोटीकोटी** ग । २. "**भिन्ना** इति प्रदेशरीत्यावेदनं भिन्नपूर्वकोटिं यावत् भवत्रये साक्षाद् दलिकवेदनम्" जै०वि०प० । ३. "**आयुषोः** इति त्रयस्त्रिंशत्" जै०वि०प० । ४. **पूर्वकोटि०** ख च । ५. ०**त्रिभागा०** घ । ६. **उत्कृष्टः । जघन्यः** ग । ७. ०**ऽसाता०** घ ङ च । ८. **सातवेद०** ख ग । ९. **सागरस्य** ख । १०. ०**वर्ज्यत्रसा०** क ग । ११. ०**विंशतिक-निर्माण०** च । १२. **नीचैर्गोत्राणां द्विषष्ट्युत्तरप्रकृतीनां सगरो०** क घ ङ । १३. ०**प्रकृतीनां देवद्विक-नरकद्विक-वैक्रियद्विका-ऽऽहारकद्विक-यशःकीर्ति-तीर्थकरनामरहितानां शेषनामप्रकृतीनाम्, तथा नीचैर्गोत्रस्य चेत्यासामुत्तरप्रकृतीनां सागरोपमस्य द्वौ** च । १४. **पल्योमस्यासङ्ख्येय०** ख ग । १५. **तु** इति कप्रतौ नास्ति । १६. **पल्योपमासङ्ख्येय०** क-खप्रती ऋते ।

तीर्थकरनाम्नां सागरोपम[१]कोटाकोटी [२]भिन्नाऽन्तर्मुहूर्तमबाधा । ननु चोत्कृष्टोऽप्येतावन्मात्र एवाभिहितस्ततः कोऽनयोर्भेद इति ? उच्यते—उत्कृष्टात् सङ्ख्येयगुणहीनो जघन्य इति । यशःकीर्ति-उच्चैर्गोत्रयोरष्ट मुहूर्तानि, अन्तर्मुहूर्तमबाधा, देव-नारका[३]युषोर्दश वर्षसहस्राणि अन्तर्मुहूर्तमबाधा, तिर्यङ्मनुजायुषोः क्षुल्लकभवः, अन्तर्मुहूर्त[४]मबाधेति, बन्धन-सङ्घातयोरौदारिकादि-[५]शरीरसहचरितत्वात् तद्गत एवोत्कृष्ट-जघन्यभेदोऽवगन्तव्य इति ।

उक्तः स्थितिबन्धः । अनुभावबन्धस्तूच्यते—तत्र शुभा-ऽशुभानां कर्मप्रकृतीनां प्रयोगकर्मणोपात्तानां प्रकृति-स्थिति-प्रदेशरूपाणां तीव्र-मन्दानुभावतयाऽनुभवनम् [६]अनुभावः, स चैक-द्वि-त्रि-चतुःस्थानभेदे[७]नावगन्तव्यः । तत्राशुभप्रकृतीनां कोशातकीरससमक्वाथ्यमानार्धत्रिभागपादावशेषतुल्यतया तीव्रानुभावोऽवगन्तव्यः, मन्दानुभावस्तु [८]जातिरसैक-द्वि-त्रि-चतुर्गुणो[९]दकप्रक्षेपास्वादतुल्यतयेति । शुभानां तु क्षीरेक्षुरसदृष्टान्तः पूर्ववद् योजनीयः । अत्र च कोशातकीक्षुरसादा[१०]वुंदक[११]परमाण्वादिप्रक्षेपाद् [१२]व्यत्यययाद्वा भेदानामानन्त्यमवसेयमिति । अत्र चायूंषि भवविपाकीनि, आनुपूर्व्यः क्षेत्रविपाकिन्यः, शरीर-संस्थाना-ऽङ्गोपाङ्ग-सङ्घात-संहनन-वर्ण-गन्ध-रस-स्पर्शा-ऽगुरुलघु-उपघात-पराघात-[उच्छ्वास]-[१३]उद्द्योता-ऽऽतप-निर्माण-प्रत्येक-साधारण-स्थिरा-ऽस्थिर-शुभा-ऽशुभरूपाः पुद्गलविपाकिन्यः, शेषास्तु ज्ञानावरणादिका जीवविपाकिन्य इति उक्तोऽनुभावबन्धः ।

प्रदेशबन्धस्त्वेकविधादि[१४]बन्धकापेक्षया भवति । तत्र यदैकविधं बध्नाति तदा प्रयोगकर्मणैकसमयोपात्ताः पुद्गलाः [१५]सातावेदनीयभावेन विपरिणमन्ते,

---

१. ०कोटीकोटिः ख ग च । २. "**भिन्ना** इति प्रदेशरीत्या वेदनं भिन्नपूर्वकोटिं यावद् भवत्रये साक्षाद् दलिकवेदनम्" जै०वि०प० । ३. "**आयुषोः** इति त्रयस्त्रिंशत्" जै०वि०प० । ४. **०मबधा, बन्धन०** ग । ५. **०रौदारिकशरीर०** क । ६. **अनुभवः** क ख । ७. **०नानुगन्तव्यः** । च । ८. "**जातिरसः** सहजरसः" स०वि०प० । ९. **०दक क्षेपा०** क । १०. **०वुदकबिन्द्वादि** च । ११. "**परमाणवः** बिन्दवः" जै०वि०प० । १२. "**व्यत्ययाद्** इति न जलनिक्षेपः किन्तु आवर्तनम्" जै०वि०प० ॥ १३. "**उद्योता-ऽऽताप०** च । १४. **०बन्धापेक्षया** ख । १५. **सातवेदनीयभावेन परिणमन्ते** ख ।

षड्विध[1]बन्धकस्य त्वायुः-मोहनीय[2]वर्जः षोढा, सप्तविधबन्धकस्य सप्तधा, अष्टविधबन्धकस्याष्टधेति । तत्राद्यसमय[3]प्रयोगोपात्ताः पुद्गलाः समुदानेन द्वितीयादि[4]समयेष्वल्प-बहुप्रदेशतयाऽनेन क्रमेण [5]व्यवस्थापयति—तत्रायुषः स्तोकाः पुद्गलाः, तद्विशेषाधिकाः प्रत्येकं नाम-गोत्रयोः [6]परस्परं तुल्याः, तद्विशेषाधिकाः प्रत्येकं ज्ञान-दर्शनावरणा-ऽन्तरायाणाम्, तेभ्यो विशेषाधिका मोहनीये । ननु च तेभ्यो विशेषाधिका इत्यत्र निर्धारणे पञ्चमी, सा च '**पञ्चमी विभक्ते**' [पा० २-३-४२] इत्यनेन सूत्रेण विधीयते, अस्य चायमर्थः-विभागो विभक्तं तत्र पञ्चमी विधीयमाना यत्रात्यन्तविभागस्तत्रैव भवति, यथा **माथुरेभ्यः [7]पाटलिपुत्रा** अभिरूपतराः, इह [8]च कर्मपुद्गलानां सर्वदैकत्वम्, [9]तथाविधानामेव [10]च बुद्ध्या बहुप्रदेशादिगुणेन पृथक्करणं चिकीर्षितम्, तत्र षष्ठी सप्तमी वा [11]न्याय्या, तद्यथा—गवां गोषु वा कृष्णा सम्पन्नक्षीरतमेति ? । नैष दोषः, यत्रावधि-अवधिमतोः सामान्यवाची शब्दः प्रयुज्यते तत्रैव षष्ठी-सप्तम्यौ '**यतश्च निर्धारणम्**' [पा० २-३-४१] इत्यनेन सूत्रेण विधीयेते, यथा गवां कृष्णा सम्पन्नक्षीरतमा, मनुष्येषु [12]**पाटलिपुत्रा** आढ्यतराः, कर्मवर्गणापुद्गलानां वेदनीये बहुतरा [13]इति, [14]यत्र तु विशेषवाची शब्दोऽवधित्वेनोपादीयते तत्र पञ्चम्येव, यथा खण्डमुण्ड-शबलशाबलेयधवलधावलेयव्यक्तिभ्यः कृष्णा सम्पन्नक्षीरतमेति, अतो नात्र विभागः कारणमविभागो वा, यतो **माथुर-पाटलिपुत्रकादि**विभागेन विभक्तानामपि सामान्यमनुष्यादिशब्दोच्चारणे षष्ठी-सप्तम्यौ भवतः, यत्र [15]तु पुन**र्माथुरा**दिविशेषोऽवधित्वेनोपादीयते तत्र कार्यवशादेकस्थानामपि पञ्चम्येव, तदिह सत्यपि कर्मवर्गणानामेकत्वे तद्विशेषस्यावधित्वेनोपादानात् पञ्चम्येव न्याय्येति । तद्विशेषाधिका वेदनीये । उक्तः प्रदेशबन्धः, समुदानकर्मापीति ।

---

१. **०बन्धकस्त्वायुः०** क, **०बन्धकस्यायुः०** ख च । २. **०वर्ज्यः** क, **०वर्जं** ग । ३. **०प्रयोगांताः** ख च, **०प्रयोगात्ताः** ग घ ङ । ४. **०समयेषु स्वल्प०** घ ङ । ५. **व्यवस्थापयतीति** क घ ङ । ६. **परस्परतस्तु तुल्याः** ख च । ७. **पटलिपुत्रका** ख ग, **पाडलिपुत्रका** च । ८. **च** इति कपुस्तके नास्ति । ९. **तथावस्थानामेव** ख ग च । १०. **च** इति क-गप्रत्योर्न वर्तते । ११. **न्याय्या, यथा—**ख । १२. **पाटलिपुत्रका** ख च । १३. **इति** इति खआदर्शो न वर्तते । १४. **यत्र पुनर्विशेषवाची** ख च । १५. **तु** इति ख-गप्रत्योर्नास्ति ।

साम्प्रतमीर्यापथिकम्, 'ईर गति-प्रेरणयोः' [[★]पा०]अस्माद्भावे ण्यत्, ईरणमीर्या, तस्याः पन्था ईर्यापथः, तत्र भवम् ईर्यापथिकम्। कश्चेर्यायाः पन्था भवति ? यदाश्रिता सा [१]भवतीति । एतच्च व्युत्पत्तिनिमित्तम्, यतस्तिष्ठतोऽपि तद् भवति, प्रवृत्तिनिमित्तं तु स्थित्यभावः, तच्चोपशान्त-क्षीणमोह-[२]सयोगकेवलिनां भवति, [३]सयोगकेवलिनोऽपि हि [४]तिष्ठतोऽपि सूक्ष्मगात्रसञ्चारा भवन्ति, उक्तं च–

**केवली णं भंते ! अस्सिं [५]समयंसि जेसु आगासपदेसेसु हत्थं वा पायं वा [६]ओगाहित्ता णं पडिसाहरेज्जा, [७]पभू णं भंते ! केवली तेसु चेवागासपदेसेसु पडिसाहरित्तए ? नो [८]इणट्ठे समट्ठे । कहं ? केवलिस्स णं चलाइं [९]सरीरोवगरणाइं भवंति, चलोवगरणत्ताए केवली नो संचाएति तेसु चेवागासपदेसेसुं हत्थं वा पायं वा पडिसाहरित्तए । [ ]**

तदेवं [१०]सूक्ष्मेतरगात्रसञ्चाररूपेण योगेन यत् कर्म बध्यते तद् ईर्यापथिकम्, ईर्याप्रभवमीर्याहेतुकमित्यर्थः । तच्च द्विसमयस्थितिकम्–एकस्मिन् समये बद्धम्, [११]द्वितीये वेदितम् । [१२]तृतीयसमये तदपेक्षया चाकर्मतेति, कथमिति ? उच्यते– यतस्तत्प्रकृतितः सातावेदनीयमकषायत्वात् स्थित्यभावेन बध्यमानमेव [१३]परिसटति, अनुभावतोऽनुत्तरोपपातिकसुखातिशायि, प्रदेशतः स्थूल-रूक्ष-शुक्लादि-बहुप्रदेशमिति, उक्तं च–

**अप्पं बायर मउयं बहुं च लुक्खं च सुक्किलं [१४]चेव ।**
**मंदं महव्वयं [१५]ति य सायाबहुलं च तं कम्मं ॥ [ ]**

अल्पं स्थितितः [१६]स्थितेरेवाभावात्, बादरं परिणामतः, अनुभावतो मृद्वनुभावम्, [१७]बहु प्रदेशैः, रूक्षं स्पर्शतः, वर्णेन शुक्लम्, मन्दं लेपतः स्थूल-चूर्णमुष्टिमृष्टकुड्यापतितलेपवत्, महाव्ययमेकसमयेनैव सर्वापगमात्, [१८]साता-बहुलम् अनुत्तरोपपातिकसुखातिशायीति । उक्तमीर्यापथिकम् ।

---

★ 'ईर गतौ कम्पने च'-पा०धा० १०१८ । १. **भवति** ख च । २. **०सयोगिकेवलिनां** घ ङ । ३. **सयोगिकेवलिनोऽपि** ग घ ङ । ४. **तिष्ठतः सूक्ष्म०** क घ ङ । ५. **समये जेसु** ख-चपुस्तके ऋते । ६. **उग्गाहित्ता** ख । ७. **वहू** ग । ८. **इणमट्ठे समट्ठे** ग घ च । ९. **सरीरोवगरणाति** ग ङ । १०. **सूक्ष्मतरगात्र०** क घ । ११. **द्वितीयसमये वेदितम्** ख च । १२. **तृतीये तदपेक्षया** ख चपुस्तके विना । १३. **परिशटति** क-खप्रती विना । १४. **चेय** क ग । १५. **चिय** ख । १६. **स्थितेरभावात्** ग । १७. **बहु च बहुप्रदेशैः** ख च । १८. **सातबहुलम्** ग ङ ।

अधुना आधाकर्म, यद् आधाय निमित्तत्वेनाश्रित्य पूर्वोक्तमष्टप्रकारमपि कर्म बध्यते तद् आधाकर्मेति । तच्च शब्द-स्पर्श-रस-रूप-गन्धादिकमिति,[1] तथाहि—शब्दादिकामगुणविषयाभिष्वङ्गवान् सुखलिप्सुर्मोहोपहतचेताः परमार्थासुखमयेष्वपि सुखाध्यारोपं विदधाति, तदुक्तम्[2]—

**दुःखात्मकेषु विषयेषु सुखाभिमानः,**
**सौख्यात्मकेषु नियमादिषु[3] दुःखबुद्धिः ।**
**उत्कीर्णवर्णपदपङ्क्तिरिवान्यरूपा,**
**सारूप्यमेति विपरीतमतिप्रयोगात्[4] ॥ [ ]**

एतदुक्तं भवति—कर्मनिमित्तभूता[5] मनोज्ञेतरशब्दादय एवाधाकर्मेत्युच्यन्त इति ।

तपःकर्म तस्यैवाष्टप्रकारस्य कर्मणो बद्ध-स्पृष्ट-निधत्त-निकाचितावस्थस्यापि निर्जराहेतुभूतं बाह्या-ऽऽभ्यन्तरभेदेन द्वादशप्रकारं तपःकर्मेत्युच्यते[6] ॥१९३॥

कृतिकर्म तस्यैव कर्मणोऽपनयनकारकम् अर्हत्-सिद्धा-ऽऽचार्योपाध्यायादिविषयमवनामादिरूपमिति[7] ।

भावकर्म पुनरबाधामुल्लङ्घ्य स्वोदयेनोदीरणाकरणेन वोदीर्णाः[8] पुद्गलाः प्रदेश-विपाकाभ्यां भव-क्षेत्र-पुद्गल-जीवेष्वनुभावं[9] ददतो भावकर्मशब्देनोच्यन्त[10] इति । तदेवं नामादिनिक्षेपेण दशधा कर्मोक्तम् । इह तु समुदानकर्मोपात्तेनाष्टविधकर्मणाऽधिकार[11] इति गाथाशकलेन दर्शयति—

**अट्ठविहेण उ कम्मेण एत्थ होई[12] अहीगारो** त्ति गाथार्धं कण्ठ्यमिति गाथाद्वयपरमार्थः[13] ॥१९४-१९५॥

तदेवं सूत्रानुगमेन सूत्रे समुच्चारिते निक्षेपनिर्युक्त्यनुगमेन प्रतिपदं निक्षिप्ते

---

१. ०गन्धादि, तथा हि ग । २. उक्तं च घ ङ । ३. नियमेषु च दुःख० ख । ४. विपरीतगति० कपुस्तकाद्विना । ५. ०निमित्त-भूतमनोज्ञे० ख । ६. तपःकर्मोच्यते ख ग च । ७. ०पाध्यायविषय० क ग घ ङ ०पाध्यायविषये अवनामादि० च । ८. चोदीर्णाः क-गप्रती विना । ९. "भव-क्षेत्र० इति भवविपाकिनीत्यादि" जै०वि०प० । १०. ०नोच्यन्ते । तदेवं ख । ११. ०णाधिकारः गाथा० ग । १२. होही ख । १३. ०द्वयसमासार्थः ख ।

नामादिनिक्षेपे च व्याख्याते सत्युत्तरकालं सूत्रं विव्रियते★—

**जे गुणे से मूलट्ठाणे** । अस्य चानन्तर-परम्परादिसूत्रैः सम्बन्धो वाच्यः । तत्रानन्तरसूत्रसम्बन्धः—'**से हु मुणी परिण्णायकम्मे**' त्ति, स मुनिः परिज्ञात-कर्मा भवति यस्यैतद् गुण-मूलादिकमधिगतं भवति । परम्परसूत्रसम्बन्धस्तु '**से ज्जं पुण जाणेज्जा सहस्सम्मइयाए**[1] **परवागरणेणं अण्णेसिं वा सोच्चा**[2]' स्वसम्मत्या परव्याकरणेन तीर्थकरोपदेशाद् अन्येभ्यो वाऽऽचार्यादिभ्यः श्रुत्वा जानीयात् परिच्छिन्द्यात्, किं तदिति ? उच्यते—**जे गुणे से मूलट्ठाणे** । आदिसूत्रसम्बन्धस्तु **सुयं मे आउसंतेणं भगवया एवमक्खायं** । किं तत् श्रुतं[3] यद् भगवताऽऽयुष्मताऽऽख्यातमिति[4] ? उच्यते—**जे गुणे से मूलट्ठाणे** ।

य इति सर्वनाम प्रथमान्तं **मागधदेशी**वचनत्वाद् एकारान्तं सामान्यो-द्देशार्थाभिधायीति । गुण्यते भिद्यते विशेष्यते[5]ऽनेन द्रव्यमिति[6] गुणः, स चेह शब्द-रूप-रस[7]-गन्ध-वर्ण-स्पर्शादिकः । **स** इति सर्वनाम प्रथमान्तमुद्दिष्ट-निर्देशार्थाभिधायीति । **मूलम्** इति निमित्तं कारणं प्रत्यय इति पर्यायाः । तिष्ठन्त्यस्मिन्निति स्थानम् । मूलस्य स्थानं मूलस्थानम् । 'व्यवच्छेदफलत्वाद् वाक्यानाम्' इति न्यायाद् य एव शब्दादिकः कामगुणः स एव संसारस्य नारक-तिर्यङ्-नरा-ऽमरसंसृतिलक्षणस्य यद् मूलं कारणं कषायास्तेषां स्थानम् आश्रयो वर्तते, यस्माद् मनोज्ञेतरशब्दाद्युपलब्धौ कषायोदयः, ततोऽपि संसार इति । अथवा मूलम् इति कारणम्, तच्चाष्टप्रकारं कर्म, तस्य स्थानम् आश्रयः कामगुण इति । अथवा मूलं मोहनीयं तद्भेदो वा कामः, तस्य स्थानं शब्दादिको[8] गुणः । अथवा मूलं शब्दादिको विषयगणः[9], तस्य स्थानमिष्टा-ऽनिष्टविषयगुणभेदेन व्यवस्थितो गुणरूपः संसार एव, आत्मा वा शब्दाद्युपयोगानन्यत्वाद् गुणः । अथवा मूलं संसारः, तस्य शब्दादयः स्थानं कषाया वा, गुणोऽपि शब्दादिकः कषायपरिणतो

---

★ पृ० १८० । १. **सहसम्मुइयाए** ख च, **सहस्सुइयाए** ग, **सहस्समुइयाए** घ ङ । २. **सुच्चा** घ ङ । ३. **श्रुतं भगवताऽऽयुष्मता यदाख्यातमिति** ख, **श्रुतं यवता भगवता०** ग । ४. **०युष्मता व्याख्यातमिति** घ ङ । ५. **विशिष्यते** ख च । ६. **०ऽनेनेति द्रव्यमिति** क घ ङ । ७. **०रस-गन्ध-स्पर्शादयः** ख च, **०रस-स्पर्श-गन्धादयः** ग । ८. **शब्दादिको विषयगुणः** च । ९. **विषयगुणः** ख च ।

वाऽऽत्मेति । यदि वा मूलं संसारस्य शब्दादिकषायपरिणतः सन् आत्मा, तस्य स्थानं शब्दादिकम्, गुणोऽप्यसावेवेति । ततश्च सर्वथा य एव गुणः स एव मूलस्थानं वर्तते ।

ननु च वर्तनक्रियायाः सूत्रे[1]ऽनुपादानात् कथमाक्षेप इति ? उच्यते—यत्र हि काचिद् विशेषक्रिया नैवोपादायि तत्र सामान्यक्रियाम् अस्ति-भवति-विद्यते-वर्तत इत्यादिकामुपादाय वाक्यं परिसमाप्यते, एवमन्यत्रापि द्रष्टव्यमिति ।

अथवा मूलम् इत्याद्यं प्रधानं वा, स्थानम् इति कारणम्, मूलं च तत् कारणं चेति विगृह्य कर्मधारयः, ततश्च य एव शब्दादिको गुणः स एव मूलस्थानं संसारस्याद्यं प्रधानं वा कारणमिति । शेषं पूर्ववदिति ।

साम्प्रतमनयोरेव गुण-मूलस्थानयोर्नियम्य-नियामकभावं दर्शयंस्तदुपात्तानां विषय-कषायादीनां बीजा-ऽङ्कुर[2]न्यायेन परस्परतः कार्य-कारणभावं सूत्रेणैव दर्शयति—

**जे मूलट्ठाणे से गुणे** त्ति यदेव संसारमूलानां कर्ममूलानां वा कषायाणां स्थानम् आश्रयः शब्दादिको गुणोऽप्यसावेव । अथवा कषायमूलानां शब्दादीनां यत् स्थानं कर्म संसारो वा तत्तत्स्वभावापत्तेः गुणोऽप्यसावेवेति । अथवा शब्दादिकषायपरिणाममूलस्य संसारस्य कर्मणो वा यत् स्थानं मोहनीयं कर्म शब्दादिकषायपरिणतो वा[3]ऽऽत्मा तद्गुणावाप्तेः गुणोऽप्यसावेव । यदि वा संसारकषायमूलस्यात्मनो यत् स्थानं विषयाभिष्वङ्गः असावपि शब्दादि-विषयत्वाद् गुणरूप एवेति । अत्र च विषयोपादानेन विषयिणोऽप्याक्षेपात् सूचनार्थत्वाच्च सूत्रस्येत्येवमपि द्रष्टव्यम्—यो गुणे गुणेषु वा वर्तते स[4] मूलस्थाने मूलस्थानेषु वा वर्तते, यो मूलस्थानादौ वर्तते स एव गुणादौ वर्तत इति । य एव जन्तुः शब्दादिके प्राग्व्यावर्णितस्वरूपे गुणे वर्तते स एव संसारमूल-[5]कषायादिस्थानादौ वर्तते, एतदेव द्वितीयसूत्रापेक्षया व्यत्ययेन प्राग्वदायोज्यम् ।

---

१. **सूत्रेऽप्यनुपादानात्** च । २. ०**न्यायतः** ख-चप्रती विना । ३. **वात्मेति तद्गुणा०** खआदर्शं विना । ४. **स एव मूलस्थाने** ग । ५. ०**कषायस्थानादिस्थानादौ** ग ।

अनन्तगमपर्यायत्वात् सूत्रस्यैवमपि द्रष्टव्यम्—यो गुणः स एव मूलं स एव [1]च स्थानम्, यद् मूलं तदेव गुणः स्थानमपि तदेव, यत् स्थानं तदेव गुणो मूलमपि तदेवेति । यो गुणः शब्दादिकोऽसावेव संसारस्य कषायकारणत्वाद् मूलम्, स्थानमप्यसावेवेति, एवमन्येष्वपि विकल्पेषु योज्यम् । विषयनिर्देशे च विषय्यप्याक्षिप्तः—यो गुणे वर्तते स मूले स्थाने चेति, एवं सर्वत्र द्रष्टव्यम् । इह च सर्वज्ञप्रणीतत्वाद् अनन्तार्थता सूत्रस्यावगन्तव्या, तथाहि—मूलमत्र कषायादिकमुपन्यस्तम्, कषायाश्च क्रोधादयश्चत्वारः, क्रोधोऽप्यनन्तानुबन्ध्यादिभेदेन चतुर्धा, अनन्तानुबन्धिनोऽप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि बन्धाध्यवसायस्थानान्यनन्ताश्च तत्पर्यायास्तेषां च प्रत्येकं स्थान-गुण[2]निरूपणेनानन्तार्थता सूत्रस्य सम्पद्यते, सा च छद्मस्थेन सर्वायुषाऽप्यविषयत्वा[दनन्तत्वा]च्चाशक्या दर्शयितुम्, दिग्दर्शनं तु कृतमेव । [3]अतोऽनया दिशा कुशाग्रीयशेमुष्या गुण-मूल-स्थानानां परस्परतः कार्य-कारणभावः संयोजना च कार्येति ।

तदेवं य एव गुणः स एव मूलस्थानम्, यदेव मूलस्थानं स एव गुण इत्युक्तम्, ततः [4]किमिति ? अत आह—

**इति से गुणट्ठी महया०** इत्यादि । **इति** हेतौ, यस्मात् शब्दादिगुणपरीत आत्मा कषायमूलस्थाने वर्तते, सर्वोऽपि च प्राणी गुणार्थी गुणप्रयोजनी गुणानुरागीति । अतस्तेषां गुणानामप्राप्तौ प्राप्तिनाशे वा काङ्क्षा-शोकाभ्यां स प्राणी महता अपरिमितेन [5]परि समन्तात् तापः परितापः तेन शारीर-मानसस्वभावेन दुःखेनाभिभूतः [6]सन् पौनःपुन्येन तेषु तेषु स्थानेषु **वसेत्** तिष्ठेदुत्पद्येत । किम्भूतः सन् ? **प्रमत्तः**, प्रमादश्च राग-द्वेषात्मकः, द्वेषश्च प्रायो न रागमृते । रागोऽप्युत्पत्तेरारभ्यानादिभवाभ्यासाद् माता-पित्रादिविषयो भवतीति दर्शयति—

**माया मे** इत्यादि । तत्र मातृविषयो रागः संसारस्वभावाद् उपकार-[7]कर्तृत्वाद्वोपजायते । रागे च सति मदीया माता क्षुत्-पिपासादिकां वेदनां मा

---

१. **वा** ख-चपुस्तके विना । २. **०निरूपणेऽनन्तार्थता** ख च, **०निरूपणादनन्तार्थता** ग । ३. **अनया** ख । ४. **किमित्याह** ख घ । ५. **परिः** ख घ ङ । ६. **सन्** इति क-घपुस्तकयोर्नास्ति । ७. **०कर्तृकत्वा०** ख ।

प्रापदिति अतः [१]कृषि-वाणिज्य-सेवादिकां प्राण्युपघातरूपां क्रियामारभते। तदुपघातकारिणि [२]च तस्यां वाऽकार्यप्रवृत्तायां द्वेष उपजायते, तद्यथा–**अनन्तवीर्य**प्रसक्तायां **रेणुका**यां **राम**स्येति। एवं **पिता मे,** पितृनिमित्तं राग-द्वेषौ भवतः, यथा **रामे**ण पितरि रागात् तदुपहन्तरि च द्वेषात् सप्तकृत्वः क्षत्रिया [३]विनिपातिताः, **सुभूमे**नापि त्रिःसप्तकृत्वो ब्राह्मणा इति। भगिनीमित्तेन च क्लेशमनुभवति प्राणी। तथा भार्यानिमित्तं राग-द्वेषोद्भवः, तद्यथा–[४]**चाणक्येन** भगिनी-भगिनी[५]पत्याद्यवज्ञातया भार्यया चोदितेन [६]**नन्दा**न्तिकं द्रव्यार्थ[७]मुपागतेन कोपाद् **नन्दकुलं** क्षयं निन्ये। तथा पुत्रा मे न जीवन्तीति आरम्भे प्रवर्तते। एवं दुहिता मे [८]दुःखितेति राग-द्वेषोपहतचेताः परमार्थमजानान[९]स्तद्विधत्ते येनैहिका-ऽऽमुष्मिकानपायानवाप्नो[१०]ति, तद्यथा–**जरासन्धो** जामातरि **कंसे** व्यापादिते स्वबलावलेपाद् अपसृत**वासुदेव**पदानुसारी सबल-वाहनः क्षयमगात्। स्नुषा मे न [११]जीवतीत्यारम्भादौ प्रवर्तते। सखि-स्वजन-सङ्ग्रन्थ-संस्तुता मे, **सखा** मित्रम्, **स्वजनः** पितृव्यादिः, **सङ्ग्रन्थः** स्वजनस्यापि स्वजनः पितृव्य-पुत्रशालादिः, **संस्तुतः** भूयोभूयोदर्शनेन परिचितः, अथवा पूर्वसंस्तुतो माता-पित्रादिरभिहितः, पश्चात्संस्तुतः शालकादिः, स इह ग्राह्यः, स च मे दुःखित इति परितप्यते। **विविक्तं** शोभनं प्रचुरं वा **उपकरणं** हस्त्यश्व-रथा-ऽऽसन-मञ्चकादि, **परिवर्तनं** द्विगुण-[१२]त्रिगुणादिभेदभिन्नं तदेव, **भोजनं** मोदकादि, **आच्छादनं** पट्टयुग्मादि, तच्च **मे** भविष्यति नष्टं वा।

[१३]**इच्चत्थ**मिति एवमर्थं गृद्धो लोकः तेष्वेव माता-पित्रादिरागादि-निमित्तस्थानेष्वामरणं प्रमत्तः 'ममेदम्, अहमस्य स्वामी पोषको वा' इत्येवं मोहितमनाः वसेत् तिष्ठेदिति, उक्तं च–

---

१. **कृषी०** ख। २. **वा** ख। ३. **व्यापादिताः** ख च। ४. **चाणाक्येन** खप्रतिमृते। ५. **०पत्यवज्ञातया** घ ङ। ६. **नन्दान्तिके** क। ७. **०मुपगतेन** च। ८. **दुःखिनीति** ख च। ९. **०स्तत्तद्विधत्ते** ख च। १०. **०ति यथा** ख। ११. **जीवन्तीत्यारम्भादौ** च। १२. **०त्रिगुणादिभेदं तदेव** ख च। १३. **इच्चत्थं गढिए इति एवमर्थं** ख, **एच्चत्थमित्यादि एवमर्थं** घ ङ **इच्चत्थमिति इत्येवमर्थं** च।

पुत्रो मे भ्राता मे स्वजनो मे गृह-कलत्रवर्गो मे ।
इति कृतमेमेशब्दं पशुमिव मृत्युर्जनं हरति ॥
*पुत्र-कलत्र-परिग्रहममत्वदोषैर्नरो व्रजति नाशम् ।*
कृमिक इव कोशकारः परिग्रहाद्दुःखमाप्नोति ॥ [ ]

अमुमेवार्थं **निर्युक्तिकारो** गाथाद्वयेनाह—

**संसारं छेत्तुमणो कम्मं उम्मूलए तयट्ठाए ।**
**उम्मूलेज्ज [1]कसाए तम्हा उ चएज्ज [2]सयणाई ॥१९६॥**

**माया मे त्ति पिया मे भगिणी भाया य पुत्तदारं मे ।**
**अत्थम्मि चेव गिद्धा जम्मण-[3]मरणाणि [4]पावंति ॥१९७॥** छ ॥

[5]**संसारं छेत्तुमणो०** गाहा, **माया** [6]**मे०** त्ति गाहा । संसारं नारक-तिर्यङ्-नरा-ऽमरलक्षणं माता-पितृ-भार्यादिस्नेहलक्षणं वा छेत्तुमनाः उन्मुमूलयिषुरष्टप्रकारं कर्मोन्मूलयेत् । तदुन्मूलनार्थं च तत्कारण[7]भूतान् कषायानुन्मूलयेत् । कषाया-पगमनाय च माता-पित्रादिगतं स्नेहं जह्यात् ॥ [8]यतो माता-पित्रादिसंयोगा-भिलाषिणः अर्थे रत्न-कुप्यादिके गृद्धाः अध्युपपन्नाः जन्म-जरा-मरणादिकानि दुःखान्यसुभृतः प्राप्नुवन्तीति गाथाद्वयार्थः ॥१९६-१९७॥

तदेवं कषायेन्द्रियप्रमत्तो माता-पित्राद्यर्थमर्थोपार्जन-रक्षणतत्परो दुःखमेव [9]केवलमवाप्नोतीत्याह—

[10]**अहो** इत्यादि । अहश्च सम्पूर्णं रात्रिं च, चशब्दात् [11]पक्षं मासं [12]च निवृत्तशुभाध्यवसायः [13]परि समन्तात् तप्यमानः परितप्यमानः सन् [14]तिष्ठति, *तद्यथा*—

---

१. **कसाया** ख ज झ ञ । २. **सयणाइं** क ख ज, **सयणादी** ञ । ३. **०मरणाइँ** ञ । ४. **पावंति ॥१९७॥ छ ॥ द्वि० अध्ययने प्रथमोद्देशकः** झ । ५. **संसारं० गाहा** । ख । ६. **मे० गाहा** ख च । ७. **०भूतांश्च कषाया०** क । ८. **यस्माद् माता०** ख च । ९. **केवल-मनुभवतीत्याह** ख च, **केवलमाप्नोतीत्याह** ग ङ । १०. **अहो म( य ) इत्यादि** क । ११. **पक्षं च मासं** ख । १२. **वा** क ग । १३. **परिः** ङ । १४. **समुत्ति( त्ति? )ष्ठति**, क, **समनुतिष्ठति** ख ।

**कइया वच्चइ सत्थो ? किं भंडं ? कत्थ ? [१]कित्तियं भूमिं ? ।**
**को कयविक्कयकालो ? [२]निव्विस्सइ किं कहिं [३]केण ? ॥** [ ] इत्यादि ।

स च परितप्यमानः किम्भूतो भवतीति ? आह—**काले**त्यादि । **कालः** कर्तव्यावसरः, [४]तद्विपरीतः **अकालः**, सम्यग् उत्थातुम् अभ्युद्यन्तुं शीलमस्येति **समुत्थायी,** इति पदार्थः । वाक्यार्थस्तु—'काले कर्तव्यावसरे [५]अकाले [६]तद्विपर्यासे समुत्तिष्ठते [७]अभ्युद्यतमनुष्ठानं करोति तच्छीलश्चेति, कर्तव्यावसरे न करोति अन्यदा च विदधातीति । यथा [८]वा काले करोत्येवमकालेऽपीति, यथा वाऽनवसरे न करोत्येवमवसरेऽपीति, अन्यमनस्कत्वाद् अपगतकाला-ऽकालविवेक इति भावना, यथा **प्रद्योतेन मृगापति**रपगतभर्तृका सती ग्रहणकालमतिवाह्य कृत-प्राकारादिरक्षा जिघृक्षितेति । यस्तु पुनः सम्यक् कालोत्थायी भवति स यथाकालं परस्परानाबाधया [९]सर्वाः क्रियाः करोतीति, तदुक्तम्—

**मासैरष्टभिरह्ना च, पूर्वेण [१०]वयसाऽऽयुषः ।**
**तत् कर्तव्यं मनुष्येण [११]येस्यान्ते सुखमेधते ॥** [ ]

धर्मानुष्ठानस्य च न [१२]कश्चिदकालो मृत्योरिवेति । किमर्थं पुनः काला-ऽकालसमुत्थायी भवतीति ? आह—

**संजोगट्ठी,** संयुज्यते संयोजनं वा संयोगः, अर्थः प्रयोजनम्, सोऽस्या-स्तीति संयोगार्थी । [१३]तत्र धन-धान्य-[१४]हिरण्य-द्विपद-चतुष्पद-राज्य-भार्यादिसंयोगः तेनार्थी तत्प्रयोजनी, अथवा शब्दादि[१५]विषयसंयोगो माता-पित्रादिभिर्वा तेनार्थी काला-ऽकालसमुत्थायी भवतीति । किञ्च—

**अट्ठालोभी,** अर्थः रत्न-कुप्यादिः तत्र आ समन्ताल्लोभः अर्थालोभः, स विद्यते यस्येत्यसावपि काला-ऽकालसमुत्थायी भवति, **मम्मण**वणिग्वत्,

---

१. **केत्तिया भूमी ?** ख च । २. **निव्विसई** ग । ३. **केण ॥' मित्यादि** ख-चप्रतीं विना । ४. **तद्विपर्यासः** ख च । ५. **अकालेन** ग च । ६. **तद्विपर्यासेन** खआदर्शं विना । ७. **अभ्युद्यममनुष्ठानं** ख ग च । ८. **वा** इति ख-चपुस्तकयोर्नास्ति । ९. **सर्वां क्रियां** क । १०. **वयसाऽऽयुषा** कप्रतिमृते । ११. **येनान्ते** घ ङ च । १२. **कश्चित् कालो** घ ङ । १३. **तत्र** इति खप्रतौ नास्ति । १४. **०हिरण्य०** इति क-घ-ङ पुस्तकेषु नोपलभ्यते । १५. **०विषयः संयोगो** ख ग च ।

तथाहि—असावतिक्रान्तार्थोपार्जनसमर्थयौवनवया[1] जल-स्थलपथप्रेषितनानादेशभाण्डभृतबोहित्थ[2]-गन्त्रिकोष्ट्रमण्डलिकासम्भृतसम्भारोऽपि प्रावृषि सप्तरात्रावच्छिन्नमुशलप्रमाणजलधारावर्षनिरुद्धसकलप्राणिगण[3]सञ्चारमनोरथायां महानदीजलपूरानीतकाष्ठानि जिघृक्षुरुपभोगधर्मावसरे निवृत्तापराशेषशुभपरिणामः केवलमर्थोपार्जनप्रवृत्त इति, उक्तं च—

**उक्खणइ खणइ निहणइ रत्तिं न सुयइ दिया वि य ससंको ।**
**लिम्पइ ठएइ[4] सययं लंछियपडिलंछियं कुणइ ॥**
**भुंजसु, न ताव[5] रिक्को[6] जेमेउं, न वि य अज्ज मज्जीहं ।**
**न वि य वसीहामि घरे कायव्वमिणं बहुं अज्ज ॥ [ ]**

पुनरपि लोभिनोऽशुभव्यापारानाह[7]—**आलुंपे** आ समन्ताद् लुम्पतीत्यालुम्पः । स हि लोभाभिभूतान्तःकरणोऽपगतसकलकर्तव्याऽकर्तव्यविवेको[8]ऽर्थलोभैकदत्तदृष्टिरैहिका-ऽऽमुष्मिकविपाककारिणीर्निर्लाञ्छन-गलकर्तनचौर्यादिकाः क्रियाः करोति । अन्यच्च—

**सहसक्कारे[9],** करणं कारः, असमीक्षितपूर्वा-ऽपरदोषं सहसा करणं सहसाकारः स विद्यते यस्येति **अर्शआदिभ्योऽच्[10]** [पा० ५-२-१२७], अथवा छान्दसत्वात् कर्तर्येव घञ् करोतीति कारः, तथाहि—लोभतिमिराच्छादितदृष्टिरर्थैकमनाः शकुन्तवत् शराघातमनालोच्य पिशिताभिलाषितया सन्धिच्छेदनादितो विनश्यति, लोभाभिभूतो ह्यर्थैकदृष्टिस्तन्मनास्तदर्थोपयुक्तोऽर्थमेव पश्यति, नापायान्, आह च—

**विणिविट्ठचित्ते** विविधम् अनेकधा निविष्टं स्थितमवगाढमर्थोपार्जनोपाये माता-पित्राद्यभिष्वङ्गे वा शब्दादिविषयोपभोगे वा चित्तम् अन्तःकरणं यस्य स तथा । पाठान्तरं वा **विणिविट्ठचेट्ठे[11]** त्ति विशेषेण निविष्टा काय-वाङ्-मनसां

---

१. **०यौवनतया** क । २. **०बोधिस्थ-गन्त्रि०** घ ङ च विना । ३. **०प्राणिजनसञ्चार०** ख । ४. **ठवेइ** ख, **ठएज्ज** च । ५. "**न ताव रिक्को** न निराकुलः" स०वि०प० । ६. "**रिक्क** इति समथो(र्थो)[ऽ]व्याकुलो वा" जै०वि०प० । ७. **०व्यापारमाह** ग । ८. **०गतकर्तव्या०** ख च । ९. **सहसक्कारो** ख । १०. **अर्शादिभ्यो** ख । ११. **विणिविट्ठचिट्ठे** घ ङ च ।

परिस्पन्दात्मिका[१]ऽर्थोपार्जनोपायादौ चेष्टा यस्य स विनिविष्टचेष्टः ।

तदेवं माता-पित्रादि[२]संयोगार्थी अर्थालोभी आलुम्पः सहसाकारो विनिविष्टचित्तो विनिविष्टचेष्टो वा किम्भूतो भवतीति ? आह—

[३]**एत्थ** इत्यादि । **अत्र** अस्मिन् माता-[४]पित्रादौ शब्दादिविषयसंयोगे वा विनिविष्टचित्तः [५]सन् पृथ्वीकायादिजन्तूनां यत् शस्त्रं उपघातकारि तत्र पुनः प्रवर्त[६]ते एवं पौनःपुन्येन शस्त्रे प्रवृत्तो भवति यदि पृथिवीकायादिजन्तूनामुपघाते वर्तते, तथाहि—**शसु हिंसायाम्** [पा०धा० ७२४] इत्यस्मात् शस्यते हिंस्यत इति करणे ष्ट्रन् विहितः, [७]तच्च स्वकाय-[८]परकायादिभेदभिन्नमिति । पाठान्तरं वा **एत्थ सत्ते पुणो पुणो,** अत्र माता-पितृ-शब्दादिसंयोगे [९]लोभार्थी सन् सक्तः गृद्धः अध्युपपन्नः पौनःपुन्येन विनिविष्टचेष्ट आलुम्पकः [१०]सहसाकारः कालाकालसमुत्थायी वा भवतीति ।

एतच्च साम्प्रतेक्षिणामपि [११]युज्येत यद्यजरामरत्वं [१२]दीर्घायुष्कं वा स्यात्, तच्चोभयमपि नास्तीत्याह—

**[ सू०६४ ] अप्पं च खलु आउं इहमेगेसिं माणवाणं । तं जहा—सोतपण्णाणेहिं परिहायमाणेहिं चक्खुपण्णाणेहिं परिहायमाणेहिं घाणपण्णाणेहिं परिहायमाणेहिं रसपण्णाणेहिं परिहायमाणेहिं फासपण्णाणेहिं परिहायमाणेहिं अभिकंतं च खलु वयं सपेहाए ततो से एगया मूढभावं जणयंति ।**

**जेहिं वा सद्धिं संवसति ते व णं एगया णियगा पुव्विं परिवदंति, सो वा ते णियगे पच्छा परिवदेज्जा । णालं ते**

---

१. ०ऽर्थोपार्जनक्रियोपायादौ ख । २. ०संयोगार्थमर्थालोभी क । ३. इत्थ ग च । ४. ०पित्रादौ विषय० घ । ५. स पृथिवी० ख । ६. ०ते पौनःपुन्येन शस्त्रे प्रवृत्तो भवति, यदि वा पृथिवी० ख । ७. तत् स्वकाय० क । ८. ०परकायभेद० ग । ९. लोभार्थासत्त( र्थी सत्ते ?) क । १०. सहसाकारकः ग घ ङ । ११. युज्यते क घ ङ । १२. दीर्घायुष्कत्वं ख ।

**तव ताणाए वा सरणाए वा, तुमं पि तेसिं णालं ताणाए वा सरणाए वा । से ण हासाए, ण किड्डाए, ण रतीए, ण विभूसाए ।**

**अप्पं च** इत्यादि । [1]अल्पं [2]स्तोकम्, **च**शब्दः अधिकवचनः, **खलुः** अवधारणे, आयुः इति भवस्थितिहेतवः कर्मपुद्गलाः, इह इति संसारे मनुष्यभवे वा एकेषां केषाञ्चिदेव मानवानां मनुजानामिति पदार्थः । वाक्यार्थस्तु इह अस्मिन् संसारे केषाञ्चिन्मनुजानां क्षुल्लकभवोपलक्षितान्तर्मुहूर्तमात्रम् अल्पं स्तोकमायुर्भवति, **च**शब्दाद्, उत्तरोत्तरसमयादिवृद्ध्या पल्योपमत्रयावसानेऽप्यायुषि खलुशब्दस्यावधारणार्थत्वात् संयमजीवितमल्पमेवेति, तथाहि—अन्तर्मुहूर्तादारभ्य देशोनपूर्वकोटिं यावत् संयमायुष्कम्, तच्चाल्पमेवेति, अथवा त्रिपल्योपमस्थितिकमप्यायुरल्पमेव, यतस्तदप्यन्तर्मुहूर्तमपहाय सर्वमपवर्तते, उक्तं च—

**अद्धा [3]जोउक्कोसे बंधित्ता भोगभूमिएसु लहुं ।**
**सव्वप्पजीवियं वज्जयित्तु उव्वट्टिया दोण्हं ॥ [ पंचसं० ३२३ ]**

[4]अस्या अयमर्थः—उत्कृष्टे योगे बन्धाध्यवसायस्थाने आयुषो यो बन्धकालोऽद्धा उत्कृष्ट एव, [5]तं बद्ध्वा, क्व ? भोगभूमिकेषु **देवकुर्वा**[6]दिजेषु, तस्य क्षिप्रमेव सर्वाल्पमायुर्वर्जयित्वा द्वयोः तिर्यङ्-मनुष्ययोरपवृत्तिका अपवर्तनं भवति, एतच्चापर्याप्तकान्त[7]र्मुहूर्तान्तर्द्रष्टव्यम्, तत [8]ऊर्ध्वमनपर्वतनमेवेति ।

सामान्येन [9]चायुः सोपक्रमायुषां सोपक्रमम्, निरुपक्रमायुषां निरुपक्रमम् । यदा ह्यसुमान् स्वायुषस्त्रिभागे त्रिभागत्रिभागे वा जघन्यत एकेन द्वाभ्यां वा उत्कृष्टतः सप्तभि[10]रष्टभिर्वाऽऽकर्षैरन्तर्मुहूर्तप्रमाणेन कालेनाऽऽत्मप्रदेश[11]रचनानाडिकान्तर्वर्तिन आयुष्ककर्मवर्गणापुद्गलान् प्रयत्नविशेषेण विधत्ते तदा

---

१. **अल्पं** च ग । २. **स्तोकं च, चशब्दः अल्पवचनः** ख । ३. **जोगुक्कोसे** ख ग च, **जोगुक्कोसं** घ ङ । ४. **अस्यायमर्थः** कप्रत्या विना । ५. **तद्** क घ ङ । ६. **देवकुर्वादिषु** क । ७. **०र्मुहूर्तकान्तर्द्र०** क, **०र्मुहूर्तकान्तं द्र०** घ ङ । ८. **ऊर्द्ध०** ख ग च । ९. **वाऽऽयुः** ग च । १०. **०रष्टभिर्वा वर्षै०** घ च । ११. **०रचनान्तर्वर्तिन** ख ।

निरुपक्रमायुर्भवति[1], अन्यदा तु सोपक्रमायुष्क इति । उपक्रमश्चोपक्रमण[2]-कारणैर्भवति, तानि चामूनि—

**दंड कस सत्थ रज्जू अग्गी उदगपडणं विसं वाला ।**
**सीउण्हं अरइ भयं खुहा पिवासा य वाही य ॥**
**मुत्त-पुरीसनिरोहे जिण्णाजिण्णे य भोयणे बहुसो ।**
**घंसण घोलण पीलण आउस्स उवक्कमा एए ॥** [ ]

उक्तं च—

**स्वतोऽन्यत इतस्ततोऽभिमुखधावमानापदामहो**
**निपुणता नृणां क्षणमपीह यज्जीव्यते ।**
**मुखे फलमतिक्षुधा सरसमल्पमायोजितं,**
**कियच्चिरमचर्वितं[3] दशनसङ्कटे स्थास्यति ?॥**
**उच्छ्वासावधयः प्राणाः, स चोच्छ्वासः समीरणः ।**
**समीरणाच्चलं नान्यत्[4], क्षणमप्यायुरद्भुतम् ॥** [ ] इत्यादि ।

येऽपि दीर्घायुष्कस्थितिका उपक्रमणकारणाभावे[5] आयुःस्थितिमनुभवन्ति तेऽपि मरणादप्यधिकां जराभिभूतविग्रहा[6] जघन्यतमामवस्थामनुभवन्तीति[7] **तद्यथे**त्यादिना दर्शयति—

**सोयपरिण्णाणेहिं**[8] इत्यादि **ततो से एगया मूढभावं जणयंति**[9] त्ति यावत् । शृणोति भाषापरिणतान् पुद्गलानिति श्रोत्रम् । तच्च कदम्बपुष्पाकारं द्रव्यतः, भावतो भाषाद्रव्यग्रहणलब्ध्युपयोगस्वभावमिति । तेन श्रोत्रेण परिः[10] समन्ताद् घट-पटशब्दादिविषयाणि ज्ञानानि परिज्ञानानि तैः श्रोत्रपरिज्ञानैर्जरा-प्रभावात् परिहीयमाणैः सद्भिस्ततोऽसौ प्राणी एकदा वृद्धावस्थायां रोगोदयावसरे वा मूढभावं मूढतां कर्तव्या-ऽकर्तव्याज्ञतामिन्द्रियपाटवाभावाद् आत्मनो जनयति, हिता-ऽहितप्राप्ति-परिहारविवेकशून्यतामापद्यत इत्यर्थः । जनयन्ति इति चैकवचनावसरे **तिङां तिङो भवन्ति** [ ] इति बहुवचनमकारि, अथवा तानि वा

---

१. **०र्भवतीति** कप्रतेर्विना । २. **०श्चोपक्रमकारणैः०** ग । ३. **०चर्बितं** घ ङ च । ४. **नास्ति, क्षण०** ख । ५. **उपक्रमकारणा०** ग । ६. **०जराभिभूतविग्रहा** इति पाठः ख आदर्शे न वर्तते । ७. **जघन्यतरा०** ख च । ८. **सोयपण्णाणेहिं** क ख ग । ९. **जणयंतीति यावत्** ख च । १०. **परि** ख ग ।

[1]श्रोत्रविज्ञानानि परिक्षीयमाणान्यात्मनः सदसद्विवेकविकलतामापादयन्तीति, श्रोत्रादिविज्ञानानां च तृतीया प्रथमार्थे सुब्व्यत्ययेन द्रष्टव्येति । एवं चक्षुरादिविज्ञानेष्वपि योज्यम् । अत्र च करणत्वादिन्द्रियाणामेवं [2]सर्वत्र द्रष्टव्यम्—श्रोत्रेणात्मनो विज्ञानानि, चक्षुषात्मनो विज्ञानानीति । ननु च तान्येव द्रष्टॄणि कुतो न [3]भवन्ति ? इत्युच्यते—अशक्यमेवं विज्ञातुं तद्विनाशे तदुपलब्धार्थस्मृत्यभावात्, दृश्यते च [4]हृषीकोपघातेऽपि तदुपलब्धार्थस्मरणम्, तद्यथा—धवलगृहान्तर्वर्तिपुरुषपञ्चवातायनोपलब्धार्थस्य तदन्यतरस्थगनेऽपि तदुपपत्तिरिति, तथाहि—अहमनेन श्रोत्रेण चक्षुषा वा मन्दमर्थमुपलभे अनेन च स्फुटतरमिति स्पष्टैव करणत्वावगतिरक्षाणाम् । यद्येवमन्यान्यपि करणानि सन्ति तानि किं नोपात्तानि ? कानि पुनस्तानि ? [5]उच्यते, वाक्-पाणि-पाद-पायु-उपस्थ-मनांसि [6]वचना-ऽऽदान-विहरण-उत्सर्गा-ऽऽनन्द-सङ्कल्पव्यापाराणि, ततश्चैतेषामात्मोपकारकत्वेन करणत्वम्, करणत्वादिन्द्रियत्वमिति, एवं चैकादशेन्द्रियसद्भावे सति पञ्चानामेवोपादानं किमर्थमिति ? आहाचार्यः—नैष दोषः, [7]इह ह्यात्मनो विज्ञानोत्पत्तौ यत् प्रकृष्टमुपकारकं तदेव करणत्वाद् इन्द्रियम्, एतानि तु वाक्-पाण्यादीनि नैवात्मनोऽनन्य[8]साधारणतया करणत्वेन व्याप्रियन्ते, अथ यां काञ्चन क्रिया-मुपादाय करणत्वमुच्यते एवं तर्हि भ्रूदरादेरप्युत्क्षेपादिसम्भवात् करणत्वं स्यात्, किञ्च—इन्द्रियाणां स्वविषये नियतत्वाद् नान्येन्द्रियकार्यमन्यदिन्द्रियं कर्तुमलम्, तथाहि—चक्षुरेव रूपावलोकनायालम्, न तदभावे श्रोत्रादीनि, यस्तु रसाद्युपलम्भे शीतस्पर्शादेरप्युपलम्भः स सर्वव्यापित्वात् स्पर्शनेन्द्रियस्येत्यनाशङ्कनीयम्, इह [9]तु पुनः पाणिच्छेदेऽपि तत्कार्यस्यादानलक्षणस्य दशनादिनाऽपि निर्वर्त्यमानत्वाद् यत्किञ्चिदेतत्, मनसस्तु सर्वेन्द्रियोपकारकत्वाद् अन्तःकरणत्वमिष्यत एव, तस्य च बाह्येन्द्रियविज्ञानोपघातेनैव गतार्थत्वाद् न पृथगुपादानमिति, प्रत्येकोपादानं च क्रमोत्पत्तिविज्ञानोपलक्षणार्थम्,

---

१. **श्रोत्रपरिज्ञानानि** ख । २. **सर्वत्र** इति चपुस्तके नास्ति । ३. **भवन्ति ? उच्यते** ख च । ४. "**हृषीकाणि इन्द्रियाणि**" स०वि०प० । ५. **उच्यन्ते** क-खप्रती विना । ६. **वचनान०** ग । ७. **इहात्मनो** क । ८. **०साधारणत्वेन व्याप्रि०** क ग । ९. **तु** इति खआदर्शे न विद्यते ।

तथाहि—येनैवेन्द्रियेण सह मनः संयुज्यते तदेवात्मीय[1]विषयग्रहणाय प्रवर्तते, नेतरदिति । ननु च दीर्घशष्कुलीभक्षणादौ पञ्चानामपि विज्ञानानां यौगपद्येनोपलब्धिरनुभूयते ? नैतदस्ति, केवलिनोऽपि [2]द्वावुपयोगौ न स्तः, आस्तां तावदारातीयभागदर्शिनः पञ्चोपयोगा इति, [3]एतच्चान्यत्र न्यक्षेण प्रतिपादितमिति नेह प्रतायते । यस्तु यौगपद्ये[4]नानुभवाभासः स द्राग्वृत्तित्वाद् मनसो भवतीति, उक्तं च—

**आत्मा सहैति मनसा मन इन्द्रियेण,**
**स्वार्थेन चेन्द्रियमिति क्रम एष शीघ्रः ।**
**योगोऽयमेव मनसः किमगम्यमस्ति ?**
**यस्मिन् मनो व्रजति तत्र गतोऽयमात्मा ॥** [ ]

इह चायमात्मा इन्द्रियलब्धिमान् आदित्सितजन्मो[5]त्पत्तिदेशे समयेनाहारपर्याप्तिं निर्वर्तयति, तदनन्तरमन्तर्मुहूर्तेन शरीरपर्याप्तिम्, ततोऽपीन्द्रियपर्याप्तिं तावतैव कालेन, तानि [6]च पञ्चेन्द्रियाणि स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्राणीति । तान्यपि द्रव्य-भावभेदात् प्रत्येकं द्विविधानीति । तत्र द्रव्येन्द्रियं निर्वृत्त्युपकरणभेदाद् द्विधा । निर्वृत्तिरप्यान्तर-बाह्यभेदाद् द्विधैव । निर्वर्त्यत इति निर्वृत्तिः । केन निर्वर्त्यते ? कर्मणा । तत्रोत्सेधाङ्गुलासङ्ख्येयभागप्रमितानां शुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेनावस्थिता या वृत्तिरभ्यन्तरा निर्वृत्तिः, तेष्वेवात्मप्रदेशेष्विन्द्रिय[7]व्यपदेशभाक्षु यः प्रतिनियतसंस्थानो निर्माणनाम्ना पुद्गलविपाकिना वर्धकिसंस्थानीयेनाऽऽरचितः कर्णशष्कुल्यादिविशेषः, अङ्गोपाङ्गनाम्ना [8]च निष्पादित इति बाह्यनिर्वृत्तिः । तस्या एव निर्वृत्तेर्द्विरूपाया, येनोपकारः क्रियते तदुपकरणम्, तच्चेन्द्रियकार्यसमर्थम्, [9]सत्यामपि [बाह्य-]निर्वृत्तावनुप[10]हतायां [च] [11]मसूराद्याकृतिरूपायां [आन्तर]निर्वृत्तौ [12]तस्योपघाताद् न पश्यति । तदपि निर्वृत्तिवद् द्विधा[13]—बाह्यमाभ्यन्तरं चेति । तत्राभ्यन्तर-मक्षणस्तावत्

१. ०**विषयगुणग्रहणाय** घ । २. **द्वावप्युपयोगौ** क घ । ३. **एतच्चान्यत्रान्यक्षेण** क ङ **एतच्च न्यक्षेण** ख, **एतच्चान्येक्ष( न्यक्षे )ण** ग । ४. ०**नानुभवभासः** ग । ५. ०**त्पत्तिप्रदेशे** ख । ६. **च** इति क-खप्रत्योर्नास्ति । ७. ०**व्यपदेशभाग् यः** ख घ ङ । ८. **तु** ख-चपुस्तके विना । ९. **तस्यामपि** ख । १०. ०**हतायामपि मसूरा०** ख घ ङ । ११. **मसूराकृति०** ङपुस्तकमृते । १२. "**तस्य** इति उपकरणस्य" जै०वि०प० । १३. **द्विधा । तत्रा०** कप्रतिं विना ।

कृष्णशुक्लमण्डलम्, बाह्यमपि पत्रपक्ष्मद्वयादि । एवं शेषेष्व-प्यायोजनीयमिति । भावेन्द्रियमपि लब्ध्युपयोगभेदाद् द्विधा । तत्र लब्धिः ज्ञान-दर्शनावरणीयक्षयोपशमरूपा यत्सन्निधानादात्मा द्रव्येन्द्रियनिर्वृत्तिं प्रति व्याप्रियते [1]तन्निमित्त आत्मनो मनःसाचिव्यादर्थग्रहणं प्रति व्यापार उपयोग इति । तदत्र सत्यां लब्धौ निर्वृत्त्युपकरणोपयोगाः, सत्यां च निर्वृत्तावुपकरणोपयोगौ, सत्युपकरण उपयोग इति । एतेषां च श्रोत्रादीनां [2]कदम्बक-मसूर-[3]कलम्बुकापुष्प-क्षुरप्र-नानासंस्थानताऽवगन्तव्येति । विषयश्च [4]श्रोत्रेन्द्रियस्य द्वादशभ्यो योजनेभ्य आगतं शब्दं गृह्णाति, चक्षुरप्येक[5]विंशतिषु लक्षेषु सातिरेकेषु व्यवस्थितं [6]प्रकाशकम्, [7]प्रकाश्यं तु सातिरेकयोजन[8]लक्षव्यवस्थितं रूपं गृह्णाति, शेषाणि तु नवभ्यो योजनेभ्य आगतं स्वविषयं गृह्णन्ति, जघन्यतस्त्वङ्गुलासङ्ख्येयभागविषयत्वं सर्वेषाम् । अत्र च **[9]सोयपरिन्नाणेहिं परिहाय[10]माणेही**त्यादि य उत्पत्तिं प्रति व्यत्ययेनेन्द्रियाणामुपन्यासः स एवमर्थो [11]द्रष्टव्यः—इह संज्ञिनः पञ्चेन्द्रियस्योपदेशदानेनाधिकृतत्वाद् उपदेशश्च श्रोत्रेन्द्रियविषय इति कृत्वा, तत्पर्याप्तौ च [12]सर्वेन्द्रियपर्याप्तिः सूचिता भवति ।

श्रोत्रादिविज्ञानानि च वयोऽतिक्रमे परिहीयन्ते, तदेवाह—**अभिकंत**मित्यादि । अथवा श्रोत्रादिविज्ञानैरपचितैः करणभूतैः सद्भिः **अभिकंतं च खलु वयं स पेहाए** । तत्र प्राणिनां कालकृता शरीरावस्था यौवनादिः वयः तज्जरामभि मृत्युं वा क्रान्तम् **अभिक्रान्तम्** । इह हि चत्वारि वयांसि कुमार-यौवन-मध्यम-वृद्धत्वानि, उक्तं च—

**प्रथमे वयसि नाधीतं, द्वितीये नार्जितं धनम् ।**
**तृतीये न तपस्तप्तं, चतुर्थे किं करिष्यति ? ॥** [ ]

तत्राऽऽद्य[13]वयोर्द्वयातिक्रमे [14]जराभिमुखमभिक्रान्तं वयो भवति । [15]अथवा

१. **तन्निमित्तमात्मनो** घ । २. **कदम्ब-मसूर०** ख । ३. "**कलम्बुकापुष्पं** काहलिका" स०त्रि०प० । ४. **श्रोत्रस्य** ख । ५. **०विंशतिलक्षेषु** ख । ६. **प्रकाशम्** ग घ, "**प्रकाशम्** इति आदित्यादि" जै०वि०प० । ७. **प्राकाश्यं** च । ८. **०लक्षस्थितं** घ ङ च । ९. **सोयपन्नाणेहिं** घ-ङपुस्तके विना । १०. **०माणेहिं तीत्यादि** ख । ११. **प्रतिपत्तव्यः** ग । १२. **सर्वेन्द्रियसम्प्राप्तिः** ख । १३. **०वयोऽतिक्रमे** ख ङ । १४. **जरामभिमुख०** क घ ङ । १५. **अन्यथा वा** च ।

त्रीणि वयांसि कौमार-यौवन-स्थविरत्वभेदात्, उक्तं च—

**पिता रक्षति कौमारे, भर्ता रक्षति यौवने ।**
**पुत्राश्च स्थाविरे भावे, न स्त्री स्वातन्त्र्यमर्हति ॥** [ मनुस्मृतौ ९।३ ]

अन्यथा वा त्रीणि वयांसि बाल-मध्यत्व-वृद्धत्वभेदात्, उक्तं च—

**आ षोडशाद् भवेद् बालो, यावत् क्षीरान्नवर्तकः ।**
**मध्यमः सप्ततिं यावत्, परतो वृद्ध उच्यते ॥** [ ]

एतेषु च वयस्सु सर्वेष्वपि योपचयवत्यवस्था [1]तामभिक्रान्तोऽभिक्रान्तवया इत्युच्यते । **चः** समुच्चये, न केवलं श्रोत्र-चक्षुः-घ्राण-रसन-स्पर्शनविज्ञानैर्व्यस्तसमस्तैर्देशतः सर्वतो वा परिहीयमाणैर्मौढ्यमापद्यते । वय[2]श्चाभिक्रान्तं **प्रेक्ष्य** पर्यालोच्य **स** इति प्राणी, **खलुः** इति विशेषणे, विशेषेण अत्यर्थं मौढ्यमापद्यत इति, आह च—**तओ से** इत्यादि । **ततः** इति तस्मादिन्द्रियविज्ञानापचयाद् [3]वयोऽतिक्रमणाद्वा **स** इति प्राणी **एकदा** इति वृद्धावस्थायां **मूढभावो** मूढत्वं किङ्कर्तव्यताभावमात्मनो जनयति । अथवा **से** तस्यासुभृतः श्रोत्रादिविज्ञानानि परिहीयमाणानि मूढभावं जनयन्तीति ।

स एवं वार्द्धक्ये मूढस्वभावः सन् प्रायेण लोकावगीतो [4]भवतीत्याह—**जेहिं वे**त्यादि । **वा**शब्दः पक्षान्तरद्योतकः, आस्तां तावदपरो लोकः यैः पुत्रकलत्रादिभिः सार्धं सह संवसति त एव भार्या-पुत्रादयो **णा**मिति वाक्यालङ्कारे **एकदा** इति वृद्धावस्थाया[5]म् **नियगा** आत्मीया ये तेन समर्थावस्थायां पूर्वमेव पोषिताः ते तं **परिवदन्ति** [6]परि समन्ताद् [7]वदन्ति परिवदन्ति यथा—अयं न म्रियते [8]नापि मञ्चकं ददाति । यदि वा परिवदन्ति परिभवन्तीत्युक्तं भवति । अथवा किमनेन वृद्धेन ? [9]इत्येवं परिवदन्ति । न केवलमेषाम्, तस्यात्माऽपि तस्यामवस्थायामवगीतो भवतीति, आह च—

---

१. **तामतिक्रान्तवया** क ख, **तामभिक्रान्तोऽतिक्रान्तवया उच्यते** ग, **तामतिक्रान्तोऽतिक्रान्तवया** च । २. ०**श्चातिक्रान्तं** घआदर्शमृते । ३. **वयोऽपक्रम०** ग । ४. **भवतीत्याह च** ख । ५. ०**म् ते नियगा** ख, ०**म् निजका** ग । ६. **परिः** ग घ । ७. **वदन्ति यथा** खप्रत्यां विना । ८. **न च** क घ ङ । ९. **इत्येवं वदन्ति** क घ ङ ।

**वलिसन्ततमस्थिशेषितं, शिथिल[१]स्नायुवृतं [२]कडेबरम् ।**
**स्वयमेव पुमान् जुगुप्सते, किमु [३]कान्ता कमनीयविग्रहा ? ॥ [ ]**

[४]गोपाल-बाला-ऽङ्गनादीनां [५]च दृष्टान्तद्वारेणोपन्यस्तोऽर्थो बुद्धिमधितिष्ठतीति अतस्तदाविर्भावनाय कथानकम्—कौशाम्ब्यां नगर्यामर्थवान् बहुपुत्रो धनो नाम सार्थवाहः । तेन चैकाकिना नानाविधैरुपायैः स्वापतेयमुपार्जितम् । तच्चाशेषदुःखितबन्धुजन-स्वज[६]न-पुत्र-मित्र-कलत्रादिभोग्यतां निन्ये, ततोऽसौ कालपरिपाकवशाद् वृद्धभाव[७]मुपगतः सन् पुत्रेषु सम्यक्पालनोपचितकला-कुशलेषु समस्तकार्यचिन्ताभारं [८]निक्षिक्षेप । तेऽपि [९]च वयमनेनेदृशीमवस्थां नीताः सर्वजनाग्रेसरा विहिताः इति कृतोपकाराः सन्तः कुलपुत्रतामवलम्बमानाः स्वतः क्वचित् कार्यव्यासङ्गात् स्वभार्याभिस्त[१०]मकल्यं वृद्धं [११]प्रत्यजजागरन् । [१२]ता अप्युद्वर्तन-स्नान-भोजनादिना यथाकालमक्षूणं विहितवत्यः । ततो गच्छत्सु दिवसेषु वर्द्धमानेषु पुत्रभाण्डेषु प्रौढीभवत्सु भर्तृषु जरद्वृद्धे च विवशकरणपरिचारे सर्वाङ्गकम्पिनि गलदशेष[१३]श्रोतसि सति शनैः शनैरुचितमुपचारं शिथिलतां निन्युः, असावपि मन्दप्रतिजागरणतया [१४]चित्ताभिमानेन विश्रसया च सुतरां दुःख-सागरावगाढः सन् पुत्रेभ्यः स्नुषाक्षूणान्याचचक्षे । ताश्च स्वभर्तृभिश्चेखिद्यमानाः सुतरामुपचारं परिहृतवत्यः, सर्वाश्च पर्यालोच्यैकवाक्यतया स्वभर्तृनभिहितवत्यः क्रियमाणेऽप्ययं प्रतिजागरणे वृद्धभावाद् विपरीतबुद्धितयाऽपह्नुते, यदि भवतामप्यस्माकमुपर्य[१५]विश्रम्भस्ततोऽन्येन विश्वसनीयेन निरूपयत । तेऽपि तथैव चक्रुः । तास्तु तस्मिन्नवसरे [१६]सर्वा अपि सर्वाणि कार्याणि यथाऽवसरं विहितवत्यः । [१७]असावपि पुत्रैः पृष्टः पूर्वविरू(रु)क्षितचेता[१८]स्तथैव ता अपवदति—नैता मम किञ्चित् सम्यक् [१९]कुर्वन्तीति [२०]तैश्च प्रत्ययिकवचनादवगततत्त्वैर्यथा

---

१. **०स्नायुधृतं** च । २. **कलेवरम्** घ ङ। ३. **कान्ताः कमनीयविग्रहाः** ग । ४. **गोपाला-ऽङ्गनां०** क घ ङ। ५. **च** इति खपुस्तके नास्ति । ६. **०न-पुत्र-कलत्रा०** ख, **०न-मित्र-पुत्र-कलत्रा०** ग, **०न-मित्र-कलत्र-पुत्रादि०** च। ७. **०मुपागतः** घ ङ। ८. **निचिक्षेप** ख ग च । ९. **च** इति कप्रतावेव । १०. "**अकल्य[ म् ]** इति सरोगम्" जै०वि०प० । ११. **प्रत्यजीजागरन्** क-चप्रती विना । १२. **ता अमुमुद्वर्तन०** घ ङ। १३. **०श्रोतसि शनैः** ख । १४. **चिंताभिमानेन** च। १५. **विस्रम्भ०** क-खपुस्तके ऋते । १६. **सर्वा एवं सर्वाणि** ख च । १७. **असौ पुत्रैः** क घ ङ। १८. **०स्तथैवैता अप०** घ । १९. **कुर्वन्ति । तैस्तु** ख च । २०. **तैस्तु** ग ।

अयमुपचर्यमाणोऽपि वार्द्धक्याद् रोरुद्यते, अतस्तैरप्यवधीरितः[१], अन्येषामपि यथावसरे[२] तद्भण्डन[३]स्वभावतामा[४]चचक्षिरे । ततोऽसौ पुत्रैरवधीरितः स्नुषाभिः परिभूतः परिजनेनावगीतो[५] वाङ्मात्रेणापि[६] केनचिदप्यननुवर्त्यमानः सुखिते[७] दुःखितः कष्टतरामायुःशेषामवस्थामनुभवतीति ।

एवमन्योऽपि जराभिभूतविग्रहस्तृणकुब्जीकरणेऽप्यसमर्थः[८] सन् स्वकार्यैकनिष्ठाल्लोकात्[९] परिभवमा[१०]प्नोतीति, आह[११]—

**गात्रं सङ्कुचितं गतिर्विगलिता दन्ताश्च नाशं गता,**
**दृष्टिर्भ्रश्यति रूपमेव ह्रसते वक्त्रं च लालायते ।**
**वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते,**
**धिक् कष्टं जरयाऽभिभूतपुरुषं पुत्रोऽप्यवज्ञायते ॥** [ ] इत्यादि ।

तदेवं जराभिभूतं पुरुषं[१२] निजाः परिवदन्ति । असावपि परिभूयमानस्तद्विरक्तचेतास्त[१३]दपवादान् जनायाचष्टे, आह च—**सो वा** इत्यादि । **वा**शब्दः पूर्वापेक्षया पक्षान्तरं दर्शयति, ते वा निजास्तं परिवदन्ति, स वा जराजर्जरितदेहः तान् निजाननेकदोषोद्‍घट्टनतया[१४] **परिवदेत्** निन्देत् । अथवा विद्यमानार्थतया तानसाववगायति परिभवतीत्यर्थः । येऽपि पूर्वकृतधर्मवशात् तं वृद्धं न परिवदन्ति तेऽपि तद्दुःखापनयनसमर्था[१५] न भवन्तीति[१६], आह च—

**नाल**मित्यादि । नालं न समर्थाः ते पुत्र-कलत्रादयः तव इति प्रत्यक्षभावमुपगतं वृद्धमाह, **त्राणाय शरणाय वेति** । तत्राऽऽपत्तरणसमर्थं त्राणमुच्यते, यथा महाश्रोतोभि[१७]रुह्यमानः सुकर्णधाराधिष्ठितं प्लवमासाद्यापस्तरतीति । शरणं पुनर्यदवष्टम्भाद् निर्भयैः स्थीयते तदुच्यते[१८], तत् पुनर्दुर्गं पर्वतः पुरुषो वेति ।

---

१. **अतस्तैरवधी०** ख, **ततस्तैरप्य०** ग च । २. **कथावसरे** क ग घ । ३. **तद्भटन०** क ङ **तद्भण्टन०** ख ग घ । ४. **०स्वभावमा०** ख । ५. **परिजनैरवगीतो** ख । ६. **वाङ्मात्रेणाप्यननु०** ख । ७. **सुखितेषु** ग, "**सुखिते** इति शेपलोके" जै०वि०प० । ८. **०समर्थः कार्यैक०** ख, **०समर्थः स्वकार्यै०** ग । ९. **निष्ठलोकात्** क-गप्रती ऋते । १०. **पराभव** ख । ११. **आह च** ग । १२. **पुरुषं** इति खपुस्तक एव । १३. **०स्तद्व्यतिरिक्तचेता०** घ ङ च । १४. **०द्धट्टनतः** ख, **०द्धटनतया** घ ङ । १५. **०नयने न समर्था भवन्तीति** ख । १६. **भवन्ति,** च । १७. **महास्रोतो०** घ । १८. **तदुच्यते** इति कप्रतौ न वर्तते ।

एतदुक्तं भवति—जराभिभूतस्य न कश्चित् त्राणाय शरणाय वा, त्वमपि तेषां नालं त्राणाय शरणाय वेति, उक्तं च—

**जन्म-जरा-मरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।**
**जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ॥** [प्रशम० गा० १५२] इत्यादि[१] ।

स तु[२] तस्यामवस्थायां किम्भूतो[३] भवतीति ? आह—**से ण हस्साए**[४] इत्यादि, **स** *जराजीर्णविग्रहो न हास्याय भवति, तस्यैव हसनीयत्वाद् न परान् हसितुं योग्यो भवतीत्यर्थः* । स च समक्षं परोक्षं वा एवमभिधीयते जनैः—किं किलास्य हसितेन हास्यास्पदस्येति । न च क्रीडायै न च लङ्घन-वल्गना-ऽऽस्फोटनक्रीडानां योग्योऽसौ[५] भवति । नापि रत्यै भवति, रतिरिह विषयगता गृह्यते, सा पुनर्ललनावगूहनादिका, तथाभूतोऽप्यवजुगूहिषुः स्त्रीभिरभिधीयते—'न लज्जते भवान्, न पश्यत्यात्मानम्, नावलोकयति शिरः पलितभस्मावगुण्डितम् मां दुहितृभूतामवगूहितुमिच्छति[६]' इत्यादिवचसामास्पदत्वाद् न रत्यै भवति । न विभूषायै, यतो विभूषितोऽपि प्रततचर्मवलीकस्तु[७] नैव शोभते, उक्तं च—

**न विभूषणमस्य युज्यते, न च हास्यं कुत एव विभ्रमः ।**
**अथ तेषु च वर्तते जनो, ध्रुवमायाति परां विडम्बनाम्[८] ॥**
**जं जं करेइ तं तं न सोहए जोव्वणे अतिक्कंते ।**
**पुरिसस्स महिलियाय[९] व एक्कं धम्मं पमोत्तूणं[१०] ॥** [ ]

*गतमप्रशस्तमूलस्थानम्[११] । साम्प्रतं प्रशस्तमुच्यते—*

## [ सू०६५ ] इच्चेवं समुट्ठिते अहोविहाराए अंतरं च खलु इमं सपेहाए धीरे मुहुत्तमवि णो पमादए । वओ अच्चेति जोव्वणं व ।

## [ सू०६६ ] जीविते इह जे पमत्ता से हंता छेत्ता भेत्ता

---

१. इत्यादि इति खपुस्तके नोपलभ्यते । २. च ख ग । ३. किङ्गुणो ख । ४. हस्सा० इत्यादि ग च । ५. योग्यो भवति ख । ६. ०मिच्छसि ? खआदर्शं विना । ७. ०वलीकः सन् नैव ख ग घ ङ, ०वलीकः स नैव च । ८. प्रपञ्चताम् ग, चूर्णौ च । ९. महिलियाए एक्कं ख घ ङ च, महिलियाइ व ग । १०. पमुत्तूणं घ ङ च । ११. ०प्रशस्तं मूल० घ ङ च ।

**लुंपित्ता विलुंपित्ता उद्दवेत्ता उत्तासयित्ता अकडं करिस्सामि त्ति मण्णमाणे ।**

**जेहिं वा सद्धिं संवसति ते व णं एगया णियगा पुव्विं पोसेंति, सो वा ते णियगे पच्छा पोसेज्जा । णालं ते तव ताणाए वा सरणाए वा, तुमं पि तेसिं णालं ताणाए वा सरणाए वा ।**

**इच्चेव**[१]मित्यादि । अथवा यत एवं ते सुहृदो नालं त्राणाय वा[२] शरणाय वा अतः किं विदध्यादिति ? आह—**इच्चेव**[३]मित्यादि । **इतिः** उपप्रदर्शने[४] । अप्रशस्तमूलगुणस्थाने वर्तमानो जराभिभूतो न हास्याय न क्रीडायै न रत्यै न विभूषायै, प्रत्येकं च शुभा-ऽशुभकर्मफलं प्राणिनामिति एवं मत्वा समुत्थितः सम्यगुत्थितः शस्त्रपरिज्ञोक्तं[५] मूलगुणस्थानमधितिष्ठन् **अहो** इत्याश्चर्ये, विहरणं **विहारः**, आश्चर्यभूतो विहारः **अहोविहारः** यथोक्तसंयमानुष्ठानम्, तस्मै अहो-विहारायोत्थितः सन् क्षणमपि न[६] प्रमादयेद् इत्युत्तरेण सण्टङ्कः[७] ॥छ॥

किञ्च—**अंतरं च**[ेत्यादि] । **अन्तरम्** इत्यवसरः, तच्चार्यक्षेत्र-सुकुलोत्पत्ति-बोधिलाभ-सर्वविरत्यादिकम् । **चः** समुच्चये । **खलुः** अवधारणे । 'इम'मित्यनेनेदमाह—विनेयस्तपः-संयमादाववसीदन् प्रत्यक्षभावापन्न-मार्यक्षेत्रादिकमन्तरमवसरमुपदर्श्याभिधीयते—तवाऽयमेवम्भूतोऽवसरोऽनादौ संसारे पुनरतीव सुदुर्लभ एवेति । अतस्तमवसरं सम्प्रेक्ष्य पर्यालोच्य **धीरः**[८] सन् **मुहूर्त**मप्येकं **न**[९] **प्रमादयेत्** न प्रमादवशगो भूयादिति । सम्प्रेक्ष्य इत्यत्र अनुस्वारलोपश्छान्दसत्वादिति, अन्यदप्यलाक्षणिकमेवंजातीयमस्मादेव हेतोरवगन्तव्यमिति । आन्तर्मौहूर्तिकत्वाच्च छाद्मस्थिकोपयोगस्य मुहूर्तम् इत्युक्तम्, अन्यथा समयमप्येकं न प्रमादयेद् इति वाच्यम्, तदुक्तम्—

---

१. **इच्चेवं इत्यादि** ख । २. **वा** इति खप्रतावेव । ३. **इच्चेवं इत्यादि** ख । ४. **०ने । यतोऽप्रशस्त०** क-चप्रती विना । ५. **०परिज्ञोक्तमूल०** क ग । ६. **नो** क-घपुस्तके ऋते । ७. **सम्बन्धः** घ ङ । ८. **वीरः** क च । ९. **नो** ख च ।

**सम्प्राप्य मानुषत्वं संसारासारतां च विज्ञाय ।**
**हे जीव ! किं प्रमादान्न चेष्टसे शान्तये सततम् ?॥**
**ननु पुनरिदमतिदुर्लभमगाधसंसारजलधिविभ्रष्टम् ।**
**मानुष्यं खद्योतक-तडिल्लताविलसितप्रतिमम् ॥** [ ] इत्यादि ।

किमर्थं च नो प्रमादयेत् ? इत्याह—[१]**वयो अच्चेइ** त्ति, **वयः** कुमारादि, तद् **अत्येति** अतीव एति याति अत्येति, अन्यच्च—[२]**जोवणं व** त्ति अत्येति अनुवर्तते, यौवनं वा अत्येति अतिक्रामति, वयोग्रहणेनैव यौवनस्य गतत्वात् तदुपादानं प्राधान्यख्यापनार्थम्, धर्मा-ऽर्थ-कामानां तन्निबन्धनत्वात् सर्ववयसां यौवनं [३]साधीयः, तदपि त्वरितं यातीति, उक्तं च—

**नइवेगसमं चवलं च जीवियं [४]जोवणं च कुसुमसमं ।**
**[५]सोक्खं च जं अणिच्चं तिण्णि वि तुरमाणभो[६]ज्जाइं ॥** [ ]

तद् एवं मत्वाऽहोविहारायोत्थानं श्रेय इति ।

ये पुनः संसाराभिष्वङ्गिणोऽसंयमजीवितमेव बहुमन्यन्ते, ते किम्भूता भवन्ति ? [७]इत्याह—[८]**जीविये** इत्यादि । ये तु वयोऽतिक्रमणं नावगच्छन्ति ते इह [९]इत्यस्मिन्नसंयमजीविते **प्रमत्ताः** [१०]अध्युपपन्ना विषय-कषायेषु प्रमाद्यन्ति, प्रमत्ताश्चहर्निशं परितप्यमानाः कालाकालसमुत्थायिनः सन्तः सत्त्वोपघातकारिणीः क्रियाः समारभन्त इति, [११]आह च—

[१२]**से हंता** इत्यादि । **से** इत्य[१३]प्रशस्तगुणमूलस्थानवान् विषयाभिलाषी प्रमत्तः सन् स्थावर-जङ्गमानामसुमतां हन्ता भवतीति । अत्र च बहुवचन[१४]प्रक्रमेऽपि जात्यपेक्षयैक[१५]वचननिर्देश इति । तथा **छेत्ता** [१६]इति कर्ण-नासिकादीनाम्, [१७]**भेत्ता**

---

१. **वए** ख । २ **जोव्वणं** ख ग च, **जुव्वणं** घ ङ । ३. **साधीयः साधुः, तदपि** च । ४. **जोव्वणं** ख ग च, **जुव्वणं** घ ङ । ५. **सुक्खं** घ ङ । ६. **०भोजाइं** क, **०भोज्जातिं** ग । ७. **इत्यत आह** ग । ८. जीविए कआदर्शमृते । ९. **इत्यस्मिन् संयम०** च । १०. **अभ्युपपन्ना** च । ११. **आह—स हंता** ख । १२. **से** इत्या० क । १३. **०प्रशस्तमूलगुणस्थान०** घ ङ । १४. **०प्रक्रमे जात्य०** क घ ङ । १५. **०वचनेन निर्देश** च । १६. **इति** ख-ग-चप्रतिषु नास्ति । १७. **भेत्ता शिरो-दशनादीनाम्** ख, **भेत्ता नयन-शिरो-दशनादीनाम्** च ।

शिरो-नयनोदरादीनाम्, **लुम्पयिता** ग्रन्थि[१]च्छेदादिभिः, विलुम्पयिता ग्राम-घातादिभिः, **अपद्रावयिता** प्राणव्यपरोपको विष-शस्त्रादिभिः, [२]अपद्रावयिता वा **उत्त्रासको** लोष्टप्रक्षेपादिभिः । स किमर्थं हननादिकाः क्रियाः [३]करोति ? इत्याह– [४]**अकडं** इत्यादि । अकृतम् इति यदन्येन नानुष्ठितं तदहं करिष्यामि इत्येवं मन्यमानोऽर्थोपार्जनाय हननादिषु प्रवर्तते । [५]स एवं क्रूरकर्मातिशयकारी समुद्रलङ्घनादिकाः क्रियाः [६]कुर्वन्नप्य[७]लाभोदयाद् अपगतसर्वस्वः किम्भूतो [८]भवति ? इत्याह–

[९]**जेहि वे**त्यादि । **वा**शब्दः भिन्नक्रमः पक्षान्तरद्योतकः, यैः माता-पितृ-स्वजनादिभिः सार्धं संवसत्यसौ त एव [१०]वा **ण**मिति वाक्यालङ्कारे, एकदा इत्यर्थनाशाद्यापदि शैशवे वा, निजाः आत्मीया बान्धवाः सुहृदो वा [११]**पुव्विं** पूर्वमेव, तं सर्वोपायक्षीणं पोषयन्ति, स [१२]वा प्राप्तेष्टमनोरथलाभः सन् तान् निजान् पश्चात् पोषयेत् अर्थदानादिना सन्मानयेदिति । ते च पोषकाः पोष्या वा तव आपद्गतस्य न त्राणाय भवन्ति इत्याह–

[१३]**नालं** इत्यादि । ते निजाः माता-पित्रादयः **तव** [१४]इत्युपदेशदानविषयापन्न उच्यते **त्राणाय** आपद्रक्षणार्थं **शरणाय** निर्भयस्थित्यर्थं [१५]**नालं** न समर्थाः, त्वमपि तेषां **त्राण**-शरणे कर्तुं नालमिति ।

तदेवं तावत् स्वजनो न त्राणाय भवतीत्येतत् प्रतिपादितम् । [१६]अर्थोऽपि महता [१७]क्लेशेनोपार्जितो रक्षितश्च न त्राणाय भवतीत्येतत् प्रतिपिपादयिषुराह–

**[ सू०६७ ] उवादीतसेसेण वा संणिहिसण्णिचयो कज्जति इहमेगेसिं माणवाणं भोयणाए । ततो से एगया**

---

१. ०च्छेदनादिभिः ख च । २. **अवद्रावयिता** ग । ३. **करोति ? आह** घ । ४. **अकडमित्यादि** घ ङ । ५. **स** इति क-गपुस्तकयोर्न वर्तते । ६. **कुर्वन्नलाभो०** क । ७. **०लाभोदयापगत०** ग । ८. **भवति ? आह** ग । ९. **जेहिं** ग । १०. **वा** इति चप्रतौ नास्ति । ११. **पूर्वं** ख । १२. **च** ग । १३. **नालमित्यादि** घ ङ । १४. **इत्युपदेशविषया०** खप्रतिमृते । १५. **न अलं समर्थाः** क ग ङ । १६. **अर्थोऽपि हि महता** ग । १७. **क्लेशेनोपात्तो** कआदर्शमृते ।

**रोगसमुप्पाया समुप्पज्जंति । जेहिं वा सद्धिं संवसति ते व णं एगदा णियगा पुव्विं परिहरंति, सो वा ते णियए पच्छा परिहरेज्जा । णालं ते तव ताणाए वा सरणाए वा, तुमं पि तेसिं णालं ताणाए वा सरणाए वा ।**

[1]**उवादीत** इत्यादि । उपादितेति [2]**अद भक्षणे** [पा०धा० १०११] इत्येतस्माद् उपपूर्वाद् निष्ठाप्रत्ययः, तत्र **बहुलं छन्दसि** [पा० ७।४।७८] इतीडागमः, [3]उपादितम् उपभुक्तम्, तस्य शेषम् उपभुक्तशेषम्, तेन वा, वाशब्दाद् अनुपभुक्तशेषेण वा । सन्निधानं सन्निधिः, तस्य सन्निचयः सन्निधिसन्निचयः, अथवा सम्यग् निधीयते अवस्थाप्यत उपभोगाय योऽर्थः स सन्निधिः, तस्य सन्निचयः प्राचुर्यम्, उपभोग्यद्रव्यनिचय इत्यर्थः । [4]स इह अस्मिन् संसारे एकेषाम् असंयतानां संयताभासानां वा केषाञ्चिद् भोजनाय उपभोगार्थं क्रियते विधीयते इति । असावपि यदर्थमनुष्ठितोऽन्तरायोदयात् तत्सम्पत्तये न प्रभवतीत्याह–

**तओ से** इत्यादि । ततः द्रव्यसन्निधिसन्निचयादुत्तरकालमुपभोगावसरे से तस्य बुभुक्षोः एकदा इति द्रव्य-क्षेत्र-काल-भावनिमित्providedविर्भावितवेदनीयकर्मोदये **रोगसमुत्पादाः** ज्वरादिप्रादुर्भावाः समुत्पद्यन्त इत्याविर्भवन्ति ।

स च तैः कुष्ठ-राजयक्ष्मादिभिरभिभूतः सन् भग्ननासिको गलत्पाणिपादोऽविच्छेदप्रवृत्तश्वासाकुलः किम्भूतो भवति ? इत्याह–

[5]**जेहिं** इत्यादि । यैः माता-पित्रादिभिर्निजैः सार्द्धं संवसति त एव वा निजाः एकदा रोगोत्पत्तिकाले पूर्वमेव तं परिहरन्ति, स वा तान् निजान् पश्चात् परिभवोत्थापितविवेकः **परिहरेत्** त्यजेत्, तन्निरपेक्षः **सेडुक**वत् स्यादित्यर्थः । ते च स्वजनादयो रोगोत्पत्तिकाले परिहरन्तोऽपरिहरन्तो वा न त्राणाय भवन्तीति [6]दर्शयति–[7]**नालमि**त्यादि पूर्ववत् । [8]रोगाद्यभिभूतान्तः[9]करणेन चापगतत्राणेन च

---

१. **उवादीय** ख च । २. **अदंप्सा भक्षणे** घ ङ । ३. **उपादीतम्** क । ४. **स** इति घङ प्रत्योर्न वर्तते । ५. **जेहीत्यादि** ख च । ६. **दर्शयितुमाह** ग । ७. **नालं इत्यादि** ख च । ८. **रोगाभिभूता०** ख च । ९. **०करणेनापगत०** ख ।

किमालम्ब्य सम्यक्करणेन रोग[1]वेदनाः सोढव्याः ? इत्याह—

**[ सू०६८ ] एवं जाणित्तु दुक्खं पत्तेयं सातं अणभिक्कंतं च खलु वयं सपेहाए खणं जाणाहि पंडिते ! जाव सोतपण्णाणा अपरिहीणा जाव णेत्तपण्णाणा अपरिहीणा जाव घाणपण्णाणा अपरिहीणा जाव जीहपण्णाणा अपरिहीणा जाव फासपण्णाणा अपरिहीणा, इच्चेतेहिं विरूवरूवेहिं पण्णाणेहिं अपरिहीणेहिं आयट्ठं सम्मं समणुवासेज्जासि त्ति बेमि ।**

**॥ लोगविजयस्स पढमो उद्देसओ सम्मत्तो ॥**

**जाणित्तु** इत्यादि । ज्ञात्वा **प्रत्येकं** प्राणिनां दुःखं तद्विपरीतं सातं वाऽदीनमनस्केन ज्वरादिवेदनोत्पत्तिकाले स्वकृतकर्मफलमवश्यमनुभवनीयमिति मत्वा न वैक्लव्यं कार्यमिति, उक्तं च—

**सह[2]कलेवर ! [3]खेदमचिन्तयन्, स्ववशता हि पुनस्तव दुर्लभा ।**
**बहुतरं च सहिष्यसि [4]जीव हे !, परवशो न च तत्र गुणोऽस्ति ते ॥ [ ]**

यावच्च श्रोत्रादिविज्ञानैः परिहीयमानैः जराजीर्णं न निजाः परिवदन्ति यावच्चानुकम्पया [5]न पोषयन्ति रोगाभिभूतं च न परिहरन्ति तावदात्मार्थोऽनुष्ठेय इत्येतद् दर्शयति—

**[6]अणभिक्कंतं च** इत्यादि । **च**शब्द आधिक्ये । **खलु**शब्दः [7]पुनरर्थे । पूर्वमभिक्रान्तं वयः समीक्ष्य मूढभावं व्रजतीति प्रतिपादितम् । अनभिक्रान्तं च पुनर्वयः सम्प्रेक्ष्य **आयट्ठं समणु[8]वासेज्जा** इत्युत्तरेण सम्बन्धः । आत्मार्थम् **आत्महितं समनुवासयेत्** कुर्यादित्यर्थः । [9]किमनभिक्रान्तवयसैवात्महित-

१. **०वेदना सोढव्या** क-गप्रती विना । २. **०कडेवर** ख च । ३. **दुःखमचिन्तयन्** ग घ ङ । ४. **कर्म हे !** कआदर्शमृते । ५. **न** इति क-ख-गप्रतिषु नास्ति । ६. **अणभिकंतं** घ ङ **अणभिक्खंतं** । ७. **अवधारणे** ख, **पुनःशब्दार्थे** ग च । ८. **०वासेज्ज** ख च । ९. **किमनतिक्रान्त०** ख-ग-प्रती विना ।

मनुष्ठेयमुतान्येनापि[1] ? अपरेणापि लब्धावसरेणात्महितमनुष्ठेयमित्येतद् दर्शयति—

**खणं जाणाहि पंडिए** ! क्षणः अवसरो धर्मानुष्ठानस्य, स चार्यक्षेत्र-सुकुलोत्पत्त्यादिकः, परिवाद-पोषण-परिहारदोषदुष्टानां जरा-बालभाव-[2]रोगाणामभावे सति[3] तं क्षणं जानीहि अवगच्छ पण्डित ! आत्मज्ञ ! अथवाऽवसीदन् शिष्यः प्रोत्साह्यते—हे अनतिक्रान्तयौवन ! परिवादादि-दोषत्रयास्पृष्ट ! पण्डित ! द्रव्य-क्षेत्र-काल-भावभेदभिन्नं **क्षणम्** अवसरमेवंविधं[4] **जानीहि** अवबुध्यस्व, तथाहि—

द्रव्यक्षणः द्रव्यात्मकोऽवसरो जङ्गमत्व-पञ्चेन्द्रियत्व-विशिष्टजाति-कुल-रूप-बला-ऽऽरोग्या-ऽऽयुष्कादिको मनुष्यभावः संसारोत्तरणसमर्थचारित्रा-वाप्तियोग्यस्त्वयाऽवाप्तः, स चानादौ संसारे पर्यटतोऽसुमतो दुरापो भवति । अन्यत्र तु नैतत् चारित्रमवाप्यते, तथाहि—देव-नारकभवयोः सम्यक्त्व-श्रुतसामायिके एव, तिर्यक्षु च कस्यचिद् देशविरतिरेवेति ।

क्षेत्रक्षणः क्षेत्रात्मकोऽवसरो यस्मिन् क्षेत्रे चारित्रमवाप्यते[5] । तत्र सर्व-विरतिसामायिकस्याधोलौकिकग्रामसमन्वितं तिर्यक्क्षेत्रमेव, तत्राप्यर्धतृतीयद्वीप-समुद्राः, तत्रापि पञ्चदशसु कर्मभूमिषु, तत्रापि भरतक्षेत्रमपेक्ष्यार्धषड्विंशेषु जनपदेष्वित्यादिकः क्षेत्रक्षणः क्षेत्ररूपोऽवसरोऽधिगन्तव्यः[6] । अन्यस्मिंश्च क्षेत्रे आद्ये एव सामायिके ।

कालक्षणस्तु कालरूपः क्षणः अवसरः, स चावसर्पिण्यां तिसृषु समासु सुषमदुःषमा-दुःषमसुषमा-दुःषमाख्यासु,[7] उत्सर्पिण्यां तु तृतीय-चतुर्था-ऽऽरकयोः सर्वविरतिसामायिकस्य भवति । एतच्च प्रतिपद्यमानकं[8] प्रत्यभ्यधायि, पूर्वप्रतिपन्नास्तु सर्वत्र तिर्यगूर्द्धा-ऽधोलोके[9] सर्वासु च समासु द्रष्टव्याः ।

---

१. ०**नापीति ? अपरेणापि** क-गपुस्तके विना । २. "**जरा-बाल०** इति पाश्चात्यैः यथासङ्ख्येन त्रिभिः संयोगः" जै०वि०प० । ३. **सति** इति गप्रतौ नास्ति । ४. ०**मेवंभूतं** ख च । ५. **चारित्रमथवाप्यते** ङ । ६. **०ऽवसरः । अन्यस्मिंश्च** ख । ७. **सुषमदुःषम-दुःषमसुषम-दुःषमाख्यासु** ख च, **सुखमदुःखमा-दुःखमसुखमा-दुःखमाख्यासु** क । ८. **प्रतिपद्यमानं** च । ९. **तिर्यगूर्ध्वा०** च ।

भावक्षणस्तु द्वेधा—कर्मभावक्षणो नोकर्मभावक्षणश्च । तत्र कर्मभावक्षणः कर्मणामुपशम-क्षयोपशम-क्षयान्यतरावाप्ताववसर उच्यते । तत्रोपशमश्रेण्यां चारित्रमोहनीय उपशमिते[1]ऽन्तर्मौहूर्तिक औपशमिकश्चारित्रक्षणो भवति । तस्यैव मोहनीयस्य क्षयेणान्तर्मौहूर्तिक एव छद्मस्थयथाख्यातचारित्रक्षणो भवति । क्षयोपशमेन[2] क्षायोपशमिकचारित्रावसरः, स चोत्कृष्टतो देशोनां पूर्वकोटिं यावदवगन्तव्यः ।

सम्यक्त्वक्षणस्त्वजघन्योत्कृष्टस्थितावायुषो वर्तमानस्य, शेषाणां तु कर्मणां पल्योपमासङ्ख्येयभाग[3]न्यूनान्तःसागरोपमकोटीकोटिस्थितिकस्य जन्तोर्भवति, स चानेन क्रमेणेति—ग्रन्थिकसत्त्वेभ्योऽभव्येभ्योऽनन्तगुणया शुद्ध्या विशुद्ध्यमानो मति-श्रुत-विभङ्गान्यतरसाकारोपयुक्तः शुद्धलेश्यात्रिकान्यतरलेश्यो[4]ऽशुभकर्मप्रकृतीनां चतुःस्थानिकं रसं [5]द्विस्थानिकतामापादयन् शुभानां च द्विस्थानिकं चतुःस्थानिकतां नयन्, बध्नंश्च ध्रुवप्रकृतीः परिवर्तमानाश्च भवप्रायोग्या बध्नन्निति। ध्रुवकर्मप्रकृतयश्चेमाः—पञ्चधा ज्ञानावरणीयं नवधा दर्शनावरणीयं मिथ्यात्वं कषायषोडशकं भयं जुगुप्सा तैजस-कार्मण[6]शरीरे वर्ण-गन्ध-रस-स्पर्शा-ऽगुरुलघु-उपघात-निर्माणनामानि पञ्चधाऽन्तरायम्, एताः सप्तचत्वारिंशद् ध्रुवप्रकृतयः, आसां सर्वदा बध्यमानत्वात् । मनुष्य-तिरश्चोरन्यतरः प्रथमं सम्यक्त्व[7]मुत्पादयन्नेता [8]एकविंशतिं परिवर्तमाना बध्नाति, तद्यथा—देवगत्यानुपूर्वीद्वय-पञ्चेन्द्रियजाति-वैक्रियशरीरा-ऽङ्गोपाङ्गद्वय-समचतुरस्त्रसंस्थान-पराघात-उच्छ्वास-प्रशस्तविहायो[9]गति-त्रसादिदशक-सातावेदनीय-उच्चैर्गोत्ररूपा इति । देव-नारकास्तु मनुष्यगत्यानुपूर्वीद्वय-औदारिकद्वय-प्रथमसंहननसहितानि [10]शुभानि बध्नन्ति । तमतमानारकास्तु तिर्यग्गत्यानुपूर्वीद्वय-नीचैर्गोत्रसहितानीति । [11]तदध्यवसायोपपन्नः सन्नायुष्कमबध्नन् यथाप्रवृत्तेन करणेन ग्रन्थिमासाद्या-

---

१. ०ऽन्तर्मौहूर्तिकौप० ग । २. ०न तु क्षायो० क-खआदर्शौ विना । ३. ०न्यूनान्त्य-सागरो० घ-ङप्रती ऋते । ४. ०लेश्यासु च शुभ० ख । ५. द्विस्थानतां ख । ६. ०शरीर-वर्ण० ख च । ७. ०मुपादयन्नेक० ख, ०मुपपादयन्नेता च । ८. एकविंशतिः च । ९. ०गति-प्रशस्तत्रसादि० घ ङ । १०. शुद्धानि क । ११. तदध्यवसायः सन्ना० ख ।

पूर्वकरणेन भित्त्वा मिथ्यात्वस्यान्तरकरणं विधायानिवृत्तिकरणेन सम्यक्त्वमवाप्नोति । तत[1] ऊर्ध्वं[2] क्रमेण क्षीयमाणे कर्मणि प्रवर्धमानेषु कण्डकेषु देशविरत्यादेरवसर इति ।

नोकर्मभावक्षणस्तु आलस्य-मोहा-ऽवर्णवाद-स्तम्भाद्यभावे सम्यक्त्वा[3]द्यवाप्त्यवसर इति । आलस्यादिभिस्तूपहतो लब्ध्वाऽपि संसारलङ्घनक्षमं मनुष्यभवं बोध्यादिकं नाप्नोतीति[4], उक्तं च—

**आलस्स-मोह-ऽवण्णा थंभा कोहा पमाय किवणत्ता[5] ।**
**भय सोगा[6] अण्णाणा वक्खेव कुतूहला रमणा ॥**
**एएहिँ कारणेहिं लद्धूण सुदुल्लहं पि माणुस्सं ।**
**न लहइ सुइं हियकरिं संसारुत्तारणिं जीवो ॥छ॥ [ ]**

तदेवं चतुर्विधोऽपि क्षण उक्तः, तद्यथा—द्रव्यक्षणः जङ्गमत्वादिविशिष्टं मनुष्यजन्म, क्षेत्रक्षणः आर्यक्षेत्रम्, कालक्षणः धर्मचरणकालः, भावक्षणः क्षयोपशमादिरूप इति । एवम्भूतमवसरमवाप्यात्मार्थं समनुवासयेदित्युत्तरेण सम्बन्धः ॥ किञ्च—

**जाव** इत्यादि । यावदस्य विशरारोः कायापशदस्य श्रोत्रविज्ञानानि जरसा रोगेण वा अपरिहीनानि भवन्ति, एवं नेत्र-घ्राण-रसन-स्पर्शनविज्ञानानि[7] न[8] विषयग्रहणस्वभावतया मान्द्यं प्रतिपद्यन्ते, इत्येतैः विरूपरूपैः इष्टा-ऽनिष्टरूपतया नानारूपैः प्रज्ञानैः प्रकृष्टैर्ज्ञानैरपरिक्षीयमाणैः[9] सद्भिः किं कुर्यात् इत्याह—

**आयट्ठं** इत्यादि । आत्मनोऽर्थः आत्मार्थः, स च ज्ञान-दर्शन-चारित्रात्मकः, अन्यस्त्वनर्थ एव[10] । अथवाऽऽत्मने हितं प्रयोजनमात्मार्थम्[11], तच्च चारित्रानुष्ठानमेव । अथवाऽऽयतः अपर्यवसानाद्[12] मोक्ष एव, स चासावर्थश्चायतार्थः, अतस्तम्, यदि वाऽऽयतः मोक्षः अर्थः प्रयोजनं यस्य दर्शनादित्रयस्य

---

१. अत ग । २. ऊर्द्ध्वं क-घप्रती विना । ३. **सम्यक्त्वादेरवाप्त्यवसर** ख च । ४. **नावाप्नोतीति** च । ५. **किविणत्ता** ख । ६. **सोगो** क । ७. **०स्पर्शविज्ञानानि** कप्रतिमृते । ८. **न** इति गपुस्तके नास्ति । ९. **०रपरिहीयमाणैः** ख । १०. **एव । आत्मने** घ ङ । ११. **०मात्मार्थः** ख च । १२. **अपर्यवसानो मोक्ष** क ।

तत् तथा । '[1]समनुवासये:' इति [2]**वस निवासे** [पा०धा० १००५] [3]इत्येतस्माद्धेतुमण्णिजन्ताल्लिट्सिप्, सम्यग् यथोक्तानुष्ठानेन अनु पश्चा[4]दनभिक्रान्तं वय: सम्प्रेक्ष्य **क्षणम्** अवसरं प्रतिपद्य श्रोत्रादिविज्ञानानां [5]चाऽप्रहीणता[6]मधिगम्य तत आत्मार्थं समनुवासये: आत्मनि विदध्या: । अथवा 'अर्थवशाद् विभक्तिपुरुषपरिणाम:' इति कृत्वा तेन [7]वाऽऽत्मार्थेन ज्ञान-दर्शन-चारित्रात्मकेनात्मानं समनुवासयेत् भावयेद् रञ्जयेत्, आयतार्थं वा [8]मोक्षार्थं सम्यग् अपुनरागमनेन अनु इति यथोक्तानुष्ठानात् पश्चा[9]दात्मना समनुवासयेत् अधिष्ठापयेत् । [10]**इति**: परिसमाप्तौ। **ब्रवीमि** इति **सुधर्मस्वामी जम्बूस्वामिन**मिदमाह यद् भगवता [11]**वर्धमान**[12]**स्वामि**नाऽर्थतोऽभ्यधायि तदेवाहं सूत्रात्मना वच्मीति ।

**।।छ।। [13]लोकविजयस्य प्रथम उद्देशक: समाप्त: ।।छ।।**

● ● ●

१. **समनुवासयेत्** क च । २. **वसु** ख । ३. **इत्यस्मा०** ख च । ४. **०दनतिक्रान्तं** घ ङ । ५. **वाऽ०** ग च । ६. **०मवगम्य** ग । ७. **चाऽऽ०** ग ङ च । ८. **मोक्षाख्यं** कपुस्तकमृते । ९. **०दात्मानं** ग । १०. **इति** ख-घप्रती विना । ११. **वीरवर्द्धमान०** ग, **श्रीवर्धमान०** घ ङ । १२. **०स्वामिनाऽभ्यधायि तदेवाहं सूत्रतो वच्मीति** ख । १३. **द्वितीयाध्ययनस्य प्रथमोद्देशक इति** ख च, **लोकविजयस्य** इति पाठ: कआदर्श एव ।

उक्तः प्रथमोद्देशकः, साम्प्रतं [१]द्वितीयव्याख्या प्रतन्यते, अस्य चायमभिसम्बन्धः—इह विषय-कषाय-मातापित्रादिलोकविजयेन मोक्षावाप्तिहेतुभूतं चारित्रं यथा सम्पूर्णभावमनुभवति एवंरूपोऽध्ययनार्थाधिकारः प्राग् निरदेशि, तत्र मातापित्रादिलोकविजयेन रोग-जराद्यनभिभूतचेतसाऽऽत्मार्थः संयमोऽनुष्ठेय इत्येतत् प्रथमोद्देशकेऽभिहितम्, इहापि तस्मिन्नेव संयमे वर्तमानस्य कदाचिन्मोहनीयोदयाद् अरतिः स्यात्, अज्ञान-कर्म-लोभोदयाद्वाऽध्यात्मदोषेण संयमे न दृढत्वं भवेदित्यतोऽरत्यादिव्युदासेन यथा संयमे दृढत्वं भवति तथाऽनेन प्रतिपाद्यते । अथवा यथाऽष्टप्रकारं कर्मापहीयते तथाऽस्मिन्नध्ययने प्रतिपाद्यते इत्यध्ययना-र्थाधिकारेऽभ्यधायि, तच्च कथं क्षीयते ? इत्याह—

**[ सू०६९ ] अरतिं आउट्टे से मेधावी खणंसि मुक्के ।**

**[ सू०७० ] अणाणाए पुट्ठा वि एगे णियट्टंति मंदा मोहेण पाउडा । 'अपरिग्गहा भविस्सामो' समुट्ठाए लद्धे कामेऽभिगाहंति । अणाणाए मुणिणो पडिलेहेंति । एत्थ मोहे पुणो पुणो सण्णा णो हव्वाए णो पाराए ।**

[२]**अरइं आउट्टे से मेहावी** । अस्य चानन्तरसूत्रेण सम्बन्धो वाच्यः, स चायम्—**आयट्ठं समणुवासेज्जासि**[३] आत्मार्थं संयमं सम्यक् कुर्यात्, तत्र कदाचिदरत्युद्भवो भवेत् तदर्थमाह—[४]**अरइं** इत्यादि । परम्परसूत्रसम्बन्धस्तु **खणं जाणाहि पंडिए** ! क्षणं चारित्रावसरमवाप्यारतिं न कुर्यादित्याह—[५]**अरइं** इत्यादि । आदिसूत्रसम्बन्धस्तु [६]**सुयं मे आउसं ! तेणं भगवया एवमक्खायं**, किं तत् श्रुतम् ? इत्याह—[७]**अरइं आउट्टे से मेहावी** । रमणं रतिः, तदभावः अरतिः, तां पञ्चविधाचारविषयां मोहोदयात् [८]कषायाभिष्वङ्गजनितां माता-पितृ-[९]कलत्रा-

१. **द्वितीयस्य व्याख्या** च । २. **अरई** ग । ३. **०सि त्ति बेमि आत्मार्थं** ख । ४. **अरई** ग च । ५. **अरइमित्यादि** ख, **अरई** च । ६. **सुतं** च । ७. **अरयी** क । ८. **कषायाभिषङ्ग०** च । ९. **०कलत्राद्युत्थापितां** कप्रतिमृते ।

द्युत्थापितां स इत्यरतिमान् मेधावी विदितासारसंसारस्वभावः सन् [1]आवर्तेत [2]अपवर्तेत निवर्तयेदित्युक्तं भवति ॥छ॥ संयमे चारतिर्न [3]विषयाभिष्वङ्गरतिमृते [4]**कण्डरीक**स्येवेति । अत इदमुक्तं भवति—[5]विषयाभिष्वङ्गे रतिं निवर्तेत । निवर्तनं चैवमुपजायते—यदि दशविधचक्रवालसामाचारीविषया रतिरुत्पद्यते **पौण्डरीक**स्येवेति । [6]ततश्चेदमप्युक्तं भवति—[7]संयमे रतिं कुर्वीत, तद्विहितरतेस्तु न किञ्चिद्बाधायै नापीहाऽपरसुखोत्तरबुद्धिरिति, आह [8]च—

> **क्षितितलशयनं वा [9]प्रान्तभैक्षाशनं वा, सहजपरिभवो वा नीचदुर्भाषितं वा ।**
> **महति फलविशेषे नित्यमभ्युद्यतानां, न मनसि न शरीरे दुःखमुत्पादयन्ति ॥**
> **तणसंथारनिसण्णो [10]वि मुणिवरो भट्ठराग-मय-मोहो ।**
> **जं पावइ [11]मुत्तिसुहं कत्तो तं चक्कवट्टी वि ? ॥ [ ]** [12]इत्यादि ।

अत्र हि चारित्रमोहनीयक्षयोपशमाद् अवाप्तचारित्रस्य पुनरपि [13]तदुदयादवदिधाविषोरनेन सूत्रेणोपदेशो दीयते । तच्चावधावनं संयमाद् यैर्हेतुभिर्भवति तान् **निर्युक्तिकारो** गाथयाऽऽचष्टे—

> **[14]बिइउद्देसे अदढो [15]उ संजमे कोइ होज्ज अरईए ।**
> **अन्नाण-कम्म-लोभादिएहिँ अज्झत्थ[16]दोसेहिं ॥१९८॥**

[17]→लोगविजयस्स निज्जुत्ती ॥छ॥ ←

**बीउद्देसे०** [18]गाहा । इह हि **प्रथमोद्देशके** बह्व्यो निर्युक्तिगाथा अस्मि[19]स्त्वयमेकैवेत्यतो मन्दबुद्धेः स्यादारेका यथा—इयमपि तत्रत्यैवेति, अतो

---

१. "आउट्टे जं भणितं होइ—णियत्तेहि" चूर्णौ । २. **अपवर्तेत** इति पाठः ख-ग-चप्रतिषु नास्ति । ३. **विषयाभिष्वङ्गमृते** च । ४. **दृश्यतां ज्ञाताधर्मकथाङ्गे** एकोनविंशतितमं **कण्डरीक-पौण्डरीकज्ञातम्** । ५. **विषयाभिष्वङ्गरतिं** ङ । ६. **ततश्चेदमुक्तं** क घ ङ । ७. **संयमरतिं** ग । ८. **च** इति घपुस्ते नास्ति । ९. **प्रान्तभिक्षाशनं** च । १०. **वि० ॥ इत्यादि** क ग । ११. **मोत्तिसुहं** च । १२. **इत्यादि च । अत्र** घ ङ च । १३. **तदुदयाऽवदिधा०** क । १४. **बितिउद्देसे** ज । १५. **य** ज । १६. "इयं गाथा द्वि० ऽध्य० द्वि० उद्दे० । तृ०-च०-पं०-षष्ठोद्देशकानां निर्युक्तिर्नास्ति ।" ठटिप्पणी । १७. →←एतच्चिन्हान्तर्वर्ती पाठः ख-छ-जप्रतिषु नास्ति, एतच्चिन्हमध्यस्थपाठस्थाने च झआदर्शे **द्वितीयोद्देशकं ( कः ।) द्वितीयमध्ययनं समाप्तः ( प्तम् ?)** ॥ इति पाठः प्राप्यते । १८. **गाहा । अत्र च प्र०** ख ङ । १९. **०मेवैकेत्यतो** खपुस्तकादिना ।

*विनेयसुखप्रतिपत्त्यर्थं द्वितीयोद्देशकग्रहणमिति* । कश्चित् **कण्डरीकदेशीयः** संयमे सप्तदशभेदभिन्ने अदृढः शिथिलो मोहनीयोदयाद् अरत्युद्भवाद् भवेत्, [1]मोहनीयोदयोऽप्याध्यात्मिकैर्दोषैर्भवेत्, ते [2]चाध्यात्मिका दोषा *अज्ञान*-[कर्म ?]लोभादयः, [3]आदिशब्दाद् इच्छा-मदनकामानां परिग्रहः, मोहस्याज्ञान-लोभ-[4]कामाद्यात्मकत्वात्, तेषां चाध्यात्मिकत्वादिति गाथार्थः ॥१९८॥

ननु चारतिमतो मेधाविनोऽनेन सूत्रेणोपदेशो दीयते यथा—*संयमा*-रतिमपवर्तेत, मेधावी चात्र विदितसंसारस्वभावो विवक्षितः, [5]यश्चैवम्भूतो नासावरतिमान्, तद्वांश्चेद् न विदितवेद्य इत्यनयोः सहानवस्थानलक्षणेन विरोधेन [6]विरोधः, छाया-ऽऽतपयोरिव नैकत्रावस्थानम्, उक्तं च—

**तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः ।**
**तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ? ॥** [ ] इत्यादि ।

यो ह्यज्ञानी [7]मोहोपहतचेताः स विषयाभिष्वङ्गात् संयमे सर्वद्वन्द्वप्रत्यनीके रत्यभावं विदध्यात्, आह च—

**अज्ञानान्धाश्चटुलवनितापाङ्गविक्षेपितास्ते,**
**कामे [8]सक्तिं दधति विभवाभोगतुङ्गार्जने वा ।**
**विद्वच्चित्तं भवति हि [9]महन्मोक्षमार्गैकतानं,**
**नाल्पस्कन्धे विटपिनि कषत्यंसभित्तिं गजेन्द्रः ॥** [ ]

नैतन्मृष्यामहे, [10]यतो ह्यवाप्तचारित्रस्यायमुपदेशो दित्सितः, चारित्रावाप्तिश्च न ज्ञानमृते तत्कार्यत्वाच्चारित्रस्य । न च ज्ञाना-ऽरत्योर्विरोधः, अपि तु रत्यरत्योः । ततश्च संयमगता रतिरेवारत्या बाध्यते, न ज्ञानम् । अतो ज्ञानिनोऽपि चारित्रमोहनीयोदयात् संयमे स्यादेवारतिः, यतो ज्ञानमप्यज्ञानस्यैव बाधकम्, न संयमारतेः, तथा चोक्तम्—

---

१. **मोहोदयो०** ख च । २. **चाध्यात्मदोषा** ग घ ङ । ३. **आदिग्रहणाद्** ख च । ४. **०कामात्मक०** क घ ङ । ५. **यश्चैवं नासा०** ग । ६. **विरोधात् छाया०** क-खप्रती विना । ७. **मोहनीयोपहत०** क । ८. **शक्ति** च । ९. **महामोक्ष०** ख च । १०. **यतोऽवाप्त०** ख ।

**ज्ञानं भूरि यथार्थ[1]वस्तुविषयं स्वस्य द्विषो बाधकं,**
**रागारातिशमाय हेतुमपरं युङ्क्ते न कर्तृ स्वयम् ।**
**दीपो यत् तमसि व्यनक्ति किमतो रूपं स एवेक्षतां,**
**सर्वः स्वं विषयं प्रसाधयति हि प्रासङ्गिकोऽन्यो विधिः ॥ [ ]**

तथेदम[2]पि भवतो न कर्णविवर[3]मगाद् यथा—

**बलवानिन्द्रियग्रामः पण्डितोऽप्यत्र मुह्यति ॥ [ ]** इति ।

अतो यत्किञ्चिदेतत् । अथवा नारत्यापन्न एवैवमुच्यते, अपि त्वयमुपदेशो मेधावी संयमविषये मा विधादरतिमिति ।

संयमारतिनिवृत्तश्च सन् कं गुणमवाप्नोति ? इत्याह—**खणंसि मुक्के** । परमनिरुद्धः कालः क्ष[4]णः पट्टशाटिकापाटनदृष्टान्तसमयप्रसाधितः, तत्र मुक्तः । विभक्तिपरिणामाद् वा क्षणेन अष्टप्रकारेण कर्मणा संसारबन्धनै[5]र्वा विषयाभिष्वङ्ग-स्नेहादिभिर्मुक्तो [6]**भरत**वदिति ।

ये पुनरनुपदेशवर्तिनः **कण्डरीका**द्यास्ते चतुर्गतिक[7]संसारान्तर्वर्तिनो दुःखसागर[8]मधिवसन्तीत्याह च—**अणाणाए** इत्यादि । आज्ञाप्यत इत्याज्ञा हिता-ऽहितप्राप्ति-परिहाररूपतया सर्वज्ञोपदेशः, तद्विपर्ययोऽनाज्ञा, तया [9]**अनाज्ञया** सत्या **स्पृष्टाः** परीषहोपसर्गैः । अपिशब्दः सम्भावनायाम्, स च भिन्नक्रमः, निवर्तन्त इत्यस्मादनन्तरं द्रष्टव्यः । एके मोहनीयोदयात् **कण्डरीका**दयः, न सर्वे । संयमात् समस्तद्वन्द्वोपशमरूपाद् निवर्तन्ते । अपि इति सम्भाव्यत एत[10]न्मोहोदयस्येत्यपिशब्दार्थः । किम्भूताः सन्तो निवर्तन्ते ? इत्याह—मन्दाः जडा अपगतकर्तव्या-ऽकर्तव्यविवेकाः । कुत एवम्भूताः ? यतो मोहेन प्रावृताः मोहः अज्ञानं मिथ्यात्वमोहनीयं वा तेन प्रावृताः [11]गुण्ठिताः, उक्तं च—

---

१. "हेतुम् इति वैराग्यादि" जे०वि०प० । २. ०पि न भवतः कर्ण० ख च । ३. ०मगमद् च । ४. क्षणः जरत्पट्ट० ग च । ५. ०र्वा विमुक्तः स्नेहाभिष्वङ्गादिभिर्मुक्तः ख । ६. भरतादिवदिति च । ७. संसारवर्तिनो च । ८. ०मभिवसन्तीत्याह-अणाणाए ख । ९. अनाज्ञया इति ग-चप्रत्योर्नास्ति । १०. ०न्मोहोदयादित्यपि० ख । ११. अवगुण्ठिताः ख ।

**अज्ञानं खलु कष्टं [1]क्रोधादिभ्योऽपि सर्वपापेभ्यः ।**

**अर्थं हितमहितं वा न वेत्ति येनावृतो लोकः ॥** [ ] इत्यादि ।

तदेवमवाप्तचारित्रोऽपि [2]कर्मोदयात् परीषहोदये कृतलिङ्गपश्चाद्भावतामवलम्बत इत्युक्तम् । अपरे तु स्वरुचिविरचितवृत्तयो नानाविधैरुपायै[3]र्लोकादर्थं जिघृक्षवः किल वयं [4]संसारोद्विग्ना मुमुक्षवस्तेषु तेष्वारम्भविषयाभिष्वङ्गेषु प्रवर्तन्त इति दर्शयति—

**अपरिग्गहा** इत्यादि । [5]परि समन्ताद् मनो-वाक्-कायकर्मभिर्गृह्यत इति परिग्रहः, स येषां नास्तीत्यपरिग्रहाः, 'एवम्भूता वयं भविष्यामः' इति **शाक्या**दि-*मतानुसारिणः स्वयूथ्या वा समुत्थाय चीवरादिग्रहणं प्रतिपद्य ततो लब्धान्* कामान् अभिगाहन्ते सेवन्ते, तिङ्व्यत्ययेन चैकवचनमिति । अत्र चान्त्यव्रतोपादानात् शेषाण्यपि ग्राह्याणि—अहिंसका वयं भविष्याम एवममृषावादिन [6]इत्याद्यायोज्यम् ।

तदेवं शैलूषा इवान्यथावादिनोऽन्यथाकारिणः कामार्थमेव तांस्तान् प्रव्रज्याविशेषान् बिभ्रति, उक्तं च—

**स्वेच्छाविरचितशास्त्रैः प्रव्रज्यावेषधारिभिः क्षुद्रैः ।**

**नानाविधैरुपायैरनाथवन्मुष्यते लोकः ॥** [ ] इत्यादि ।

तदेवं प्रव्रज्यावेषधारिणो लब्धान् कामानवगाहन्ते, तल्लाभार्थं च तदुपायेषु प्रवर्तन्ते इत्याह—

[7]**अणाणाए** इत्यादि, अनाज्ञया स्वैरिण्या बुद्ध्या मुनय इति मुनिवेषविडम्बिनः कामोपायान् **प्रत्युपेक्षन्ते** कामोपायारम्भेषु पौनःपुण्येन लगन्तीति, आह च—[8]**एत्थ** इत्यादि, अत्र अस्मिन् विषयाभिष्वङ्गाज्ञानमये भाव**मोहे** पौनःपुण्येन **सन्नाः** [9]विषण्णा निमग्नाः पङ्कावमग्ना नागा इवात्मानमाक्रष्टुं नालमिति, आह च—

---

१. **मोहादिभ्यो०** ख । २. **कर्मोदयाङ्गीकृतलिङ्गपश्चाद्भा०** ग । ३. **०र्लोकं जिघृ०** ख, **०र्लोकार्थं** क । ४. **संसारादुद्विग्ना** ख च । ५. **परिः** क-गप्रती ऋते । ६. **इत्यप्यायोज्यम्** ख, **इत्याद्यप्यायोज्यम्** ग घ च । ७. **अणाणाएत्यादि** घ ङ । ८. **इत्थ** घ ङ । ९. **विषण्णा** इति ख-गप्रत्योर्न विद्यते ।

**नो हव्वाए[1] नो पाराए,** यो हि मध्येमहानदीपूरं[2] निमग्नो भवत्यसौ नारातीयतीराय नापि पारेमहानदीपूरमिति[3], एवमत्रापि कुतश्चिन्निमित्तात् त्यक्तगृह-गृहिणी-पुत्र-धन-धान्य-हिरण्य-रत्न-कुप्य-दासी-दासादिविभव[4] आकिञ्चन्यं प्रतिज्ञाय आरातीयतीरदेश्याद् गृहवाससौख्यान्निर्गतः[5] सन् **नो हव्वाए[6]** त्ति भवति, पुनरपि वान्तभोगाभिलाषितया यथोक्तसंयमाभावे[7] तत्क्रियाया विफलत्वात् **नो पाराए** त्ति भवति उभयतो मुक्तबन्धना मुक्कोलीवोभयभ्रष्टो[8] न गृहस्थो नापि प्रव्रजित इत्युक्तं[9] भवति, उक्तं च—

**इन्द्रियाणि न गुप्तानि लालितानि न वेच्छया[10] ।**
**मानुष्यं दुर्लभं प्राप्य न भुक्तं न विशोषितम् ॥** [ ] इति ॥

ये पुनरप्रशस्तरतिनिवृत्ताः प्रशस्तरतिमधिशयानास्ते किम्भूता भवन्ति ? इत्याह—

## [ सू०७१ ] विमुक्का हु ते जणा जे जणा पारगामिणो लोभमलोभेणं दुगुंछमाणो लद्धे कामे णाभिगाहति । विणा वि लोभं निक्खम्म एस अकम्मे जाणति पासति, पडिलेहाए णावकंखति, एस अणगारे त्ति पवुच्चति ।

**विमुक्का** इत्यादि । विविधम् अनेकप्रकारं द्रव्यतो धन-स्वजनानुषङ्गाद् भावतो विषय-कषायादिभ्योऽनुसमयं मुच्यमाना एव 'भाविनि भूतवदुपचाराद्' मुक्ताः विमुक्ताः ते जनाः **ये जनाः** सर्वस्वजनभूता निर्ममत्वाः पारगामिनो भवन्ति, पारः मोक्षः संसारार्णवतटवृत्तित्वात् तत्कारणानि ज्ञान-दर्शन-चारित्राण्यपि पार इति । भवति हि तादर्थ्यात् ताच्छब्द्यं यथा—तन्दुलान् वर्षति

---

१. "**हव्वं** गारुहत्थं पकामकामभोगित्तं, तं तेसिं अदढचित्ताणं ण भवति । **पारं** संजमो, तत्थ वि ते ण भवंति । ते उभयतो मुक्का ण गिहत्था ण पव्वइता भवंति ।" चूर्णौ । २. **०पूरनिमग्नो** ख । ३. **०पूर एवमिहापि** ख, **०पूरमिति । एवमिहापि** च । ४. **०विभवं** ग । ५. **गृहपाशसौख्या०** क । ६. **हव्वाइ त्ति** ख । ७. **०भावेन क्रियाया** घ ङ । ८. **मुत्कोली** ग, **मुक्काली** घ ङ, "**मुक्कोली** इति मोट्टा [?]" जै०वि०प० "उद्दे० २-**मुक्कोली** मोट्टा" स०वि०प० । ९. **इति । उक्तं च** ग च । १०. **न चेच्छया** क घ ङ च **नेच्छया** ग ।

[१]पर्जन्यः । [२]अतस्तं पारं [३]>ज्ञान-दर्शन-चारित्राख्यं गन्तुं शीलं येषां ते पारगामिनः । ते मुक्ता भवन्तीति पूर्वेण सम्बन्धः । कथं पुनः सम्पूर्णपार[४]गामित्वं भवति ? इत्याह—

**लोभं इत्यादि** । इह हि लोभः सर्वसङ्गानां दुस्त्यजो भवति, तथाहि— **क्षपक**श्रेण्यन्तर्गत[५]स्यापगताशेषकषायस्यापि खण्डशः [६]क्षप्यमाणोऽप्यनुबध्यत इति । अतस्तं **लोभं** तद्विपक्षेण **अलोभेन जुगुप्समानः** निन्दन् परिहरन्, किं करोति ? इत्याह—

[७]**लद्धे** इत्यादि । लब्धान् प्राप्तान् इच्छा-मदन[८]रूपान् कामान् **नाभिगाहते** [९]न सेवते । यो हि शरीरादावपि निवृत्तलोभः स कामाभिष्वङ्गवान् न भवति **ब्रह्मदत्ता**मन्त्रित**चित्र**वदिति । प्रधानान्त्यलोभपरित्यागेन चोपसर्जनाधस्तन-परित्यागो द्रष्टव्यः, तद्यथा—क्रोधं क्षान्त्या जुगुप्समानः, मानं मार्दवेन, माया-मार्जवेन इत्याद्यप्यायोज्यम् । लोभोपादानं तु सर्व[१०]कषायप्राधान्य[११]ख्यापनार्थम्, तथाहि—तत्प्रवृत्तः साध्या-ऽसाध्य[१२]विवेकविकलः कार्या-ऽकार्यविचाररहितः सन्नर्थैकदत्तदृष्टिः पापोपादानमास्थाय सर्वाः> क्रिया अधितिष्ठतीति, तदुक्तम्—

**धावेइ रोहणं तरइ सायरं भमइ गिरि[१३]णिगुंजेसु ।**
**मारेइ बंधवं पि हु पुरिसो जो होइ धणलुद्धो ॥**
**अडइ बहुं वहइ भरं सहइ छुहं पावमायरइ [१४]धँट्ठो ।**
**कुल-सील-[१५]जाइपच्चट्ठिइं च [१६]लोभद्दुओ चयइ ॥** [ ] इत्यादि ।

तदेवं कुतश्चिन्निमित्तात् सहापि लोभादिना निष्क्रम्य पुनर्लोभादिपरित्यागः कार्यः । अन्यस्तु लोभं विनाऽपि प्रव्रज्यां प्रतिपद्यत इति दर्शयति—

---

१. **पर्जन्यः** इति कपुस्तके नास्ति । २. **अतस्तत्पारं** ख-चप्रती विना । ३. एतन्मध्यगः पाठः खआदर्शे नास्ति । ४. **०गामित्वं च भवति ?** च । ६. **०स्यापगतशेष०** च । ६. **क्षिप्यमाणो०** ख च । ७. **लद्धे कामे इत्यादि** ख च । ८. **०रूपादीम्न( न् ) कामान्** क । ९. **नासेवते** ग । १०. **०कषायप्रधानख्या०** ग । ११. **०ख्यापनार्थमुपाददे, तथाहि** कप्रतिमृते । १२. **०विवेकरहितः कार्या०** ख । १३. **०णिउंजेसु** ख च । १४. **धिट्ठो** ग । १५. **०जायपच्चयठिइं** ग ङ **०जाइपच्चयधिइं** च, **०जायपच्चयथिइं** च । १६. **लोभुद्दुओ** च ।

**विणा**[१] **वि लोहं**[२] इत्यादि । कश्चित् **भरतादिः** निःशेषतो लोभापगमात्, विनापि लोभं **निष्क्रम्य** प्रव्रज्यां प्रतिपद्य । पाठान्तरं वा **विणइत्तु लोभं** सञ्ज्वलनसंज्ञकमपि लोभं विनीय निर्मूलतोऽपनीय । **एष** एवम्भूतः सन् **अकर्मा** अपगतघातिकर्म[३]चतुष्टयाविर्भूतानावरणज्ञानो विशेषतो **जानाति,** सामान्यतः **पश्यति,** एतदुक्तं भवति–एवम्भूतो लोभो येन तत्क्षये मोहनीयक्षयः, मोहनीयक्षये [४]चावश्यम्भावी घातिकर्मक्षयः, तस्मिंश्च निरावरणज्ञानसद्भावः, ततोऽपि भवोपग्राहिकर्मापगम इति, अतो लोभापगमे अकर्मा इत्युक्तम् । यतश्चैवम्भूतो लोभो दुरन्तस्तद्धानौ चावश्यं कर्मक्षयस्ततः किं कर्तव्यम् ? इत्याह–

**पडिलेहाए**[५] इत्यादि । प्रत्युपेक्षणया गुण–दोषपर्यालोचनयोपपन्नः सन्, अथवा लोभविपाकं प्रत्युपेक्ष्य पर्यालोच्य तदभावे गुणं च, लोभं **नावकाङ्क्षति** नाभिलषतीति । यश्चाज्ञानोपहतान्तःकरणोऽप्रशस्तगुणमूल[६]स्थानवर्ती विषय-[७]कषायाद्यध्युपपन्नस्तस्य [८]पूर्वोक्तं विपरीततया सर्वं सन्तिष्ठते, तथाहि–अलोभं लोभेन जुगुप्समानो लब्धान् कामानवगाहते, लोभमनपनीय निष्क्रम्य पुनरपि लोभैकमनाः सकर्मा न जानाति नापि पश्यति, अपश्यंश्चाप्रत्युपेक्षणयाऽभिकाङ्क्षति । यच्च **प्रथमोद्देशके**ऽ[९]प्रशस्तगुणमूलस्थानमवाचि तच्च [१०]वाच्यमिति । आह [११]च–

## [ सू०७२ ] अहो य रातो य परितप्पमाणे कालाकाल-समुट्ठायी संजोगट्ठी अट्ठालोभी आलुंपे सहसक्कारे विणिविट्ठचित्ते एत्थ सत्थे पुणो पुणो ।

---

१. **विणाभिलोभ इत्यादि** क । २. **लोभमित्यादि** घ ङ । ३. **०चतुष्टयः आविर्भूता०** ख । ४. **चावश्यं घाति०** घ ङ । ५. **पडिलेहए** क । ६. **०स्थान-विषय०** च । ७. **०कषायाध्युपपन्न०** ख च. **०कषायाद्युपपन्न०** ग । ८. **पूर्वोक्तं सर्वं विपरीततया सन्तिष्ठते** ख । ९. **०प्रशस्तमूलगुणस्थान०** घ ङ । १०. **वाच्यम् । आह च** च । ११. **च** इति घप्रतौ नास्ति ।

**[ सू०७३ ] से आतबले, से णातबले, से मित्तबले, से पेच्चबले, से देवबले, से रायबले, से चोरबले, से अतिथिबले, से किवणबले, से समणबले, इच्चेतेहिं विरूवरूवेहिं कज्जेहिं दंडसमादाणं सपेहाए भया कज्जति, पावमोक्खो त्ति मण्णमाणे अदुवा आसंसाए ।**

**अहो य राओ**[1] इत्यादि । **अहोरात्रं परितप्यमानः कालाकालसमुत्थायी संयोगार्थी अर्थालोभी**[2] **आलुम्पः**[3] **सहसाकारो विनिविष्टचित्तः** अत्र[4] **'शस्त्रे'** पृथिवीकायाद्युपघातकारिणि **पौनःपुण्येन** वर्तते । किञ्च–

**से आयबले** आत्मनः बलं शक्त्युपचय आत्मबलम्, तन्मे भावी इति कृत्वा नानाविधैरुपायैरात्मपुष्टये तास्ताः क्रिया ऐहिका-ऽऽमुष्मिकोपघातकारिणीर्विधत्ते[5], तथाहि–मांसेन पुष्यते मांसम् इति कृत्वा पञ्चेन्द्रियघातादावपि प्रवर्तते, अपराश्चालुम्पनादिकाः[6][7] सूत्रेणैवाभिहिताः । एवं **तद्**[8] **ज्ञातिबलं**[9] स्वजनबलं मे भावीति । तथा **तद् मित्रबलं** मे भविष्यति येनाहमापदं सुखेनैव निस्तरिष्यामि[10] । **तत् प्रेत्यबलं** मे[11] भविष्यतीति[12] बस्तादिकमुपहन्ति । तद्वा[13] **देवबलं** भावीति पचन-पाचनादिकाः[14] क्रिया विधत्ते । **राजबलं** वा मे भविष्यति राजानमुपचरति[15] । चोरभागं[16] वा समत्स्यामि चौरानुपचरति[17] । **अतिथिबलं** वा मे भविष्यति[18] अतिथीनुपचरति, अतिथिर्हि निस्पृहोऽभिधीयते इति, उक्तं च–

**तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना ।**
**अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥ [ ]**

---

१. राओ य परितप्पमाणे इत्यादि ख । २. अर्थलोभी ख ग । ३. आलुम्पी ख । ४. अत्र च शस्त्रे घ ङ च । ५. ०विदधाति ख । ६. अपराश्च लम्पना० क । ७. ०दिकाः क्रियाः सूत्रेणै० ख । ८. तद् इति ख-ग-चप्रतिषु नास्ति । ९. जातिबलं घ च । १०. निस्तरिष्यामीति । तत् ख च । ११. मम ख च । १२. भविष्यति बस्ता० घ ङ । १३. तथा देव० ख ग । १४. ०पाचनक्रिया ङ । १५. ०ति । चौरग्रामे वा वसति चोरभागं ग । १६. चौरभागं ख घ ङ । १७. चोरा० ख च । १८. भविष्यतीति च ।

एतदुक्तं भवति—तद्बलार्थमपि प्राणिषु दण्डो न निक्षेप्तव्य इति । एवं कृपण-श्रमणार्थमपि वाच्यमिति ।

एवं पूर्वोक्तैः विरूपरूपैः नानाप्रकारैः पिण्डदानादिभिः कार्यैः दण्डसमादानम् इति दण्ड्यन्ते व्यापाद्यन्ते प्राणिनो येन स दण्डः तस्य सम्यगादानं ग्रहणं समादानम् 'तदात्मबलादिकं मम नाभविष्यद् यद्यहमेतन्नाकरिष्यम्' इत्येवं [1]सम्प्रेक्षया पर्यालोचनया एवं सम्प्रेक्ष्य वा भयात् क्रियते । एवं तावदिह-भवमाश्रित्य दण्ड[2]समादानकारणमुपन्यस्तम्, आमुष्मिकार्थमपि परमार्थमजानानै-र्दण्डसमादानं क्रियत इति दर्शयति—**पावमोक्खो त्ति** इत्यादि । पातयति [3]पासयतीति वा पापम् तस्माद् मोक्षः [4]पापमोक्षः, इति हेतोः, [5]यस्माद् मम [6]भविष्यति [7]इति मन्यमानः दण्डसमादानाय प्रवर्तत [8]इति, तथाहि—हुतभुजि षड्-जीवोपघातकारिणि शस्त्रे नानाविधोपायप्राण्युप[9]घातात्तपापविध्वंसनाय [10]पिप्पल-शमी-समित्तिला-ऽऽज्यादिकं शठव्युद्ग्राहितमतयो जुह्वति, तथा पितृपिण्डदानादौ बस्तादि[11]मांसोपस्कृतभोजनादिकं द्विजातिभ्य उपकल्पयन्ति, तद्भुक्तशेषानुज्ञातं [12]स्वतोऽपि भुञ्जते । तदेवं नानाविधैरुपायैरज्ञानोपहतबुद्धयः पापमोक्षार्थं दण्डोपादानेन तास्ताः क्रियाः प्राण्युपघातकारिणीः समारभमाणा अनेक-भवशत[13]कोटीदुर्मोचमघ[14]मेवोपाददत इति । किञ्च—

**अदुवा** इत्यादि । पापमोक्ष इति मन्यमानो दण्डमादत्त इत्युक्तम् । अथवा आशंसनम् आशंसा अप्राप्तप्रापणाभिलाषः तदर्थं दण्डसमादानमादत्ते, तथाहि—ममैतत् परुत्परारि वा प्रेत्य वोपस्थास्यते इत्याशंसया क्रियासु प्रवर्तते, राजानं वाऽर्थाशाविमोहितमना अवलगति, उक्तं च—

**आराध्य भूपतिमवाप्य ततो धनानि, भोक्ष्यामहे किल वयं सततं सुखानि ।**
**इत्याशया [15]बत विमोहितमानसानां, कालः प्रयाति मरणावधिरेव पुंसाम् ॥ [ ]**

---

१. "सयं पेहाए **सपेहाए**" चूर्णौ । २. **०समुपादान०** ग । ३. **पांसयतीति** ख ग घ । ४. "सम्मोक्खो पामोक्खो" चूर्णौ । ५. **यस्मात् स मम** ग । ६. **भविष्यतीति इत्येवं मन्य०** ग ङ । ७. **इत्येवं मन्य०** ख च । ८. **इति** इति ख-चप्रत्योर्नास्ति । ९. **०घातात् पाप०** ग च । १०. **पिप्पल०** घ ङ च । ११. **०मांसोपसंस्कृत०** ख-चप्रती विना । १२. **स्वतो भुञ्जते** ख-चपुस्तके ऋते । १३. **०कोटि०** ख च । १४. **०मेवोपाददति** ख-चआदर्शाभ्यामृते । १५. **वठ** क, **बल** ख, **वन** घ ङ ।

**एहि गच्छ पतोत्तिष्ठ, वद मौनं समाचर ।**
**इत्याद्याशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥** [ ] इत्यादि ।

तदेवं ज्ञात्वा किं कर्तव्यम् ? इत्याह–

**[ सू०७४ ] तं परिण्णाय मेहावी णेव सयं एतेहिं कज्जेहिं दंडं समारभेज्जा, णेव अण्णं एतेहिं कज्जेहिं दंडं समारभावेज्जा णेवऽन्ने एतेहिं कज्जेहिं दंडं समारभंते समणुजाणेज्जा ।**

**एस मग्गे आरिएहिं पवेदिते जहेत्थ कुसले णोवलिंपेज्जासि त्ति बेमि ।**

**तं** इत्यादि । **तद्** इति सर्वनाम प्रक्रान्तपरामर्शि । तत् **शस्त्रपरिज्ञोक्तं** स्वकाय[1]परकायादिभेदभिन्नं शस्त्रम्, इह वा यदुक्तमप्रशस्तगुणमूलस्थानं विषय-कषाय-माता-पित्रादिकम्, तथा कालाकालसमुत्थान-[2]क्षणपरिज्ञान-श्रोत्रादि-विज्ञानप्रहाणादिकम्, तथाऽऽत्म[3]बलाधानाद्यर्थं च दण्डसमादानं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया [4]च परिहरेत् मेधावी मर्यादावर्ती, ज्ञातहेयोपादेयः सन् किं कुर्यात् ? इत्याह–

**नेव [5]सय**मित्यादि । नैव स्वयम् आत्मना [6]एतैः आत्मबलाधानादिकैः कार्यैः कर्तव्यैः [7]समुत्थितैः सद्भिः दण्डं सत्त्वोप[8]घातं समारभेत, नाप्यन्यम् अपर[9]मेभिः कार्यैर्हिंसा-ऽनृतादिकं दण्डं समारम्भयेत्, तथा समारभमाणमप्यपरं योगत्रिकेण न समनुज्ञापयेत् ।

एष चोपदेशस्तीर्थकृद्भिरभिहित इत्येतत् **सुधर्मस्वामी जम्बूस्वामिन**माहेति दर्शयति–

---

१. **०परकायभेद०** ख ग च । २. **०क्षणापरिज्ञान०** ग ङ । ३. **०बलाधानार्थं** ग । ४. **च** इति ख-च प्रती विनाऽन्यत्र नास्ति । ५. **सयं इत्यादि** ख च । ६. **एतैः अयमात्मबला०** ग । ७. **समुपस्थितैः** ख च । ८. **०घातमारभेत** ख । ९. **०मेभिः हिंसा०** ख ग ।

**एस** इत्यादि । एष इति ज्ञानादियुक्तो भावमार्गो योगत्रिक-करणत्रिकेण दण्डसमादानपरिहारलक्षणो वा । **आर्यैः** आराद्याताः सर्वहेयधर्मेभ्य इति आर्याः संसारार्णवतटवर्तिनः [१]क्षीणघातिकर्मांशाः संसारोदरविवरवर्तिभाववेदः तीर्थकृतस्तैः । प्रकर्षेण सदेव-मनुजायां [२]परिषदि सर्वस्वभाषानुगामिन्या वाचा यौगपद्याशेषसंशीतिच्छेत्त्र्या प्रकर्षेण वेदितः कथितः प्रतिपादित इति यावत् । एवम्भूतं [३]च मार्गं ज्ञात्वा किं कर्तव्यम् ? इत्याह—

**जहेत्थ** इत्यादि । तेषु तेष्वात्मबलोपधानादिकेषु कार्येषु [४]समुत्थितेषु सत्सु दण्डसमुपादानादिकं परिहरन् कुशलः निपुणोऽवगततत्त्वो यथैतस्मिन् दण्डसमुपादाने [५]स्वमात्मानं नोपलिम्पयेः न तत्र संश्लेषं कुर्या इति । विभक्तिपरिणामाद्वा एतेन दण्डसमुपादानजनितकर्मणा यथा नोपलिप्यसे तथा सर्वैः प्रकारैः कुर्यास्त्वम् । **इति**शब्दः परिसमाप्तौ । **ब्रवीमि** इति पूर्ववत् ।

**लोकविजये [६]द्वितीय उद्देशकः समाप्तः ॥छ॥ छ॥**

• • •

---

१. **क्षीणकर्मांशाः** ख । २. **पर्षदि** ख ग च । ३. **च** इति कपुस्तके न, **च धर्मं ज्ञात्वा** ख । ४. **समुपस्थितेषु** ख । ५. **त्वमात्मानं** ख घ ङ । ६. **द्वितीयोद्देशकः** ख ङ च ।

उक्तो द्वितीयोद्देशकः । [1]साम्प्रतं तृतीय आरभ्यते—अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके 'संयमे दृढत्वं कार्यम्, असंयमे चादृढत्वम्' उक्तम्, तच्चोभयमपि कषायव्युदासेन सम्पद्यते, तत्रापि मानः उत्पत्तेरारभ्य उच्चैर्गोत्रोत्थापितः स्यात्, अतस्तद्व्युदासार्थमिदमभिधीयते ।

अस्य चानन्तरसूत्रेण सम्बन्धः—**जहेत्थ कुसले [2]नोवलिप्पेज्जासि** कुशलः [3]निपुणः सन्नस्मिन्नुच्चैर्गो[4]त्राभिमाने यथाऽऽत्मानं नोपलिम्पयेस्तथा विदध्यास्त्वम् । किं मत्वा ? इत्यतस्तदभिधीयते—

**[ सू०७५ ] से असइं उच्चागोए, असइं णीयागोए । णो हीणे, णो अतिरित्ते । णो पीहए ।**

**इति संखाए के गोतावादी ? के माणावादी ? कंसि वा एगे गिज्झे ?**

**तम्हा पंडिते णो हरिसे, णो कुज्झे ।**

**से [5]असइं उच्चागोए [6]असइं [7]नीचागोए** त्ति । स इति संसार्यसुमान् [8]असकृत् अनेकशः उच्चैर्गोत्रे मान-सत्कारार्हे उत्पन्न इति शेषः । तथा असकृत् नीचैर्गोत्रे सर्वलोकावगीते पौनःपुन्येनोत्पन्न इति । [9]तथाहि—नीचैर्गोत्रोदयाद् अनन्तमपि कालं तिर्यक्ष्वास्ते, तत्र [10]च पर्यटन् द्विनवतिनामोत्तरप्रकृतिसत्कर्मांसस्तथाविधाध्यवसायोपपन्नः आहारकशरीर-तत्सङ्घात-बन्धना-ऽङ्गोपाङ्ग-देवगत्यानुपूर्वीद्वय-नरकगत्यानुपूर्वीद्वय-वैक्रियचतुष्टयरूपा एता द्वादश कर्मप्रकृतीर्निर्लेप्याशीतिसत्कर्मा तेजोवायुषूत्पन्नः सन् मनुजगत्यानुपूर्वीद्वयमपि निर्लेप्य [11]तत उच्चैर्गोत्रमुद्वलयति पल्योपमासङ्ख्येयभागेन । अतस्तेजो-

---

१. **साम्प्रतं** इति ङप्रतौ नास्ति । २. **नोवलिप्पिज्जासि** ख, **नोवलिंपेज्जासि** ग । ३. **निपुणस्तस्मि०** ख । ४. **०त्राभिधाने** ख च । ५. **असइ** क, **असई** ग । ६. **असई** ग, **असइ** च । ७. **नीआगोइ** ख, **नीयागोए** घ ङ च । ८. "**असइ** *अणेगसो अणंतसो वा*" चूर्णौ । ९. **तथा नीचै०** क घ ङ । १०. **च** इति क-ङ-प्रत्योर्नास्ति । ११. **तत उच्चैर्गोत्रं च पल्यो०** ख ।

वायुष्वाद्य[1] एव भङ्गकः, तद्यथा–नीचैर्गोत्रस्य बन्धः[2] उदयोऽपि तस्यैव सत्कर्मताऽपीति[3] । ततोऽप्युद्वृत्तस्या[4]परैकेन्द्रियगतस्यायमेव भङ्गः । त्रसेष्वप्यपर्याप्तकावस्थायामयमेव । अनिर्लेपिते तूच्चैर्गोत्रे[5] द्वितीय-चतुर्थौ भङ्गौ, तद्यथा–नीचैर्गोत्रस्य बन्धः, उदयोऽपि तस्यैव, सत्कर्मता तूभयरूपस्यैवेति द्वितीयः, तथा[6] उच्चैर्गोत्रस्य बन्धः, नीचस्योदयः, सत्कर्मता तूभयरूपस्येति चतुर्थः । शेषास्तु चत्वारो न सन्त्येव तिर्यक्षूच्चैर्गोत्रस्योदयाभावादिति भावः । तदेवमुच्चैर्गोत्रोद्वलनेन कालङ्कली[7]भावमा[8]पन्नोऽसङ्ख्येयमपि कालं सूक्ष्मत्रसेष्वास्ते, ततोऽप्युद्वृत्त उच्चैर्गोत्रोदयाभावे सति द्वितीय-चतुर्थभङ्गस्थोऽनन्तमपि कालं तिर्यक्ष्वास्त इति, स चानन्ता उत्सर्पिण्यवसर्पिणीः, आवलिकाकालासङ्ख्येयभागसमयसङ्ख्यान् पुद्गलपरावर्तानिति ।

कीदृशः पुनः पुद्गलपरावर्तः ? इत्युच्यते–यदौदारिक-वैक्रिय-तैजस[9]-भाषा-[10]ऽऽनापान-मनः-कर्मसप्तकेन संसारोदरविवर[11]वर्तिनः पुद्गला आत्म-

---

१. ०ष्वाद्यो भङ्गकः ख च, ०ष्वाद्य एव भङ्गः ग, "आद्य एव इति सप्तत्या[?]-प्रकार-प्रसिद्धगोत्रसम्बन्धे सप्तभङ्ग्य(ङ्गा)न् हृदि व्यवस्थाप्यासिस्व[?]वल्लिखति आ" जै०वि०प०.

| | | |
|---|---|---|
| ० | उ | उ |
| ० | उ | २ |
| उ | उ | २ |
| उ | नी | २ |
| नी | उ | २ |
| नी | नी | २ |
| नी | नी | नी |
| उ | उ | स(उ ?) |

ङ पुस्तके त्वेतादृक् कोष्ठकमुपलभ्यते––

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| नी | नी | नी | उ | उ | ० | ० | बन्धः |
| नी | नी | उ | नी | उ | उ | उ | उदयः |
| नी | २ | २ | २ | २ | २ | उ | सत्ता |

२. बन्धो नीचस्योदयः सत्क० ख । ३. "सत्कर्मताऽपीति सत्ताऽपीति" जै०वि०प० । ४. ०स्यान्यत्राप्यादावयमेव च । ५. तूच्चैर्गोत्रे द्वितीयो भङ्गकः, कस्यचित् प्रथमसमय एवापरस्यान्तर्मुहूर्ताधो( द्वो )र्ध्वमुच्चैर्गोत्रसम्बन्धसद्भावे चतुर्थभङ्गकः, तद्यथा–नीचैर्गोत्रस्य बन्धः उदयोऽपि तस्यैव सत्कर्मता तूभयरूपस्यैवेति द्वितीयः, तथा च । ६. तत उच्चै० ग घ ङ कपुस्तके पाठभङ्गः । ७. कलङ्कली० घ ङ "कलङ्कलीभाव इति आरघट्टघटीयन्त्रन्यायेन" जै०वि०प० । ८. ०मापन्नोऽनन्तं कालमेकेन्द्रियेष्वास्ते, अनुद्वलिते वा तिर्यक्ष्वास्तेऽनन्ता उत्सर्पिण्य० ग घ ङ । ९. ०तैजस-कार्मण-भाषा० च । १०. ०ऽऽनपान० घ । ११. ०वर्तिना ख ।

सात्परिणामिता भवन्ति तदा पुद्गलपरावर्त **इत्येके । अन्ये** तु द्रव्य-क्षेत्र-काल-भावभेदात् चतुर्धा वर्णयन्ति, प्रत्येकमसावपि बादर-सूक्ष्मभेदाद् द्वैविध्यमनुभवति। तत्र द्रव्यतो बादरो यदौदारिक-वैक्रिय-तैजस-कार्मणचतुष्टयेन सर्वपुद्गला गृहीत्वोज्झितास्तदा भवति, सूक्ष्मः पुनर्यदैकशरीरेण सर्वपुद्गलाः [1]स्पर्शिता भवन्ति तदा द्रष्टव्यः । क्षेत्रतो बादरो यदा क्रमोत्क्रमाभ्यां म्रियमाणेन [2]सर्वे लोकाकाशप्रदेशाः स्पृष्टा भवन्ति तदा विज्ञेयः, सूक्ष्मस्[3]तु यदैकस्मिन् विवक्षिताकाशखण्डके [4]मृतः पुनर्यदा तस्यानन्तरप्रदेशवृद्ध्या [5]सर्वं लोकाकाशं व्याप्नोति तदा ग्राह्यः । कालतो बादरो यदोत्सर्पिण्यवसर्पिणीसमयाः क्रमोत्क्रमाभ्यां म्रियमाणेनालिङ्गिता भवन्ति तदा विज्ञेयः, सूक्ष्मस्तूत्सर्पिणीप्रथमसमयादारभ्य क्रमेण सर्वसमया म्रियमाणेन यदा [6]छुप्ता भवन्ति तदाऽवगन्तव्यः । भावतो बादरो यदा[7]ऽनुभागबन्धाध्यवसायस्थानानि क्रमोत्क्रमाभ्यां म्रियमाणेन व्याप्तानि भवन्ति तदाऽभिधीयते, अनुभागबन्धाध्यवसायप्रमाणं तु संयमस्थानावसरे प्रागेवाभ्यधायीति, सूक्ष्मस्तु जघन्या[8]नुभागबन्धाध्यवसायस्थानादारभ्य यदा सर्वेष्वपि क्रमेण मृतो भवति तदाऽवसेय इति ।

तदेवं कालङ्कलीभावमापन्नोऽ[9]न्यो वा नीचैर्गोत्रोदयाद् [10]अनन्तमपि कालं तिर्यक्ष्वास्ते । मनुष्येष्वपि [11]तदुदयादेवावगीतोऽवगीतेषु स्थानेषूत्पद्यते । तथा [12]कालङ्कलीसत्त्वोऽपि द्वीन्द्रियादिषूत्पन्नः सन् प्रथमसमये एव पर्याप्त्युत्तरकालं वोच्चैर्गोत्रं बद्ध्वा मनुष्येष्वसकृदुच्चैर्गोत्रमास्कन्दति । तत्र कदाचित् तृतीयभङ्गकस्थः पञ्चमभङ्गोपपन्नो वा भवति, ताविमौ—नीचैर्गोत्रं बध्नाति; [13]उच्चैर्गोत्रस्योदयः; सत्कर्मता [14]तूभयस्य; तृतीयः । पञ्चमस्तूच्चैर्गोत्रं बध्नाति; तस्यैवोदयः; [15]सत्कर्मता तूभयस्य । षष्ठ-सप्तमभङ्गौ तूपरतबन्धस्य भवतः,

---

१. **स्पृष्टा** ख। २. **०णेनालिङ्गिता भवन्ति तदा** ग, **०णेन सर्वलोका०** क च । ३. **०स्तु तदा विज्ञेयो यदै०** ख-च पुस्तके विना । ४. **म-तस्तस्यानन्तर०** ख । ५. **सर्वलोका०** क-घ प्रती विना । ६. **प्लुता** च । ७. **०ऽनुभावबन्धा०** ग । ८. **०नुभावबन्धा०** ङ । ९. "**अन्यो वा** इति निगोदः" जै०वि०प० । १०. **अनन्तकालं** घ ङ। ११. **०देवावगीतोऽवगीतेषु** ख, **०देवावगीयते । तेषु स्थानेषू०** च । १२. **कलङ्कली०** च । १३. **उच्चैर्गोत्रोदयः** क । १४. **तूभयस्येति तृ०** ख । १५. **सत्कर्मतोभयस्य** च ।

अविषयत्वाद् न ताभ्यामिहाधिकारः । तौ चेमौ—बन्धोपरमे उच्चैर्गोत्रोदयः; सत्कर्मता तूभयस्येति षष्ठः, सप्तमस्तु शैलेश्यवस्थायां द्विचरमसमये नीचैर्गोत्रे क्षपिते उच्चैर्गोत्रोदयः, तस्यैव सत्कर्मतेति ।

तदेवमु[1]च्चा-ऽवचेषु गोत्रेष्वसकृदुत्पद्यमानेनासुमता पञ्चभङ्गकान्तर्वर्तिना न मानो विधेयो नापि दीनतेति । तयोश्चोच्चा-ऽवचयोर्गोत्रयोर्बन्धाध्यवसाय-स्थानकण्डकानि तुल्यानीत्याह—**णो हीणे णो अ[2]इरित्ते** । यावन्त्युच्चैर्गोत्रेऽनुभावबन्धा[3]ध्यवसायस्थानकण्डकानि नीचैर्गोत्रेऽपि तावन्त्येव । तानि च सर्वाण्यप्यसुमताऽनादिसंसारे भूयो भूयः स्पर्शितानि । त[4]त उच्चैर्गोत्र-कण्डकार्थतयाऽसुभृन्न हीनो ना[5]प्यतिरिक्तः । एवं नीचैर्गोत्रकण्डकार्थतयाऽपीति ।

**नागार्जुनीयास्तु** पठन्ति—**एगमेगे खलु जी[6]वे अ[7]ईअद्धाए अ[8]सइं उच्चागोए असइं नीयागोए, कं[9]डयट्ठयाए नो[10] हीणे नो अइरित्ते ।**

ए[11]कैको जीवः, **खलु**शब्दः वाक्यालङ्कारे, अतीते कालेऽसकृदुच्चा-ऽवचेषु गोत्रेषूत्पन्नः, स चोच्चा-ऽवचा[12]नुभागकण्डकापेक्षया न हीनो नाप्यतिरिक्त इति, तथाहि—उच्चैर्गोत्रक[13]ण्डकेभ्य एकभविकेभ्योऽनेकभविकेभ्यो वा नीचैर्गोत्रकण्डकानि न हीनानि [14]नाप्यतिरिक्तानीत्यतोऽवगम्य उत्कर्षा-ऽपकर्षौ न विधेयौ । अस्य चोपलक्षणार्थत्वात् सर्वेष्वपि मदस्थानेष्वेतदायोज्यम्, यतश्चोच्चा-ऽवचेषु स्थानेषु कर्मवशादुत्पद्यते ।

बल-रूप-लाभादिमदस्थानानां चासमञ्जसतामवगम्य किं कर्तव्यम् ? इत्याह—**नो [15]पीहए** [16]अपिः सम्भावने, स च भिन्नक्रमः, जात्यादीनां मद-स्थानाना[17]मन्यतमदपि नो [18]ईहेतापि नाभिलषेदपि । अथवा नो स्पृहयेत्

---

१. **०मुच्चा-वचगोत्रेष्व०** ग । २. **अतिरित्ते** ग । ३. **०ध्यवसायकण्डकानि** ख च । ४. **तत्र तूच्चै०** ख । ५. **नाप्यधिकः एवं** ख । ६. **ज्जीवे** क । ७. **अतीयद्धाए** ख च । ८. **असई** क । ९. **कंडगट्ठयाए** ख ग ङ **कंडट्ठयाए** च । १०. **नावि हीणे** ग । ११. **एवमेकैको** ख । १२. **०नुभावकण्डका०** ख । १३. "**कण्डकेभ्य** इति कोऽर्थः ? यदा बध्नाति तदा उच्चैर्गोत्रकण्डकानि" जै०वि०प०, "**कंडगं** परिमाणं छेदो त्ति वा" चूर्णौ । १४. **नाप्यधिकानी०** ख । १५. "**पीहणं** णाम [म]दनभिलासकयं पेमं" चूर्णौ । १६. **अपि** ग च । १७. **०मन्यतमदपि** ख ग । १८. **ईहित नाभि०** ख ।

[१]नावकाङ्क्षेदिति । तत्र यद्युच्चा-ऽ[२]वचेषु स्थानेष्वसकृदुत्पन्नोऽसुमांस्ततः किम् ? इत्याह—

**इति [३]संखाए** इत्यादि । इतिः उपप्रदर्शने । इत्येतत् पूर्वोक्तनीत्योच्चा-ऽवचस्थानोत्पादादिकं परिसङ्ख्याय ज्ञात्वा को गोत्रवादी भवेत् ? [४]यथा—ममोच्चैर्गोत्रं सर्वलोकमाननीयं नापरस्येत्येवंवादी को बुद्धिमान् भवेत् ? तथाहि—मयाऽन्यैश्च जन्तुभिः सर्वाण्यपि स्थानान्यनेकशः प्राप्तपूर्वाणीति । तथोच्चैर्गोत्रनिमित्तमानवादी वा को भवेत् ? न कश्चित् संसार[५]स्वरूपपरिच्छेदीत्यर्थः । किञ्च—

**कंसि वा एगे गिज्झे** अनेकशोऽनेकस्मिन् स्थानेऽनुभूते सति तन्मध्ये **कस्मिन् वा** एकस्मिन् उच्चैर्गोत्रादिकेऽनव[६]स्थितस्थानके रागादिविरहादेकः कथं **गृध्येत्**, तात्पर्यम्—आसेवां विदितकर्मपरिणामो विदध्यात् ? युज्येत गार्द्ध्यं यदि तत् [७]स्थानं प्राप्तपूर्वं नाभविष्यत्, तच्चानेकशः [८]प्राप्तपूर्वम्, अतस्तल्लाभा-ऽलाभयोर्नोत्कर्षा-ऽपकर्षौ विधेयाविति । आह [९]च—

**तम्हा** इत्यादि, यतोऽनादौ संसारे पर्यटताऽसुमताऽदृष्टायत्तान्यसकृ-दुच्चा-ऽवचानि स्थानान्यनुभूतानि, तस्मात् कथञ्चिदुच्चादिकं मदस्थानमवाप्य **पण्डितः** हेयोपादेयतत्त्वज्ञः [१०]**न हृष्येत** न हर्षं विदध्यात्, उक्तं च—

**सर्वसुखान्यपि बहुशः प्राप्तान्यटता मयाऽत्र संसारे ।**
**उच्चैःस्थानानि तथा तेन न मे विस्मयस्तेषु ॥** [ ]
**जइ सो वि निज्जरमओ पडिसिद्धो [११]अट्ठमाणमहणेहिं ।**
**[१२]अवसेसमयट्ठाणा परिहरियव्वा पयत्तेण ॥** [ ]

नाप्यवगीतस्थानावाप्तौ वैमनस्यं विदध्यात्, आह च—**नो [१३]कुज्झे** अदृष्टवशात् तथाभूतलोकासम्मतं जाति-कुल-रूप-बल-लाभादि[१४]कमधम-मवाप्य **न [१५]क्रुध्येत्** न क्रोधं [१६]कुर्यात्, कतरन्नीचस्थानं शब्दादिकं वा [१७]दुःखं मया

---

१. **नाभिकाङ्क्षेदिति** ख । २. **०वचस्थाने०** ङ । ३. **संखाय** ङ । ४. **तद्यथा** ख । ५. **०स्वभावपरि०** ख च । ६. **०स्थिते स्थाने** ख च, **०स्थिते स्थानके** ङ । ७. **स्थानं पूर्वं नाभ०** ग । ८. **प्राप्तम्, अत०** ख च । ९. **च** इति खपुस्तके नास्ति । १०. **न हृष्टो न हर्षं** ख, **न 'हृष्येत' हर्षं** क । ११. "**अट्ठमाण** इति अष्टमदाः" जै०वि०प० । १२. **अवसेसा मयठाणा** च । १३. **कुप्पे**'त्यदृष्ट० ग । १४. **०कमवाप्य** घ । १५. **कुप्येत्** क ग घ । १६. **कुर्वीत** च । १७. **दुःखं** इति खपुस्तके नास्ति ।

नानुभूतम् ? [1]इत्यवगम्य नोद्वेगवशगेन भाव्यम्, उक्तं च—

अवमानात् परिभ्रंशाद् वध-बन्ध-धनक्षयात् ।
प्राप्ता रोगाश्च शोकाश्च जात्यन्तरशतेष्वपि ॥ [ ]
संते य [2]अविम्हइउं असोइउं पंडिएण य असंते ।
सक्का हु दुमोवमियं हियएण हियं धरंतेण ॥ [ ]
होऊण चक्कवट्टी पुहइवई विमलपंडरच्छत्तो ।
सो चेव नाम भुज्जो अणाहसालालओ होइ ॥ [ ]

एकस्मिन् वा जन्मनि नानाभूतावस्था [3]उच्चा-ऽवचाः [4]कर्मवशतोऽनुभवति ।

तदेवमुच्च-[5]नीचगोत्रनिर्विकल्पमना अन्यदपि [6]अविकल्पेन किं कुर्यात् ? इत्याह—

**[ सू०७६ ] भूतेहिं जाण पडिलेह सातं । समिते एयाणुपस्सी । तंजहा—अंधत्तं बहिरत्तं मूकत्तं काणत्तं कुंटत्तं खुज्जत्तं वडभत्तं सामत्तं सबलत्तं । सह पमादेणं अणेगरूवाओ जोणीओ संधेति, विरूवरूवे फासे पडिसंवेदयति ।**

**[ सू०७७ ] से अबुज्झमाणे हतोवहते जाती-मरणं अणुपरियट्टमाणे ।**

**जीवियं पुढो पियं इहमेगेसिं माणवाणं खेत्त-वत्थु ममायमाणाणं । आरत्तं विरत्तं मणि-कुंडलं सह हिरण्णेण इत्थियाओ परिगिज्झ तत्थेव रत्ता । ण एत्थ तवो वा दमो**

१. इत्येवमवगम्य क-घप्रती विना । २. अविम्हइयं असोइअं क, अविम्हइओ ख । ३. उच्चा-ऽवचा ङ च । ४. कर्मवशगोऽनु० ख च । ५. ०नीचैर्गोत्र० ख । ६. अविकल्पेन इति गप्रतौ न विद्यते ।

**वा णियमो वा दिस्सति । संपुण्णं बाले जीविउकामे लालप्पमाणे मूढे विप्परियासमुवेति ।**

**भूएहिं** इत्यादि । भवन्ति भविष्यन्त्यभूवन्निति च[1] भूतानि असुभृतस्तेषु प्रत्युपेक्ष्य पर्यालोच्य विचार्य कुशाग्रीयया शेमुष्या जानीहि[2] अवगच्छ[3] । किं जानीहि ? सातं सुखम्, तद्विपरीतमसातमपि जानीहि । किं च कारणं साताऽसातयोः ? एतज्जानीहि—किं वाभिलषन्त्यविगानेन प्राणिनः इति । अत्र जीव-जन्तु-प्राण्यादिशब्दान् उपयोगलक्षणद्रव्यस्य मुख्यान् वाचकान्[4] विहाय सत्तावाचिनो[5] भूतशब्दस्योपादानेनेदमाविर्भावयति यथा[6]—अयमुपयोगलक्षणः पदार्थोऽवश्यं सत्तां बिभर्ति, साताभिलाष्यसातं च जुगुप्सते, साताभिलाषश्च शुभप्रकृतित्वात्, अतोऽपरासामपि शुभप्रकृतीनामुपलक्षणमेतदवसेयम्, अतः शुभनाम-गोत्रा-ऽऽयुराद्याः कर्मप्रकृतीरनुधावत्यशुभाश्च जुगुप्सते सर्वोऽपि प्राणी ।

एवं[7] च व्यवस्थिते[8] किं विधेयम् ? इत्याह—**समिए** इत्यादि । अथवा भूतेषु शुभाऽशुभरूपं कर्म प्रत्युपेक्ष्य यत् तेषामप्रियं तद्[9] न विदध्यात् इत्ययमुपदेशः ।

**नागार्जुनीयास्तु** पठन्ति—**पुरिसे[10] णं खलु दुक्खुव्वेय-सुहेसए ।**

पुरुषः जीवः । णमिति वाक्यालङ्कारे । खलुः अवधारणे । दुःखाद् उद्वेगो यस्य स दुःखोद्वेगः, सुखस्यैषकः सुखैषकः, याजकादित्वात् समासः छान्दसत्वाद्वा, दुःखोद्वेगश्चासौ सुखैषकश्च दुःखोद्वेग-सुखैषकः ।

सर्वोऽपि प्राणी दुःखोद्वेग-सुखैषक एव[11] भवति अतो जीवप्ररूपणं कार्यम् । तच्चावनि-वन-पवना-ऽनल-वनस्पति-सूक्ष्म-बादर-विकल-पञ्चेन्द्रिय-संज्ञीतर-पर्याप्तका-ऽपर्याप्तकरूपं **शस्त्रपरिज्ञा**यामकार्येव । तेषां च दुःखपरिजिहीर्षूणां सुखलिप्सूनामात्मौपम्यमाचरता तदुपमर्दकानि हिंसादिस्थानानि

---

१. **च** इति खआदर्शे नास्ति । २. "जाणति त्ति **जाणतो**" चूर्णौ । ३. **अवबुध्यस्व** ख च । ४. "**वाचकान्** इति शब्दान्" जै०वि०प० । ५. **०वादिनो** च । ६. **यथा समुपयोग०** क । ७. **एवं स्थिते सति किं** ख । ८. **व्यवस्थिते सति किं** ग च । ९. **तं न** ख छ । १०. "पुरिसेण खलु दुक्खविवागगवेसएणं पुव्विं ताव जीवाभिगमे कायव्वे जाव इच्छिता-ऽणिच्छे" चूर्णौ । ११. **एवेति अतो** ख ग ।

परिहरताऽऽत्मा पञ्चमहाव्रतेष्वास्थेयः । तत्परिपालनार्थं चोत्तरगुणा अप्यनुशीलनीयाः, तदर्थमुपदिश्यते—

**समिए एयाणुपस्सी**, पञ्चभिः समितिभिः समितः सन् एतत् शुभा[१]ऽशुभं कर्म वक्ष्यमाणं वाऽन्धत्वादिकं द्रष्टुं [२]शीलं यस्येति एतदनुदर्शी, भूतेषु सातं जानीहीति सण्टङ्कः ।

तत्र समितिः इति '**इण्**[३]' गतौ [पा०धा० १०४५] इत्यस्मात् सम्पूर्वात् क्तिन्नन्ताद्भवति । सा च पञ्चधा, तद्यथा—ईर्याभाषैषणादाननिक्षेपोत्सर्गरूपा । तत्रेर्यासमितिः [४]प्राणाव्यपरोपणव्रत[५]प्रतिपालनाय, भाषासमितिः असदभिधाननियमसंसिद्धये, एषणासमितिः अस्तेयव्रत[६]परिपालनाय, शेषद्वयं तु समस्तव्रत[७]प्रष्ठस्याहिंसाव्रतस्य संसिद्धये व्याप्रियत [८]इति । तदेवं पञ्चमहाव्रतोपपेतस्त[९]द्वृतिकल्पसमितिभिः समितः सन् भावत एतद्भूतसातादिकमनुपश्यति । अथवा यदनुदर्श्यसौ भवति [तद्?] **तद्यथे**त्यादिना [१०]सूत्रेणैव दर्शयति—

**अन्धत्व**मित्यादि यावत् [११]**विरूवरूवे फासे** [१२]**परिसंवेएइ** । संसारोदरे पर्यटन् [१३]प्राण्यन्धत्वादिका अवस्था बहुशः परिसंवेदयते । स चान्धो द्रव्यतो भावतश्च । तत्रैकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिया द्रव्य-भावान्धाः । [१४]चतुरिन्द्रियादयस्तु मिथ्यादृष्टयो भावान्धाः, उक्तं च—

**एकं हि चक्षुरमलं सहजो विवेक[१५]स्तद्वद्भिरेव सह संवसतिर्द्वितीयम् ।**
**एतद् द्वयं भुवि न यस्य स तत्त्वतोऽन्ध[१६]स्तस्यापमार्गचलने खलु कोऽपराधः ? ॥** [ ]

सम्यग्दृष्टयस्तूपहतनयना द्रव्यान्धाः, त एवानघा न द्रव्यतो [१७]न च भावतः । तदेवमन्धत्वं द्रव्य-[१८]भावविभिन्नमेकान्तेन दुःखजननमवाप्नोतीति, उक्तं च—

---

१. ०ऽशुभकर्म ख । २. शीलमस्येति ख । ३. इणु ग । ४. प्राणव्यपरोपणविरतिप्रति० ख च । ५. ०परिपालनाय ग घ ङ । ६. ०प्रतिपालनाय क । ७. ०प्रकृष्टस्याहिंसा० च । ८. ख-चप्रती ऋतेऽन्यत्र इति इति नोपलभ्यते । ९. ०द्वृत्तिभूतसमितिभिः ख च । १०. सूत्रेण दर्श० क । ११. विरूपरूपे क च । १२. परिसंवेदेति ख । १३. प्राण्यन्धादिका ख । १४. चतुरिन्द्रियास्तु ख ग । १५. ०स्तद्विद्भिरेव च । १६. ०स्तस्यापि मार्ग० क ख ग । १७. नापि भावतः ख च । १८. ०भावभेदभिन्न० ख ग च, ०भावभिन्न० घ ङ।

**जीवन्नेव मृतोऽन्धो यस्मात् सर्वक्रियासु परतन्त्रः ।**
**नित्यास्तमितदिवाकरतमोऽन्धकारार्णवनिमग्नः ॥**
**लोकद्वयव्यसनवह्निविदीपिताङ्गमन्धं समीक्ष्य कृपणं परयष्टिनेयम् ।**
**को नोद्विजेत भयकृज्जननादिवोग्रात्, कृष्णाहिनैकनिचितादिव चान्धगर्तात् ॥**
[ ]

एवं बधिरत्वमप्यदृष्टवशाद् अनेकशः परिसंवेदयते, तदावृतश्च सदसद्विवेकविकलत्वाद् ऐहिका-ऽऽमुष्मिकेष्टफलक्रियानुष्ठानशून्यतां बिभर्तीति,[1] उक्तं च—

**धर्मश्रुतिश्रवणमङ्गलवर्जितो हि, लोकश्रुतिश्रवणसंव्यवहारबाह्यः ।**
**किं जीवतीह बधिरो भुवि यस्य शब्दाः स्वप्नोपलब्धधननिष्फलतां प्रयान्ति ? ॥**
**स्वकलत्र-बाल-पुत्रकमधुरवचःश्रवणबाह्यकर्णस्य ।**
**बधिरस्य जीवितं किं जीवन्मृतकाकृतिधरस्य ? ॥ [ ]**

एवं मूकत्वमप्येकान्तेन दुः[2]खावहं परिसंवेदयते, उक्तं च—

**दुःखकरमकीर्तिकरं मूकत्वं सर्वलोकपरिभूतम् ।**
**प्र[3]त्यादेशं मूढाः कर्मकृतं किं न पश्यन्ति ॥ [ ]**

तथा काणत्वमप्येवं[4]रूपमिति, आह च[5]—

**काणो निमग्न[6]विषमोन्नतदृष्टिरेकः, शक्तो विरागजनने जननातुराणाम् ।**
**यो नैव कस्यचिदुपैति मनःप्रियत्वमालेख्यकर्मलिखितोऽपि किमु स्वरूपः ? ॥**
[ ]

एवं कुण्टत्वं पाणिवक्रत्वादिकम्, कुब्जत्वं वामनलक्षणम्, वडभत्वं विनिर्गतपृ[7]थ्वीवडभलक्षणम्, श्यामत्वं कृ[8]ष्णलक्षणम्, शबलत्वं श्वि[9]त्रलक्षणम् सहजं पश्चाद्भावि वा कर्मवशगो भूरिशो दुःखराशिदेशीयं परिसंवेदयते । किञ्च **सह प्रमादेन**[10] विषयक्रीडाभिष्वङ्गरूपेण श्रेयस्यनुद्यमात्मकेन[11] **वाऽनेकरूपाः** सङ्कट-

---

१. बिभर्ति, उक्तं घ ङ । २. दुःखरूपं संवेदयत इति, उक्तं च ख, दुःखरूपं परिवेदयत इति, उक्तं च च । ३. "प्रत्यादेशम् इति दृष्टान्तः" जै०वि०प० । ४. ०रूपमेवेति ख च । ५. च इति कप्रतौ नास्ति । ६. ०विषमोत्कटदृष्टि० ग च । ७. पृथि( ष्ठि ? )वडभ० ङ । ८. कुष्ठलक्षणम् क ख । ९. चित्रलक्षणम् ख च, क-ङप्रत्योः पाठभङ्गः । १०. ०न क्रीडा० ग । ११. ०न चानेक० ख, ०न अनेक० घ ङ ।

विकट-शीतोष्णादिभेदभिन्ना **योनीः सन्दधाति** [1]सन्धत्ते, चतुरशीतियोनिलक्ष-सम्बन्धाविच्छेदं विदधातीति भावः, सम्यग् धावतीति वा तासु तास्वायुष्क-बन्धोत्तरकालं गच्छतीत्यर्थः । तासु च नानाप्रकारासु योनिषु **विरूपरूपान्** नानाप्रकारान् **स्पर्शान्** दुःखानुभावान् **परिसंवेदयते** अनुभवतीत्यर्थः ।

तदेवमुच्चैर्गोत्रोत्थापितमानोपहतचेता नीचैर्गोत्रविहितदीनभावो वाऽन्ध-बधिरभूयं वा गतः सन् नावबुध्यते कर्तव्यम्, न जानाति कर्मविपाकम्, नावगच्छति संसारा[2]पशदताम्, नावधारयति हिताऽहिते, न गणयत्यौचित्यम्, इत्यनवगततत्त्वो मूढस्तत्रैवोच्चैर्गोत्रादिके विपर्यासमुपैति, आह च—

**से [3]अबुज्झमाणे** इत्यादि यावत् **मूढे [4]विप्परियासुवेइ** । स इत्युच्चैर्गोत्राभिमानी अन्ध-बधिरादिभावसंवेदको वा कर्मविपाक[5]मबुध्यमानो हतोपहतो भवति । नानाव्याधिसद्भावक्षतशरीरत्वाद् हतः, समस्तलोकपरिभूतत्वाद् उपहतः । अथवोच्चैर्गोत्रगर्वाध्मातत्यक्तोचितविधेयविद्वज्जनवदनसमुद्भूतशब्दाऽयशः[6]पटहहतत्वाद् हतः, [7]अभिमानोत्पादितानेकभव[8]कोटिनीचैर्गोत्रोदयाद् उपहतः । मूढो विपर्यासमुपैतीत्युत्तरेण सम्बन्धः । तथा जातिश्च मरणं च समाहारद्वन्द्वः तद् **अनुपरिवर्तमानः** पुनर्जन्म पुनर्मरणमित्येव[9]मरघट्टघटीयन्त्रन्यायेन संसारोदरे [10]विवर्तमानः, आवीचीमरणाद्वा प्रतिक्षणं जन्म-विनाशावनुभवन् दुःख-सागरावगाढो विशरारुण्यपि [11]नित्यताकृतमतिः हितेऽप्यहिताध्यवसायो विपर्यास[12]मुपैतीति, आह च—

**जीवितम्** आयुष्कानुपरमलक्षण[13]मसंयमजीवितं वा **पृथक्** इति प्रत्येकं प्रतिप्राणि **प्रियं** दयितं वल्लभम् **इह** इत्यस्मिन् संसारे **एकेषाम्** अविद्योपहतचेतसां **मानवानाम्** इति उपलक्षणार्थत्वात् प्राणिनाम्, तथाहि—दीर्घजीवनार्थं तास्ता

---

१. **विधत्ते** च । २. **०रापसदताम्** ङ च । ३. **अबुज्झमाणो** ग । ४. **विप्परिआसुवेइ** घ ङ, **विप्परियासमेइ** च । ५. **०मनवबुध्यमानो** ख च । ६. **पटहत्वात्** क घ ङ । ७. **अभिमानापादिता०** ख ग च । ८. **०कोटी०** ग । ९. **०मरहट्ट०** क घ ङ । १०. **परिवर्तमानः** ख । ११. **नित्यत्वकृतमतिः** ग । १२. **०मुपैति, आह च** कप्रतिमृते । १३. **०मसंयमलक्षणजीवितं** ख ।

[1]रसायनादिकाः क्रियाः सत्त्वोपघातकारिणीः कुर्वते । तथा क्षेत्रं शालिक्षेत्रादि वास्तु धवलगृहादि ममेदम् इत्येवमाचरतां तत् क्षेत्रादिकं प्रेयो भवति । किञ्च—[2]आरक्तम् ईषद्रक्तं वस्त्रादि, [3]विरक्तं विगतरागं विविधरागं वा, मणिः इति रत्न-वैडूर्येन्द्रनीलादि, कुण्डलं कर्णाभरणम्, हिरण्येन सह [4]स्त्रीः परिगृह्य तत्रैव क्षेत्र-वास्त्वारक्त-विरक्तवस्त्र-मणि-कुण्डल-स्त्र्यादौ रक्ताः गृद्धा अध्युपपन्ना मूढा विपर्यासमुपयान्ति, वदन्ति च—नात्र तपो वा [5]अनशनादिलक्षणम् दमो वा इन्द्रिय-नोइन्द्रियोपशमलक्षणः नियमो [6]वा अहिंसाव्रतलक्षणः फलवान् दृश्यते, तथाहि—तपो-[7]नियमोपेतस्यापि कायक्लेश-भोगादिवञ्चनां विहाय नान्यत् [8]फलमुपलभ्यते, [9]जन्मान्तरे भविष्यतीति चेद्, व्युद्ग्राहितस्योल्लापः, किञ्च-दृष्टहानि[10]रदृष्टकल्पना च [11]पापीयसी । तदेवं साम्प्रतेक्षी भो[12]गसङ्गविहितैकपुरुषार्थबुद्धिः [13]सम्पूर्णं यथा-वसरसम्पादितविषयोपभोगं बालः अज्ञः जीवितुकामः आयुष्कानु-भवनमभिलषन् लालप्यमानः भोगार्थमत्यर्थः लपन् वाग्दण्डं करोति, तद्यथा—अत्र तपो दमो नियमो वा फलवान् न दृश्यत इति । एवमर्थं ब्रुवन् मूढः [14]अबुध्यमानो हतोपहतो जाति-मरणमनुपरिवर्तमानो जीवित-क्षेत्र-स्त्र्यादि[15]लोभपरिमोहितमनाः विपर्यासमुपैति तत्त्वेऽतत्त्वाभिनिवेशम् अतत्त्वे च तत्त्वाभि[16]निवेशं हिते-ऽहित[17]बुद्धिमित्येवं सर्वत्र विपर्ययं विदधाति, उक्तं च—

**दाराः परिभवकारा बन्धुजनो बन्धनं विषं विषयाः ।**
**कोऽयं जनस्य मोहः ये रिपवस्तेषु सुहृदाशा ? ॥** [ ] इत्यादि ।

ये पुनरुन्मज्जच्छुभकर्मापादिताध्यवसायपुरस्कृतमोक्षास्ते किम्भूता भवन्ति ? इत्याह—

१. ०काः **सत्त्वोपघातकारिणीः क्रियाः कुर्वते** ख च । २. "**आरत्तं** ईसि त्ति रत्तं आरत्तं, अहवा अच्चत्थं रत्तं" चूर्णौ । ३. **विरक्तं विविधरागं विरागं वा** च । ४. **स्त्री परिगृह्य ते तत्रैव** ग । ५. **अनशनादिकम्** च । ६. **वा व्रतलक्षणः** घ, **वा ब्रह्मलक्षणः** ङ । ७. ०**नियमोपपेतस्यापि** ङ । ८. **फलं लभ्यते** च । ९. **जन्मातरेऽपि भवि०** घ ङ । १०. ०**रदृष्टपरिकल्पना** ख ग च । ११. **पापीयसीति** । च । १२. **भोगसंविदितैकपुरुषा०** ख । १३. **सम्पूर्णयथाव०** ग । १४. **अविद्यमानो** ख । १५. ०**लोभे परि०** क । १६. ०**निवेशं च हिते०** च । १७. ०**बुद्धिमेवं** ख च ।

**[ सू०७८ ] इणमेव णावकंखंति जे जणा धुव-चारिणो ।**
**जाती-मरणं परिण्णाय चर संकमणे दढे ॥१॥**

**णत्थि कालस्स ऽणागमो ।**

**सव्वे पाणा पिआउया सुहसाता दुक्खपडिकूला अप्पियवधा पियजीविणो जीवितुकामा । सव्वेसिं जीवितं पियं ।**

[१]**इणमेवे**त्यादि । इदमेव पूर्वोक्तं [२]सम्पूर्णजीवितं [३]क्षेत्रा-ऽङ्गनापरिभोगा[४]दिकं वा नावकाङ्क्षन्ति नाभिलषन्ति ये जना ध्रुवचारिणः ध्रुवः मोक्षः तत्कारणं च ज्ञानादि ध्रुवं तदाचरितुं शीलं येषां ते तथा धूतचारिणो वा धुनातीति धूतं चारित्रं तच्चारिण इति ॥ किञ्च–

[५]**जाई** इत्यादि । जातिश्च मरणं च समाहारद्वन्द्वः, तत् परिज्ञाय परिच्छिद्य [६]ज्ञात्वा **चर** उद्युक्तो भव । क्व ?–**सङ्क्रमणे**, सङ्क्रम्यते[७]ऽनेनेति सङ्क्रमणं चारित्रं तत्र दृढः विश्रोतसिकारहितः परीषहोपसर्गैर्निष्प्रकम्पो वा । यदि वा **अशङ्क**[८]**मनाः** संयमं [९]**चर**, न विद्यते शङ्का यस्य [१०]मनसस्तदशङ्कम्, अशङ्कं मनो यस्यासावशङ्कमनाः तपो-दम-नियमनिष्फलत्वाशङ्कारहित [११]आस्तिकमत्युपपेतस्तपो-दमादौ [१२]प्रवर्तेत, यतस्तद्वान् राजराजादीनां पूजा-प्रशंसार्हो भवति ॥ न चौपशमिकसुखावाप्तफलस्य तपस्विनः समस्तद्वन्द्वदवीयसोऽसत्यपि परलोके किञ्चित् [१३]क्षूयते, उक्तं च–

---

१. इणाम्वे( ञ्चे )वेत्यादि क । २. **सम्पूर्णजीवितत्त्वं** ख, **सम्पूर्णजीवित्वं** घ ङ च, **सम्पूर्णं जीवितं** ग । ३. **क्षेत्रा-ङ्गनादिकं** क । ४. **०दिकं नाभिलषन्ति** ख । ५. जाइ इत्यादि ग, जाईत्यादि च । ६. **ज्ञात्वाचारोद्युक्तो भवेत्** । क च, **ज्ञात्वा चरेद्युक्तो भवेत्** । ग, **ज्ञात्वा चरे उद्युक्तो भवेत्** । घ । ७. **०ऽनेन सङ्क्र०** च । ८. **०मनाः सन् संयमं** ख ग च । ९. **चरे** क । १०. **मनसस्तं विशङ्कं** ख । ११. **आस्तिक्यमत्यु०** ग घ ङ । १२. **प्रवर्तते** ख-चप्रती ऋते । १३. **क्षीयते** ख ।

**सन्दिग्धेऽपि [1]परे लोके त्याज्यमेवाशुभं बुधैः ।**
**यदि नास्ति ततः किं स्याद् ? अस्ति चेन्नास्तिको हतः ॥ [ ]** [2]इत्यादि ।

तस्मात् स्वायत्ते संयमसुखे दृढेन भाव्यम् । [3]न चैतद्भावनीयं यथा—परुत् परारि वृद्धावस्थायां वा धर्मं करिष्यामीति, यतः—

**नत्थि** इत्यादि । नास्ति न विद्यते कालस्य मृत्योः **अनागमः** अनागमन-मनवसर इति यावत्, तथाहि—सोपक्रमायुषोऽसुमतो न काचित् साऽवस्था यस्यां कर्मपावकान्तर्वर्ती [4]जन्तुर्जतुगोलक [5]इव न [6]विलीयेत इति, उक्तं च—

**शिशुमशिशुं कठोरमकठोरमपण्डितमपि च पण्डितं,**
**[7]धीरमधीरं मानिनममानिनमपगुणमपि च बहुगुणम् ।**
**यतिमयतिं प्रकाशमवलीनमचेतनमथ सचेतनं,**
**निशि दिवसेऽपि सान्ध्यसमयेऽपि विनश्यति कोऽपि कथमपि ॥ [ ]**

तदेवं सर्वङ्कषत्वं मृत्योरवधार्याहिंसादिषु दत्तावधानेन भाव्यम् । किमिति ? यतः—

**सव्वे [8]पाणा पियाउया,** प्राणशब्देनात्राभेदोपचारात् तद्वन्त एव गृह्यन्ते, सर्वे प्राणिनो जन्तवः प्रियायुषः प्रियमायुर्येषां ते तथा । ननु च सिद्धैर्व्यभिचारः, न हि [9]ते प्रियायुषः तदभावात्, नैष दोषः, यतो मुख्यजीवादिशब्दव्युदासेन प्राणशब्दस्योपचरितस्य ग्रहणं [10]संसारिप्राण्युपलक्षणार्थमिति यत्किञ्चिदेतत् । **पाठान्तरं वा—सव्वे पाणा पियायया,** [11]आयतः आत्मा अनाद्यनन्त[12]त्वात्, प्रियो येषां ते तथा । सर्वेऽपि प्राणिनः प्रियात्मानः । प्रियात्मता च सुख-दुःखप्राप्ति-परिहारतया भवतीति, आह च—

**सुहसाया दुक्खपडिकूला, सुखम्** आनन्दरूपमास्वादयन्तीति सुखा-स्वादाः [13]सुखभोगिनः सुखैषिण इत्युक्तं भवति । दुःखम् असातं तत्

---

१. **परलोके** ख-चपुस्तके विना । २. **इत्यादि** इति क-गप्रत्योर्नास्ति । ३. **नैतद्भा०** च । ४. **जतुगोलक** क ग । ५. **इव विलीयेत न इति** ख । ६. **विलीयते** क ग च । ७ **वीरमवीरं** च । ८. **पाणे** ग । ९. **ते प्रियायुषः** ख च । १०. **संसारे प्रा०** ग, **संसार प्रा०** घ । ११. **प्रियः आयतः आत्मा अनाद्यनन्तत्त्वात्, येषां** ख च । १२. **०त्वात्, स प्रियो** घ ङ च । १३. **सुखभोजिनः** ग ।

प्रतिकूलयन्तीति दुःखप्रतिकूलाः दुःखद्वेषिण इत्युक्तं भवति । तथा **अप्रियवधा** अप्रियं दुःखकारणं तद् घ्नन्ति **अप्रियवधाः** । तथा **पियजीविणो**[3] प्रियं दयितं जीवितम् आयुष्कमसंयमजीवितं[वा] येषां ते तथा । **जीविउकामा**[4], यत एव प्रियजीविनोऽत एव दीर्घकालं जीवितुकामाः दीर्घकालमायुष्काभिलाषिणः दुःखाभिभूता अप्यन्त्यां दशामापन्ना जीवितुमेवाभिलषन्ति[5], उक्तं च–

**रमइ विहवी विसेसे थितिमित्तं**[6] **थेववित्थरो महई ।**
**मग्गइ सरीरमहणो**[7] **रोगी जीए च्चिय**[8] **कयत्थो ॥ [ ]**

तदेवं सर्वोऽपि प्राणी सुखजीविताभिलाषी, तच्च नारम्भमृते, असावपि प्राण्युपघातकारी, प्राणिनां च जीवितमत्यर्थं दयितमित्यतो भूयो भूयस्त-देवोपदिश्यत इत्याह[9]–

**सव्वेसिं**[10] इत्यादि । सर्वेषामविगानेन जीवितम्[11] असंयमजीवितं प्रियं दयितम्[12] । यद्येवं ततः किम् ? इत्यत आह[13]–

**[ सू०७९ ] तं परिगिज्झ दुपयं चउप्पयं अभिजुंजियाणं संसिंचियाणं तिविधेण जा वि से तत्थ मत्ता भवति अप्पा वा बहुगा वा से तत्थ गढिते चिट्ठति भोयणाए । ततो से एगदा विप्परिसिट्ठं संभूतं महोवकरणं भवति । तं पि से एगदा दायादा विभयंति, अदत्तहारो वा सेऽवहरति, रायाणो वा से विलुंपंति, णस्सति वा से, विणस्सति वा से, अगार-दाहेण वा से डज्झति ।**

---

२. इति तदुक्तं च । २. "वहो दुविहो–तालणं मारणं वा । सो दुविहो वि अप्पिओ" चूर्णौ । ३. ०णो तथा प्रियं ख । ४. जीवितुकामा च । ५. जीवितुमेवमभि० क, जीवितमेवाभि० च । ६. ठितिमेत्तं ख ग घ । ७. ०महणो ख । ८. जीवे च्चिय ख, जीवे च्चिय ग, जीए दुिय च । ९. इत्यत आह ग । १०. सव्वेसिमित्यादि ख घ ङ च, सव्वेसि इत्यादि ग । ११. जीवियमसंयम० ङ । १२. दयितम् इति खप्रतौ नास्ति । १३. इत्याह ख च ।

इति से परस्सऽट्ठाए कूराइं कम्माइं बाले पकुव्वमाणे तेण दुक्खेण मूढे विप्परियासमुवेति ।

मुणिणा हु एतं पवेदितं ।

अणोहंतरा एते, णो य ओहं तरित्तए ।

अतीरंगमा एते, णो य तीरं गमित्तए ।

अपारंगमा एते, णो य पारं गमित्तए ।

आयाणिज्जं च आदाय तम्मि ठाणे ण चिट्ठति ।

वितहं पप्प खेत्तण्णे तम्मि ठाणम्मि चिट्ठति ॥२॥

[ सू०८० ] उद्देसो पासगस्स णत्थि ।

बाले पुण णिहे कामसमणुण्णे असमितदुक्खे दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टति त्ति बेमि ।

॥ लोगविजयस्स ततीयो उद्देसओ सम्मत्तो ॥

तं परिगिज्झ[1], तद् असंयमजीवितं परिगृह्य आश्रित्य । किं कुर्वन्ति ? इत्याह—दुपय[2]मित्यादि । द्विपदं दासी[3]-कर्मकरादि, चतुष्पदं गवाश्वादि, अभियुज्य योजयित्वा अभियोगं ग्राहयित्वा व्यापारयित्वेत्युक्तं भवति । ततः किम् ? इत्यत[4] आह—

संसिंचियाण[5]मित्यादि । प्रियजीवितार्थमर्थाभिवृद्धये द्विपद-चतुष्पदादि-व्यापारेण संसिच्य अर्थनिचयं संवर्ध्य त्रिविधेन योगत्रिक-करणत्रिकेण यापि[6] काचिदल्पा परमार्थचिन्तायां बह्व्यपि[7] फल्गुदेश्या से तस्यार्थारम्भिणः सा चार्थमात्रा तत्र इति द्विपदाद्यारम्भे मात्रा इति सोपस्कारत्वात् सूत्राणाम् अर्थमात्रा

१. परिगेज्ज ख च । २. दुपयं इत्यादि ख च । ३. कर्मकर-दास्यादि ग । ४. इत्याह ग । ५. संसिचियाण० क, संसिच्चियाणं इत्यादि ख च, संसंचियाण० घ । ६. या काचि० ग । ७. बह्वपि ख च ।

अ[1]र्थाल्पता भवति सत्तां बिभर्ति । किम्भूता सा ? सूत्रेणैव कथयति—**अल्पा वा बह्वी वा**, अल्पबहुत्वं चापेक्षिकम्, अतः स[2]र्वाऽप्यल्पा सर्वाऽपि बह्वी । स इत्यर्थवान् तत्र तस्मिन्नर्थे गृद्धः अ[3]ध्युपपन्नस्तिष्ठति, नालोचयत्यर्थस्योपार्जनक्लेशम्, न गणयति रक्षणपरिश्रमम्, न विवेचयति तरलताम्, ना[4]वधारयति फल्गुताम्, उक्तं च—

**कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं,**
**निरुपमर[5]सप्रीत्या खादन् नरास्थि निरामिषम् ।**
**सुरपतिमपि श्वा पार्श्वस्थं सशङ्कितमीक्षते,**
**न हि गणयति क्षुद्रो लोकः परिग्रहफल्गुता[6]म् ॥** [ ] इत्यादि ।

स च किमर्थमर्थयते ? इ[7]त्यत आह—**भोयणाए** भोजनम् उपभोगस्तस्मै अर्थमर्थयते, तदर्थी च क्रियासु प्रवर्तते, क्रि[8]यावतश्च किं भवति ? इत्याह—**तओ से** इत्यादि । ततः से तस्यावलगनादिकाः क्रियाः कुर्वतः एकदा लाभान्तरायकर्मक्षयोपशमे विविधं नानाप्रकारं परिशिष्टं प्रभूतत्वाद् भुक्तोद्वरितं **स[9]म्भूतं** सम्यक्प्रतिपालनाय भूतं संवृत्तम्, किं तत् ? महच्च तत् परिभोगाङ्गत्वाद् उपकरणं च **महोपकरणं** द्रव्यनिचय इत्यर्थः, स कदाचिल्लाभोदये भवति । असावप्यन्तरायोदयाद् न तस्योपभोगायेत्याह—

**तं पि से** इत्यादि । तदपि समुद्रोत्तरण-रोहणखनन-बिलप्रवेश-रसेन्द्रमर्दन-राजावलगन-कृषीवलादिकाभिः क्रियाभिः स्व-परोपतापकारिणीभिः स्वोपभोगायोपार्जितं स[10]त् से तस्यार्थो[11]पार्जनोपायक्लेशकारिणः **एकदा** भाग्यक्षये दायादाः पितृपिण्डोदकदानयोग्याः विभजन्ते विलुम्पन्ति, अ[12]दत्तहारो वा

---

१. **अर्थाल्पा भवति । सा च किम्भूता ? अल्पा वा** ख । २. **सर्वाल्पा** ख । ३. **अध्युपपन्नः सन् नालोचय०** ख । ४. **नोऽवधारयति** ख । ५. **०रसं प्रीत्या** क ख । ६. **०ताम् ॥ लब्धं तेन शुना स्वतोऽस्थिशकलं नैवात्तु( न्य? )मभ्युद्यते, मह्यं दत्तमहं पुनर्भगवता हन्तुं तमेवोद्यतः । इन्द्रादप्यधिको मुनिः पुनरहं प्रायः शुनो पीतरो, या यस्येह भवेद्गतिर्गतिमतः सा चेष्टया व्यज्यते ॥ इत्यादि** ख ग ङ केवलं खआदर्शे पाठान्तरान्तस्थः इत्यादि इति पाठो नोपलभ्यते । ७. **इत्याह** ख । ८. **तत्क्रियावतश्च** क । ९. "संभितं वा संभृतं" चूर्णौ । १०. **सत्** इति कप्रतौ न वर्तते । ११. **०पार्जनक्लेश०** ख ग । १२. **अदत्ताहारो** ख ग ।

दस्युर्वाऽपहरति, राजानो वा विलुम्पन्ति अवच्छिन्दन्ति, नश्यति[1] वा स्वत एवाटवीतः, **से** तस्य, विनश्यति वा जीर्णभावापत्तेः, अगारदाहेन वा गृहदाहेन वा दह्यते । कियन्ति वा कारणान्यर्थनाशे वक्ष्यन्ते ? इत्युपसंहरति–

**इति** एवं बहुभिः प्रकारैरुपार्जितोऽप्यर्थो नाशमुपैति, नैवोपार्जयितुरुपतिष्ठते इत्युपदिश्यते । **सः** अर्थस्योत्पादयिता परस्मै[2] अन्यस्मै अर्थाय प्रयोजनाय[3] प्रयोजनकृते क्रूराणि गलकर्तनादीनि कर्माणि अनुष्ठानानि **बालः** अज्ञः प्रकुर्वाणः विदधानः तेन कर्मविपाकापादितेन दुःखेन असातोदयेन **मूढः** अपगतविवेकः विपर्यासमुपैति अपगतसदसद्विवेकत्वात् कार्यमकार्यं मन्यते व्यत्ययं चेति, उक्तं च–

राग-द्वेषाभिभूतत्वात् कार्या-ऽकार्यपराङ्मुखः ।
**एष मूढ इति ज्ञेयो विपरीतविधायकः** ॥ [ ]

तदेवं मौढ्यान्धतमसाच्छादितालोकपथाः सुखार्थिनो दुःखमृच्छन्ति[4] जन्तव इति ज्ञात्वा सर्वज्ञवचन[5]दीपमशेषपदार्थस्वरूपाविर्भावकमालम्बिरे मुनयः । अदश्च मया न स्वमनीषिकयोच्यते, **सुधर्मस्वामी जम्बूस्वामिन**माह । यदि स्वमनीषिकया नोच्यते, कौतस्त्यं तर्हीदम् ? इत्यत आह–

**मुणिणा** इत्यादि । मनुते जगतस्त्रिकालावस्थामिति मुनिः तीर्थकृत् तेन, **एतद्** असकृदुच्चैर्गोत्रभवनादिकम्, प्रकर्षेणादौ वा सर्वस्वभाषानुगामिन्या[6] वाचा **वेदितं** कथितं वक्ष्यमाणं च प्रवेदितम् । किं तद् ? इत्याह–

[7]**अणोह**मित्यादि ओघो द्विधा–द्रव्य-भावभेदात् । द्रव्यौघो नदीपूरादिकः । भावौघोऽष्टप्रकारं कर्म संसारो वा, तेन हि प्राण्यनन्तमपि कालमुह्यते । तम् ओघं ज्ञान-दर्शन-चारित्रबोहित्थस्थाः[8] तरन्तीत्योघन्तराः, न ओघन्तरा अनोघन्तराः । तरतेश्छान्दसत्वात् खच्, खित्त्वाद् मुमागमः । एते कुतीर्थिकाः पार्श्वस्थादयो वा

---

१. "णस्सति चउप्पयादि सयमेव, अपथं देवताजोगेण" चूर्णौ । २. **परस्मा अर्थाय** ग घ, **परस्माद(ऽ)न्यस्माद(ऽ)र्थाय** ख । ३. ०य **अन्यप्रयोजनकृते** कप्रतिमृते । ४. दुःख-**मर्थयन्ति** क, **दुःखमिच्छन्ति** ग । ५. **०वचनप्रदीप०** घ ङ । ६. **सर्वभाषा०** घ । ७. **अणोहं** इत्यादि ख । ८. **०बोधिस्थस्थाः** घ ङ च विना ।

ज्ञानादियानविकलाः, यद्यपि तेऽप्योघतरणायोद्यतास्तथापि सम्यगुपायाभावाद् न ओघतरणसमर्था [1]भवन्तीति । आह च–

**नो य ओहं तरित्तए,** न च नैव ओघं भावौघं तरितुं समर्थाः, संसारौघतरणप्रत्यला न भवन्तीत्यर्थः । तथा–

**अतीरंगमा** इत्यादि । तीरं गच्छन्तीति तीरङ्गमाः । पूर्ववत् खच्-प्रत्ययादिकम् । न तीरङ्गमा अतीरङ्गमाः । **एते** इति प्रत्यक्षभावमापन्नान् कुतीर्थिकादीन् दर्शयति । न च ते तीरगमनायोद्यता अपि तीरं गन्तुमलम्, सर्वज्ञोपदिष्टसन्मार्गाभावादिति भावः । तथा–

**अपारंगमा** इत्यादि । पारः तटः परकूलम्, तद् गच्छन्तीति पारङ्गमाः, न पारङ्गमा अपारङ्गमाः । **एते** इति [2]पूर्वोक्ताः पारगतोपदेशाभावाद् [3]अपारगता इति भावनीयम् । न च ते पारगतोपदेशमृते पारगमनायोद्यता अपि पारं गन्तुमलम् । अथवा गमनं गमः, पारस्य पारे वा गमः पारगमः, सूत्रे त्वनुस्वारोऽलाक्षणिकः, न पारगमः अपारगमः, तस्मा [4]अपारगमाय । [5]असमर्थसमासोऽयम्, तेनायमर्थः– [6]पारगमनाय ते न भवन्तीत्युक्तं भवति । ततश्चानन्तमपि कालं संसारान्तर्वर्तिन एवासते । यद्यपि [7]पारगमनायाभ्युद्यमयन्ति तथापि ते सर्वज्ञोपदेशविकलाः स्वरुचिविरचित[8]शास्त्रप्रवृत्तयो [9]नैव संसारपारं गन्तुमलम् ।

अथ तीर-पारयोः को विशेषः ? इत्युच्यते–तीरं मोहनीयक्षयः; पारं शेषघातिक्षयः, अथवा तीरं घातिचतुष्टयापगमः; पारं भवोपग्राह्यभाव [10]इति ।

स्यात्–कथमोघतारी [11]कुतीर्थादिको न भवति तीर-पारगामी च ? इत्याह–

[12]**आयाणिज्ज**मित्यादि । आदीयन्ते गृह्यन्ते सर्वभावा अनेनेति आदानीयं श्रुतं तदादाय तदुक्ते तस्मिन् संयमस्थाने न तिष्ठति । यदि वा आदानीयम् आदातव्यं भोगाङ्गं द्विपद-चतुष्पद-धन-[13]धान्य-हिरण्यादि, तद् आदाय गृहीत्वा।

---

१. **भवन्तीत्याह–**ग । २. **पूर्वगताः** ख । ३. **अपारङ्गता** च । ४. **अपरागमनाय** ग च । ५. **असमर्थः समासो०** क । ६. **पारगमाय** ख । ७. **पारगमनायोद्यमयन्ति** घ ङ च । ८. **०शास्त्रवृत्तयो** क च । ९. **न संसार०** ख । १०. **इत्यर्थः ।** घ ङ च । ११. **कुतीर्थ्यादिको** च । १२. **आयाणिज्जं इत्यादि** ख । १३. **०धान्यादि, तद्** ख ।

अथवा मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगैः आदानीयं कर्मादाय । किम्भूतो भवति ? इत्याह—तस्मिन् ज्ञानादिमये मोक्षमार्गे सम्यगुपदेशे वा प्रशस्तगुणस्थाने न तिष्ठति नात्मानं विधत्ते ।

न केवलं सर्वज्ञोपदेशस्थाने न तिष्ठति विपर्ययानुष्ठायी च भवतीति दर्शयति—**वितहमित्यादि** । वितथम् असद्भूतं दुर्गतिहेतुं तत् तथाभूतमुपदेशं प्राप्य अखेदज्ञः अकुशलः, खेदज्ञो वा असंयमस्थाने, तस्मिंश्च साम्प्रतेक्ष्याचरिते उपदिष्टे च तिष्ठति, तत्रैवासंयमस्थानेऽभ्युपपन्नो भवतीति यावत् । अथवा **वितथम्** इति आदानीयभोगाङ्गव्यतिरिक्तं संयमस्थानं तत् प्राप्य खेदज्ञः निपुण**स्तस्मिन् स्थाने** आदानीयस्य हन्तृणि **तिष्ठति**, सर्वज्ञाज्ञयाऽऽत्मानं व्यवस्थापयतीत्यर्थः ।

अयं चोपदेशोऽनवगततत्त्वस्य विनेयस्य यथोपदेशं प्रवर्तमानस्य दीयते, यस्त्ववगतहेयोपादेयविशेषः स यथावसरं यथाविधेयं स्वत एव विधत्ते इति, आह च—**उद्देसो** इत्यादि । उद्दिश्यते इति उद्देशः उपदेशः सदसत्कर्तव्या-ऽकर्तव्यादेशः सः पश्यतीति पश्यः, स एव पश्यकस्तस्य न विद्यते, स्वत एव विदित-वेद्यत्वात् तस्य । अथवा पश्यतीति पश्यकः सर्वज्ञः तदुपदेशवर्ती वा तस्य, उद्दिश्यत इति उद्देशः नारकादिव्यपदेशः उच्चा-ऽवचगोत्रादिव्यपदेशो वा **स** तस्य न विद्यते, तस्य द्रागेव मोक्षगमनादिति भावः । कः पुनर्यथोपदेशकारी न भवति ? इत्याह—

**बाले** इत्यादि । **बालो** नाम रागादिमोहितः, स पुनः कषायैः कर्मभिः परीषहोपसर्गैर्वा निहन्यत इति **निहः** । निपूर्वाद् हन्तेः कर्मणि डः । अथवा स्निह्यत इति स्निहः स्नेहवान् रागीत्यर्थः । अत एवाह—**कामसमणुण्णे** कामाः इच्छा-मदनरूपाः सम्यग् मनोज्ञा यस्य स तथा । अथवा सह मनोज्ञैर्वर्तत इति समनोज्ञः, गमकत्वात् सापेक्षस्यापि समासः, कामैः समनोज्ञः कामसमनोज्ञः ।

---

१. सम्प्रत्यैक्ष्याचरित क-मत्रती ऋते । २. ०गततत्त्वो हेयो० क । ३. **स्वयमेव** ख । ४. च खं० ५. ०धर्यं० । ६. **उपदेशः** ङ । ६. नरकादि० ग । ७. **प्रागेव** क ग । ८. **बालः** रागादि० ख । ९. "**पुण** विसेसणे । किं विसेसेति ? ण केवलं वयबालो, वुड्ढो (वुड्ढो ? ) वि कज्जा उकज्जअयाणओ बालो चेव ।" चूर्णी । १०. **स्निह्यतीति** ख ग च । ११. **स्नेहः** च छ ।

यदि वा कामान् सम्यग् अनु पश्चात् स्नेहानुबन्धाद् जानाति सेवत इति **कामसमनुज्ञः** । एवम्भूतश्च किम्भूतो भवति ? इत्याह–**असमियदुक्खे** अशमितम् अनुपशमितं विषयाभिष्वङ्ग–कषायोत्थं[1] दुःखं येन स तथा । यत एवाशमितदुःखोऽत एव दुःखी शारीर-मानसाभ्यां दुःखाभ्याम् । तत्र शारीरं कण्टक-शस्त्र-गण्डलूतादिसमुत्थम्, मानसं प्रियविप्रयोगा-ऽप्रियसंयोगे[2]-प्सितालाभ-दारिद्र्य-दौर्भाग्य-दौर्मनस्यकृतम्[3] । तद् द्विरूपमपि दुःखं विद्यते यस्यासौ दुःखी । एवम्भूतश्च सन् किमवाप्नोति ? इत्याह–**दुक्खाण**[4]मित्यादि । दुःखानां शारीरमानसानामावर्तं[5] पौनःपुण्यभवनमनुपरिवर्तते, दुःखावर्तावमग्नो बम्भ्रम्यत इत्यर्थः । **इति**[6] परिसमाप्तौ । **ब्रवीमि** इति पूर्ववत् ॥छ॥

॥ लोकविजयस्य तृतीयोद्देशकटीका[7] समाप्ता ॥

• • •

१. विषय-कषायोत्थं क । २. ०सम्प्रयोगे० च । ३. ०दौर्मनस्यभूतम् च । ४. दुक्खाणं इत्यादि ख च । ५. मावर्तः ख । ६. इतिः ख च । ७. तृतीयोद्देशकः समाप्तः ॥ छ ॥ ख च ।

उक्तस्तृतीयोद्देशकः साम्प्रतं चतुर्थव्याख्या प्रस्तूयते, 'भोगेष्वनभिषक्तेन[१] भाव्यं यतो भोगिनामपाया दर्श्यन्ते' प्रागुक्तम्, ते चामी **तओ से एगया** इत्यादि। अनन्तरसूत्रसम्बन्धः '**दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टइ**' त्ति, तानि चामूनि दुःखानि–**तओ से** इत्यादि । परम्परसूत्रसम्बन्धस्तु '**बाले पुण णिहे कामसमणुण्णे**', ते च कामा दुःखात्मका एव, तत्र चासक्तस्य धातुक्षय-भगन्दरादयो रोगाः समुत्पद्यन्ते इत्यतोऽपदिश्यते

**[ सू०८१ ] ततो से एगया रोगसमुप्पाया समुप्पज्जंति । जेहिं वा सद्धिं संवसति ते व णं एगया णियगा पुव्विं परिवयंति, सो वा ते णियए पच्छा परिवएज्जा । णालं ते तव ताणाए वा सरणाए वा, तुमं पि तेसिं णालं ताणाए वा सरणाए वा ।**

**[ सू०८२ ] जाणित्तु दुक्खं पत्तेयं सायं, भोगामेव अणुसोयंति, इहमेगेसिं माणवाणं तिविहेण जा वि से तत्थ मत्ता भवति अप्पा वा बहुया वा से तत्थ गढिते चिट्ठति भोयणाए । ततो से एगया विप्परिसिट्ठं संभूतं महोवकरणं भवति । तं पि से एगया दायादा विभयंति, अदत्तहारो वा सेऽवहरति, रायाणो वा से विलुंपंति, णस्सति वा से, विणस्सति वा से अगारदाहेण वा से डज्झति ।**

**इति से परस्स अट्ठाए कूराइं कम्माइं बाले पकुव्वमाणे तेण दुक्खेण मूढे विप्परियासमुवेति ।**

**तओ से एगया रोगसमुप्पाया समुप्पज्जंति** । ततः इति कामानु-[२]

---

१. ०ष्वनभियुक्तेन ख । २. कामानुषङ्गापायात् घ ङ ।

भूगत कर्मोपचयः, ततोऽपि पञ्चत्वम्, तस्मादपि नरकभवः, नरकाद् निषेक-कललाऽर्बुद-पेशी-व्यूह-गर्भ-प्रसवादिः, जातस्य च रोगाः प्रादुःष्यन्ति । **स** तस्य कामानुषक्तमनसः **एकदा** इत्यसातावेदनीयविपाकोदये **रोगसमुत्पादा** इति रोगाणां शिरोऽर्ति-शूलादीनां समुत्पादाः प्रादुर्भावाः **समुत्पद्यन्ते** प्रादुर्भवन्ति । तस्यां च रोगावस्थायां किम्भूतो भवत्यसौ ? इत्यत आह—

[8]**जेहिं** इत्यादि । यैर्वा सार्धमसौ [9]संवसति त एवैकदा निजाः पूर्वं [10]परिवदन्ति, स वा तान् निजान् पश्चात् [11]परिवदेत् । नालं ते तव [12]त्राणाय शरणाय वा, त्वमपि तेषां नालं [13]त्राणाय शरणाय वा । इति ज्ञात्वा [14]तु [15]दुःखं प्रत्येकं सातं च 'स्वकृतकर्मफलभुजः सर्वेऽपि प्राणिनः' इति [16]मत्वा न रोगोत्पत्तौ दौर्मनस्यं भावनीयम्, न भोगाः शोचनीया [17]इति । आह च—

[18]**भोगामेवे**त्यादि । भोगाः शब्द-[19]रूप-रस-गन्ध-स्पर्शविषयाभिलाषाः तानेव [20]अनुशोचन्ति 'कथमस्यामप्यवस्थायां वयं भोगान् [21]भुङ्क्ष्महे ? एवम्भूता [22]ऽस्माकं दशाऽभूद् येन मनोज्ञा अपि विषया उपनता नोपभोगाय' इति । ईदृक्षश्चाध्यवसायः केषाञ्चिदेव भवतीत्याह—

[23]**इहमेगेसि**मित्यादि । [24]**इह** संसारे **एकेषाम्** [25]अनवगतविषयविपाकानां [26]**ब्रह्मदत्ता**दीनां मानवानामेवम्भूतोऽध्यवसायो भवति, न सर्वेषाम्, **सनत्कुमारा**दिना [27]व्यभिचारात्, तथाहि—

---

१. ०प्रसवादि ङ । २. **भूतस्य** च । ३. ०**वेदनीयरोगविपाकोदये** ख [illegible] । ४. शिरःशूलादीनां ख च । ५. **आविर्भवन्ति** ख च । ६. **भवति ? अत आह** ख [illegible] । ७. इत्याह घ । ८. **जेहिमित्यादि** ग घ ङ । ९. **वसति** घ । १०. "अणुव्वयंति" चूर्णौ, अनुव्रजन्तीत्यर्थः । [illegible] "[illegible]यंति" चूर्णौ । १२. **त्राणाय वा शरणाय** च । १३. **त्राणाय वा शरणाय** घ ङ । १४. तु इति चप्रतौ नास्ति । १५. "दुक्खं णाम कम्मं" चूर्णौ । १६. **मत्वा रोगोत्पत्तौ न दौ०** कपुस्तकं ऋते । १७. **इत्याह**-घ ङ । १८. **भोगामे इत्यादि** ख विना । १९. ०**रूप-गन्ध-रस-स्पर्श०** ख च, ०**रूप-रस-स्पर्श०** क । २०. **अनुशोचयन्ति** ख च । २१. **भुञ्ज्महे** ग चपुस्तकं विना । २२. **वाऽस्माकं** ग । २३. **इहमेगेसिं इत्यादि** ख च, **इयमेगेसि०** घ ङ । २४. **इह इति संसारेऽनवगत०** ख, **इह(हं)व संसारे एके०** च । २५. **अनधिगत०** घ ङ । २६. **ब्रह्मदत्तादीनामेवम्भूतो०** ख च । २७. **व्यभिचारः, तथाहि** क ।

**ब्रह्मदत्तो** [1]मारणान्तिकरोगवेदनाभिभूतः सन्तापातिशयात् स्पृशन्तीं प्रणयिनीमिव विश्वासभूमीं मूर्च्छां बहुमन्यमानः, तथा हस्तीकृतो विहस्ततया विपर्यीकृतो वैषम्येण, गोचरीकृतो ग्लान्या, दष्टो दुःखासिकया, क्रोडीकृतः कालेन, [2]पीडितः पीडाभिः, निरूपितो नियत्या, आदित्सितो दैवेन, अन्तिकेऽन्त्योच्छ्वासस्य, मुखे महाप्रवासस्य, द्वारि दीर्घनिद्रायाः, जिह्वाग्रे जीवितेशस्य वर्तमानः, विरलो वाचि, विह्वलो वपुषि, प्रचुरः प्रलापे, जितो [3]जृम्भिकाभिरिति । एवम्भूतामवस्थामनुभवन्नपि महामोहोदयाद् भोगाभि- काङ्क्षिषुः पार्श्वोपविष्टां भार्यामनवरत[4]वेदनावेशविगलदश्रुरक्तनयनां '**कुरुमति ! कुरुमति** !' [5]इत्येवं व्याहरन्नधः [6]सप्तमीं नरक[7]पृथ्वीमगात् । तत्रापि तीव्रतरवेदनाभि[8]भूतोऽप्यवगणय्य वेदनां तामेव **कुरुमतीं** [9]व्याहरतीति ।

एवम्भूतो भोगाभिष्वङ्गो दुस्त्यजो भवति केषाञ्चि[10]त्, अन्येषां पुनर्महापुरुषाणामुदारसत्त्वानाम् 'आत्मनोऽन्यच्छरीरम्' इत्येवमवगततत्त्वानां **सनत्कुमारा**दीनामिव यथोक्तरोगवेदनासद्भावे सत्यपि '[11]मयैवैतत् कृतम् सोढव्यमपि मयैव' इत्येवं जातनिश्चयानां कर्मक्षपणोद्यतानां न [12]मनसः पीडोत्पद्यत इति, उक्तं च—

**उप्तो यः स्वत एव मोह[13]सलिलो जन्मालवालोऽशुभः,**
**राग-द्वेष-कषायसन्तति[14]र्महानिर्विघ्नबीजस्त्वया ।**
**रोगैरङ्कुरितो विपत्कुसुमितः कर्मद्रुमः साम्प्रतम्,**
**सोढा नो यदि सम्यगेष [15]फलिता दुःखैरधोगामिभिः ॥ [ ]**

---

१. मारणान्तिकवेदनासमुद्भूतः( त? )सन्तापा० ख । २. पीतः ग घ । ३. जृम्भाभि० ग । ४. ०वेदनावेगविगलदश्रु० ग, ०वेदनावेशगलदश्रु० ख च । ५. इत्येवं नां व्याह० ख ग । ६. सप्तमीनरक० क घ, सप्तमनरक० ख । ७. पृथिवी० ख च । ८. ०भूतोऽप्यविगणय्य ख च । ९. व्याहरति क ग । १०. ०त्, न पुनरन्येषां महा० ख-चआदर्शौ विना । ११. मयैतत् घ । १२. मनःपीडो० च । १३. ०सलिलैर्जन्मालवालेऽशुभो ख ग, खप्रतौ मूलस्थः पाठः शोधितः । १४. ०महान् नि० ग च । १५. फलितो क खप्रतौ ऋते ।

पुनरपि सहनीयो दुःख[1]पाकस्त्वयाऽयम्,
न खलु भवति नाशः कर्मणां सञ्चितानाम् ।
इति[2] सह गणयित्वा यद् यदायाति सम्यक्,
सदसदिति विवेकोऽन्यत्र भूयः कुतस्त्यः ?॥ [ ]

अपि च—भोगानां प्रधानं कारणमर्थः, अतस्तत्स्वरूपमेव निर्दिदिक्षुराह—[3]**तिविहेण** इत्यादि । त्रिविधेन याऽपि तस्य तत्रार्थमात्रा भवति [4]अल्पा वा बह्वी वा, स तस्यामर्थमात्रायां गृद्धस्तिष्ठति । सा च भोजनाय किल भविष्यति । ततस्तस्यैकदा विपरिशिष्टं सम्भूतं महोपकरणं भवति । तदपि तस्यैकदा दायादा विभजन्ते, [5]अदत्तहारा वा हरन्ति, राजानो वा [6]विलुम्पन्ति, नश्यति वा, विनश्यति वा, अगारदाहेन वा दह्यते । इति स परस्मा अर्थाय क्रूराणि कर्माणि बालः प्रकुर्वाणस्तेन दुःखेन [7]मूढो विपर्यासमुपैति । एतच्च प्रागेव व्याख्यातमिति नेह प्रतायते ।

तदेवं दुःखविपाकान् भोगान् प्रतिपाद्य यत्[8]कर्तव्यं तदुपदिशतीत्याह—

**[ सू०८३ ] आसं च छंदं च विगिंच धीरे ।**
**तुमं चेव तं सल्लमाहट्टु ।**
**जेण सिया तेण णो सिया ।**
**इणमेव णावबुज्झंति जे जणा मोहपाउडा ।**

**[ सू०८४ ] थीभि लोए पव्वहिते ।**
**ते भो ! वदंति एयाइं आयतणाइं ।**
**से दुक्खाए मोहाए माराए णरगाए नरगतिरिक्खाए ।**
**सततं मूढे धम्मं णाभिजाणति ।**

---

१. ०पाकस्तवाऽयं ख ग च । २. इह सह ख । ३. तिविहेणेत्यादि च । ४. अल्पा च बह्वी च ख । ५. *अदत्ताहारो वा तस्य हरति ख ग घ ङ च, परं हरन्ति इति गप्रतौ* अदत्तहारो इति च घप्रतौ विशेषः । ६. विलुञ्चन्ति ग । ७. विमूढो ङ । ८. कर्तव्यं च तदु० ङ ।

**आसं च** इत्यादि । **आशां** भोगाकाङ्क्षाम्, चः समुच्चये, छन्दनं छन्दः परानुवृत्त्या भोगाभिप्रायस्तं च[१], चशब्दः पूर्वापेक्षया समुच्चयार्थः, तावाशा-छन्दौ वेविक्ष्व पृथक्कुरु त्यज, धीर ! धीः बुद्धिस्तया राजत इति । भोगाशा-छन्दापरित्यागे च दुःखमेव केवलम्, न तत्प्राप्तिरिति । आह च—**तुमं चेव** इत्यादि । विनेय उपदेशगोचरापन्न आत्मा वाऽपदिश्यते, त्वमेव तत् भोगाशादिकं शल्यम् आहृत्य स्वीकृत्य परमशुभमादत्से, न तु पुनरुपभोगम्, यतो भोगोपभोगो यैरेवार्थाद्युपायैर्भवति तैरेव न [२]भवतीति । आह च—**जेण सिया तेण नो सिया** । येनैवार्थोपार्जनादिना भोगोपभोगः स्यात् तेनैव विचित्रत्वात् कर्मपरिणतेर्न स्यात् । अथवा येन केनचिद्धेतुना कर्मबन्धः स्यात् तद् न कुर्यात्, तत्र न वर्तेतेत्यर्थः । यदि वा [३]येनैव राज्योपभोगादिना कर्मबन्धो येन वा [४]निर्ग्रन्थत्वादिना मोक्षः स्यात् भवेत् तेनैव तथाभूतपरिणामवशाद् न स्यादिति ।

एतच्चानुभवावधारितमपि मोहाभिभूता नावगच्छन्तीत्याह—**[५]इणमेव** इत्यादि । इदमेव हेतुवैचित्र्यं न बुध्यन्ते न सञ्जानते, के ? ये जना मौनीन्द्रोपदेशविकला मोहेन अज्ञानेन मिथ्यात्वोदयेन वा प्रावृताः छादिताः, तत्त्व[६]विपर्यस्तमतयो मोहनीयोदयाद् भवन्ति ।

मोहनीयस्य च [७]तद्भेदकामानां च स्त्रियो गरीयः कारण[८]मिति दर्शयति—

**थीभि** इत्यादि । **स्त्रीभिः** अङ्गनाभि[९]र्भ्रूक्षेपादिविभ्रमैरसौ लोकः आशा-च्छन्दाभिभूतात्मा क्रूरकर्मविधायी नरकविपाकफलं शल्यमाहृत्य तत्फल[१०]म-बुध्यमानो मोहाच्छादितान्तरात्मा प्रकर्षेण व्यथितः प्रव्यथितः पराजितो वशीकृत इति यावत् ।

न केवलं स्वतो [११]विनष्टाः, [१२]अपरानपि असदुपदेशदानेन [१३]विनाशयन्ती-त्याह—**ते भो** इत्यादि । **ते** स्त्रीभिः प्रव्यथिताः, **भो** इत्यामन्त्रणे, एतद् **वदन्ति**

---

१. **च** इति घ-चप्रत्योर्नास्ति । २. **भवतीत्याह-** ग घ ङ । ३. **येनैव नि०** ख । ४. **निर्ग्रन्थादिना** ग । ५. **इणमेवमित्यादि** ख । ६. **०विपर्यासमतयो** ख । ७. **तद्भेदकानां च** क । ८. **०मिति कृत्वा दर्श०** ख । ९. **०भ्रूत्क्षेपादि०** घ । १०. **०म[ न ]वबुध्यमानो** ख । ११. **नष्टाः** ङ **नष्टः** च । १२. **अपरानप्युपदेश०** ग । १३. **विनाशयतीत्याह** च ।

यथा—**एतानि** स्त्र्यादीनि **आयतनानि** उपभोगास्पदभूतानि वर्तन्ते, एतैश्च विना [1]शरीरस्थितिरेव न भवतीति।

एतच्च प्रव्यथनमुपदेशदानं वा तेषामपायाय स्यादित्याह—**से** इत्यादि। तेषां [2]**से** इत्येतत् स्त्रीप्रव्यथनमायतनभणनं वा दुःखाय भवति शारीर-मानसा[3]सातवेदनीयोदयाय जायते। किञ्च—**मोहाए** मोहनीयकर्म[4]बन्धनाय अज्ञानाय [5]वेति, तथा **माराए** [6]मरणाय, ततोऽपि **नरगाए** नरकाय नरक[7]गमनार्थम्, पुनरपि **नरग-**[8]**तिरिक्खाए**, ततोऽपि नरका[9]दुद्वृत्य [10]तिरश्च्येतत् प्रभवति तिर्यग्योन्यर्थं तत् स्त्रीप्रव्यथनम्, भोगायतनवदनं वा सर्वत्र सम्बन्धनीयम्।

स [11]एवमङ्गनापाङ्गविलोकनाक्षिप्तस्तासु तासु योनिषु पर्यटन्नात्महितं न जानातीत्याह—**सययमि**त्यादि। **सततम्** अनवरतं दुःखाभिभूतो [12]**मूढो** [13]**धर्मं** क्षान्त्यादिलक्षणं दुर्गति[14]प्रसृतिनिषेधकं न **जानाति** न वेत्ति।

एतच्च तीर्थकृदाहेति दर्शयति—

**[ सू०८५ ] उदाहु वीरे—अप्पमादो महामोहे, अलं कुसलस्स पमादेणं, संतिमरणं सपेहाए, भेउरधम्मं सपेहाए। णालं पास। अलं ते एतेहिं। एतं पास मुणि! महब्भयं। णातिवातेज्ज कंचणं।**

**[ सू०८६ ] एस वीरे पसंसिते जे ण णिव्विज्जति आदाणाए।**

**ण मे देति ण कुप्पेज्जा, थोवं लद्धुं ण खिंसए।**

---

१. शारीर० ग। २. से एतत् क, से इति खप्रतौ नास्ति, "स इति सो त्थिवसगो बालो, दुक्खाए त्ति संसारदुक्खस्स आयतणं भवति" चूर्णौ। ३. ०सातावेद० घ च। ४. बन्धाय ख। ५. चेति क ख। ६. मारणाय च। ७. ०गमनार्थे ख। ८. ०तिरित्ताए ख। ९. ०दुद्वृत्त्य खप्रतिमृते। १०. तिरश्चेतत् चप्रतेर्विना। ११. एवमङ्गनाङ्गवि० क, एवाङ्गनापाङ्गवलोकना० ख। १२. मूढो वा धर्मं ग। १३. धर्मं वा क्षा० ख। १४. ०प्रसृतनि० क घ च।

**पडिसेहितो परिणमेज्जा ।**

**एतं मोणं समणुवासेज्जासि त्ति बेमि ।**

॥ लोगविजयस्स चउत्थो उद्देसओ सम्मत्तो ॥

**उदाहु** इत्यादि । उत् प्राबल्येन आह **उदाह** उक्तवान् । कोऽसौ ? **वीरः**[१], अपगतसंसारभयः तीर्थकृदित्यर्थः । किमुक्तवान् ? तदेव[२] पूर्वोक्तं वाचा दर्शयति— **अप्रमादः** कर्तव्यः । क्व ? **महामोहे,** अङ्गनाभिष्वङ्ग एव महामोहकारणत्वात्[३] महामोहः, तत्र प्रमादवता न भाव्यम् । आह च[४]—

**अलमित्यादि**[५] । **अलं** पर्याप्तम् । कस्य ? **कुशलस्य** निपुणस्य सूक्ष्मेक्षिणः, केनालम् ? मद्य-विषय-कषाय-निद्रा-विकथारूपेण पञ्चविधेनापि **प्रमादेन,** यतः प्रमादो दुःखाद्यभिगमनायोक्त इति ।

स्यात्—किमालम्ब्य प्रमादेनालमिति ? उच्यते—**संतिं** इत्यादि । [illegible] **शान्तिः** अशेषकर्मापगमः[६], अतो मोक्ष एव शान्तिरिति, म्रियन्ते प्राणिनः पौनःपुन्येन यत्र चतुर्गतिके संसारे स मरणः संसारः, शान्तिश्च मरणश्च[७] शान्तिमरणम्, समाहारद्वन्द्वः । तत्[८] **सम्प्रेक्ष्य** पर्यालोच्य 'प्रमादवतः संसारानुगमः तत्परित्यागाच्च मोक्षः' इत्येतद्विचार्येति हृदयम्, **स** वा कुशलः **प्रेक्षक** [illegible] कषायप्रमादं न विदध्यात् । अथवा 'शान्त्या' उपशमेन 'मरणं' मरणावधि यावत् तिष्ठतो यत् फलं भवति तत् पर्यालोच्य प्रमादं न कुर्यादिति ।

किञ्च—**भेउर**[९] इत्यादि । प्रमादो हि[१०] विषय-कषायादि[११]रूपः शरीराधिष्ठानः, तच्च शरीरं भिदुरधर्मं स्वत एव भिद्यत इति भिदुरं स एव धर्मः स्वभावो यस्य तद् भिदुरधर्मम्, एतत् समीक्ष्य पर्यालोच्य प्रमादं न कुर्यादिति सम्बन्धः । एते[१२] च भोगा भुज्यमाना अपि न तृप्तये भवन्तीत्याह—

---

१. धीरः ङ । २. तदेवं ग ङ । ३. ०मोहनी[ य ]कारणात्वाद् ङ । ४. च इति चपुस्तके नास्ति । ५. अलं इत्यादि ख । ६. ०कर्मापगमतो मोक्ष ख । ७. मरणं च घ ङ कप्रतौ पाठभङ्गः । ८. तं सम्प्रेक्ष्य ग ङ । ९. भिउर ख च । १०. हि इति ख-चप्रत्योरेव । ११. विषयाभिष्वङ्ग० ख च । १२. ते च क ।

**नालम्**[1]इत्यादि । नालं न समर्था अभिलाषोच्छित्तये यथेष्टावाप्तावपि[2] भोगाः, एतत् पश्य जानीहि, अतोऽलं तव[3] कुशल ! **एभिः** प्रमादमयैर्दुःखकारणस्वभावैर्विषयैरुपभोगैरिति । न चैते बहुशोऽप्युपभुज्यमाना उपशमं विदधतीति, उक्तं च—

**यल्लोके व्रीहि-यवं, हिरण्यं पशवः स्त्रियः ।**
**नालमेकस्य तत् सर्वमिति मत्वा शमं कुरु[4] ॥**
**उपभोगोपायपरो वाञ्छति यः शमयितुं विषयतृष्णाम् ।**
**धावत्याक्रमितुमसौ पुरोऽपराह्णे निजच्छायाम् ॥** [ ]

तदेवं भोगलिप्सूनां तत्प्राप्तावप्राप्तौ च दुःखमेवेति दर्शयति—

**एयं[5] पस्स[6]** इत्यादि । एतत् प्रत्यक्षमेव[7] भोगाशामहाज्वरगृहीतानां कामदशावस्थात्मकं **महद्भयं** भयहेतुत्वाद् दुःखमेव भयं तच्च मरणकारणमिति [8]महदित्युच्यते । **एतत् मुने ! पश्य** सम्यगैहिका-ऽऽमुष्मिकापायापादकत्वेन जानीहित्युक्तं भवति । यद्येवं तत् किं कुर्यात् ? इत्याह—**नाइवाएज्ज**[9] इत्यादि । यतो भोगाभिलषणं महद्भयमतस्तदर्थं नातिपातयेत् न व्यथेत कञ्चन कमपि जीवमिति । अस्य च शेषव्रतोपलक्षणार्थत्वाद् न प्रतारयेत् कञ्चन इत्याद्यप्यायोज्यम् ।

भोगनिरीहः प्राणातिपातादिव्रता[10]धिरूढश्च कं गुणमवाप्नोतीत्याह—**एस** इत्यादि । **एष** इति भोगाशा-च्छन्दविवेचकोऽप्रमादी पञ्चमहाव्रतभारारोहणोन्नामितस्कन्धो **वीरः**[11] कर्मविदारणात् प्रशंसितः स्तुतो देवराजादिभिः । क एष[12] **वीरो** नाम योऽभिष्टूयते ? इत्यत आह—

**जे** इत्यादि । **यो न निर्विद्यते** न[13] खिद्यते न जुगुप्सते । कस्मै ? आदानाय, आदीयते गृह्यतेऽवाप्यते[14] आत्मस्वतत्त्वमशेषावारककर्मक्षयाविर्भूत-

---

१. **नालं इत्यादि** ख । २. **०वाप्ता अपि** ख । ३. **तव** इति ङप्रतौ न । ४. **कुरु ॥ तथा-उपभोगो०** ख ग च । ५. **एवं** ग । ६. **पस्सेत्यादि** ख, **पासेत्यादि** च । ७. **०मेव महाभयं तच्च** क ग च । ८. **महद्भयमित्युच्यते** ख । ९. **नातिवातेज्ज** ख । १०. **०व्रतादिरूढश्च** क घ, **०व्रतारूढश्च** ख ग च । ११. **धीरः** ख च । १२. **एवं** क । १३. **न खिद्यते** इति ख-घ-चप्रतिषु न वर्तते । १४. **०ते वा आत्म०** ग ।

समस्तवस्तुग्राहि[१]ज्ञानाऽबाधसुखरूपं येन तद् आदानं संयमानुष्ठानं तस्मै न जुगुप्सते । तद्वा कुर्वन् सिकताकवलचर्वणदेशीयं क्वचिदलाभादौ न खेदमुपयाती[२]त्याह–

**न मे** इत्यादि । ममायं गृहस्थः सम्भृतसम्भारोऽप्युप[३]स्थितेऽपि दानावसरे न ददातीति कृत्वा **न कुप्येत्** न[४] क्रोधवशगो भूयात्, भावनीयं च–ममैवैषा कर्मपरिणतिरित्यलाभोदयोऽयम्, अ[५]नेन चालाभेन कर्मक्षयायोद्यतस्य मे तत्क्षपणसमर्थं तपो भावीति न किञ्चित् क्षूयते ।

अथापि कथञ्चित् स्तोकं प्रान्तं वा लभेत तदपि न निन्देदित्याह– [६]**थेव**मित्यादि । स्तोकम् अपर्याप्तं लब्धुं लब्ध्वा वा[७] न निन्देद् दातारं दत्तं वा, [८]तथाहि–कतिचित्सिक्थानयने ब्रवीति–सिद्ध ओदनः, भिक्षामानय, [९]लवणाहारो वाऽस्माकं नास्तीत्यन्नं ददस्व इत्येवमत्युद्वृत्तच्छात्रवन्न विदध्यात् ।

किञ्च–[१०]**पडिसेहिओ** इत्यादि । प्रतिषिद्धः अदित्सितस्तस्मादेव प्रदेशात् परिणमेत् निवर्तेत, क्षणमपि न तिष्ठेत्, न दौर्मनस्यं विदध्या[११]त्, रुण्टन्नापगच्छेत्, न तां सीमन्तिनीमपवदेत् 'धिक् ते गृहवासम्' इति, उक्तं च–

**दिट्ठा सि [१२]कसेरुमइ ! अणुभूया सि [१३]कसेरुमइ ! ।**
**पीयं चिय [१४]ते पाणिययं वरि तुह नाम [१५]न [१६]दंसणयं ॥** [ ] इत्यादि ।

पठ्यते [१७]च–[१८]**पडिलाभिओ परिणमेज्जा,** प्रतिलाभितः प्राप्त[१९]भिक्षादि-

---

१. **०ज्ञानाबन्धसुख०** ग । २. **०त्याह च-** ख च । ३. **०स्थिते दाना०** ख । ४. **न च क्रोध०** च । ५. **अनेनैवालाभोदयेन कर्मक्षपणार्थमुद्यतस्यैतत् क्षपणसमर्थं** ख । ६. **थेवं** इत्यादि ख च, **थोवमि०** ग घ ङ । ७. **वा** इति खप्रतावेव । ८. **तथाहि** इति खप्रतौ न । ९. **लवणधारो** ग, **लवणाधारो** च । १०. **पडिसेहित्तु** ख । ११. **०त्, न रुण्टन्नपगच्छेत्** ख च । १२-१३. **कसेरुमती** ख च, **कसेरुमई** ग घ ङ "**कसेरुमयीति** नदी" जै०वि०प० । १४. **तेण पाणियं वरि तुह नामं न** ख । १५. **म** क घ ङ । १६. **दंसणयमित्यादि** । गप्रतेर्विना । १७. **च** इति खपुस्तके नास्ति । १८. **पडिलाहिओ** ग । १९. **०भिक्षालाभः** क घ ।

लाभः सन् परिणमेत्, नोच्चा-ऽवचालापैस्तत्रैव संस्तवं विदध्यात्, वैतालिकवद् दातारं नोत्प्रासयेदिति । उपसंहरन्नाह–

[1]**एयमि**त्यादि । एतत् प्रव्रज्याऽनिर्वेदरूपम् अदानाऽकोपनं स्तोका-ऽजुगुप्सनं प्रतिषिद्धनिवर्तनं मुनेरिदं मौनं मुनिभि[2]र्मुमुक्षुभिर्वाऽऽचरितं त्वमप्यवाप्तानेकभवकोटिदुरापसंयमः सन् समनुवासये[3]: सम्यग् विधत्स्व अनुपालयेति विनेयोपदेश आत्मानुशासनं वा । [4]**इतिः** परिसमाप्तौ । [5]**ब्रवीमि** पूर्ववत् ।

**लोकविजयाध्ययनचतु[6]र्थोद्देशकटीका [7]समाप्ता ॥ छ ॥ छ ॥**

● ● ●

१. **एयं इत्यादि** ख च । २. ०**भिराचरितं** ख च । ३. ०**ये: समनुपालयेति** वि० ख। ४. **इति** ख घ ङ विना । ५. **ब्रवीमि इति पू०** ङ च । ६. ०**र्थोद्देशटीका** च । ७. **परिसमाप्ता** ख च ।

उक्तश्चतुर्थोद्देशकः साम्प्रतं पञ्चमस्य व्याख्या प्रतन्यते[1] । तस्य[2] चायमभिसम्बन्धः—इह भोगान् परित्यज्य लोकनिश्रया संयमदेहप्रतिपालनार्थं विहर्तव्यमित्युक्तम् तदत्र प्रतिपाद्यते । इह हि संसारोद्वेगवता परित्यक्तभोगाभिलाषेण मुमुक्षुणोत्क्षिप्तपञ्चमहाव्रतभारेण निरवद्यानुष्ठानविधायिना दीर्घसंयमयात्रार्थं देहप्रतिपालनाय[3] लोकनिश्रया विहर्तव्यम्, निराश्रयस्य हि कुतो देहसाधनानि ? तदभावे धर्मश्च ? इति, उक्तं हि[4]—

**धर्मं चरतः साधोर्लोके निश्रापदानि पञ्चापि ।**
**राजा गृहपतिरपरः षट् काया गण-शरीरे च[5] ॥ [ ]**

साधनानि च वस्त्र-पात्रा-ऽन्ना-ऽऽसन-शयनादीनि[6], तत्रापि प्रायः प्रतिदिनमुपयोगित्वाद् आहारो गरीयानिति, स च लोकादन्वेष्टव्यः, लोकश्च नानाविधैरुपायैरात्मीयपुत्र-कलत्राद्यर्थमारम्भप्रवृत्तः, तत्र साधुना संयमदेहनिमित्तं वृत्तिरन्वेषणीयेति[7] दर्शयति—

**[ सू०८७ ] जमिणं विरूवरूवेहिं सत्थेहिं लोगस्स कम्मसमारंभा कज्जंति । तंजहा—अप्पणो से पुत्ताणं धूताणं सुण्हाणं णातीणं धातीणं राईणं दासाणं दासीणं कम्मकराणं कम्मकरीणं आदेसाए पुढो पहेणाए सामासाए पातरासाए संणिहिसंणिचयो कज्जति इहमेगेसिं माणवाणं भोयणाए ।**

जमिणमित्यादि[8] । यैः अविदितवेद्यैः **इदम्** इति सुख-दुःखप्राप्तिपरिहारत्वमुद्दिश्य **विरूपरूपैः** नानास्वरूपैः[9] **शस्त्रैः** प्राण्युपघातकारिभिर्द्रव्यभावभेदभिन्नैः लोकाय शरीर-पुत्र-दुहितृ-स्नुषा-ज्ञात्याद्यर्थं **कर्मणां** सुखदुःखप्राप्ति-परिहारक्रियाणां कायिका-ऽऽधिकरणिका-प्रादोषिका[10]-पारि[11]

---

१. **प्रतायते** ख । २. **अस्य** ग । ३. देहपरिपालनाय घ ङ । ४. **उक्तं च** ख ग ङ । ५. **षट्कायगणः शरीरं च** ख । ६. ०ऽन्न-शयनादीनि क घ ङ । ७. ०देहनिमित्तं **प्रवृत्ति०** क, ०देहार्थं **वृत्ति०** ख, ०देहार्थं **प्रवृत्ति०** च । ८. **जमिणं इत्यादि** ख च । ९. **नानाप्रकारस्वरूपैः** ख ग, चप्रतौ पाठपतनम् । १०. **०प्रादोषिकी-पारितापनिकी०** ख । ११. **०परितापनिका०** क घ ङ ।

तापनिका-प्राणातिपातरूपाणां कृषि-वाणिज्यादिरूपाणां वा, **समारम्भा** इति मध्यग्रहणाद् बहुवचननिर्देशाच्च संरम्भा-ऽऽरम्भयोरप्युपादानम्, तेनायमर्थः— शरीर-कलत्राद्यर्थं संरम्भ-समारम्भा-ऽऽरम्भाः **क्रियन्ते** अनुष्ठीयन्ते । तत्र संरम्भ इष्टा-ऽनिष्टप्राप्ति-परिहाराय प्राणातिपातादिसङ्कल्पावेशः, तत्साधनसन्निपातकाय-वाग्[१]व्यापारजनितपरितापनादिलक्षणः समारम्भः, दण्डत्रय[२]व्यापारापादित-चिकीर्षितप्राणातिपातादिक्रिया[३]निर्वृत्तिरारम्भः । कर्मणो वा अष्टप्रकारस्य समारम्भाः उपार्जनोपायाः क्रियन्त इति । लोकस्य इति चतुर्थ्यर्थे षष्ठी, साऽपि तादर्थ्ये । कः पुनरसौ लो[४]को यदर्थं संरम्भ-समारम्भा-ऽऽरम्भाः क्रियन्ते ? इत्या[५]ह—**तंजहा— अप्पणो से** इत्यादि । यदि वा लोकस्य तृतीयार्थे षष्ठी । **यद्** इति हेतौ, यस्माद् लोकेन नानाविधैः शस्त्रैः कर्मसमारम्भाः क्रियन्त इत्यतस्तस्मिन् लोके [६]साधुर्वृत्तिमन्वेषयेत् । यदर्थं च लोकेन कर्मसमारम्भाः क्रियन्ते [७]तत् **तद्यथे**त्यादिना दर्शयति—**तंजहा—अप्पणो से** इत्यादि । **तद्यथा** [८]इत्युपप्रदर्शनार्थे, नोक्तमात्रमेव, अन्यदप्येवञ्जातीयकं मित्रादिकं द्रष्टव्यम् । **से** तस्यारम्भारिप्सोर्य **आत्मा** शरीरं [९]तस्मै तदर्थं कर्मसमारम्भाः पाकादयः क्रियन्ते ।

ननु च [१०]लोकार्थमारम्भाः क्रियन्त इति [११]प्रागभिहितम्, न च शरीरं लोको भवति, नैतदस्ति, यतः परमार्थदृशां ज्ञान-दर्शन-चारित्रात्मकमात्मतत्त्वं विहायान्यत् सर्वं शरीराद्यपि [१२]पराक्यमेव, तथाहि—बाह्यस्य पौद्गलिकस्याचेतनस्य कर्मणो विपाकभूतानि पञ्चापि [१३]शरीराणीत्यतः शरीरात्माऽपि लोकशब्दाभिधेय इति ।

तदेवं कश्चिच्छरीरनिमित्तं कर्मारभ[१४]ते, अपरस्तु पुत्रेभ्यो दुहितृभ्यः स्नुषाः वध्वस्ताभ्यः, ज्ञातयः पूर्वा-ऽपर[१५]सम्बद्धाः स्वजनाः [१६]ताभ्यः, धात्रीभ्यो राजभ्यो

१. ०व्यापारादिजनित० ख । २. ०व्यापारादित० ङ । ३. ०निवृत्ति० ख च । ४. से इति गप्रतौ न । ५. हेतोः ख । ६. साधुवृत्ति० ग । ७. तत् इति घप्रतावेव । ८. इत्युपप्रदर्शनार्थो ग घ, इत्युपदर्शनार्थो ङ इत्युपप्रदर्शनार्थम् च । ९. तस्मै अर्थं तदर्थं कर्म० ग च । १०. लोकार्थं समारम्भाः ग घ । ११. प्रागभ्यधायि, न ख । १२. पाराक्यमेव क घ ङ परकीयमेव ग । १३. शरीराण्यतः ख । १४. ०ते, परस्तु च । १५. ०सम्बन्धाः क । १६. तेभ्यः खपुस्तकमृते ।

दासेभ्यो दासीभ्यः कर्मकरेभ्यः कर्मकरीभ्यः, आदिश्यते परिजनो यस्मिन्नागते तदातिथेयायेति आदेशः[1] प्राघूर्णकस्तदर्थं कर्मसमारम्भाः क्रियन्त इति सम्बन्धः । तथा **पुढो**[2] **पहेणाए**त्यादि । पृथक् पृथक् पुत्रादिभ्यः प्रहेणकार्थम् । तथा **सामासाए** त्ति[3] श्यामा रजनी तस्यामशनं श्यामाशस्तदर्थम्, तथा **पायरासाये**[4] त्ति प्रातरशनं प्रातराशस्तस्मै, 'कर्मसमारम्भाः क्रियन्त' इति सामान्योक्तावपि[5] विशेषार्थमाह—**सन्निही**[6]त्यादि । सम्यग् निधीयत इति सन्निधिः विनाशिद्रव्याणां दध्योदनादीनां संस्थापनम्, तथा सम्यग् निश्चयेन चीयत इति **सन्निचयः** अविनाशिद्रव्याणामभया-सिता[7]-मृद्वीकादीनां सङ्ग्रहः, सन्निधिश्च सन्निचयश्च सन्निधि-सन्निचयम्, प्राकृतशैल्या पुंलिङ्गता । अथवा सन्निधेः सन्निचयः सन्निधिसन्निचयः, स च परिग्रहसंज्ञोदयाद् आजीविकाभयाद्वा धन-धान्य-हिरण्यादीनां क्रियत इति । स च किमर्थम् ? इत्याह—

**इहे**त्यादि । इह इति मनुष्यलोके **एकेषाम्** इहलोककृतपरमार्थबुद्धीनां[8] **मानवानां** मनुष्याणां **भोजनाय** उपभोगार्थमिति । तदेवं विरूपरूपैः शस्त्रैरात्म-पुत्राद्यर्थं[9] कर्मसमारम्भप्रवृत्ते लोके पृथक् प्रहेणकाय श्यामाशाय प्रातराशाय केषाञ्चिन्मानवानां भोजनार्थं सन्निधिसन्निचयकरणोद्यते सति साधुना किं कर्तव्यम् ? इत्याह—

**[ सू०८८ ] समुट्ठिते अणगारे आरिए आरियपण्णे आरियदंसी अयंसंधीति अदक्खु ।**

**से णाइए, णाइआवए, न समणुजाणए ।**

**सव्वामगंधं परिण्णाय णिरामगंधे परिव्वए ।**

---

१. **आदेशस्तदर्थं** ख । २. **पुढो पहेणाए** त्ति **पृथक् पृ०** ख, **पुढो पहेणाए इत्यादि** ग, **पुढो पहेणायेत्यादि** घ ङ च, "**पुढो पहेणाए** त्ति 'पिहु' वित्थारे, अणेगप्पगारपधेह(धेणय?)त्थे" चूर्णौ । ३. **ति** क । ४. **पायरासाए** ख ग । ५. **सामान्येनोक्तावपि** ख-गप्रती विना । ६. **सन्निही य इत्यादि** ग, **सन्निही इत्यादि** ङ च । ७. "उ० प-**सिता** शर्करा" स०वि०प० । ८. **इहलोकभूतपरमार्थ०** च । ९. **०पुत्राद्यर्थे** च ।

**अदिस्समाणे कय-विक्कएसु । से ण किणे, ण किणावए, किणंतं ण समणुजाणए ।**

**से भिक्खू कालण्णे बालण्णे मातण्णे खेयण्णे खणयण्णे विणयण्णे समयण्णे भावण्णे परिग्गहं अममायमाणे कालेणुट्ठाई अपडिण्णे । दुहतो छित्ता णियाइ ।**

**[ सू०८९ ] वत्थं पडिग्गहं कंबलं पादपुंछणं उग्गहं च कडासणं एतेसु चेव जाणेज्जा ।**

**लद्धे आहारे अणगारो मातं जाणेज्जा । से जहेयं भगवता पवेदितं ।**

**लाभो त्ति ण मज्जेज्जा । अलाभो त्ति ण सोएज्जा, बहुं पि लद्धुं ण णिहे । परिग्गहाओ अप्पाणं अवसक्केज्जा । अण्णहा णं पासए परिहरेज्जा ।**

**एस मग्गे आरिएहिं पवेदिते, जहेत्थ कुसले णोवलिंपिज्जासि त्ति बेमि ।**

**[ सू०९० ] कामा दुरतिक्कमा । जीवियं दुप्पडिबूहगं ।**

**कामकामी खलु अयं पुरिसे, से सोयति जूरति तिप्पति पिड्डति परितप्पति ।**

समुट्ठिए इत्यादि यावत् निरामगन्धो परिव्वए । [1]सम्यक् [2]सततं सङ्गतं वा संयमानुष्ठानेनोत्थितः **समुत्थितः**, [3]नानाविधशस्त्रकर्मसमारम्भोपरत इत्यर्थः । न

---

१. सम्यक् सङ्गतं सततं वा ख । २. सन्ततं च । ३. नानाविधकर्मशस्त्रमा० क ।

विद्यते अगारं गृहमस्येत्यनगारः, पुत्र-दुहितृ-स्नुषा-ज्ञाति-धात्र्यादिरहित इत्यर्थः । सो[1]ऽनगारः, आराद् यातः सर्वहेयधर्मेभ्य इत्यार्यः चारित्रार्हः[2] । आर्या प्रज्ञा यस्यासावार्यप्रज्ञः श्रुतविशेषित[3]शेमुषीक इत्यर्थः । आर्यं प्रगुणं न्यायोपपन्नं पश्यति तच्छीलश्चेत्यार्यदर्शी पृथक्प्रहेणक-श्यामाशनादिसङ्कल्परहित इत्यर्थः । **अयंसंधीति** सन्धानं सन्धीयते वाऽसाविति सन्धिः, अयं सन्धिर्यस्य साधोरसावयंसन्धिः, 'छान्दसत्वाद् विभक्तेरलुग्' इत्ययंसन्धिः यथाकालमनुष्ठानविधायी यो यस्य वर्तमानः[4] कालः[5] कर्तव्यतयोपस्थितस्तत्करणतया तमेव सन्धत्त इति, एतदुक्तं भवति—सर्वाः क्रियाः प्रत्युपेक्षणोपयोग-स्वाध्याय-भिक्षाचर्या-प्रतिक्रमणादिका असपत्ना अन्योन्याऽबाधयाऽऽत्मीयकर्तव्यकाले करोतीत्यर्थः । इति[6] हेतोः[7] यस्माद् यथाकालानुष्ठानविधायी तस्मादसावेव परमार्थं पश्यतीत्याह—

**अदक्खु** त्ति तिङ्व्यत्ययेनैकवचनावसरे बहुवचनमकारि, ततश्चायमर्थः—यो ह्यार्य आर्यप्रज्ञ आर्यदर्शी कालज्ञश्च स एव परमार्थमद्राक्षीन्नापर इति । पाठान्तरं वा—**अयं संधिमदक्खु**[8]**, अयम्** अनन्तरविशेषणविशिष्टः साधुः **सन्धि** कर्तव्यकालम् **अद्राक्षीत्** दृष्टवान्, एतदुक्तं भवति—यः परस्पराऽबाधया हिताऽहितप्राप्ति-परिहाररूपतया विधेयावसरं वेत्ति विधत्ते च स परमार्थं ज्ञातवानिति । अथवा भावसन्धिः ज्ञान-दर्शन-चारित्राणामभिवृद्धिः । स च शरीरमृते न भवति, तदपि नोपष्टम्भकारणमन्तरेण, तस्य च सावद्यस्य परिहारः कर्तव्य इत्यत आह—

**से णाइए**[9] इत्यादि । स भिक्षुः तद् वा अकल्प्यं नाददीत न गृह्णीयात्, नाप्यपरम् आदापयेत् ग्राहयेत्, नापरमनेषणीयमाददतं[10] समनुजानीयात् । अथवा सइङ्गालं सधूमं वा नाद्यात् न भक्षयेत्, नापरमादयेत्, अदन्तं वा न समनुजानीयादिति । आह—

**सव्वामगंध**[11]मित्यादि । आमं च गन्धश्च आमगन्धम्, समाहारद्वन्द्वः, सर्वं

---

१. असौ ऽ( अ )नगारः क । २. चरित्रार्हः च । ३. श्रुतविशेषशेमुषीकः ग । ४. प्रवर्तमानः ङ । ५. कालः इति खपुस्तके नास्ति । ६. इतिः घ । ७. हेतौ ग घ च । ८. संधि अदक्खु अयम् अनन्तरोक्तविशेषण० ख च । ९. णाइते ख, णाईए घ ङ । १०. नाप्यपरमनेषणीयमाददानं ख ग च । ११. ०गंधमित्यादि कपुस्तकं विना ।

च तदामगन्धं च सर्वामगन्धम् । सर्वशब्दः प्रकारकात्स्न्येऽत्र गृह्यते, न द्रव्यकात्स्न्ये । आमम् अपरिशुद्धम् । गन्धग्रहणेन तु [1]पूतिर्गृह्यते ।

ननु च पूतिद्रव्यस्याप्यशुद्धत्वाद् आमशब्देनैवोपादानात् किमर्थं भेदेनोपादानमिति ? सत्यम्, अशुद्धसामान्याद् गृह्यते, किन्तु पूतिग्रहणेनेहाधाकर्माद्यविशुद्धकोटिरुपात्ता, तस्याश्च [2]गुरुतरत्वात् प्राधान्यख्यापनार्थं पुनरुपादानम्, ततश्चायमर्थः—गन्धग्रहणेनाधाकर्म १ [3]औद्देशिकत्रिकं २ पूतिकर्म ३ [4]मिश्रजातं ४ बादरप्राभृतिका ५ [5]अध्यवपूरकश्च ६ एते षडुद्गमदोषा अविशुद्धकोट्यन्तर्गता गृहीताः, शेषास्तु विशुद्धकोट्यन्तर्भूता आमग्रहणेनोपात्ता द्रष्टव्या इति ।

सर्वशब्दस्य [6]च प्रकारकात्स्न्याभिधायकत्वाद् येन केनचित् प्रकारेण आमम् अपरिशुद्धं [7]पूति वा भवति तत् सर्वं ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया **निराम-गन्धः** निर्गतावाम-गन्धौ यस्मात् स तथा, **परिव्रजेत्** मोक्षमार्गे ज्ञान-दर्शन-चारित्राख्ये [8]परि समन्ताद् गच्छेत्, संयमानुष्ठानं सम्यगनुपालयेदिति यावत्। आमग्रहणेन प्रतिषिद्धेऽपि क्रीतकृते तथाप्यल्पसत्त्वानां विशुद्धकोट्यालम्बनतया मा भूत् तत्र प्रवृत्तिरतस्तदेव नामग्राहं [9]प्रतिषिषेधिषुराह—

**अदिस्स** इत्यादि । क्रयश्च विक्रयश्च क्रय-विक्रयौ तयोरदृश्यमानः । कीदृक्षश्च तयोरदृश्यमानो भवति ? [10]यस्तयोर्निमित्तभूतद्रव्याभावाद् अकिञ्चनः । अथवा क्रयविक्रययोः अदिश्यमानः अनपदिश्यमानः । कश्च तयोरनपदिश्यमानो भवति ? यः [11]क्रीतकृतापरिभोगी भवतीति । [12]आह—

**से ण किणे** इत्यादि । स मुमुक्षुरकिञ्चनो धर्मोपकरणमपि न क्रीणीयात् स्वतः, नाप्यपरेण क्रापयेत्, क्रीणन्तमपि न समनुजानीयात् । अथवा निरामगन्धः [13]परिव्रजेदित्यत्रामग्रहणेन हननकोटित्रिकम्, गन्धग्रहणेन पचनकोटित्रिकम्,

---

१. **पूति गृह्यते** ग । २. **गुरुत्वात्** ख । ३. **उद्देशकत्रिक** २ क, **उद्देशिक** २ ख, **उद्देशिकत्रिकं** २ ग च । ४. **मिश्रजातत्रिकं** ४ ग । ५. **अध्यवपूरकाश्चेति** ६ क, **अध्यवपूरकाश्चैते** ६ च । ६. **च** इति ख प्रतौ न । ७. **पूतिर्वा** क । ८. **परिः** घ ङ । ९. ***प्रतिषिषेधयिषुराह*** च । १०. ***यतस्तयो०*** च । ११. ***क्रीतक्रियापरिभोगी*** ग ङ । १२. **आह च** घ च । १३. **०दित्यामग्रहणेन** ख ।

क्रय[१]त्रिकं तु[२] पुनः स्वरूपेणैवोपात्तम् । अतो नवकोटीपरि[३]शुद्धमाहारं विगताङ्गार-धूमं भुञ्जीत । एतद्गुणविशिष्ट[४]श्च किम्भूतो भवति ? इत्याह—

**से भिक्खू कालन्ने,** कालः कर्तव्यावसरस्तं जानातीति कालज्ञः विदितवेद्यः । तथा—**बा[५]लण्णे,** बलं जानातीति बलज्ञः । छान्दसत्वाद् दीर्घत्वम् । आत्मबलं सामर्थ्यं जानातीति य[६]थाशक्त्यनुष्ठानविधायी, अनिगूहित-बलवीर्य इत्यर्थः । त[७]था **मायन्ने,** यावद्द्रव्योपयोगिता मात्रा तां जानातीति तज्ज्ञः । तथा **खे[८]यन्ने,** खेदः अभ्यासस्तेन जानातीति खेदज्ञः । अथवा **खेदः** श्रमः संसारपर्यटनजनितस्तं जानातीति, उक्तं च—

**जरा-मरण-दौर्गत्य-व्याधयस्तावदासताम् ।**
**मन्ये जन्मैव धी[९]रस्य भूयो भूयस्त्रपाकरम् ॥** [ ] इत्यादि ।

अथवा **क्षेत्रज्ञः** संसक्त-विरुद्धद्रव्य-परिहार्यकुलादिक्षेत्रस्वरूपपरि-च्छेदकः । तथा—**खणयन्ने**, क्षण एव क्षणकः अवसरो भिक्षार्थमुपसर्पणादिकस्तं जानातीति । तथा **विणयन्ने,** विनयः ज्ञान-दर्शन-चा[१०]रित्रौपचारिकरूपस्तं जानातीति । तथा **समयन्ने,** स्व[११]समय-प[१२]रसमयौ जानातीति । स्वसमयज्ञो गोचरप्रदेशादौ पृष्टः सन् सुखेनै[१३]व भिक्षादोषानाचष्टे, तद्यथा—षोडशोद्गमदोषाः, ते चामी—आधाकर्म १ औ[१४]द्देशिकं २ पूतिकर्म ३ मिश्रजातं ४ स्थापना ५ प्राभृतिका ६ प्रकाशकरणं ७ क्रीतं ८ उद्यतकं ९ प[१५]रिवर्तितं १० अभ्याहृतं ११ उद्भिन्नं १२ मा[१६]लापहृतं १३ आच्छेद्यं १४ अनिसृष्टं १५ अध्यवपूरकश्चेति १६ । षोडशो[१७]त्पादनदोषाः, ते चामी—धात्रीपिण्डः १ दू[१८]तीपिण्डः २ निमित्तपिण्डः ३ आ[१९]जीवपिण्डः ४ व[२०]नीपकपिण्डः ५ चिकित्सापिण्डः ६ क्रोधपिण्डः ७

---

१. **क्रयणकोटित्रिकं** च । २. **तु पुनः** इति खआदर्शे नास्ति । ३. **०परिशुद्धाहारं** ग । ४. **०विशिष्टस्तु** क ग । ५. **बलण्णे** ख, **बालज्ञो बलं** च । ६. **यथाशक्त्यानुष्ठान०** ख च । ७. **तथा** इति कप्रतौ न । ८. **खेदन्ने** ख । ९. **वीरस्य** ख च । १०. **०चारित्ररूपस्तं** क । ११. **स्वसमयं जानातीति स्वसमयज्ञो गोचर०** च । १२. **०परसमयान्** क ग घ ङ । १३. **०व जानाति भिक्षा०** ख । १४. **उद्देशिकं** घ-ङ प्रती विना । १५. **परिवर्ति १० आभ्याहृतं ११** ग । १६. **मालाहृतं** ख च, **मालाभ्यहृतं** ग । १७. **०त्पादनादोषाः** च । १८. **द्यूतीपिण्डः** क ङ **दूतिपिण्डः** ख च । १९. **आजीविनपिण्डः** ग । २०. **वनीमकपिण्डः** ख च ।

मानपिण्डः ८ मायापिण्डः ९ लोभपिण्डः १० पूर्वसंस्तवपिण्डः ११ पश्चात्संस्तवपिण्डः १२ विद्यापिण्डः १३ मन्त्रपिण्डः १४ चूर्णयोगपिण्डः १५ मूलकर्मपिण्डश्चेति १६ । तथा दशैषणादोषाः, ते चामी—शङ्कित १-म्रक्षित २-निक्षिप्त ३-पिहित ४-संहृत ५-दायक ६-उन्मिश्रा ७-ऽपरिणत ८-लिप्त ९-उज्झित १० दोषाः । एषां चोद्गमदोषा दातृकृता एव भवन्ति, उत्पादनादोषास्तु साधुजनिताः, एषणादोषाश्चोभयोत्पादिता[1] इति । तथा परसमयज्ञो ग्रीष्ममध्याह्नतीव्र[2]-तरतरणिकरनिकरावलीढगलत्स्वेदबिन्दुक[3]क्लिन्नवपुष्कः साधुः केनचिद् धिग्जातिदेश्येनाभिहितः—किमिति भवतां सर्वजनाचीर्णं स्नानं न सम्मतमिति ? स आह—प्रायः सर्वेषामेव यतीनां कामाङ्गत्वाद् जलस्नानं प्रतिषिद्धम्, तथा[4] चार्षम्—

**स्नानं मद-दर्पकरं कामाङ्गं प्रथमं स्मृतम् ।**
**तस्मात् कामं परित्यज्य नैव स्नान्ति दमे रताः ॥** [ ] इत्यादि ।

तदेवमुभयज्ञस्तद्विषये प्रश्ने उत्तरदानाऽनाकुलो[5] भवति । तथा **भावन्ने,** भावः चित्ताभिप्रायो दातुः श्रोतुर्वा, तं जानातीति भावज्ञः । किञ्च—**परिग्गहं अममायमीणे**[6], परिगृह्यत इति परिग्रहः संयमातिरिक्तमुपकरणादि[7], तम् अममीकुर्वन् अस्वीकुर्वन् मनसाऽप्यनाददान[8] इति यावत् । स एवंविधो भिक्षुः कालज्ञो बलज्ञो मात्राज्ञः[9] खेदज्ञः[10] क्षणकज्ञो[11] विनयज्ञः समयज्ञो भावज्ञः परिग्रहममीकुर्वाणश्च किम्भूतो भवतीत्याह—**काले अणुट्ठाई**[12], यद् यस्मिन् काले कर्तव्यं तत् तस्मिन्नेवानुष्ठातुं शीलमस्येति कालानुष्ठायी, कालानतिपात-कर्तव्योद्यतः । ननु चास्यार्थस्य **से भिक्खू कालन्ने** इत्यनेनैव गतार्थत्वात्

---

१. ०षाश्चोभयापादिता ख च । २. ०तीव्रतरणि० ग घ, ०तीव्रतरतरणिकरावलीढ० ङ। ३. ०बिन्दुकः क्लिन्न० ख-घपुस्तके ऋते । ४. तथा चोक्तम् ग, तथा चार्षम् इति चप्रतौ न विद्यते । ५. प्रश्ने उत्तरदानाकुलो क, प्रश्ने उत्तरप्रदानकुशलो ख, प्रश्नोत्तरदानाऽनाकुलो ग, प्रश्ने उत्तरदानकुशलो च । ६. अममायमीणो ग, अममायमाणे च । ७. संयमाति-रिक्तमु( रिक्तो? )पकरणादिस्तम् क ग च । ८. मनसाऽनाददान ग । ९. मात्रज्ञः क-खपुस्तके विना । १०. क्षेत्रज्ञः च । ११. क्षणज्ञो घ-ङप्रती ऋते । १२. काले णुट्ठाई ख च, काले अणुट्ठायी ग, कालो( लेऽ )णुट्ठाई घ, कालाणुट्ठाई ङ ।

[1]किमर्थं पुनरभिधीयते इति ? नैष दोषः, तत्र हि ज्ञपरिज्ञैव केवलाऽभिहिता, कर्तव्यकालं जानाति, इह पुनरासेवनापरि[2]ज्ञा, कर्तव्यकाले कार्यं विधत्त इति । किञ्च–

[3]**अपडिन्ने**, नास्य प्रतिज्ञा विद्यते इत्यप्रतिज्ञः, प्रतिज्ञा च कषायोदयादाविरस्ति, तद्यथा–क्रोधोदयात् [4]**स्कन्दकाचार्येण** स्वशिष्ययन्त्र[5]पीलनव्यतिकरमालोक्य सबल-वाहन-राजधानीसमन्वितपुरोहितोपरि विनाश[6]प्रतिज्ञाऽकारि, तथा मानोदयाद् **बाहुबलि**ना प्रतिज्ञा व्यधायि यथा–कथमहं शिशून् स्वभ्रातृनुत्पन्ननिरावरणज्ञानांश्छद्मस्थः सन् द्रक्ष्यामि ? इति, तथा मायोदयाद् [7]**मल्लिस्वामि**जीवेन [8]यथाऽपरयतिविप्रलम्भनं भवति तथा प्रत्याख्या[9]नपरिज्ञा जगृहे, तथा लोभोदयाच्चाविदितपरमार्थाः साम्प्रतेक्षिणो यत्याभासा मासक्षपणादिका अपि प्रतिज्ञाः [10]कुर्वन्ति । अथवा अप्रतिज्ञः अनिदानो **वसुदेव**वत् संयमानुष्ठा[11]नं कुर्वन् निदानं न [12]करोतीति । अथवा गोचरादौ प्रविष्टः सन्नाहारादिकं [13]ममैतद्भविष्यतीत्येवं प्रतिज्ञां न करोतीत्यप्रतिज्ञः । यदि वा स्याद्वादप्रधानत्वाद् मौनीन्द्रागमस्यैकपक्षावधारणं [14]च प्रति[15]ज्ञा तद्रहितोऽप्रतिज्ञः, तथाहि–मैथुनविषयं विहायान्य[16]त्र न क्वचिन्नियमवती प्रतिज्ञा विधेया, यत उक्तम्–

**न य किंचि अणुण्णायं पडिसिद्धं वा वि जिणवरिंदेहिं ।**
**मोत्तुं मेहुणभावं [17]न तं विणा राग-दोसेहिं ॥**
**दोसा जेण [18]निरुब्भंति जेण [19]झिज्जंति पुव्वकम्माइं ।**
**सो सो [20]मोक्खोवाओ रोगावत्थासु समणं व ॥**

---

१. किमयं पुन० ख । २. ०ज्ञा काले कार्यं घ ङ । ३. अप्पडिन्ने क ङ । ४. स्कन्दाचार्येण ख । ५. ०पीडनमवलोक्य ख, ०पीडनव्यतिकरमवलोक्य च । ६. ०प्रतिज्ञाभ्यधायि ख । ७. मल्लिस्वामिनाऽभ्यधायि यथाऽपरजनविप्र० ख । ८. यथा परयति० ग ङ च । ९. ०नप्रतिज्ञा घ ङ । १०. कुर्वते कआदर्शं विना । ११. ०नं करोतीति ग । १२. करोति । ङ । १३. ममैवेतद्भ० ङ च । १४. च इति चप्रतौ न । १५. ०ज्ञा तस्मात् तद्रहितो० ख, ०ज्ञा तस्माद्रहितो० ग । १६. ०त्र क्वचिन्नियमवती प्रतिज्ञा न विधेया घ । १७. न विणा तं राग० च । १८. निरुंभंति क, निरूभंते ग, निरुज्झंति ङ निरज्जंति च । १९. सिज्झंति क । २०. मुक्खो० घ ।

**जे जेत्तिया[1] उ[2] हेऊ भवस्स ते चेव[3] तत्तिया[4] मोक्खे[5] ।**
**गणणाईया[6] लोया दोण्ह[7] वि पुण्णा भवे तुल्ला ॥** [ ] इत्यादि ।

**अयंसंधी**त्यारभ्य **काले[8] अणुट्ठाइ** त्ति यावदेतेभ्यः सूत्रेभ्य एकादशभ्यः पिण्डैषणा निर्यूढा[9] इति[10] ।

एवं तर्ह्यप्रतिज्ञ इत्यनेन सूत्रेणेदमापन्नम्—न क्वचित् केनचित् प्रतिज्ञा विधेया, प्रतिपादिताश्च**आगमे** नानाविधा अभिग्रहविशेषाः, ततश्च पूर्वोत्तरव्याहतिरिव[11] लक्ष्यत इत्यत[12] आह—

**दुहओ[13] छेत्ता णियाइ[14],** द्विधा इति रागेण द्वेषेण वा या प्रतिज्ञा तां छित्त्वा निश्चयेन नियतं वा याति नियाति ज्ञान-दर्शन-चारित्राख्ये मोक्षमार्गे संयमानुष्ठाने वा भिक्षाद्यर्थं वा, एतदुक्तं भवति—राग-द्वेषौ च्छित्त्वा प्रतिज्ञा गुणवती, व्यत्यये व्यत्यय इति । स एवम्भूतो भिक्षुः कालज्ञो बलज्ञो यावद् द्विधा छिन्दन्[15] किं कुर्यात् ? इत्याह—

**वत्थं पडिग्गहं[16]** इत्यादि यावत् **एएसु चेव जाणिज्जा** । एतेषु पुत्राद्यर्थमारम्भप्रवृत्तेषु सन्निधिसन्निचयकरणोद्यतेषु जानीयात् शुद्धा-ऽशुद्धतया परिच्छिन्द्यात् । परिच्छेदश्चैवमात्मकः—शुद्धं गृह्णीयादशुद्धं परिहरेदिति यावत् । किं तज्जानीयात्[17] ?—**वस्त्रम्,** वस्त्रग्रहणेन वस्त्रैषणा सूचिता । तथा **पतद्ग्रहं** पात्रम्, एतद्ग्रहणेन च पात्रैषणा सूचिता । **कम्बल**मित्यनेना[18]ऽऽविकः पात्रनिर्योगः[19] कल्पश्च गृह्यते । **पादपुञ्छनक**मित्यनेन च रजोहरणमिति । एभिश्च सूत्रै-रोघोपधिरौपग्रहिकश्च सूचितः । तथैतेभ्य एव वस्त्रैषणा पात्रैषणा च निर्यूढा[20] । तथा अवगृह्यत इत्यवग्रहः, स च पञ्चधा—देवेन्द्रावग्रहः राजावग्रहः गृहपत्यवग्रहः

---

१. **जत्तिया** घ ङ च । २. **य** ख । ३. **चेय** क, **च्चेय** च । ४. **तेत्तिया** घ, **तित्तिया** ङ । ५. **मुक्खे** घ । ६. **गणणातीता** ख च । ७. **दुण्ह** घ ङ । ८. **काले णुट्ठाइ त्ति** ख च । ९. "**निर्यूढा** इति द्वितीयस्कन्धे प्रथमाध्ययने उद्देशरूपा (पाः)" जैं०वि०प० । १०. **इति** इति खपुस्तके नास्ति । ११. **०व्याहतिरिव** ख । १२. **इत्याह** ग । १३. **दुहउ च्छित्ता** ग, **दुहओ छित्ता** घ ङ च । १४. *णिआदि* ख, *णियाति* च । १५. **च्छित्त्वा** [ *णियान्?* ] **किं** क । १६. **पडिग्गहमित्यादि** ग घ ङ । १७. **तद्विजानीयात् ?** ख-चआदर्शा ऋते । १८. **०नाधिकः** चपुस्तकमृते । १९. **०निर्यागः** ग । २०. **निर्व्यूढा** च ।

शय्यातरावग्रहः साधर्मिकावग्रहश्चेति । अनेन[1] चावग्रह[2]प्रतिमाः सर्वाः सूचिताः । अत एवासौ निर्यूढा, अवग्रहकल्पिकश्चास्मिन्नेव सूत्रे कल्पते[3] । तथा **कटासनम्, कट**ग्रहणेन संस्तारो[4] गृह्यते, **आसन**ग्रहणेन चासन्दकादि विष्टरमिति, आस्यते स्थीयतेऽस्मिन्निति आसनं[5] शय्या, ततश्चासन[6]ग्रहणेन शय्या सूचिता, अत एवासौ निर्यूढेति । एतानि च सर्वाण्यपि[7] वस्त्रादीन्याहारादीनि चैतेषु स्वारम्भप्रवृत्तेषु गृहस्थेषु जानीयात्, सर्वामगन्धं परिज्ञाय निरामगन्धो यथा भवसि[8] तथा परिव्रजेरिति भावार्थः । एतेषु च[9] स्वारम्भप्रवृत्तेषु[10] गृहस्थेषु परिव्रजन् यावल्लाभं गृह्णीयाद् उत कश्चिन्नियमोऽप्यस्ति[11] ? अस्तीत्याह–

**लद्धे** इत्यादि । **लब्धे** प्राप्ते सत्याहारे, आहारग्रहणं चोपलक्षणार्थम्, अन्यस्मिन्नपि वस्त्रौषधादिके अनगारः भिक्षुः मात्रां जानीयात्, यावन्मात्रेण गृहीतेन गृहस्थः पुनरारम्भे न प्रवर्तते यावन्मात्रेण चात्मनो विवक्षितकार्यनिष्पत्तिर्भवति तथाभूतां मात्रामवगच्छेदिति भावः । एतच्च स्वमनीषिकया नोच्यत इत्यह आह–

**से जहेय**[12]मित्यादि । **तद्यथा इद**मुद्देशकादेरार[13]भ्यानन्तरसूत्रं यावद् भगवता ऐश्वर्यादिगुणसमन्विते**नार्द्धमागध**या भाषया[14] सर्वस्वभाषानुगतया सदेव-मनुजायां परिषदि[15] केवलज्ञानचक्षुषाऽवलोक्य **प्रवेदितं** प्रतिपादितं **सुधर्मस्वामी जम्बूस्वामि**ने इदम[16]चाष्टे । किञ्चान्यत्–

**लाभो त्ति** इत्यादि । 'लाभो वस्त्रा-ऽऽहारादेर्मम संवृत्तः[17], अहोऽहं लब्धिमान्' इत्येवं मदं न विदध्यात् । न च तदभावे शोकाभिभूतो विमनस्को भूयादिति, आह च[18]–

**अलाभो त्ति** इत्यादि । अलाभे सति शोकं न कुर्यात् । कथम् ? धिग्

---

१. **अनेनावग्रह०** ख च । २. "[ **अवग्रहप्रति?** ]**मा** इति अवग्रहविशेषाः" जै०त्रि०प० । ३. **क्रियते** ख ग च । ४. **संस्तारको** ग च । ५. **वाऽऽसनं** कप्रतेर्विना । ६. **तत आसन०** ख-चपुस्तके ऋते । ७. **समस्तान्यपि** ख च । ८. **भवति तथा परिव्रजेदिति** ख ग । ९. **च आरम्भ०** च । १०. **०प्रकृतेषु** क । ११. **०प्यस्ति ? इत्याह** ख ग च । १२. **जहेयं इत्यादि** ख च । १३. **०भ्यानन्तरं सूत्रं** क । १४. **०या स्वभाषा०** ख । १५. **पर्षदि** ख च । १६. **इदमाह।** ख । १७. **संवृत्त इत्यतोऽहं लब्धि०** ख च, **संवृत्त इत्यतोऽहोऽहं लब्धिमान् इत्येवं न मदं विद०** ग । १८. **च** इति ख-ग-चप्रतिषु न ।

माम्, मन्दभाग्योऽहं येन सर्वदानोद्यतादपि दातुर्न लभे[1]ऽहमिति । अपि तु तयोर्लाभा-ऽलाभयोर्माध्यस्थ्यं भावनीयमिति, उक्तं च—

**लभ्यते लभ्यते साधुः[2] साधुरेव न लभ्यते ।**
**अलब्धे[3] तपसो वृद्धिर्लब्धे[4] तु प्राणधारणम् ॥** [ ] इत्यादि ।

तदेवं पिण्ड-पात्र-वस्त्राणामेषणाः प्रतिपादिताः । साम्प्रतं सन्निधिप्रतिषेधं कुर्वन्नाह—

**बहुं[5] पि** इत्यादि । बह्वपि लब्ध्वा **न निहे[6]** त्ति न स्थापयेत्, न सन्निधिं कुर्यात्, स्तोकं तावन्न सन्निधीयत[7] एव[8], बह्वपि न सन्निदध्यादि[9]त्यपिशब्दार्थः । न केवलमाहारसन्निधिं न कुर्यात्, अपरमपि वस्त्र-पात्रादिकं संयमोपकरणातिरिक्तं न बिभृयादिति । आह—

**परी**त्यादि । परिगृह्यत इति परिग्रहः धर्मोपकरणातिरिक्तमुपकरणं तस्मादात्मानम् अपष्वष्केत्[10] अपसर्पयेत् । अथवा संयमोपकरणमपि मूर्च्छया परिग्रहो भवति, **मुच्छा[11] परिग्गहो वुत्तो** [ ] इति वचनात् । तत आत्मानं परिग्रहादपसर्पयन्नुपकरणे तुरगवद् मूर्च्छां न कुर्यात् ।

ननु च[12] यः कश्चिद्धर्मोपकरणाद्यपि परिग्रहो न स चित्तकालुष्यमृते भवति, तथाहि—आत्मीयोपकारिणि रागः, उपघातकारिणि च द्वेषः, ततः परिग्रहे सति राग-द्वेषौ निर्दिष्टौ[13], ताभ्यां च कर्मबन्धः, ततः[14] कथं परिग्रहो धर्मोपकरणम् ? उक्तं च—

**ममाहमिति चैष यावदभिमानदाहज्वरः,**
**कृतान्तमुखमेव तावदिति न प्रशान्त्युन्नयः ।**
**यशः-सुखपिपासितैरयमसावनर्थोत्तरैः,**
**परैरपशदः[15] कुतोऽपि कथमप्यपाकृष्यते ॥''** [ ]

---

१. **लभेयमिति** ख । २. **साधु साधु चैव न** घ ङ । ३. **अलाभे तपसो वृद्धिर्लाभे तु** ख । ४. **०ब्धे देहस्य धारणा** चूर्णौ । ५. **बहुं पीत्यादि** ख च । ६. **णिभे** च । ७. **सन्धीयत** क । ८. **०त इत्येव,** ख । ९. **सन्निधिं विदध्यादि०** क । १०. **अवशक्यात्** ख, **अपष्वष्कयेत्** ग । ११. **''मूर्छा च परिग्रहः'' इति व०** ख, **''मूर्छा परिग्रहः'' इति व०** ग घ ङ च । १२. **च** इति खप्रतौ न । १३. **नेदिष्ठौ** क खपुस्तके ऋते, **''नेदिष्ठौ निकटौ''** जै०वि०प० । १४. **तत् कथं** ख च, **ततः कथं न परिग्रहो** ग । १५. **०रपसदः** क गपुस्तके विना ।

नैष दोषः, न हि धर्मोपकरणे ममेदमिति[1] साधूनां परिग्रहाग्रहयोगोऽस्ति[2], तथा ह्यागमः—

**अवि अप्पणो[3] वि देहम्मि नायरंति ममाइउं ।** [ ]

यदिह परिगृहीतं कर्मबन्धायोपकल्पते[4] स परिग्रहः, यत् तु पुनः[5] कर्मनिर्जरणार्थं प्रभवति तत् परिग्रह एव न भवतीति । आह च[6]—

**अन्नहा णमित्यादि**[7] । ★[8]णमिति वाक्यालङ्कारे★ अन्यथा इत्यन्येन प्रकारेण पश्यकः सन् परिग्रहं परिहरेत् । यथा ह्यविदितपरमार्था गृहस्थाः सुखसाधनाय परिग्रहं पश्यन्ति न तथा साधुः, तथा ह्ययमस्याशयः—आचार्यसत्कमिदमुपकरणं न ममेति, राग-द्वेषमूलत्वात् परिग्रहाग्रहयोगोऽत्र निषेध्यः, न धर्मोपकरणम्, तेन विना संसारार्णवपारागमनादिति, उक्तं च—

**साध्यं यथा कथञ्चित् स्वल्पं कार्यं, महच्च न तथेति ।**
**प्लवनमृते न हि शक्यं पारं गन्तुं समुद्रस्य ॥** [ ]

अत्र चार्हताभासैर्बोटिकैः[9] सह महान् विवादोऽस्तीत्यतो विवक्षितमर्थं तीर्थकराभिप्रायेणापि[10] सिसाधयिषुराह—

**एस मग्गे**[11] इत्यादि । धर्मोपकरणं न परिग्रहायेति एषः[12] अनन्तरोक्तो मार्गः आराद्याताः सर्वहेयधर्मेभ्य इत्यार्याः तीर्थकृतस्तैः **प्रवेदितः** कथितः, न तु यथा बोटिकैः कुण्डिका तट्टिका[13] लम्बणिका अश्ववालधिवालादि स्वरुचिविरचितो मार्ग इति, न वा यथा **मौद्गलि-स्वातिपुत्राभ्यां शौद्धोदनिं** ध्वजीकृत्य प्रकाशितः, इत्यनया दिशाऽन्येऽपि परिहार्या इति[14] । इह तु स्वशास्त्रगौरवमुत्पादयितुमार्यैः प्रवेदित इत्युक्तम् । अस्मिंश्चार्यप्रवेदिते[15] मार्गे प्रयत्नवता भाव्यमिति । आह च[16]—

---

१. **०मित्येवं साधूनां** ख च । २. **परिग्रहयोगो०** ङ । ३. **यप्पणो** च । ४. **०योपकल्प्यते** ग च । ५. **यस्तु पुनः** क घ, **यत् पुनः** ग । ६. **च** इति गपुस्तके नास्ति । ७. **अण्णहा णं इत्यादि** ख च । ८. ★★एतच्चिह्नान्तर्वर्ती पाठः खपुस्तके न वर्तते । ९. **०बोटिकाभासैः सह** ख । १०. **तीर्थङ्करा०** ख ङ । ११. **मग्ग** खप्रतिमृते । १२. **एषः** इति क चप्रत्योर्नास्ति । १३. "**तड्डि( ट्टि )का** इति तलगटी, **लम्बनिका** इति पर्यिछि । त्रिगव्यम्[?], **अश्ववालधिवालादिः** इति काष्ठसिंगी" जै०चि०प० । १४. **इति** इति खप्रतौ न । १५. **०प्रवेदितमार्गे** ख । १६. **च** इति चपुस्तके नास्ति ।

**जहेत्थे**त्यादि । लब्ध्वा कर्मभूमिं मोक्षपादपबीजभूतां च बोधिं सर्वसंवरचारित्रं च प्राप्य तथा विधेयं यथा **कुशलः** विदितवेद्यः अत्र अस्मिन्नार्यप्रवेदिते मार्गे आत्मानं पापेन कर्मणा नोपलिम्पयेदिति । एवं चोपलिम्पनं भवति यदि यथोक्तानुष्ठानविधायित्वं न भवति, सतां चायं पन्था यदुत यत् [१]स्वयं प्रतिज्ञातं तद् अन्त्योच्छ्वासं यावद्विधेयमिति, उक्तं च–

**लज्जां गुणौघजननीं जननीमिवार्यामत्यन्तशुद्धहृदयामनुवर्तमानाः ।**
**तेजस्विनः सुखमसूनपि सन्त्यजन्ति, सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ॥** [ ]

**इति**शब्दः अधिकारसमाप्त्यर्थः । **ब्रवीमि** इति, [२]सोऽहं ब्रवीमि येन मया भगवत्पादारविन्दमुपासताऽश्रावीति । परिग्रहादात्मानमपसर्पयेदित्युक्तम्, तच्च न निदानोच्छेदमन्तरेण, निदानं च शब्दादिपञ्चगुणानुगामिनः कामाः, तेषां चोच्छेदोऽसुकरः । यत आह–

**कामा** इत्यादि । कामा [३]द्विविधाः–इच्छाकामा मदनकामाश्च । तत्रेच्छाकामा [४]मोहनीयभेदहास्य-रत्युद्भवाः, मदनकामा अपि मोहनीयभेदवेदोदयात् प्रादुष्यन्ति । ततश्च द्विरूपाणामपि कामानां मोहनीयं कारणम्, तत्सद्भावे [५]च न कामोच्छेद इत्यतो दुःखेनातिक्रमः अतिलङ्घनं विनाशो येषां ते तथा । ततश्चेदमुक्तं भवति– न तत्र प्रमादवता भाव्यम् । न केवलमत्र, जीविते[६]ऽपि न प्रमादवता भाव्यमिति, आह [७]च–

**जीविय**मित्यादि । **जीवितम्** आयुष्कं तत् क्षीणं सत् [८]**दुष्प्रतिबृंहणीयं** दुः अभावार्थे, नैव वृद्धिं नीयते [९]इति यावत् । अथवा जीवितं संयमजीवितम्, तत् दुष्प्रतिबृंहणीयं कामानुषक्तजनान्तर्वर्तिना [१०]दुःखेन वृद्धिं नीयते, दुःखेन निष्प्रत्यूहः संय[११]मः प्रतिपाल्यत इति, उक्तं च–

---

१. **स्वतः** ख । २. **सोऽहं ब्रवीमि** इति पाठो ग-चप्रत्योर्नास्ति । ३. **द्विधा** च । ४. **मोहनीयहास्य०** ख । ५. **च** इति खपुस्तके न । ६. **०पि प्रमादवता न भवितव्यमिति** ख । ७. **च** इति ङप्रतौ नास्ति । ८. **दुःखं प्रतिबृंहणीयं** ग । ९. **इति यावत्** इति पाठः कआदर्शे न वर्तते । १०. **दुःखेन निष्प्रत्यूहः** ग च । ११. **०मः पाल्यत** ख, **०मः प्रतिपाल्य इति** च ।

आगासे [१]गंगसोउ व्व, पडिसोउ व्व दुत्तरो ।
बाहाहिं [२]चेव गंभीरो, तरिअव्वो महोयही ॥
वालुगाकवलो [३]चेव, [४]निरासाए हु संजमे ।
जवा लोहमया चेव, चावेयव्वा सुदुक्करं ॥ [ ] इत्यादि

[५]येन चाभिप्रायेण कामा [६]दुरतिक्रमा इति [७]प्रागभ्यधायि तमभिप्रायमाविष्कुर्वन्नाह—**कामकामी**त्यादि । कामान् कामयितुम् अभिलषितुं शीलमस्येति **कामकामी**, **खलुः** वाक्यालङ्कारे, **अयम्** इत्यध्यक्षः [८]**पुरुषः** जन्तुः । यस्त्वेवं[९]विधोऽविरतचेताः कामकामी स नानाविधान् शारीर-मानसान् दुःखविशेषाननुभवतीति दर्शयति—

**से** [१०]**सोयई**त्यादि । **स** इति कामकामी [११]ईप्सितस्यार्थस्याप्राप्तौ तद्वियोगे [१२]वा स्मृत्यनुषङ्गः [१३]शोकस्तमनुभवति । अथवा शोचते इति काममहाज्वरगृहीतः सन् [१४]प्रलपतीति, उक्तं च—

गते प्रेमाबन्धे प्रणयबहुमाने च गलिते,
निवृत्ते सद्भावे जन इव जने गच्छति [१५]पुरः ।
तमुत्प्रेक्ष्योत्प्रेक्ष्य प्रियसखि ! गतांस्तांश्च दिवसान्,
न जाने को हेतुर्दलति शतधा यन्न हृदयम् ? ॥ [ ]

[१६]इत्यादि शोचते । तथा—**जूरइ** त्ति हृदयेन खिद्यते, तद्यथा—

प्रथमतरमथेदं चिन्तनीयं तवासीद्,
बहुजनदयितेन प्रेम कृत्वा जनेन ।
[१७]हतहृदय ! निराश ! क्लीब ! सन्तप्यसे किं ?,
न हि जड ! गततोये सेतुबन्धाः क्रियन्ते ॥ [ ]

इत्येवमादि । तथा—

---

१. गंगासोउ क, गंगसोय ख । २. चेय क । ३. चेवा, णिरस्सातो हु संजमो चूर्णौ । ४. निरस्साए उ सं० ख, निरासाए सुसं० ङ । ५. येन च कारणेन कामा क । ६. दुरभिक्रमा ग । ७. प्रागेवाभ्यधायि ख । ८. पुरुष इति जन्तुः ख । ९. ०विधाविरतचेताः ख । १०. सोयमित्यादि ख च । ११. ईप्सितार्थस्या० ख । १२. च ङ । १३. शोकः, शोचते इति ग । १४. प्रलपति ख । १५. तिरः ग । १६. इत्येवमादि ख । १७. हतहृदय ! च ।

[1]**तिप्पइ** त्ति तिपृ तेपृ क्षरणार्थौ, [पा०धा० ३६२-३६३] तेपते क्षरति सञ्चलति मर्यादातो [2]भ्रश्यति निर्मर्यादो भवतीति यावत् । तथा शारीर-मानसैर्दुखैः पीड्यते । तथा

[3]**परि** समन्ताद् बहिरन्तश्च **तप्यते परितप्यते** पश्चात्तापं[4] करोति, [5]यथेष्टपुत्र-कलत्रादौ कोपात् क्वचिद् गते 'स मया नानुवर्तितः' इति परितप्यते [6]इति । सर्वाणि चैतानि शोचनादीनि विषयविषावष्टब्धान्तःकरणानां दुःखावस्था-संसूचकानि ।

अथवा शोचत इति यौवन-धन-मद-मोहाभिभूतमानसो विरुद्धानि निषेव्य पुनर्वयःपरिणमेन मृत्युकालोपस्थानेन वा मोहापगमे सति किं मया मन्दभाग्येन पूर्वमशेषशिष्टाचीर्णः सुगति[7]गमनैकहेतुर्दुर्गतिद्वारपरिघो धर्मो नाचीर्णः ? इत्येवं शोचत इति, उक्तं च—

**[8]भवित्री भूतानां परिणतिमनालोच्य नियतां,**
**पुरा यद् यत् किञ्चिद्विहितमशुभं यौवनमदात् ।**
**पुनः प्रत्यासन्ने महति परलोकैकगमने,**
**तदेवैकं पुंसां व्यथयति जराजीर्णवपुषाम् ॥** [ ]

तथा **जूरती**त्यादीन्यपि स्वबुद्ध्या योजनीयानि, उक्तं च—

**सगुणमपगुणं वा कुर्वता कार्यजातं,**
**परिणतिरवधार्या यत्नतः पण्डितेन ।**
**अतिरभसकृतानां कर्मणामा विपत्तेर्भवति,**
**हृदयदाही शल्यतुल्यो विपाकः ॥** [ ] इत्यादि ।

कः [9]पुनरेवं न शोचते ? इत्याह—

---

१. "**तप्पति** त्ति काय-वाय-मणेहि त्ति तिहि तप्पति" चूर्णौ । २. **भ्रश्यते** क ग च । ३. **परिः** क-गप्रती विना । ४. **०पं वा करोति** कपुस्तकमृते। ५. **यथेष्टे पुत्र०** घ ङ च । ६. **इति** इति खप्रतावेव । ७. **०गमनहेतुर्दुर्गतिमार्गो( र्ग? )परिघो** ख । ८. **भवित्री भावानां** घ ङ च । ९. *पुनरित्येवं* क ग ।

**[ सू०९१ ] आयतचक्खू लोगविपस्सी लोगस्स अहेभागं जाणति, उड्ढं भागं जाणति, तिरियं भागं जाणति, गढिए अणुपरियट्टमाणे ।**

**संधिं विदित्ता इह मच्चिएहिं,**

**एस वीरे पसंसिते जे बद्धे पडिमोयए ।**

**[ सू०९२ ] जहा अंतो तहा बाहिं, जहा बाहिं तहा अंतो ।**

**अंतो अंतो पूति-देहंतराणि पासति पुढो वि सवंताइं । पंडिते पडिलेहाए ।**

**से मतिमं परिण्णाय मा य हु लालं पच्चासी । मा तेसु तिरिच्छमप्पाणमावातए ।**

**आयतचक्खू**, आयतं दीर्घमैहिका-ऽऽमुष्मिकापायदर्शि चक्षुः ज्ञानं यस्य स[1] आयतचक्षुः । कः पुनरित्येवम्भूतो[2] भवति ? यः कामानेकान्तेनाऽनर्थभूयिष्ठान्[3] परित्यज्य शमसुखमनुभवति । किञ्च—

**लोगवियस्सी**[4], लोकं विषयानुषङ्गावेशाप्तदुःखातिशयं तथा त्यक्तकामावाप्तप्रशमसुखं विविधं द्रष्टुं शीलमस्येति लोकविदर्शी । अथवा लोकस्य ऊर्द्धा-ऽध-स्तिर्यग्भागगतिकारणायुष्क-सुख-दुःखविशेषान्[5] पश्यतीति । एतद् दर्शयति—

**लोगस्से**त्यादि[6] । लोकस्य धर्मा-ऽधर्मास्तिकायावच्छिन्नाकाशखण्डस्याधोभागं जानातीति स्वरूपतोऽवगच्छति, इदमुक्तं भवति—येन कर्मणा तत्रोत्पद्यन्तेऽसुमन्तः यादृक्[7] च तत्र सुख-दुःखविपाको भवति[8] तं जानाति,

---

१. **स भवति आयत०** ख । २. **पुनश्चैवम्भूतो** ख, **पुनरेवम्भूतो** ङ । ३. **०नार्थभूयिष्ठान्** ख । ४. **लोगविपस्सी** कप्रतिं विना । ५. **ऊर्ध्वा०** ख घ ङ । ६. **लोगस्स इत्यादि** ख । ७. **यादृक्षः तत्र** क, **यादृक् तत्र** ग च । ८. **भवतीति संजानाति** ग, **भवतीति जानाति** घ ङ ।

[1]एवमूर्द्ध-तिर्यग्भागयोरपि वाच्यम् । यदिवा लोकविदर्शी इति कामार्थमर्थोपार्जनप्रसक्तं गृद्धमध्युपपन्नं लोकं पश्यतीति । एतदेव दर्शयितुमाह—

[2]**गढिए** इत्यादि । अयं हि लोको गृद्धः अध्युपपन्नः कामानुषङ्गे तदुपाये वा तत्रैवानुपरिवर्तमानो भूयो भूयस्तदेवाऽऽचरंस्तज्जनितेन वा कर्मणा [3]संसारचक्रे अनुपरिवर्तमानः पर्यटन् आयतचक्षुषो गोचरीभवन् कामाभिलाषनिवर्तना[4]य प्रभवति । यदि वा कामगृद्धान् संसारेऽनुपरिवर्तमानानसुमतः पश्य इत्येवमुपदेशः । अपि च—

[5]**संधी**त्यादि । इह मर्त्येषु मनुजेषु यो ज्ञानादिको भावसन्धिः, स च मर्त्येष्वेव सम्पूर्णो भवतीति मर्त्यग्रहणम्, अतस्तं विदित्वा यो विषय-कषायादीन् परित्यजति स एव वीर इति दर्शयति—

[6]**एस** इत्यादि । एषः अनन्तरोक्तः आयतचक्षुर्यथावस्थित[7]लोकविभागस्वभावदर्शी भावसन्धेर्वेत्ता परि[8]त्यक्तविषयतर्षो **वीरः** कर्मविदारणात् **प्रशंसितः** स्तुतः विदिततत्त्वैरिति । स एवम्भूतः किमपरं करोति ? इति [9]चेद् इत्याह—

**जे बद्धे** इत्यादि । यो बद्धान् द्रव्य-भाव[10]बन्धनेन स्वतो विमुक्तो अपरानपि [11]मोचयतीति । एतदेव द्रव्य-भावबन्धन[12]विमोक्षं वाचोयुक्त्याऽऽचष्टे—

[13]**जहा अंतो तहा** [14]**बाहि**मित्यादि । यथाऽन्तर्भावबन्धनमष्ट[15]प्रकारं [16]कर्मनिगडनं मोचयति एवं पुत्र-कलत्रादि बाह्यमपि । यथा [17]वा [18]बाह्यं बन्धुबन्धनं मोचयति एवं मोक्षगमनविघ्नकारणमान्तरमपीति । यदि वा कथमसौ मोचयति ?

---

१. **एवमूर्ध्व०** ग घ ङ । २. **गडिए** क । ३. **संसारचक्रवाले अनु०** ख । ४. **०य न प्रभवति ? यदि** ग । ५. **संधित्यादि** ख, **संधिं इत्यादि** घ ङ **संधी इत्यादि** च । ६. **एस एव इत्यादि** क । ७. **०लोकस्वभावविभागदर्शी** च । ८. **०त्यक्तभोगतर्षो** ख । ९. **चेद्** इति घ-ङप्रत्योर्नास्ति । १०. **०बन्धनतः स्वतो** ख । ११. **मोचयति** । ख । १२. **०विमोक्षणं वाचो** ग । १३. **जह** ख । १४. **बाहिं इत्यादि** ख । १५. **०प्रकारकर्म०** घ ङ च । १६. **कर्मनिगडं** ख ग । १७. **वा** इति खपुस्तके न । १८. **बाह्यं बन्धनं** क ।

इति चेत्, तत्त्वाविर्भावनेन । स्यादेतत्[१]—तदेव किम्भूतम् ? इत्याह—**जहा अंतो** इत्यादि । यथा स्वकायस्य अन्तः मध्येऽमेध्यकलल-पिशिता-ऽसृक्-पूत्यादिपूर्णत्वेना[२]ऽसारत्वमित्येवं बहिरप्यसारता द्रष्टव्या, अमेध्यपूर्णघटवदिति, उक्तं च—

**यदि नामास्य कायस्य, यदन्तस्तद्बहिर्भवेत् ।**
**दण्डमादाय लोकोऽयं शुनः काकांश्च वारयेत् ॥** [ ] इति[३] ।

यथा वा बहिरसारता तथाऽन्तोऽपीति । किञ्च—**अंतो अंतो** इत्यादि । देहस्य मध्ये मध्ये **पूत्यन्तराणि** पूतिविशेषान् **देहान्तराणि** देहस्यावस्थाविशेषान् इह मांसमिह रुधिरमिह मेदो मज्जा[४] चेत्येवमादि पूति-देहान्तराणि पश्यति यथावस्थितानि परिच्छिनत्तीत्युक्तं भवति । यदि वा देहान्तराण्येवम्भूतानि पश्यति—

**पुढो** इत्यादि । पृथगपि प्रत्येकमपि **अपि**शब्दात् कुष्ठाद्यवस्थायां यौगपद्येनापि श्रवन्ति[५] नवभिः श्रोतोभिः[६] कर्णा-ऽक्षिमल-श्लेष्म-लाला-प्रश्रवणोच्चारादीन् तथाऽपर[७]व्याधिविशेषापादितव्रणमुखपूतिशोणित-र[illegible]दीनि चेति । यद्येतानि[८] ततः किम् ?

**पंडिते पडिलेहाए,** एतान्येवम्भूतानि गलच्छ्रोतोव्रणरोमकूपानि **पण्डितः** अवगततत्त्वः **प्रत्युपेक्षेत** यथावस्थितमस्य स्वरूपमवगच्छेदिति, उक्तं च—

**मंस-ऽट्ठि-रुहिर-ण्हारूवणद्धकलमलय-मेय[९]-मज्जासु ।**
**पुण्णम्मि चम्मकोसे दुग्गंधे असुइबीभच्छे[१०] ॥**
**[११]संचारिमजंतगलंतवच्चमुत्तंतसेयपुण्णम्मि ।**
**देहे होज्जा[१२] किं रागकारणं असुइहेउम्मि ॥** [ ] इत्यादि ।

तदेवं पूति-देहान्तराणि पश्यन्[१३] पृथगपि श्रवन्तीत्येवं[१४] प्रत्युपेक्ष्य किं

---

१. **स्यान् तत् तदेव** ख । २. **०नासारत्वमेवं** ख । ३. **इति** इति खपुस्तके नास्ति । ४. **मज्जा वेत्यादि** ग घ ङ । ५. **स्त्रवन्ति** क-खप्रती विना । ६. **स्त्रोतोभिः** ग घ ङ । ७. **तथा पर०** ख ङ च । ८. **चेति । एतानि च किम् ?** ख । ९. **०मेत०** ग । १०. **०बीभत्से** ख च । ११. **संसारिम०** ङ । १२. **हुज्जा** ग घ ङ । १३. **पश्य पृथगपि** ख । १४. **स्त्रवन्ती** ग घ ।

कुर्यात् ? इत्याह—[1]**से** [2]**मइम**मित्यादि । **स** पूर्वोक्तो यतिः **मतिमान्** श्रुतसंस्कृतबुद्धिर्यथावस्थितं देहस्वरूपं कामस्वरूपं च द्विविधयाऽपि परिज्ञया परिज्ञाय किं कुर्यात् ? इत्याह—

**मा य हु** इत्यादि । मा प्रतिषेधे, चः समुच्चये, हुः वाक्यालङ्कारे, ललतीति लाला अत्रुट्यन्मुखश्लेष्मसन्ततिः, तां प्रत्यशितुं शीलमस्येति प्रत्याशी । वाक्यार्थस्तु यथा हि बालो निर्गतामपि लालां सद-ऽसद्विवेकाभावात् पुनरप्यश्नातीत्येवं त्वमपि लालावत् [3]त्यक्त्वा मा भोगान् [4]प्रत्याशीः, वान्तस्य पुनरप्यभिलाषं मा कुर्वित्यर्थः । [5]किञ्च—

[6]**मा तेसु तिरिच्छ** इत्यादि । संसार[7]श्रोतांसि अज्ञाना-ऽविरति-मिथ्यादर्शनादीनि प्रतिकूलेन [8]वा तिरश्चीनेन वाऽतिक्रमणीयानि, निर्वाणश्रोतांसि तु ज्ञानादीनि तत्रानुकूल्यं विधेयम्, मा तेष्वात्मानं तिरश्चीन[9]मापादयेः, ज्ञानादिकार्ये प्रतिकूलतां मा विदध्याः, तत्राप्रमादवता भाव्यम्, प्रमादवांश्चेहैव शान्तिं न लभते, यत आह—

**[ सू०९३ ] कासंकसे खलु अयं पुरिसे, बहुमायी, कडेण मूढे, पुणो तं करेति लोभं, वेरं वड्ढेति अप्पणो ।**

**जमिणं परिकहिज्जइ इमस्स चेव पडिबूहणताए । अमरायइ महासड्ढी । अट्टमेतं तु पेहाए अपरिण्णाए कंदति ।**

**[ सू०९४ ] से तं जाणह जमहं बेमि । तेइच्छं पंडिए पवयमाणे से हंता छेत्ता भेत्ता लुंपित्ता विलुंपित्ता उद्दवइत्ता**

---

१. **स** च । २. **मइमं इत्यादि** ख ग च । ३. **त्यक्त्वा भोगान् मा प्रत्याशीः** ख । ४. **प्रत्यश्नीहि,** क-खआदर्शौ ऋते, खप्रतौ तु **प्रत्यशान** इति लिखितपाठं निष्काश्य **प्रत्याशीः** इति विशोधितम्, **प्रत्यश्नीहि** इत्येतत्पाठस्योपरि "प्रत्यशान" इति चप्रतौ टिप्पणी । ५. **किञ्च** इति गप्रतौ न । ६. **मा या तिरिच्छ** क, **मा तिरिच्छ** ख ग । ७. **०स्त्रोतांसि** ग । ८. **वा** इति घ-ङ-प्रत्योरेव । ९. **०मापादयेत्,** ग घ ङ ।

**'अकडं करिस्सामि' त्ति मण्णमाणे, जस्स वि य णं करेइ ।**

**अलं बालस्स संगेणं, जे वा से कारेति बाले ।**

**ण एवं अणगारस्स जायति त्ति बेमि ।**

॥ लोगविजयस्स पंचमो उद्देसओ सम्मत्तो ॥

[1]**कासंकसे** इत्यादि । यो हि ज्ञानादि[2]श्रोतसि तिरश्चीनवर्ती भोगाभिलाषवान् स एवम्भूतोऽयं पुरुषः सर्वदा किङ्कर्तव्यताकुलः 'इदमहमकार्षमिदं च करिष्ये' इत्येवं भोगाभिलाषक्रियाव्यापृतान्तःकरणो न स्वास्थ्यमनुभवति, **खलुशब्दः** अवधारणे, वर्तमानकालस्यातिसूक्ष्मत्वाद् असंव्यवहारित्वम्, अतीता-ऽनागतयोश्च '[3]इदमहमकार्षमिदं च करिष्ये' इत्येवमातुरस्य नास्त्येव स्वास्थ्यमिति, उक्तं च—

**इदं तावत् करोम्यद्य, [4]श्वः कर्ताऽस्मीति चापरम् ।**
**[5]चिन्तयन्निह कार्याणि, प्रेत्यार्थं नावबुध्यते ॥ [ ]**

अत्र **दधिघटिकाद्रमकदृष्टान्तो** वाच्यः, स चायम्—

[6]द्रमकः [7]कश्चित् क्वचिन्महिषीरक्षणावाप्तदुग्धः तद् दधीकृत्य चिन्तयामास—ममातो घृत-वेतनादि यावद् [8]भार्या-ऽपत्योत्पत्तिः । ततश्चिन्ता, कलहे पार्ष्णि[9]प्रहारेणैव दधिघटिकाव्यापत्तिः । एवं वा चिन्तामनोरथव्याकुलीकृतान्तः[10]करणेन वृद्ध्यानयने शिरोविण्टलिकाचीवरे आदीयमाने [11]इव शिरो विधूयाऽऽस्फोटिता दधिघटिकेति । एवं यथा [12]तेन न तद्दधि भक्षितं नापि [13]कस्मैचित् पुण्याय दत्तम् एवमन्योऽपि [14]कासंकसः किङ्कर्तव्यतामूढो निष्फलारम्भो [15]भवतीति ।

---

१. **कासंकासे** ख ग । २. **०स्त्रोतसि** ग । ३. **इदमकार्ष०** ग । ४. **श्वः करिष्यामि वा( चा? )परम् । चिन्तयन् कार्यकार्याणि, प्रेत्यार्थं** चूर्णौ । ५. **चिन्तयन्निति** ख च । ६. **द्रमकः** इति खपुस्तके नास्ति । ७. **कश्चिन्महिषी०** ग । ८. **भार्या अपत्योत्पत्तिः** घ ङ । ९. **०प्रहारेण दधिघटिकाव्यापत्तिरिति । तत०** ख च । १०. **०करण इति पाठान्तरम्, वृद्ध्यानयने शिरो विधूय स्फोटिता** ग । ११. **इव** इति खप्रतौ न, चआदर्शे पाठभङ्गः । १२. **तेन तद्दधि न भक्षितं** ख ग च । १३. **कस्यचित्** ग । १४. **काषङ्कषः** घ ङ । १५. **भवति** ग ।

अथवा कस्यतेऽस्मिन्निति कासः संसारस्तं कषतीति तदभिमुखो यातीति **कासङ्कषः**, यो ज्ञानादिप्रमादवान् वक्ष्यमाणो वेति आह—[1]**बहुमायी**, कासङ्कषो हि कषायैर्भवति, तन्मध्यभूताया मायाया [2]ग्रहणे तेषामपि ग्रहणं द्रष्टव्यमिति । ततः क्रोधी मानी मायी लोभीति द्रष्टव्यमिति । अपि च—**कडेण मूढे**, करणं कृतं तेन मूढः किङ्कर्तव्यताकुलः सुखार्थी दुःखमश्नुते इति, उक्तं हि—

**सोउं [3]सोवणकाले मज्जणकाले य [4]मज्जिउं लोलो ।**
**जेमेउं च वराओ जेमण[5]काले न चाएइ ॥** [ ]

अत्र **मम्मणवणिग्दृष्टान्तो** वाच्यः । [6]स चैवं कासङ्कषो बहुमायी कृतेन मूढस्तत् [7]तत् करोति येनात्मनो वैरानुषङ्गो जायत [8]इत्याह—

[9]**पुणो तं करे**इत्यादि । मायावी परवञ्चनबुद्ध्या पुनरपि तत् लोभानुष्ठानं तथा [10]करोति येनात्मनो वैरं वर्धते । अथवा तं लोभं [11]करोति अर्जयति येन जन्मशतेष्वपि वैरं वर्धते इति, उक्तं च—

**दुःखार्तः सेवते कामान् सेवितास्ते च दुःखदाः ।**
**यदि ते न प्रियं दुःखं प्रसङ्गस्तेषु न क्षमः ॥** [ ]

किं पुनः कारणमसुमांस्तत् करोति येनात्मनो वैरं [12]वर्धते ? इत्याह—

**जमिणमि**त्यादि । **यद्** इति यस्मात् अस्यैव विशरारोः [13]शरीरस्य परिबृंहणार्थं प्राणघातादिकाः क्रियाः करोतीति । ते च तेनोपहताः प्राणिनः पुनः शतशो घ्नन्ति । अतो मयेदं कथ्यते—कासङ्कषः खल्वयं पुरुषो बहुमायी कृतेन मूढः पुनस्तत् करोति येनात्मनो वैरं वर्द्धयतीति । यदि वा यद् इदं मयोपदेशप्रायं पौनःपुण्येन कथ्यते तद् अस्यैव संयमस्य परिबृंहणार्थम् । इदं चापरं कथ्यते—

[14]**अमरायइ** इत्यादि । अमरायते अनमरः सन् द्रव्य-यौवन-प्रभुत्व-रूपावसक्तोऽमर इवाचरति अमरायते । कोऽसौ ?—**महाश्रद्धी**, महती चासौ

---

१. **बहुमाई** ग । २. **ग्रहणेऽन्येषामपि** ग । ३. **सोयणकाले** ख ग । ४. **मज्जियं** ग । ५. **०काले य न( नो ) चाए** ग । ६. **स एव** ख, **स एवं** च । ७. **तत्** इति ग-घ-ङप्रतिषु न वर्तते । ८. **इत्याह च** ख घ च । ९. **पुणो पुणो तं** ख । १०. **करोतीति** घ । ११. **करोतीति** क-खपुस्तके विना । १२. **वर्धयति** ख, **वर्धयते** ग । १३. **शरीरकस्य** क-चप्रती विना । १४. **अमरा[ य ]ई इत्यादि** क, **अमरा इत्यादि** ख ।

श्रद्धा च महाश्रद्धा सा विद्यते भोगेषु तदुपायेषु वा यस्य स तथा, अत्रोदाहरणम्[१]—

**राजगृहे** नगरे[२] **मगधसेना** गणिका । तत्र कदाचिद् **धनः** सार्थवाहो महता [३]द्रव्यनिचयेन समन्वितः प्रविष्टः । [४]तद्रूप-यौवन-गुणगण-द्रव्यसम्पदाक्षिप्तया **मगधसेन**याऽसावभिसरितः । तेन चाय-[५]व्ययाक्षिप्तमानसेनाऽसौ नावलोकिताऽपि। अस्याश्चात्मीयरूप-यौवन-सौभाग्यावलेपाद् महती दुःखासिकाऽभूत् । ततश्च [६]तां परिम्लानवदनामवलोक्य **जरासन्धे**नाभ्यधायि—किं भवत्या दुःखासिकाकारणम् ? केन वा सार्धमुषितेति । सा त्ववादीत्-अमरेणेति । कथमसावमरः इत्युक्ते तया सद्भावः कथितो [७]निरूपितश्च यावत् [८]तथैवाद्याप्यास्त इति । अतो भोगार्थिनोऽर्थे [९]प्रसक्ता अजरामरवत् क्रियासु प्रवर्तन्त इति ।

यश्चामरायमाणः कामभोगाभिलाषुकः स किम्भूतो भवति ? [१०]इत्याह—**अट्ट** इत्यादि । अर्त्तिः शारीर-मानसी पीडा, तत्र भव आर्त्तः, तमार्तममरायमाणं [११]कामार्थं महाश्रद्धावन्तं [१२]प्रेक्ष्य दृष्ट्वा पर्यालोच्य वा कामा-ऽर्थयोर्न मनो विधेयमिति । [१३]पुनरप्यमरायमाण-भोगश्रद्धावतः स्वरूपमुच्यते—

[१४]**अपरिन्नाए**त्यादि । कामस्वरूपं तद्विपाकं वा अपरिज्ञाय [१५]तत्र दत्तावधानः कामस्वरूपापरिज्ञया वा **क्रन्दते** भोगेष्वप्राप्त-नष्टेषु काङ्क्षा-शोकावनु[१६]भवतीति, उक्तं च—

**चिन्ता गते भवति साध्वसमन्तिकस्थे,**
**मुक्ते तु तप्तिरधिका रमितेऽप्यतृप्तिः ।**
**द्वेषोऽन्यभाजि वशवर्तिनि दग्धमानः,**
**प्राप्तिः सुखस्य दयिते न कथञ्चिदस्ति** ॥ [                    ] इत्यादि ।

---

१. उदाहरणमिदमत्रस्थाने केचिदेव भणन्ति, न तु **चूर्णिकृत्पूर्ववर्तिनः** सर्वे आचार्याः, तथा च चूर्णिः—''तत्थ उदाहरणं **केई** भणंति'' । २. **नगरे** इति क-गप्रत्योर्न । ३. **धननिचयेन** च । ४. **तद्रूप-गुणगण०** च । ५. **०व्ययक्षिप्तमानसेन नाव०** ख । ६. **तां** इति गपुस्तके नास्ति । ७. **निरूपितो यावत्** ग च । ८. **तथैवास्त इति** क च। ९. **प्रसक्त्या** क । १०. इत्याह **च** क। ११. **कामार्थमहा०** ख ग च । १२. **सम्प्रेक्ष्य** ख । १३. **पुनरमराय०** ख-गप्रती ऋते । १४. **अपरिण्णाए इत्यादि** ख ग । १५. **तत्तद्दत्तावधानः** ख । १६. **भवतीत्यर्थः, उक्तं च** ख ।

तदेवमनेकधा [१]कामविपाकमुपदर्श्योपसंहरति—**से य**मित्यादि । **से** [२]ति तदर्थे, तदपि हेत्वर्थे, यस्मात् कामा दुःखैकहेतवः तस्मात् तद् जानीत यदहं ब्रवीमि, [३]मदुपदेशं कामपरित्यागविषयं [४]कर्णीकुरुतेति भावार्थः । ननु च कामनिग्रहोऽत्र चिकीर्षितः, स चान्योपदेशादपि सिद्ध्यत्येव! इत्येतदा-[५]शङ्क्याह—

[६]**तेइच्छ**मित्यादि । कामचिकित्सां **पण्डितः** पण्डिताभिमानी **प्रवदन्** अपरव्याधिचिकित्सामिवोपदिशन्नपरः तीर्थिको जीवोपमर्दे [७]वर्तत इत्याह—**से हंता** इत्यादि । **स** इत्यविदिततत्त्वः कामचिकित्सोपदेशकः प्राणिनां **हन्ता** दण्डादिभिः, **छेत्ता** कर्णादीनां **भेत्ता** शूलादिभिः **लुम्पयिता** [८]ग्रन्थिच्छेदनादिना **विलुम्पयिता** [९]अवस्कन्दादिना **अपद्रावयिता** [१०]प्राणव्यपरोपणादिना, नान्यथा कामचिकित्सा [११]व्याधिचिकित्सा वाऽपरमार्थदृशां सम्पद्यते । किञ्च—**अकृतं** यदपरेण न कृतं कामचिकित्सनं व्याधिचिकित्सनं वा तदहं **करिष्ये** इत्येवं मन्यमानो हननादिकाः क्रियाः करोति, ताभिश्च कर्मबन्धः । अतो य [१२]एवम्भूतमुपदिशति यस्याप्युपदिश्यते उभयोरप्येतयो[१३]रपथ्यत्वाद् अकार्यमिति । आह च—**जस्स वि** [१४]**य णा**मित्यादि । यस्याप्यसावेवम्भूतां चिकित्सां करोति, न केवलं स्वस्य इत्यपिशब्दार्थः, [१५]तयोर्द्वयोरपि कर्तुः कारयितुश्च हननादिकाः क्रियाः ।

अतो **अलं** पर्याप्तं **बालस्य** [१६]अज्ञानस्य **सङ्गेन** कर्मबन्धहेतुना कर्तुरिति । [१७]**यो**ऽप्येतत् कारयति **बालः** अज्ञस्तस्याप्यलमिति सण्टङ्कः । एतच्चैवम्भूतमुपदेशदानं विधानं वाऽवगततत्त्वस्य न भवतीत्याह—[१८]**न एव**मित्यादि । [१९]एवम्भूतं

---

१. **काममुपदर्श्यो०** ख । २. **त्ति** घ ङ च । ३. **तदुपदेशं** ख-चपुस्तके विना । ४. **कर्णे कुरुतेति** ख ग च । ५. **इत्याशङ्क्याह** ख । ६. **तेइच्छं इत्यादि** ख च । ७. **वर्तेत** ख । ८. **ग्रन्थच्छेदनादिना** ख ग ङ । ९. "**अवस्कन्दादिना** धाटीप्रभृतिना" स०वि०प० । १०. **प्राणव्यपरोपणात् नान्यथा** ख ग च । ११. **व्याधिचिकित्सनं वा** ग । १२. **एवम्भूत उपदिशति** ङ । १३. **०रपथ्यकारित्वाद्** ख । १४. **य** इति कप्रतौ नास्ति, **य णं इत्यादि** ख च । १५. *तयोरपि* घ । १६. *अज्ञस्य* ख च । १७. *यो वैतत्* ख च । १८. *ण एवं इत्यादि* ख च । १९. **एवम्भूतप्राण्यु०** ङ ।

प्राण्युपमर्दनं चिकित्सोपदेशदानं करणं वा **अनगारस्य** साधोर्ज्ञातसंसारस्वभावस्य **न जायते** न कल्पते । ये तु कामचिकित्सां व्याधिचिकित्सां वा जीवोपमर्देन प्रतिपादयन्ति ते बालाः [१]अविज्ञाततत्त्वाः, तेषां वचनमवधीरणीयमेवेति भावार्थः । [२]**इति** [३]परिसमाप्त्यर्थे । **ब्रवीमि** इति [४]पूर्ववदिति ॥

लोक[५]विजयस्य पञ्चमोद्देशकटीका [६]समाप्तेति ॥ छ ॥ छ ॥

● ● ●

१. अविज्ञातत्त्वात्, तेषां क । २. इतिः ग । ३. परिसमाप्त्यर्थः ङ । ४. पूर्ववत् ॥ ख च । ५. ०विजयपञ्चमो० ङ । ६. समाप्तेति ङपुस्तके न, परिसमाप्तेति च ।

उक्तः पञ्चमोद्देशकः । साम्प्रतं षष्ठ आरभ्यते, अस्य चायमभिसम्बन्धः— संयमदेहयात्रार्थं लोकमनुसरता साधुना लोके ममत्वं न कर्तव्यम् इत्युद्देशार्थाधिकारोऽभिहितः, सोऽधुना प्रतिपाद्यते । अस्य चानन्तरसूत्रसम्बन्धो वाच्यः 'नैवमनगारस्य जायते' इत्यभिहितम् एतदेवात्रापि प्रतिपिपादयिषुराह—

**[सू०९५] से तं संबुज्झमाणे आयाणीयं समुट्ठाए तम्हा पावं कम्मं णेव कुज्जा ण कारवे ।**

**[सू०९६] सिया तत्थ एकयरं विप्परामुसति छसु अण्णयरम्मि कप्पति सुहट्ठी लालप्पमाणे सएण दुक्खेण मूढे विप्परियासमुवेति । सएण विप्पमाएण पुढो वयं पकुव्वति जंसिमे पाणा पव्वहिता ।**

**से तं**[1] **संबुज्झमाणे**[2] इत्यादि । यस्यानगारस्यैतत् पूर्वोक्तं न जायते **सः** अनगारः । **तत्** [3]प्राण्युपघातकारि चिकित्सोपदेशदानमनुष्ठानं वा । **सम्बुध्यमानः** अवगच्छन् ज्ञपरिज्ञया, प्रत्याख्यानपरिज्ञया च[4] परिहरन् । आदातव्यम् **आदानीयम्** । तच्च परमार्थतो भावादानीयं ज्ञान-दर्शन-चारित्ररूपं तद् **उत्थाय** इत्यनेकार्थत्वाद् आदाय गृहीत्वा । अथवा सः अनगार[5] एव तत् आदानीयम् [6]ज्ञानाद्यपवर्गकारणम् इत्येवं सम्यगवबुध्यमानः **सम्यक्** संयमानुष्ठानेन **उत्थाय** [7]सर्वं सावद्यं कर्म न मया कर्तव्यम् इत्येवं प्रतिज्ञामन्दरमारुह्य । क्त्वाप्रत्ययस्य पूर्वकालाभिधायित्वात् किं कुर्यात् ? इत्याह—

**तम्हा** इत्यादि । यस्मात् संयमः सर्वसावद्यारम्भनिवृत्तिरूपः तस्मात् [8]तमादाय **पापं** पापहेतुत्वात् **कर्म** [9]क्रियां 'न कुर्यात् स्वतः' मनसाऽपि न

---

१. त्तं ख ग । २. **संबुज्झमाण** ख-चप्रती विना । ३. **प्राण्युपघातचिकित्सोप०** ख । ४. **वा** ग । ५. ०र **इत्येतत् आ०** क घ ङ ०र **एतत् आ०** ग च । ६. **ज्ञानाद्यपवर्गैककारणम्** घ ङ । ७. **सर्वं सावद्यकर्म मया न कर्तव्यम्** ख ङ **सर्वसावद्यं कर्म न** ग, **सर्वसावद्यकर्म न** घ, **सर्वं सावद्यकर्म न** च । ८. **तदादाय** च । ९. **क्रियां स्वतो न कुर्यात् मनसा** ख च ।

समनुजानीयादित्यवधारणफलम् । अपरेणापि न कारये[1]दित्याह—

**न कारवे** इत्यादि अपरेणापि कर्मकरादिना पापसमारम्भं न [2]कारयेत् । एतदुक्तं भवति—प्राणातिपात-मृषावादा-ऽदत्तादान-मैथुन-[3]परिग्रह-क्रोध-मान-माया-लोभ-राग-द्वेष-कलहा-ऽभ्याख्यान-पैशून्य-परपरिवादा-ऽरतिरति-मायामृषावाद-मिथ्यादर्शनशल्यरूपमष्टादशप्रकारं पापं कर्म स्वतो न कुर्यात्, नाप्यपरेण कारयेत्, [4]एवकारात् चापरं कुर्वन्तं न समनुजानीयात्, योगत्रिकेणापि [इति ?] भावार्थः ।

स्यादेतत्—किमेकं प्राणातिपातादिकं पापं कुर्वतोऽपरमपि ढौकते, आहोस्विन्न ? इत्याह—

**सिया तत्थेत्यादि । [5]स्यात्** कदाचित् **तत्र** पापारम्भे **एकतरं** पृथिवी-[6]कायादिसंरम्भं विपरामृशति पृथिवीकायादिसमारम्भं करोति । एकतरं वा [7]आश्रवद्वारं परामृशति आरभते । स षट्स्वन्यतरस्मिन् कल्प्यते, [8]यस्मिन्नेवालोच्यते तस्मिन्नेव प्रवृत्तो द्रष्टव्यः । इदमुक्तं भवति—[9]पृथिवीकायादिषु षट्सु जीवनिकाये[10]ष्वाश्रवद्वारेषु वा मध्येऽन्यतरस्मिन्नपि [11]वर्तमानो यस्मिन्नेव पर्यालोच्य[12]ते तस्मिन्नेव कल्प्य[13]ते, सर्वस्मिन्नेव वर्तत इति भावार्थः ।

[14]कथमन्यतरस्मिन् पृथिवीकायादिसमारम्भे वर्तमानोऽपरकायसमारम्भे सर्वपापसमारम्भे वा [15]वर्तते इत्येवं मन्यते ? कुम्भकारशालोदकप्लावन-दृष्टान्ते[16]नैककायसमारम्भकोऽपरकाय[17]समारम्भको भवति । अथवा प्राणाति-पा[18]तास्रवद्वारविघटनाद् एकजीवातिपाताद् एककायातिपाताद् वाऽपरजीवातिपाती

---

१. ०दिति, आह च ख ग ङ । २. कारयेदित्युक्तं भवति । प्राणातिपात० ख-चपुस्तके ऋते । ३. ०परिग्रहरात्रिभोजन-क्रोध० क ग । ४. एवकाराद्वापरं क । ५. स्यात् तत्र कदाचित् ख-गप्रती विना । ६. ०कायादिसमारम्भं करोति । एक० क, कायादि विपरामृशति ख, ०कायादिसमारम्भं विपरामृशति ग । ७. आस्रवद्वारं ग घ ङ । ८. यस्मिन्नेव प्रवृत्तो वालोच्यते तस्मिन्नेव द्रष्टव्य इति । इदमुक्तं ख । ९. पृथ्वी० ग । १०. ०ष्वास्रव० ग घ ङ । ११. प्रवर्तमानो घ ङ च । १२. ०ते सर्वस्मिन्नेव कल्प्यते ङ । १३. ०ते, स सर्वस्मिन्नपि वर्तत ख । १४. कथं पुनरन्यतरस्मिन् ख । १५. वर्तते एवं मन्यते क ग च । १६. ०नैवाप्कायसमा० ख । १७. ०समारम्भे भवति ङ । १८. ०ताश्रव० ख ।

द्रष्टव्यः, प्रतिज्ञालोपात् चानृतः, न च तेन व्यापाद्यमानेनासुमताऽऽत्मा व्यापादकाय दत्तः तीर्थकरेण [1]वाऽनुज्ञातः, अतः प्राणिनः प्राणान् गृह्णन्नदत्तग्राही, सावद्योपादानात् च [2]पारिग्रहिकः, परिग्रहाच्च मैथुन-रात्रीभोजने [3]अपि गृहीते, यतो नापरिगृहीतमुपभुज्य[4]ते परिभुज्यते [5]वेति, अतोऽन्यतरारम्भे षण्णामप्यारम्भः। अथवाऽनावृतचतु[6]रास्रवद्वारस्य कथं चतुर्थ-[7]षष्ठव्रतावस्थानं स्यात् ? अतः [8]षट्स्वन्यतरस्मिन् प्रवृत्तः सर्वेष्वपि प्रवृत्त इति। अथवैकतरमपि पापसमारम्भं य आरभते स षट्स्वन्यतरस्मिन् कल्पते योग्यो भवति, अकर्तव्यप्रवृत्तत्वात्। अथवैकतरमपि यः पापारम्भं करोत्यसावष्टप्रकारं कर्मादाय षट्स्वन्यतरस्मिन् कल्पते प्रभवति, पौनःपुण्येनोत्पद्यत [9]इत्यर्थः। स्यात्—किमर्थमेवंविधं [10]पापकं कर्म समारभते ? तदुच्यते—

[11]**सुहट्ठी** [12]**लालप्पमाणे**, सुखेनार्थः सुखार्थः, स विद्यते यस्यासाविति मत्वर्थीयः। स एवम्भूतः सन् अत्यर्थं लपति पुनः पुनर्वा लपति लालप्यते वाचा, कायेन धावन-वल्गनादिकाः [13]क्रियाः करोति, मनसा च तत्साधनोपायांश्चिन्तयति, तथाहि—सुखार्थी सन् कृष्यादिकर्मभिः पृथिवीं समारभते, [14]स्नानार्थमु[15]दकम्, वितापनार्थमग्निम्, घर्मापनोदार्थं वायुम्, आहारार्थी वनस्पतिं त्रसकायं वेत्यसंयतः, संयतो वा रससुखार्थी [16]सचित्तं लवण-वनस्पति-फलादि गृह्णाति, एवमन्यदपि यथासम्भवमायोज्यम्।

स चैवं लालप्यमानः किम्भूतो भवति ? इत्याह—**सएण** इत्यादि। यत् तद् उप्तमन्यजन्मनि दुःखतरुकर्मबीजं तद् आत्मीयं दुःखतरुकार्यमाविर्भावयति, तच्च तेनैव कृतमि[17]त्यात्मीयमुच्यते। [18]अतस्तेन स्वकीयेन **दुःखेन** स्वकृतकर्मोदयजनितेन **मूढः** परमार्थमजानानः **विपर्यासमुपैति** सुखार्थी प्राण्युप-

---

१. **वा नानुज्ञातः** ग, **चाननुज्ञातः** च। २. **परिग्रहिकः** ग, **पारिग्राहिकः** घ ङ। ३. **०ने परिगृहते** क, **०ने अ[पि] परिगृहीते** ङ। ४. **०ते इति, अतो०** ग। ५. **चेति** च। ६. **०राश्रव०** ख ङ च। ७. **०षष्ठावस्थानं** ख। ८. **षट्स्वन्यतरप्रवृत्तः** ख-चप्रती ऋते। ९. **इत्याद्यर्थः** ख। १०. **पापं कर्म** घ। ११. **सुहत्थी** ख। १२. **लालप्पमीणे** ख ग च। १३. **क्रिया विधत्ते, मनसा** ख। १४. **स्नानाद्यर्थ०** ख। १५. **चेत्यसंयतः** ख ङ च। १६. **सच्चित्तं** घ च। १७. **०त्यात्मीयमित्युच्यते** ख। १८. **ततस्तेन** ग।

घात[1]कारिणमारम्भमारभते सुखस्य च विपर्यासो दुःखं तदुपैति, उक्तं च—

**दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः ।**
**यां यां करोति चेष्टां तया तया दुःखमादत्ते ॥** [प्रशम० गा० ४०]

यदि वा मूढः हिता-ऽहितप्राप्ति-परिहाररहितो विपर्यासमुपैति हित-मप्यहितबुद्ध्याऽधितिष्ठति अहितं च हितबुद्ध्येति । एवं कार्या-ऽकार्य-पथ्या-ऽपथ्य-वाच्या-ऽवाच्यादिष्वपि विपर्यासो योज्यः । इदमुक्तं भवति—मोह अज्ञानं मोहनीयभेदो वा तेनोभयप्रकारेणापि मोहेन मूढोऽल्पसुखकृते तत् तदारभते येन शारीर-मानसदुःख-व्यसनोपनिपातानामनन्तमपि कालं पात्रतां व्रजतीति । पुनरपि मूढस्यानर्थपरम्परां दर्शयितुमाह—

[2]**सएण** इत्यादि । स्वकीयेन आत्मना कृतेन प्रमादेन मद्यादिना, विविधम् इति मद्य-विषय-कषाय-विकथा-निद्राणां स्वभेदग्रहणम् तेन **पृथक्** विभिन्नं **व्रतं करोति** । यदि वा **पृथु** विस्तीर्णं **वय**मिति [3]वयन्ते पर्यटन्ति प्राणिनः स्वकीयेन कर्मणा यस्मिन् स **वयः** संसारः तं प्रकरोति, [4]एकैककाये दीर्घ[5]कालावस्थानात् । यदि वा कारणे कार्योपचारात् [6]स्वकीयनानाविधप्रमादकृतेन कर्मणा **वयः** अवस्थाविशेषस्तमेकेन्द्रियादि-कलला-ऽर्बुदादि-तदहर्जात-बालादि-व्याधिगृहीत-दारिद्र्य-दौर्भाग्य-व्यसनोपनिपातादिरूपं **प्रकर्षेण करोति** विधत्त इति ।

तस्मिंश्च संसारेऽवस्थाविशेषे वा प्राणिनः पीड्यन्ते इति दर्शयितुमाह—
[7]**जंसिमे** इत्यादि । यस्मिन् स्वकृतप्रमादापादितकर्मविपाकजनिते चतुर्गतिकसंसारे एकेन्द्रियाद्यवस्था[8]विशेषे वा **इमे** प्रत्यक्षगोचरीभूताः **प्राणाः** इत्यभेदोपचारात् प्राणिनः **प्रव्यथिताः** नानाप्रकारैर्व्यसनोपनिपातैः पीडिताः, सुखार्थिभिरारम्भ-प्रवृत्तैर्मोहाद्विपर्यस्तैः प्रमादवद्भिश्च गृहस्थैः पाषण्डिकैर्यत्याभासैश्चेति वा । यदि नामात्र प्रव्यथिताः प्राणिनः ततः किम् ? इत्याह—

---

१. **०कारणमारभते** घ । २. **सएणमित्यादि** ख । ३. **वयन्ति** च । ४. **एकैकस्मिन् काये** ख च, **एकैके काये** ग । ५. **०कालावस्थानम् । यदि** घ ङ च । ६. **स्वकीयेन नानाविध०** ग । ७. **जंसिमेत्यादि** ख च । ८. **०विशेषा इमे** ग ।

**[ सू०९७ ] पडिलेहाए णो णिकरणाए । एस परिण्णा पवुच्चति कम्मोवसंती ।**

**जे ममाइयमतिं जहाति से जहाति ममाइतं ।**

**से हु दिट्ठपहे मुणी जस्स णत्थि ममाइतं ।**

**तं परिण्णाय मेहावी विदित्ता लोगं, वंता लोगसण्णं, से मतिमं परक्कमेज्जासि त्ति बेमि ।**

**पडि** इत्यादि । एतत् संसार[1]चक्रे स्वकृत[2]कर्मफलेश्वराणामसुमतां गृहस्थादिभिः परस्परतो वा कर्मविपाकतो वा प्रव्यथनं प्रत्युपेक्ष्य विदितवेद्यः साधुर्निश्चयेन नितरां वा नियतं वा क्रियन्ते [3]नानादुःखावस्था जन्तवो येन तद् निकरणं निकारः शारीर-मानसदुःखोत्पादनं तस्मै, नो कर्म कुर्यात्, येन प्राणिनां पीडोत्पद्यते तमारम्भं न विदध्यादिति भावार्थः ।

एवं च सति किं भवति ? इत्याह—**एस** इत्यादि । येयं सावद्य-योग[4]निवृत्तिरेषा परिज्ञा एतत् तत्त्वतः परिज्ञानं प्रकर्षेणोच्यते प्रोच्यते, न पुनः शैलूषस्येव ज्ञानं [5]निवृत्तिफलरहितमिति ।

एवं द्विविधयाऽपि ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च [6]प्राणिनिकारपरिहारे सति किं भवति ? इत्याह—[7]**कम्मोवसंती**, कर्मणाम् अशेषद्वन्द्वव्रातात्मक-संसारतरु[8]बीजभूतानाम् उपशान्तिः उपशमः, कर्मक्षयः प्राणिनिकारक्रिया-निवृत्तेर्भवतीत्युक्तं भवति ।

अस्य [9]च कर्मक्षयप्रत्यूह[10]स्य प्राणिनिकरणस्य मूलमात्मीयग्रहः, तदपनोदार्थमाह—**जे** [11]**ममाइय** इत्यादि । ममायितं मामकं तत्र मतिर्ममायित-

---

१. ०चक्रवाले स्वकृत० क-चपुस्तके विना । २. ०कर्मेश्वराणा० ख । ३. नानावस्था ख । ४. ०निवृत्तिपरिज्ञा ख । ५. निमित्तफल ख, निर्वृत्तिफल० ग । ६. प्राणिनिकारे परिहृते सति ख । ७. कर्मेत्यादि कर्मणाम् क, कम्मोवसन्ती च । ८. ०बीजानाम् ख । ९. च इति खप्रतौ नास्ति । १०. ०स्य प्रकरणस्य मूल० ख । ११. ममाइयमित्यादि गप्रतिमृते ।

मतिस्तां यः परिग्रहविपाकज्ञः [1]जहाति परित्यजति स ममायितं स्वीकृतं परिग्रहं जहाति [2]परित्यजति । इह द्विविधः परिग्रहः—द्रव्यतो भावतश्च । तत्र परिग्रहमतिनिषेधाद् आन्तरो भावपरिग्रहो निषिद्धः, परिग्रहबुद्धिविषयप्रतिषेधाच्च बाह्यो द्रव्यपरिग्रह इति । अथवा काक्वा नीयते—यो हि परिग्रहाध्यवसायकलुषितं ज्ञानं परित्यजति स एव परमार्थतः सबाह्या[3]भ्यन्तरं [4]परिग्रहं परित्यजति । ततश्चेदमुक्तं भवति—सत्यपि सम्बन्धमात्रे चित्तस्य परिग्रहकालुष्याभावाद् नगरादि[5]सम्बद्ध[6]पृथ्वीसम्बन्धेऽपि [7]जिनकल्पिकस्येव निष्परिग्रहतैव । यदि नामैवं ततः किम् ? इत्याह—

**से हु** इत्यादि । यो हि मौक्षेकविघ्नहेतोः संसार[8]भ्रमणकारणात् परिग्रहान्निवृत्ताध्यवसायः, **हुः** अवधारणे, **स** एव **मुनिः**, दृष्टो [9]ज्ञानादिको [10]मोक्षपथो येन स **दृष्टपथः**, यदि वा **दृष्टभयः** अवगतसप्तप्रकारभयः, शरीरादेः परिग्रहात् साक्षात् पारम्पर्येण वा पर्यालोच्यमानं सप्तप्रकारमपि भयमाप[11]नीपद्यत इत्यतः [12]परिग्रहपरित्यागे ज्ञातभयत्व[13]मवसीयत इति ।

एतदेव पूर्वोक्तं स्पष्टयितुमाह—**जस्से**त्यादि । यस्य **ममायितं** स्वीकृतं परिग्रहो **न विद्यते** स दृष्टभयो मुनिरिति सम्बन्धः । किञ्च—

[14]**तमि**त्यादि । **तं** पूर्वव्यावर्णितस्वरूपं परिग्रहं द्विविधयाऽपि परिज्ञया **परिज्ञाय मेधावी** ज्ञातज्ञेयो **विदित्वा लोकं** परिग्रहाग्रहयोगविपाकिन-मेकेन्द्रियादिप्राणिगणम्, **वान्त्वा** उद्‌गीर्य **लोकस्य** प्राणिगणस्य **संज्ञा** दशप्रकाराऽतस्ताम्, **स** इति मुनिः, किम्भूतः ? **मतिमान्** सदसद्विवेकज्ञः **पराक्रमेथाः** संयमानुष्ठाने समुद्यच्छेः, संयमानुष्ठानोद्योगं सम्यग् विदध्या इति यावत् । अथवा[15]ऽष्टप्रकारं कर्मारिषड्वर्गं वा विषय-कषायान् वा पराक्रमस्वेति । **इति** [16]अधिकारपरिसमाप्तौ, **ब्रवीमि** [17]इति पूर्ववत् ।

---

१. **जहाति त्यजति** घ । २. **परित्यजति** इति पाठो ग-चप्रत्योर्न वर्तते । ३. **०भ्यन्तरपरिग्रहं** घ । ४. **परिग्रहं त्यजति** ग । ५. **०सम्बन्धपृथ्वी०** ग घ ङच । ६. **०पृथिवी०** ख । ७. **जिनकल्पस्येव** क । ८. **०भ्रमकारणात्** च । ९. **ज्ञानादिमोक्षपथो** ग । १०. **मोक्षपन्था** ङच । ११. **०नीपद्यतेऽतः** ख । १२. **परिग्रहत्यागे** ग । १३. **०मवसीयते । एतदेव** ख । १४. **तं इत्यादि** ख । १५. **०ऽष्टप्रकारकर्मारि०** च । १६. **अधिकारसमाप्तौ** ख ग । १७. **इति** इति गपुस्तके नास्ति ।

स एवं संयमानुष्ठाने पराक्रममाणस्त्यक्त[1]परिग्रहाग्रहयोगो मुनिः किम्भूतो भवति ? इत्याह–

**[ सू०९८ ] णारतिं सहती वीरे, वीरे णो सहती रतिं ।**
**जम्हा अविमणे वीरे तम्हा वीरे ण रज्जति ॥**

**[ सू०९९ ] सद्दे फासे अधियासमाणे णिव्विंद णंदिं इह जीवयस्स ।**

**मुणी मोणं समादाय धुणे कम्मसरीरगं ।**
**पंतं लूहं सेवंति वीरा सम्मत्तदंसिणो ॥**

**एस ओघंतरे मुणी तिण्णे मुत्ते विरते वियाहिते त्ति बेमि ।**

[2]**नारई**मित्याद्यनुष्टुप् । तस्य हि त्यक्तगृह–गृहिणी–धन–हिरण्यादिपरिग्रहस्य निष्किञ्चनस्य संयमानुष्ठानं कुर्वतः [3]साधोः कदाचिन्मोहनीयोदयादरतिराविः स्यात्, तामुत्पन्नां संयमविषयां **न सहते** न क्षमते । कोऽसौ ? विशेषेणेरयति प्रेरयति [4]अष्टप्रकारं कर्मारिषड्वर्गं [5]वेति **वीरः** शक्तिमान् । [6]स एव वीरोऽसंयमे विषयेषु परिग्रहे वा या रतिरुत्पद्यते तां **न सहते** न [7]मर्षयति, या चारतिः संयमे, [8]विषयेषु च रतिस्ताभ्यां विमनी[9]भूतः शब्दादि[10]षु रज्यति, अतो रत्यरतिपरित्यागाद् न विमनस्को [11]भवति, नापि रागमुपयातीति दर्शयति–यस्मात् त्यक्तरत्यरतिर**विमना** [12]**वीरस्तस्मात्** कारणाद् **वीरः न रज्यति** शब्दादिविषयग्रामे न गार्द्ध्यं विदधाति।

यत एवं ततः किम् ? इत्याह–**सद्दे** इत्यादि । यस्माद् वीरो रत्यरती

---

१. ०परिग्रहयोगो घ ङ च । २. **णारइं इत्याद्य०** ख च । ३. **साधोः** इति खपुस्तके न। ४. **अष्टप्रकारकर्मारि०** ग । ५. **चेति** ख च । ६. **स एवासंयमे** ख। ७. **मर्षति** कप्रतिं विना । ८. **विषये च** ग । ९. **०भूतो न शब्दादिषु** च । १०. **०षु न रज्यते** ग । ११. **भवति** इति क-घ-ङप्रतिषु नास्ति । १२. **धीरस्तत्कारणाद्** ख ।

निराकृत्य [1]शब्दादिषु विषयेषु मनोज्ञेषु न रागमुपयाति नापि [2]दुष्टेषु द्वेषं तस्मात् **शब्दान् स्पर्शांश्च** मनोज्ञेतरभेदभिन्नान् **[3]अहियासमीणे** त्ति सम्यक् सहमानो **निर्विन्द नन्दी**त्युत्तरसूत्रेण सम्बन्धः । एतदुक्तं भवति—मनोज्ञान् शब्दान् श्रुत्वा न रागमुपयाति नापीतरान् द्वेष्टि । आद्यन्तग्रहणाच्चेतरेषामप्युपादानं द्रष्टव्यम्, तत्रा[4]प्यभिसहनं विधेयमिति, उक्तं च—

**सद्देसु य भद्दय-पावएसु सोयविसयं उवगएसु ।**
**तुट्ठेण व रुट्ठेण व समणेण [6]सया न [7]होयव्वं ॥** [ ]

एवम्—**[8]रूवेसु य भद्दय-[9]पंतएसु०** [ ]

[10]**तथा—गंधेसु [11]य०** [ ]

इत्यादि वाच्यम् । ततश्च शब्दादीन् विषया[12]नभिसहसमानः किं कुर्यात् ? इत्याह—**निव्विंद** इत्यादि । इहोपदेश[13]गोचरो विनेयोऽभिधीयते, सामान्येन वा मुमुक्षोरयमुपदेशः—**निर्विन्दस्व** जुगुप्सस्व ऐश्वर्य-विभवात्मिका मनसस्तुष्टिर्नन्दिः ताम्, **इह** मनुष्यलोके यज्जीवितमसंयमजीवितं वा तस्य या नन्दिः [14]तुष्टिः प्रमोदो [15]वा यथा-ममैतत् समृद्ध्यादिकमभूद्भवति भवि[16]ष्यति वेत्येवं विकल्पजनितां **[17]नन्दिं** जुगुप्सस्व यथा—'किमनया पापोपा[18]दानहेतुभूतयाऽस्थिरया ?' [19]इति, उक्तं च—

**विभव इति किं मदस्ते ? च्युतविभवः किं विषादमुपयासि ? ।**
**[20]करनिहितकन्दुकसमाः पातोत्पाता मनुष्याणाम् ॥** [ ]

एवं रूप-बलादिष्वपि वाच्यं **सनत्कुमार**[21]दृष्टान्तेन । अथवा [22]पञ्चानाम[23]प्यतीचाराणामतीतं निन्दति प्रत्युत्पन्नं संवृणोति अनागतं प्रत्याचष्टे ।

---

१. **शब्दादिविषयेषु** ख । २. **दुष्टे द्वेषं** च । ३. **अहियासमाणे** घ ङ च । ४. **०प्यतिसहनं** कप्रतिमृते । ५. **विधेयं समतेति, उक्तं च** ख । ६. **सया य नो हव्वं** ङ । ७. **होतव्वं** ख । ८. **रूयेसु व भद्दय-पावएसु०** ग, **रूएसु य** च । ९. **०पंतयेसु** घ ङ । १०. **तया** ख-चप्रती विना । ११. **अ** च । १२. **०नतिसहमानः** कआदर्शमृते । १३. **०गोचरापन्नो विनेयो०** ख ग च । १४. **पुष्टिः** ग । १५. **वा** इति खप्रतावेव । १६. **०ति इत्येवं** च । १७. **नन्दीं** ग घ च । १८. **०दानभूतया** क घ ङ । १९. **इति** इति ख-चप्रत्योरेव । २०. **करनिहत०** ग । २१. **०दृष्टान्तेनेति । अथवा** ख च । २२. "**पञ्चानाम्** इति महाव्रतानाम्" जं०वि०प० । २३. **०प्यतिचरणमतीतं** ख ।

स्यादेतत्—किमालम्ब्य करोति ? इत्याह—**मुणी**[१]त्यादि । मुनिः त्रिकालवेदी यतिरित्यर्थः, मुनेरयं मौनः संयमः । यदि वा मुनेर्भावः मुनित्वं तदप्यसावेव । मौनं वा वाचः संयमनम्, अस्य चोपलक्षणार्थत्वात् काय-मनसोरपि । अतः सर्वथा संयममादाय किं कुर्यात् ? **धुनीयात् कर्मशरीरकं**[२] औदारिकादिशरीरं वा । अथवा धुनीहि विवेचय पृथक्कुरु, तदुपरि ममत्वं मा विधत्स्वेति भावार्थः ।

कथं तच्छरीरकं धूयते ? ममत्वं वा तदुपरि न कृतं भवति ? इत्याह—**पन्तं**[३] इत्यादि । प्रान्तं स्वाभाविकरसरहितं[४] स्वल्पं वा, **रूक्षम्** आगन्तुक-स्नेहादिरहितं द्रव्यतः, भावतोऽपि **प्रान्तं** द्वेषरहितं विगतधूमं **रूक्षं** राग-रहितमपगताङ्गारं[५] **सेवन्ते** भुञ्जते, के ? **वीराः** साधवः, किम्भूताः[६] ? **समत्व-दर्शिनः** राग-द्वेषरहिताः, **सम्यक्त्वदर्शिनो** वा, सम्यक् तत्त्वं सम्यक्त्वं तद्दर्शिनः परमार्थदृशः, तथाहि—इदं शरीरकं कृतघ्नं निरुपकारि, एतत्कृते प्राणिन ऐहिका-ऽऽमुष्मिकक्लेशभाजो भवन्ति ।

[७]अनेकादेशे चैकादेश इति कृत्वा प्रान्त-रूक्षसेवी समत्वदर्शी[८] च कं गुणमवाप्नोति ? इत्याह—**एस** इत्यादि । **एषः**[९] प्रान्त-रूक्षाहारसेवनेन कर्मादिशरीरं धुनानो भावतो भवौघं तरतीति । कोऽसौ । **मुनिः** यतिः । अथवा क्रियमाणं कृतम् इति कृत्वा **तीर्णं** एव भवौघम् । कश्च भवौघं तरति ? यः **मुक्तः** सबाह्याभ्यन्तर-परिग्रहरहितः । कश्च परिग्रहान्मुक्तो भवति[१०] ? यो भावतः शब्दादि-विषयाभिष्वङ्गा**द्विरतः** । ततश्च यो मुक्तत्वेन विरतत्वेन वा **विख्यातो** मुनिः स एव भवौघं तरति, तीर्ण एवेति वा स्थितम् । **इतिः** [११]अधिकारपरिसमाप्तौ । **ब्रवीमि** इति पूर्ववत् । यश्च मुक्तत्व-विरतत्वाभ्यां न विख्यातः स किम्भूतो

---

१. **मुणि इत्यादि** ख च । २. **कर्मशरीरं** ख ङ । ३. **पंतं** क-गपुस्तके विना । ४. ०**रहितमल्पं वा** ख च । ५. ०**त-द्वेषरहितमपगता**० क । ६. **किम्भूताः** इति क-घप्रत्योर्नास्ति । ७. ''**अनेक( का )देशे** इति 'धी(वी?)रा' इत्यत्र बहुवचननिर्देशे सति'' जै०वि०प । ८. **सम्यक्त्वदर्शी च कं गुणं समा( म )वाप्नोति ?** ग । ९. **एष इति प्रान्त**० ख च । १०. **भवति** इति क-घ-ङप्रतिषु न । ११. ०**अधिकारसमाप्तौ** ग ।

भवति ? इत्याह—

**[ सू०१०० ] दुव्वसुमुणी अणाणाए, तुच्छए गिलाति वत्तए ।**

**[ सू०१०१ ] एस वीरे पसंसिए अच्चेति लोगसंजोगं । एस णाए पवुच्चति ।**

**जं दुक्खं पवेदितं इह माणवाणं तस्स दुक्खस्स कुसला परिण्णमुदाहरंति, इति कम्मं परिण्णाय सव्वसो ।**

**जे अणण्णदंसी से अणण्णारामे, जे अणण्णारामे से अणण्णदंसी ।**

**दुव्वसु**[1] इत्यादि । वसु द्रव्यम्, एतच्च भव्येऽर्थे व्युत्पादितम्, '**द्रव्यं च भव्ये**' [पा० ५।३।१०४] इत्यनेन । भव्यश्च मुक्तिगमनयोग्यः । ततश्च मुक्तिगमनयोग्यं यद् द्रव्यं तद् वसु, दुष्टं वसु दुर्वसु, दुर्वसु चासौ मुनिश्च दुर्वसुमुनिः मोक्षगमनायोग्यः । स च कुतो भवति ? **अनाज्ञया** तीर्थकरोपदेशशून्यः, स्वैरीत्यर्थः । किमत्र तीर्थकरोपदेशे दुष्करं येन स्वैरित्वमभ्युपगम्यते ? तदुच्यते—उद्देशकादेरारभ्य सर्वं यथासम्भवमायोज्यम्, तथाहि—मिथ्यात्वमोहिते लोके सम्बोद्धुं दुष्करम्, व्रतेष्वात्मानमध्यारोपयितुम्, रत्यरती निग्रहीतुम्, शब्दादिविषयेष्विष्टा-ऽनिष्टेषु मध्यस्थतां भावयितुम्, प्रान्त-रूक्षाणि भोक्तुम्, एवं यथोद्दिष्टया मौनीन्द्राज्ञया[2]ऽसिधाराकल्पया[3] दुष्करं सञ्चरितुम्, तथाऽनुकूलप्रतिकूलांश्च नानाप्रकारानुपसर्गान् सोढुम्, असहने च कर्मोदयो[4]ऽनाद्यतीत[5]-

---

१. ''**दव्ववसु( दुव्वसु )मुणी** वसतीति वस्ता(सू?) संजमे नाणादितिये वा, दुट्ठे वसुस्(?) दुव्वसु (सू ?), जं भणितं कुस्समणे ।'' चूर्णौ, **दुव्वसुमुणी । वसु** ख । २. **मौनीन्द्रयाऽऽज्ञया** ग । ३. **०ऽसिधारकल्पया** च । ४. ''**कर्मा( र्मो )दयः** इति कारणम्'' जै०वि०प० । ५. ''**अनाद्यतीत०** इति सदा मुखरितप्सुरेव'' जै०वि०प० ।

कालसुखभावना च कारणम्, जीवो हि स्वभावतो दुःखभीरुरनिरोधसुखप्रियः, अतो निरोधकल्पायामाज्ञायां दुःखं वसति । अवसंश्च किम्भूतो भवति ? इत्याह–

[१]**तुच्छ** इत्यादि । **तुच्छः** रिक्तः, स च द्रव्यतो निर्धनो घटादिर्वा [२]जलादिरहि[३]तः, भावतो ज्ञानादि[४]रहितः, ज्ञानरहितो हि क्वचित् संशीतिविषये केनचित् पृष्टोऽपरिज्ञानाद् **ग्लायति वक्तुम्,** ज्ञानसमन्वितो वा चारित्ररिक्तः पूजासत्कारभयात् शुद्धमार्गप्ररूपणावसरे ग्लायति यथावस्थितं प्रज्ञापयितुम्, तथाहि–प्रवृत्तसन्निधिः सन्निधेर्निर्दोषतामाचष्टे, एवमन्यत्रापीति ।

यस्तु [५]कषायमहाविषागदकल्पभगवदाज्ञोपजीवकः स [६]सुवसुमुनिर्भवत्यरिक्तो [७]न ग्लायति च वक्तुम्, यथावस्थितवस्तुपरि[८]ज्ञानादनुष्ठानाच्च । आह च–**एस** इत्यादि । **एषः** इति [९]सुवसुमुनिर्ज्ञानाद्यरिक्तो यथावस्थितमार्गप्ररूपको **वीरः** कर्मविदारणात् **प्रशंसितः** तद्विद्भिः श्लाघित इति । किञ्च–

[१०]**अच्चे**त्यादि । [११]स [१२]एवं भगव[१३]दाज्ञानुवर्तको [१४]वीरः **अत्येति** अतिक्रामति, कम् ? **लोकसंयोगं** लोकेन असंयतलोकेन संयोगः सम्बन्धः ममत्वकृतस्तमत्येति । अथवा लोको बाह्योऽभ्यन्तरश्च । [१५]तत्र बाह्यो [१६]धन-हिरण्य-मातृ-पित्रादिः । आन्तरस्तु राग-द्वेषादिः, तत्कार्यं वाऽष्टप्रकारं कर्म । तेन [१७]सार्धं संयोगम् [१८]अत्येति अतिलङ्घयतीत्युक्तं भवति । यदि नामैवं ततः किम् ? इत्याह–

**एस** इत्यादि । योऽयं लोकसंयोगातिक्रमः **एष न्यायः** एष सन्मार्गो मुमुक्षूणामयमाचारः प्रोच्यते अभिधीयते । अथवा परम् आत्मानं च मोक्षं नयतीति छान्दसत्वात् कर्तरि घञ् **नायः,** यो हि त्यक्तलोकसंयोग एष एव परात्मनोर्मोक्षस्य नायः प्रोच्यते मोक्षप्रापकोऽभिधीयते सदुपदेशात् ।

---

१. **तुच्छए इत्यादि** ख, **तुच्छएत्यादि** ग । २. **जलरहितः** ख । ३. **०तः[ भावतो ज्ञानरहितः ], स हि क्वचित्** ग । ४. **०रहितः स्वैरी, ज्ञान०** ख । ५. **कषाय-विषमहागद०** ख । ६. **सुवसुर्मुनि०** ङ विना । ७. **न च ग्लायति वक्तुम्** ख । ८. **०ज्ञानाच्चानुष्ठानाच्च** ख । ९. **सुमुनि०** क, **सुवसुर्मुनि०** ग च । १०. **अच्चे इत्यादि** ख । ११. **स** इति कपुस्तके नास्ति । १२. **एव** ख घ ङ । १३. **०दाज्ञानतिवर्तको** ग । १४. **वीरः** इति क-गप्रत्योर्न वर्तते । १५. **ततः** ख । १६. **धन-धान्य-हिरण्य०** ख । १७. **सार्धं यो योगस्तं योगम् अत्येति** ग । १८. **अत्येति इत्यतिलङ्घयती०** ख ।

स्यादेतत्—किम्भूतोऽसावुपदेशः ? इत्यत[१] आह—

**जं दुक्ख**[२]मित्यादि । यद् दुःखं दुःखकारणं वा कर्म लोकसंयोगात्मकं वा **प्रवेदितं** तीर्थकृद्भिरावेदितम् **इह** अस्मिन् संसारे **मानवानां** जन्तूनाम्, ततः किम् ? **तस्य दुःखस्य** असातलक्षणस्य[३] कर्मणो वा **कुशलाः** निपुणा धर्मकथालब्धिसम्पन्नाः स्वसमय-परसमयविद उद्युक्तविहारिणो यथावादिनस्तथाकारिणो जितनिद्रा जितेन्द्रिया देश-कालादिक्रमज्ञास्ते एवम्भूताः **परिज्ञाम्** उपादानकारणपरिज्ञानं निरोधकारणपरिच्छेदं च **उदाहरन्ति** ज्ञपरिज्ञया, प्रत्याख्यानपरिज्ञया च परिहरन्ति परिहारयन्ति च[४] । किञ्च—

**इति कम्मं**[५] इत्यादि । **इतिः**[६] पूर्वप्रक्रान्तपरामर्शकः यत् तद् दुःखं प्रवेदितं मनुजानाम्, यस्य च दुःखस्य परिज्ञां कुशला उदाहरन्ति तद् दुःखं कर्मकृतं तत् **कर्मा**ष्टप्रकारं परिज्ञाय तदास्रवद्वाराणि[७] च[८], तद्यथा—ज्ञानप्रत्यनीकतया ज्ञानावरणीयमित्यादि । प्रत्याख्यानपरिज्ञया प्रत्याख्याय तदास्रवद्वारेषु[९] सर्वशः सर्वैः प्रकारैर्योगत्रिक-करणत्रिकरूपैर्न वर्तेत[१०] । अथवा सर्वशः परिज्ञाय कथयति, सर्वशः परिज्ञानं च केवलिनो गणधरस्य चतुर्दशपूर्वविदो वा । यदि वा सर्वशः कथयति आक्षेपण्याद्या चतुर्विधया धर्मकथयेति । सा च कीदृक्कथा ? इत्याह—

**जे** इत्यादि । अन्यद् द्रष्टुं शीलमस्येत्यन्यदर्शी, यस्तथा नासौ **अनन्यदर्शी** यथावस्थितपदार्थद्रष्टा । कश्चैवम्भूतः ? यः सम्यग्दृष्टिर्मौनीन्द्रप्रवचनावि-[११]र्भूततत्त्वार्थः । यश्चानन्यदृष्टिः सः **अनन्यारामः**[१२] मोक्षमार्गादन्यत्र न रमते । हेतुहेतुमद्भावेन सूत्रं लगयितुमाह—**जे** इत्यादि । यश्च भगवदुपदेशादन्यत्र न रमते सोऽनन्यदर्शी, यश्चैवम्भूतः सोऽन्यत्र न रमत इति, उक्तं च—

**शिवमस्तु कुशास्त्राणां वैशेषिक-षष्टितन्त्र[१३]-बौद्धानाम् ।**
**येषां दुर्विहितत्वाद् भगवत्यनुरज्यते चेतः ॥** [ ] इत्यादि ।

---

१. इत्याह ख । २. **दुक्खं इत्यादि** ख, **दुखमित्यादि** ग । ३. **असातस्य कर्मणो** ख । ४. **च** इति क-खप्रत्योर्न । ५. **कमा इत्यादि** क च । ६. **इति च पूर्व०** ख, **इति पूर्व०** ग च । ७. **तदाश्रव०** ख ङ च । ८. **च, यथा** ख । ९. **तदाश्रव०** ख ङ च । १०. **वर्तते** क ग ङ । ११. **०ग्दृष्टिमौनीन्द्र०** ग । १२. ''ण अण्णत्थारामतीति **अणण्णारामो**'' चूर्णौ । १३. ''**षष्टितन्त्र** इति साङ्ख्यकम्'' जै०वि०प० ।

तदेवं सम्यक्त्वस्वरूपमाख्यातम् । कथयंश्चारक्तद्विष्टः कथयतीति दर्शयति–

**[सू०१०२] जहा पुण्णस्स कत्थति तहा तुच्छस्स कत्थति ।**

**जहा तुच्छस्स कत्थति तहा पुण्णस्स कत्थति ।**

**अवि य हणे अणातियमाणे । एत्थं पि जाण सेयं ति णत्थि ।**

**केऽयं पुरिसे कं च णए ।**

**[सू०१०३] एस वीरे पसंसिए जे बद्धे पडिमोयए, उड्ढं अहं तिरियं दिसासु,**

**से सव्वतो सव्वपरिण्णाचारी ण लिप्पति छणपदेण वीरे ।**

**जहा पुन्नस्स** इत्यादि । तीर्थकर-गणधरा-ऽऽचार्यादिना येन प्रकारेण पुण्यवतः सुरेश्वर-चक्रवर्ति-माण्डलिकादेः **कथ्यते** उपदेशो दीयते **तथा**[1] तेनैव प्रकारेण **तुच्छस्य** द्रमकस्य काष्ठहारकादेः[2] कथ्यते । अथवा पूर्णः जाति-कुल-रूपाद्युपेतः, तद्विपरीतः तुच्छः । विज्ञानवान् वा पूर्णस्ततोऽन्यस्तुच्छ इति, उक्तं च–

**ज्ञानैश्वर्य-धनोपेतो जात्यन्वय-बलान्वितः ।**
**तेजस्वी मतिमान् ख्यातः पूर्णस्तुच्छो विपर्ययात् ॥ [ ]**

एतदुक्तं भवति–यथा द्रमकादेस्तदनुग्रहबुद्ध्या प्रत्युपकारनिरपेक्षः कथयति एवं चक्रवर्त्यादेरपि, यथा वा चक्रवर्त्यादेः कथयत्यादरेण संसारोत्तरण-हेतुमेवमितरस्यापि । अत्र च[3] निरीहता विवक्षिता ।

---

१. **तथा** इति कपुस्तके नास्ति । २. **काष्ठाहारकादेः** ग । ३. **च** इति खप्रतौ न ।

न पुनरयं नियमः-एकरूपतयैव कथनीयम्, तथाहि—यो यथा बुध्यते तस्य तथा कथ्यते । बुद्धिमतो निपुणम्, स्थूलबुद्धेस्त्वन्यथेति[1] । राज्ञश्च कथयता तदभिप्रायमनुवर्तमानेन कथनीयम्, 'किमसावभिगृहीतमिथ्यादृष्टिः, अनभिगृहीता वा संशीत्यापन्नो वा ? अभिगृहीतोऽपि कुतीर्थिकव्युद्ग्राहितः[2], स्वत एव वा ?' तस्य चैवम्भूतस्य यद्येवं कथयेद् यथा—

**[3]दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।**
**दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥** [मनुस्मृति० ८५]

तद्भक्तिविषयरुद्रादिदेवता[4]दारुवन[5]चरितकथने च मोहोदयात् तथाविध-[6]कर्मोदये कदाचिदसौ द्वेषमुपगच्छेत्[7], द्विष्टश्चैतद्[8] विदध्यादिति, आह च-

**अवि [9]य** इत्यादि । [10]अपि सम्भावने—आस्तां तावद् वाचा [illegible] अनाद्रियमाणो हन्यादपि, चशब्दाद् अन्यदप्येवंजातीयं क्रोधाभिभूतो दण्डकशा-दिना ताडयेदिति, उक्तं च—

**तत्थेव य [11]निट्ठुवणं बंधण निच्छुभण कडगमद्दो वा ।**
**निव्विसयं व [12]नरिंदो करेज्ज संघं पि सो [13]कुद्धो ॥** [ ]

तथा—[14]तच्चन्निकोपासको [15]**नन्दावला**कुक्षिमुद्दिश्य **बुद्धो** जातः इति बुद्धोत्पत्तिकथानकात्, भागवतो वा [16]**भल्लिगृहो**पाख्यानात्, रौद्रो वा **पेढालपुत्र**-[17]**सत्यक्युमा**दिव्यतिकराकर्णनात् प्रद्वेषमुपगच्छेत्, द्रमक-काणकुण्टादिर्वा कश्चित् [18]तमेवोद्दिश्योद्दिश्याधर्म[19]फलोपप्रदर्शनेनेति ।

---

१. **०बुद्धेरन्यथेति** क । २. **कुतीर्थिकैर्व्युद्ग्राहितः** क-गपुस्तके ऋते । ३. **दशशूना-समश्चक्री दशचक्रिसमो ध्वजः** घ ङ । ४. **०देवताभवन-दारुवन०** घ, **०देवताभवनचरित०** ङ । ५. "**दारुवन** इति नाट्यारम्भः" जै०वि०प० । ६. **०कर्मोदयात्** क । ७. **प्रद्वेष०** ग च ङ । ८. **प्रद्विष्ट०** ख । ९. **अ** ख । १०. **अपिः** ख घ ङ । ११. "**निट्ठुवणमिति** मारणम्" जै०वि०प० । १२. **च** ग । १३. **कुट्ठो** ग । १४. **तच्चनिको०** ङ । १५. **नन्दबलाद् बुद्धोत्पत्तिकथानकात्**, कआदर्शं विना, "**नन्दा( न्द ? )बलाद्** इति नन्दा कुक्षिमुद्दिश्य भञ्जाता" जै०वि०प०, "णंदवलाए बुद्धुप्पत्तीए" चूर्णौ । १६. "**इ( भ )ल्लिगृह** इति राजकुमारेण भल्ल्या विद्धः नरकं गतः" जै०वि०प० । १७. **०सत्यक्युमाव्यतिकरा०** कपुस्तकमृते । १८. **तमेवोद्दिश्याधर्म०** क ख ग, **तमेवोद्दिश्य धर्म०** च । १९. **०फलोपदर्शनेनेति** ग घ ।

एवमविधिकथनेनेहैव तावद् बाधा, आमुष्मिकोऽपि न कश्चिद् गुणो[1]ऽस्तीति, आह च—

**एत्थं[2] पि** इत्यादि । मुमुक्षोः परहितार्थं धर्मकथां कथयतस्तावत् पुण्यमस्ति, परिषदं[3] त्वविदित्वाऽनन्तरोपवर्णितस्वरूपकथने **अत्रापि** धर्मकथायामपि **श्रेयः** पुण्य**मि**त्येतन्**नास्ती**त्येवं जानीहि । यदि वाऽसौ राजादिरनाद्रियमाणस्तं साधुं धर्मकथिक[4]मपि हन्यात् । किम्[5] ? इत्याह—**एत्थं[6] पी**त्यादि । यद् यद् असौ पशुवध-तर्पणादिकं धर्मकारणमुपन्यस्यति तत् तद् असौ[7] धर्मकथिकः 'अत्रापि श्रेयो न विद्यते, ★[8] अत्रापि[9] श्रेयो न विद्यते ★ इत्येवं प्रतिहन्ति । यदि वा यद् यद् अविधिकथनं तत्र तत्रेदमुपतिष्ठति—अत्रापि श्रेयो नास्तीति, तथाहि—अक्षरकोविदपर्षदि[10] पक्ष-हेतु-दृष्टान्ताननाहृत्य **प्राकृतभाषया** कथनमविधिः, इतरस्यां[11] चान्यथेति । एवं च प्रवचनस्य हीलनैव केवलम्, कर्मबन्धश्च, न पुनः श्रेयः, विधिमजानानस्य मौनमेव श्रेय इति, उक्तं च—

> **सावज्ज-ऽणवज्जाणं वयणाणं जो न याणइ विसेसं ।**
> **वोत्तुं[12] पि तस्स न खमं किमंग पुण देसणं काउं ? ॥** [ ]

स्यादेतत्—कथं तर्हि धर्मकथा कार्या ? इत्युच्यते—**केऽय[13]**मित्यादि । यो हि वश्येन्द्रियो विषयविषपराङ्मुखः संसारोद्विग्नमना वैराग्याकृष्यमाणहृदयो धर्मं पृच्छति तेनाचार्यादिना धर्मकथिकेनासौ[14] पर्यालोचनीयः—कोऽयं पुरुषः[15] ? मिथ्यादृष्टिरुत भद्रकः ? केन वाऽऽशयेनायं पृच्छति ? कं च[16] देवताविशेषं[17] नतः ? किमनेन दर्शनमाश्रितम् ? इत्येवमालोच्य यथायोग्यमुत्तरकालं कथनीयम्[18] । एतदुक्तं भवति—धर्मकथाविधिज्ञो ह्यात्मना परिपूर्णः श्रोतारमालोचयति द्रव्यतः, क्षेत्रतः किमिदं क्षेत्रं तच्चन्निकैर्भागवतैरन्यैर्वा[19] तज्जातीयैः

---

१. **गुणोऽपीत्याह**—ख । २. **एत्थ इत्यादि** ख, **एत्थमित्यादि** च । ३. **पर्षदमविदित्वा** ख च । ४. **धर्मकथक०** ग । ५. **कथम् ?** घ ङ । ६. **एत्थं पि इत्यादि** ख च । ७. **धर्मकथकः** ग । ८. ★ ★ एतादृगाकृत्यन्तर्गतः पाठः ग-चप्रत्योर्नास्ति । ९. **अत्रापि न विद्यते** घ ङ । १०. **०परिषदि** ग घ ङ । ११. **इतरस्या वान्यथेति** ग । १२. **वुत्तुं** घ ङ । १३. **के यं इत्यादि** ख च । १४. **धर्मकथकेनासौ** ग । १५. **पुरुषः** इति खप्रतौ नास्ति । १६. **वा** ग । १७. **०विशेषं न नतः ?** घ । १८. **कथनम् । एतदु०** ख । १९. **तच्चनिकैर्भागवत्तैर्वा** ख, **तच्चनिकै०** घ ।

पार्श्वस्थादिभिर्वोत्सर्गरुचिभिर्वा भावितम्, कालतो दुःषमादिकं कालं दुर्लभद्रव्यकालं वा, भावतोऽरक्त-द्विष्ट-मध्यस्थभावापन्नम्, एवं पर्यालोच्य यथा यथाऽसौ बुध्यते तथा तथा धर्मकथा कार्या । एवमसौ [1]धर्मकथायोग्यः । अपरस्य त्वधिकार एव नास्तीति, उक्तं च–

**जो [2]हेउवायपक्खम्मि हेउओ आगमम्मि आगमिओ ।**
**सो ससमयपण्णवओ सिद्धंतविराहओ अण्णो ॥** [ ]

य [3]एवं धर्मकथाविधिज्ञः स एव प्रशस्त [4]इति, आह च–

**एस** इत्यादि । यो हि पुण्या-ऽपुण्यवतोर्धर्मकथासमदृष्टिर्विधिज्ञः श्रोतृविवेचकः **एषः** अनन्तरोक्तः **वीरः** कर्मविदारकः **प्रशंसितः** श्लाघितः । किम्भूतश्च यो भवति ? [5]इत्याह–

**जे [6]बद्धे** इत्यादि । यो ह्यष्टप्रकारेण कर्मणा [7]स्नेहनिगडादिना वा बद्धानां जन्तूनां प्रतिमोचको धर्मकथो[8]पदेशदानादिना, स च तीर्थकृद् गणधर आचार्यादिर्वा यथोक्तधर्मकथाविधिज्ञ इति । क्व पुनर्व्यवस्थितान् जन्तून् मोचयति ? इत्याह– [9]**उड्ढम**त्यादि । [10]ऊर्ध्वं ज्योतिष्कादीन्, अधः भवनपत्यादीन्, [11]तिर्यग्दिक्षु मनुष्यादीनिति । [12]किञ्च–

**से सव्वओ** इत्यादि । **स** इति वीरो बद्धप्रतिमोचकः **सर्वतः** सर्वकालं सर्वपरिज्ञया द्विविधयाऽपि चरितुं शीलमस्येति **सर्वपरिज्ञाचारी** विशिष्टज्ञानान्वितः सर्वसंवरचारित्रोपेतो वा । स एवम्भूतः कं गुणमवाप्नोति ? इत्याह–

**न लिप्पई**त्यादि । न [13]लिप्यते [14]नावगुण्ठ्यते, [15]केन ? [16]**क्षणपदेन** हिंसास्पदेन प्राण्युपमर्दजनितेन, [17]क्षणु **हिंसायाम्** [पा०धा० १४६६] इत्यस्यैतद्रूपम्, कोऽसौ ? **वीर** [18]इति । किमेतावदेव वीरलक्षणमुतान्यदप्यस्ति ? इत्याह–

---

१. **धर्मकथायोगः** ग । २. **हेउपक्खवायम्मि हेउओ आगमे य आगमिओ** ख । ३. **एव** ग च । ४. **इत्याह** ख ग । ५. **इत्याह च** क । ६. **बद्धेत्यादि** ङ । ७. **स्नेहादिनिगडादिना** च । ८. **०पदेशनादिना** च । ९. **उड्ढं इत्यादि** ख, **उद्धं इत्यादि** च । १०. **ऊर्द्ध** ख ग च । ११. **तिर्यक्षु मनु०** ख चप्रतौ विना । १२. **किञ्च** इति ङपुस्तके न वर्तते । १३. "लिप्पति त्ति जुज्जति" चूर्णौ । १४. **न गुण्ठ्यते** क । १५. **केन** इति ङप्रतौ नास्ति । १६. **क्षणपदेन** ग ङआदर्शौ विना । १७. **क्षण** क-प्रतौ ऋते । १८. **इति** इति क-गप्रत्योर्न ।

**[सू०१०४] से मेधावी जे अणुग्घातणस्स खेत्तण्णे जे य बंधपमोक्खमण्णेसी । कुसले पुण णो बद्धे णो मुक्के ।**

**से जं च आरभे, जं च णारभे, अणारद्धं च ण आरभे ।**

**छणं छणं परिण्णाय लोगसण्णं च सव्वसो ।**

**[सू०१०५] उद्देसो पासगस्स णत्थि ।**

**बाले पुण णिहे कामसमणुण्णे असमितदुक्खे दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टति त्ति बेमि ।**

**॥ बीयमज्झयणं लोगविजयो सम्मत्तं ॥**

**से [1]मेहावी** इत्यादि । **[2]स [3]मेधावी** बुद्धिमान् यः **अणोद्घातनस्य खेदज्ञः** अणत्यने[4]न जन्तुगणश्चतुर्गतिकं संसारमिति अणं कर्म, तस्य उत् प्राबल्येन घातनम् अपनयनं तस्य तत्र वा **खेदज्ञः** निपुणः, इह हि कर्मक्षपणोद्यतानां मुमुक्षूणां यः कर्मक्षपणविधिज्ञः **स मेधावी** कुशलो **वीर** इत्युक्तं भवति ।

किञ्चान्यत्—**[5]जे [6]य** इत्यादि । यश्च प्रकृति-स्थित्यनुभाव-प्रदेशरूपस्य चतुर्विधस्यापि बन्धस्य यः प्रमोक्षः तदुपायो वा तम् अन्वेष्टुं मृगयितुं शीलमस्येत्यन्वेषी, यश्चैवम्भूतः स वीरो मेधावी खेदज्ञ इति पूर्वेण सम्बन्धः । **अणोद्घातनस्य खेदज्ञ** इत्यनेन मूलोत्तरप्रकृतिभेदभिन्नस्य योगनिमित्तायातस्य कषायस्थितिकस्य कर्मणो बध्यमानावस्थां बद्ध-स्पृष्ट-निधत्त-निकाचितरूपां तदपनयनोपायं च वेत्तीत्येतदभिहितम्, अनेन चापनयनानुष्ठानमिति न पुनरुक्तदोषानुषङ्गः प्रसजति ।

स्यादेतत्—योऽयमणोद्घातनस्य खेदज्ञो बन्ध-मोक्षान्वेषको वाऽभिहितः स किं छद्मस्थ आहोस्वित् केवली ? केवलिनो यथोक्तविशेषणासम्भवात् [7]छद्मस्थस्य ग्रहणम्, केवलिनस्तर्हि का वार्ता ? इत्युच्यते—**[8]कुसले** इत्यादि ।

---

१. **मेहावीत्यादि** ग घ ङ । २. **से मेहावी बुद्धिमान्** च । ३. "मेहया धावतीति **मेधावी**" चूर्णौ । ४. **०न चतुर्गतिकं** ख । ५. **जे इत्यादि** ग । ६. **अ** ख । ७. **छद्मस्थग्रहणम्** ङ । ८. **कुसलेत्यादि** ग च ।

कुशलोऽत्र क्षीणघातिकर्मांशो विवक्षितः, स च तीर्थकृत् सामान्यकेवली वा । छद्मस्थो हि कर्मणा बद्धो मोक्षार्थी तदुपायन्वेषकः, केवली तु[1] पुनर्घातिकर्मक्षयाद्[2] नो बद्धः, [3]भवोपग्राहिकर्मसद्भावाद् नो मुक्तः । यदि वा छद्मस्थ एवाभिधीयते कुशलः अवाप्तज्ञान-दर्शन-चारित्रो मिथ्यात्व-द्वादशकषायोपशम-क्षयोपशमसद्भावात् तदुदयवानिव न बद्धः, अद्यापि तत्सत्कर्मतासद्भावाद् नो मुक्तः इति ।

एवम्भूतश्च स[4] कुशलः केवली छद्मस्थो वा यद् [5]आचीर्णवानाचरति वा तद् अपरेणापि मुमुक्षुणा [6]विधेयमिति दर्शयति—**से [7]जं च** इत्यादि । स कुशलो यद् **आरभते** आरब्धवान् वा अशेषकर्म[8]क्षपणोपायं संयमानुष्ठानम्, **यच्च नारभते** मिथ्यात्वा-ऽविरत्यादिकं संसारकारणं तद् आरब्धव्यमारम्भणीयम् अनारब्ध-मनारम्भणीयं चेति, संसारकारणस्य च मिथ्यात्वा-ऽविरत्यादेः प्राणाति-पाताद्यष्टादशरूपस्य चैकान्तेन निराकार्यत्वात्, तन्निषेधे च [9]विधेयस्य संयमानुष्ठानस्य सामर्थ्यायातत्वात् तन्निषेधमाह—

**अणारद्धं चे**त्यादि । अनारब्धम् अनाचीर्णं केवलिभिर्विशिष्टमुनिभिर्वा तन्मुमुक्षुः [10]**नारभेत** [11]न कुर्यादित्युपदेशः, यच्च मोक्षाङ्गमाचीर्णं तत् कुर्यादित्युक्तं भवति । यत् तद् भगवदनाचीर्णं परिहार्यं तद् नामग्राहमाह—

**छणं** [12]**छण**मित्यादि । **क्षणु हिंसायाम्** [पा०धा० १४६६] क्षणनं क्षणः हिंसनम्, कारणे कार्योपचाराद् येन येन प्रकारेण हिंसोत्पद्यते तत् तद् [13]ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेत् । यदि वा क्षणः अवसरः कर्तव्यकालस्तं [14]तं ज्ञपरिज्ञया ज्ञात्वा, आसेवनापरिज्ञया [15]च आचरेदिति ।

किञ्च—[16]**लोयसन्न**मित्यादि । लोकस्य गृहस्थलोकस्य संज्ञानं संज्ञा

१. तु इति खप्रतौ नास्ति । २. ''**पुण** विसेसणे, किं विसेसेइ ?—अन्ने वि कुसला साहू'' चूर्णौ । ३. **भवोपग्राहिककर्म०** च । ४. **स** इति कप्रतावेव । ५. **आचीर्णवान् यदाचरति** वा ख । ६. **विधेयम् । से जं च** ग । ७. ज्जं ख । ८. **०क्षयोपायं** ख । ९. **विधेयसंयमा०** घ ङ । १०. **नारभते** ग घ ङ । ११. **नो** ख च । १२. **छणं इत्यादि** ख ग । १३. **ज्ञपरिज्ञया ज्ञात्वा प्रत्या०** ख ग च । १४. **तं ज्ञात्वा ज्ञपरिज्ञया, आसेवना०** ख ग च । १५. **च** इति कपुस्तके नास्ति, **वाचरेदिति** ग घ च । १६. **लोयसण्णं इत्यादि** ख च ।

विषयाभिष्वङ्गजनितसुखेच्छा परिग्रहसंज्ञा वा तां [1]च ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च परिहरेत् । कथम् ? **सर्वशः** सर्वैः प्रकारैर्योगत्रिक-करणत्रिकेणेत्यर्थः ।

तस्यैवंविधस्य यथोक्तगुणावस्थितस्य धर्मकथाविधिज्ञस्य बद्धप्रतिमोचकस्य [2]कर्मोद्घातनखेदज्ञस्य बन्ध-मोक्षान्वेषिणः सत्पथव्यवस्थितस्य [3]कुमार्गनिराचिकीर्षोर्हिंसाद्यष्टादशपापस्थानविरतस्यावगतलोकसंज्ञस्य यद् भवति तद् दर्शयति—**उद्देसो** इत्यादि । उद्दिश्यते [4]नारकादिव्यपदेशेनेत्युद्देशः, स पश्यकस्य परमार्थदृशो न विद्यते । इत्यादीनि च सूत्राण्युद्देशकपरिसमाप्तिं यावत् **तृतीयोद्देशके** व्याख्यातानि, तत एवार्थोऽवगन्तव्यः, आक्षेप-परिहारौ चेति । तानि चामूनि—बालः पुनर्निहः कामसमनुज्ञः अशमितदुःखः दुःखी दुःखा[5]नामेवार्तमनुपरिवर्तते । [6]**इतिः** परिसमाप्तौ । **ब्रवीमि** इति पूर्ववत् । [7]★ [ग्रन्थाग्रम् २५००]★

उक्तः षष्ठोद्देशकः । तत्परिसमाप्तौ [8]चोक्तः सूत्रानुगमः सूत्रालापक[9]निष्पन्ननिक्षेपश्च ससूत्रस्पर्शनिर्युक्तिकः ।

साम्प्रतं नैगमादयो नयाः । [10]ते चान्यत्र न्यक्षेण प्रतिपादिता [11]इति इह तु न प्रतन्यन्ते, सङ्क्षेपतस्तु ज्ञान-क्रियानयद्वयान्तर्गत[12]त्वात् तेषाम् तावेव प्रतिपाद्येते, तयोरप्यात्मीयपक्षसावधारणतया मोक्षाङ्गत्वाभावात् प्रत्येकं मिथ्यादृष्टित्वम्, अतः पङ्ग्वन्धवत् परस्परसापेक्षतयेष्ट[13]कार्यावाप्तिरवगन्तव्येति उपरम्य[14]ते ॥

[15]**इति लोकविजयाध्ययनटीका समाप्ता ॥ छ ॥**

● ● ●

१. "चसद्दो (द्दा) आयसण्णं च" चूर्णौ । २. **कर्मोद्घाटन०** ख च । ३. **कुमार्गं तित्यक्षोर्हिंसा०** ख, **कुमार्गं चिकीर्षो०** ग । ४. **नरकादि०** क । ५. **०मेवावर्तमनु०** घ ङ । ६. **इति** ग ङ च । ७. ★★ नास्त्येतच्चिह्नान्तर्वर्ती पाठः क-ख-चप्रतिषु । ८. **प्रोक्तः** ग । ९. **०निष्पन्नः निक्षेपश्च** घ ङ । १०. **तेऽन्यत्र** च । ११. **इति नेह प्रतन्यन्ते** ख च । १२. **०त्वात् तावेव** क ग घ । १३. **०कार्यावाप्तिरिति उप०** ख । १४. **०ते ॥ छ ॥ समाप्ता लोकविजयाध्ययनटीकेति ॥ छ ॥** ख, **०ते ॥ छ ॥ समाप्ता लोगविजयाध्ययनस्य टीकेति** *॥ छ ॥ ग्रन्थाग्रम्—२५०० ।* च १५. *इति परिसमाप्ता लोकविजयटीका ॥ छ ॥* ङ ।

उक्तं द्वितीयमध्ययनम् । साम्प्रतं तृतीयमारभ्यते । [1]अस्य चायमभिसम्बन्धः—तत्र शस्त्रपरिज्ञायामस्यार्थाधिकारोऽभाणि यथा—शीतोष्णयोरनुकूलप्रतिकूल[2]परीषहयोररतिसहनं कर्तव्यम्, तदधुना प्रतिपाद्यते । अध्ययनसम्बन्धस्तु शस्त्रपरिज्ञोक्तमहाव्रतसम्पन्नस्य लोकविजयाध्ययनप्रसिद्धसंयमव्यवस्थितस्य विजितकषायादिलोकस्य मुमुक्षोः कदा[3]चिदनुलोम-प्रतिलोमाः [4]परीषहाः प्रादुःषन्ति, तेऽविकृतान्तःकरणेन सम्यक् सोढव्या इत्यनेन सम्बन्धेनायातमिदमध्ययनम् । अस्य चोपक्रमादीनि चत्वार्यनुयोगद्वाराणि [5]भवन्ति । तत्रोपक्रमेऽर्थाधिकारो द्वेधा । [6]तत्राप्यध्ययनार्थाधिकारोऽभिहितः । उद्देशार्थाधिकारप्रतिपादनार्थं तु **निर्युक्तिकार** आह—

**पढमे सुत्ता [7]अस्संजय त्ति बिइए दुहं अणुहवंति ।**
**[8]तइए ण हु दुक्खेणं अकरणयाए [9]व समणो त्ति ॥१९९॥**

**उद्देसम्मि चउत्थे अहिगारो उ वमणं कसायाणं ।**
**पाव[10]विरई उ विउणो [11]उ संजमो [12]एत्थ [13]मुक्खु त्ति ॥२००॥**

**पढमे** इत्यादि । **उद्देसम्मि** इत्यादि । प्रथमोद्देशकेऽयमर्थाधिकारो यथा भावनिद्रया सुप्ताः *सम्यग्विवेकरहिताः, के ? असंयताः गृहस्थाः*, तेषां च भावसुप्तानां दोषा अभिधीयन्ते, जाग्रतां च गुणाः, तद्यथा—**जरा[14]मच्चुवसोवणीए नरे** इत्यादि । द्विती[15]ये तु त एवासंय[16]ता यथा भावनिद्रापन्ना दुःखमनुभवन्ति तथोच्यते, [17]तद्यथा—**कामेसु गिद्धा निचयं [18]करेंति** । तृतीये तु 'न हु' नैव दुःखसहनादेव केवलात् श्रमणः अकरणतयैव अक्रिययैव संयमानुष्ठान-

१. **तस्य** क, **अस्यायमभि०** ख । २. **०परिषह०** ङ । ३. **०चित्प्रतिलोमा-ऽनुलोमाः** ख च । ४. **परिषहाः प्रादुःष्यन्ति** ग । ५. **भवन्ति** इति खप्रतौ नास्ति । ६. **तत्राध्ययना०** क । ७. **अस्संजयंति बिइए** ज, **अस्संजतो( त )त्ति बीए** ञ । ८. **ततिए** ञ । ९. **अ** छ । १०. **०विरईओ** ख । ११. **य** ञ । १२. **इत्थ** ठ । १३. **मोक्खो त्ति** ख छ ञ, **मुक्खोत्ति** ज, **मोक्ख त्ति** झ । १४. **०मच्चूवसोमणीए नरो** क । १५. **०ये तदेवासंयता** क, **०ये तु तदेवासंयता** घ । १६. **०ता ये भाव०** ख । १७. नास्ति **तद्यथा** इति खप्रतौ । १८. **करेति** घ ।

पन्नरेणेत्यर्थः, वक्ष्यति च—**सहिए दुक्खमायाए[1] तेणेव य पुट्ठो नो झंझाए ।** चतुर्थोद्देशके त्वयमर्थाधिकारो[2] यथा—कषायाणां वमनं[3] कार्यम् पापस्य च[4] कर्मणो विरतिः, विदुषः विदितवेद्यस्य संयमोऽत्रैव प्रतिपाद्यते, क्षपकश्रेणिप्रक्रमाप्तकेवलभवोपग्राहिक्षयान्मोक्षश्चेति गाथाद्वयार्थः ॥१९९-२००॥

नामनिष्पन्ने तु निक्षेपे शीतोष्णीयम्[5], अतः शीतोष्णयोर्निक्षेपं निर्दिदिक्षुराह—

**नामं ठवणा सीयं दव्वे भावे य होइ नायव्वं ।**
**एमेव य उण्हस्स वि[6] चउव्विहो होइ निक्खेवो ॥२०१॥**

**नामं ठवणा**[7] इत्यादि । सुगमा ॥२०१॥ तत्र नाम-स्थापने अनादृत्य द्रव्यशीतोष्णे दर्शयितुमाह—

**दव्वे सीयलदव्वं दव्वुण्हं चेव[8] होइ उण्हं तु ।**
**भावे उ[9] पुग्गलगुणो[10] जीवस्स गुणो अणेगविहो ॥२०२॥**

**दव्वे** इत्यादि । ज्ञशरीर-भव्यशरीरव्यतिरिक्तं द्रव्यशीतं शीतगुणोपेतं गुण-गुणिनोरभेदात् शीतकारणं वा यद् द्रव्यं द्रव्यप्राधान्यात्, शीतलद्रव्यमेव द्रव्यशीतं हिम-तुषार-करक-हारादि[11][12] । एवं द्रव्योष्णमपीति । भावतस्तु द्वेधा पुद्गलाश्रितं जीवाश्रितं च गाथाशकलेनाचष्टे—तत्र पुद्गलाश्रितं भावशीतं पुद्गलस्य शीतो[13] गुणः, गुणस्य[14] प्राधान्यविवक्षयेति । एवं भावोष्णमपि । जीवस्य तु शीतोष्णरूपोऽनेकविधो गुणः, तद्यथा—औदयिकादयः षड् भावाः । तत्रौदयिकः कर्मोदयाविर्भूतनारकादिभवकषायोत्पत्तिलक्षण उष्णः । औपशमिकः कर्मोपशमावाप्तसम्यक्त्वविरतिस्वरूपः शीतः । क्षायिकोऽपि शीत[15] एव,

---

१. ०मादाय णो वुद्धो ( ट्ठो ? ) णो सं( झं )ज्झाए ख, ०मादाय तेणेव य पुट्ठो च । २. त्वयमधिकारो कपुस्तकमृते । ३. दमनं ख । ४. च इति खपुस्तके न । ५. शीतोष्णीयमध्ययनम्, अतः घ ङ । ६. वि निक्खेवे( वो ) चउव्विहो होति ञ । ७. ठवणेत्यादि ग । ८. चेव उण्हदव्वं तु ख ज ठ, चेव उण्हदव्वं च ञ । ९. य ठ । १०. पोग्गल० छ ज झ ञ । ११. हिम-करक-तुषार-हारादि ख, हिम-तुषार-क-हारादि ग । १२. ०करकादि क च, कर-हारादि घ । १३. शीतगुणः ख । १४. ०स्य च प्राधान्य० घ ङ । १५. शीतः, क्षायिक० ख ।

क्षायिकसम्यक्त्व-चारित्रादिरूपत्वात् । अथवाऽशेषकर्मदाहान्यथानुपपत्तेरुष्णः । शेषा अपि विवक्षातो द्विरूपा अपीति ॥२०२॥

अस्य च जीवभावगुणस्य शीतोष्णविवेकं स्वत एव **निर्युक्तिकारः** प्रचिकटयिषुराह—

**सीयं परीसह [१]पमायुवसम [२]विरई सुहं च, उण्हं [३]तु ।**
**[४]परिसहतवुज्जमकसायसोगवेयारई दुक्खं ॥२०३॥** [५]दारगाहा ॥

[६]**सीय**मित्यादि । शीतम् इति भावशीतम्, तच्चेह जीवपरिणामस्वरूपं गृह्यते, स चायं परिणामः—मार्गाच्यवन-निर्जरार्थं [७]परिषोढव्याः परीषहाः । प्रमादः कार्यशैथिल्यं शीतलविहारता, उपशमः मोहनीयोपशमः, स च सम्यक्त्व-देशविरति-सर्वविरतिलक्षणः, उपशमश्रेण्याश्रितो वा, [८]तत्क्षयो वेति । [९]विरतिः इति प्राणातिपातादिविरत्युपलक्षितः सप्तदशविधः संयमः । सुखं [१०]च साता-वेदनीयविपाकाविर्भूतम् । एतत् सर्वं [११]परीषहादि शीतम् । उष्णं च गाथाशकलेनाह—[१२]**परीषहाः** [१३]पूर्वव्यावर्णितस्वरूपाः, **तपस्युद्यमः** यथाशक्ति द्वादशप्रकारतपोऽनुष्ठानम्, **कषायाः** [१४]क्रोधादयः, **शोकः** इष्टाप्राप्ति-विनाशोद्भव आधिः, **वेदः** स्त्री-पुं-नपुंसकवेदोदयः, **अरतिः** मोहनीयविपाकाच्चित्तदौस्थ्यम्, **दुःखं** च असातावेदनीयोदयादिति । एतानि [१५]परीषहादीनि पीडाकारित्वादुष्णमिति गाथासमासार्थः ॥२०३॥ व्यासार्थं तु **निर्युक्तिकारः** स्वत एवाचष्टे, तत्र परीषहाः शीतोष्णयोर्द्वयोरप्यभिहिताः, ततो मन्दबुद्धेर[१६]नध्यवसायः संशयो विपर्ययो वा स्यात्, अतस्तदपनोदार्थमाह—

---

१. **पमाय पसम** ख छ ज, **पमाउवसम** झ, **पमायुपसम** ठ । २. **विरती** ञ । ३. **च** क-छप्रती ऋते । ४. सर्वेष्वप्यादर्शेषु **परीसह** इति पाठः । ५. **दारं** ॥ ख ञ । ६. **सीयं इत्यादि** ख च । ७. "**परिषोढव्या** इति सम्यक्सह्यमानाः सीताः" जै०वि०प० । ८. "**तत्क्षये( यो )** मोहनीयक्षयः" जै०वि०प० । ९. **विरतिः प्राणा०** घ । १०. **च** इति कपुस्तके नास्ति । ११. **परिषहादि** ङ । १२. **परिषहाः** ङ । १३. **पूर्ववर्णित०** ग । १४. **क्रोधादय इति, शोकः** ख । १५. **परिषहादीनि** ङ । १६. "**अनध्यवसायम्( यः )** इति न विचारक्षमं द्वयमपि, **संशय** इति शीतं चेद् उष्णं कथम् ? **विपर्य[ य ]** इति एकमेव शीतमुष्णं वा न द्वे" जै०वि०प० ।

**इत्थी सक्कारपरीसहो य दो भावसीयला एए ।**
**सेसा वीसं [1]उण्हा परीसहा [2]होंति नायव्वा ॥२०४॥**

**इत्थी** [3]इत्यादि । स्त्रीपरीषहः सत्कारपरीषहश्च द्वावप्येतौ शीतौ, भावमनोऽनुकूलत्वात् । शेषास्तु पुनर्विंशतिरुष्णा ज्ञातव्या भवन्ति, मनसः प्रतिकूलत्वादिति गाथार्थः ॥२०४॥ यदि वा परीषहाणां शीतोष्णत्वमन्यथाऽऽचष्टे—

**जे तिव्वपरीणामा परीसहा ते भवन्ति उण्हा [4]तु ।**
**जे मंदपरीणामा परीसहा ते भवे सीया ॥२०५॥** दारं ॥

**जे** इत्यादि गाथा । तीव्रः दुःसहः परिणामः परिणतिर्येषां ते तथा, य एवम्भूताः परीषहास्ते उष्णाः । ये तु मन्दपरिणामास्ते शीता इति, इदमुक्तं भवति— ये [5]शारीरदुःखोत्पादकत्वेनोदीर्णाः सम्यक्सहनाभावाच्चाधिविधायिन[6]स्ते तीव्रपरिणामत्वादुष्णाः । ये पुनरुदीर्णाः शारीरमेव केवलं दुःखमुत्पादयन्ति महासत्त्वस्य, न मानसं, ते भावतो मन्दपरिणामाः, । यदि वा ये तीव्रपरिणामाः प्रबलाविर्भूतस्वरूपास्ते उष्णाः, ये तु मन्दपरिणामाः ईषल्लक्ष्यमाणस्वरूपास्ते शीता इति ॥२०५॥ यत् परीषहानन्तरं प्रमादपदमुपन्यस्तं शीतत्वेन यच्च तपस्युद्यम इत्युष्णत्वेन तदुभयं गाथयाऽऽचष्टे—

**धम्मम्मि [7]जो पमायइ अत्थे वा [8]सीयलो [9]त्ति तं [10]बेंति ।**
**उज्जुत्तं पुण अन्नं तत्तो उण्हं ति णं बेंति ॥२०६॥** दारं ॥

[11]**धम्मम्मि जो** इत्यादि । धर्मे श्रमणधर्मे यः प्रमाद्यति नोद्यमं विधत्ते [12]अर्थे वा अर्थ्यत इति अर्थः [13]धन-हिरण्यादिः तत्र [14]तदुपाये वा, [15]शीतल इत्येवं तं ब्रुवते आचक्षते । **उद्युक्तं पुनरन्यं ततः** संयमोद्यमात् कारणाद् **उष्णमित्येवं ब्रुवते** । **णा**मिति वाक्यालङ्कार इति गाथार्थः ॥२०६॥

---

१. तुम्हा क । २. हुंति ख ठ । ३. **इत्यादि गाथा** । क गपुस्तके विना । ४. उ ख ज झ ठ । ५. **शरीर०** घ । ६. **०स्ते च तीव्र०** ख । ७. जे झ । ८. **सीअलो** ज । ९. हि क । १०. **बेति** क, **बिंति** ठ । ११. **धम्मंसि** ख । १२. **अथवा अर्थ्यत** क ग । १३. **धन-धान्य-हिरण्यादिः** घ ङ । १४. "**तदुपाय** इति यः प्रमाद्यति" जै०वि०प० । १५. **शीतलं तं** ख ।

उपशमपदव्याचिख्यासयाऽऽह–

**[१]सीईभूओ [२]परिणिव्वुओ य सन्तो तहेव पण्हाणो ।**
**होउवसन्त[३]कसाओ तेणुवसन्तो [४]भवो सीओ ॥२०७॥** दारं ॥

**[५]सीईभूओ** इत्यादिगाथा । उपशमो हि क्रोधाद्युदयाभावे भवति । ततश्च [६]कषायाग्न्युपशमात् शीतीभूतो भवति, क्रोधादिज्वालानिर्वाणात् परिनिर्वृतो भवति । चः समुच्चये, राग-द्वेषपावकोपशमादुपशान्तः । **तथा** क्रोधादिपरिता[७]पोपशमात् **प्रह्लादितः** आपन्नसुखः । यतो ह्युपशान्तकषाय एव एवम्भूतो भवति तेनोपशान्तकषायः शीतो भवतीति । एकार्थिका[८]नि चैतानीति गाथार्थः ॥२०७॥ अधुना विरतिपदव्याख्यामाह–

**अभयकरो जीवाणं [९]सीयघरो संजमो हवइ [१०]सीओ ।**
**अस्संजमो य उण्हो एसो अन्नो [११]वे [१२]पज्जाओ ॥२०८॥** दारं ॥

**अभय** इत्यादिगाथा । अभयकरणशीलः, केषां ? जीवानाम्, शीतं सुखं [१३]तद्गृहः तदावासः, कोऽसौ ? संयमः सप्तदशभेदः, अतोऽसौ शीतो भवति, समस्तदुःखहेतुद्वन्द्वोपरमात्, एतद्विपर्य[१४]यस्त्वसंयम उष्णः । एषः शीतोष्णलक्षणः संयमा-ऽसंयमयोः पर्यायः, अन्यो वा सुख-दुःखरूपो विवक्षावशाद्भवतीति गाथार्थः ॥२०९॥ साम्प्रतं सुखपदविवरणायाह–

**णिव्वाणसुहं [१५]सायं [१६]सीईभूयं पयं अणाबाहं ।**
**इहमवि जं किंचि सुहं तं सीयं दुक्खमवि उण्हं ॥२०९॥**

**[१७]निव्वाणसुहमि**त्यादिगाथा । सुखं शीतमित्युक्तम् । तच्च समस्त-द्वन्द्वोपरमादात्यन्तिकैकान्तिकानाबाधलक्षणं निरुपाधिकं [१८]परमार्थचिन्तायां

---

१. **सीतीभूतो** ख ञ, **सीतीभूओ** ज झ । २. **परिनिव्वुतो** ज । ३. **०कसातो** ञ । ४. **हवति सीतो** ञ, **भवे जीवो** ख्र । ५. **सीतीभूतो** ख । ६. **कषायाद्युपशमात्** ग । ७. **०पोपशमनात्** ग । ८. **०नि चेति गाथार्थः** ख । ९. **सीयहरो** ञ । १०. **गीओ** छ, **सीतो** ञ । ११. **वि** ञ-ठआदर्शौ विना । १२. **पज्जातो** ञ । १३ **तद्गृहं** घ च । १४. **०यें उष्णः** ङ । १५. **सीयं** झ ञ । १६. **सीतीभूतं सुहं अणाबाधं** ख । १७. **नेव्वाणसुहं इत्यादि** ख । १८. **पारमार्थ०** च ।

मुक्तिसुखमेव सुखम्, नापरम् । एतच्च समस्तकर्मोपतापाभावाच्छीतमिति दर्शयति–**निर्वाणसु[1]खम्** इति, निर्वाणम् अशेषकर्मक्षयः, तदवाप्तौ वा विशिष्टाकाशप्रदेशः तेन तत्र वा सुखं निर्वाणसुखम् । अस्य चैकार्थिकानि–**सातं शीतीभूतं पदमनाबाध**मिति । **इहापि** संसारे **यत्किञ्चित्** सातावेदनीय-विपाकोद्भूतं सातं सुखं तदपि **शीतं** मनआह्लादात्, एतद्विपर्ययस्तु **दुःखम्**, तच्चोष्णमिति गाथार्थः ॥२०९॥ कषायादिपदव्याचिख्यासयाऽऽह–

**डज्झइ तिव्वक[2]साओ सोगऽभिभूओ उ[3]इन्नवेओ य ।**
**उण्हयरो होइ तवो कसायमाई वि जं डहइ ॥२१०॥**

**डज्झइ** इ[4]त्यादिगाथा । दह्यते परिपच्यते । कोऽसौ ? **तीव्रा** उत्कटा उदीर्णा विपाकानुभवेन **कषाया** यस्य स तथा । न केवलं कषायाग्निना दह्यते **शोकाभिभूतश्च**, इष्टवियोगादिजनितः शोकस्तेनाभिभूतः तिरोहितशुभ-व्यापारोऽसावपि दह्यते । तथा **उदीर्णः** विपाकापन्नो **वेदो** यस्य स तथा, उदीर्णवेदो हि पुमान् स्त्रियं कामयते, साऽपीतरम्, नपुंसकस्तूभयमिति, [5]तत्प्राप्त्यभावे काङ्क्षोद्भूतारतिदाहेन दह्यते । **च**शब्दाद् इच्छाकामाप्राप्ति-जनिता[6]रतिपावके[7]न च दह्यते । तदेवं कषायाः शोको वेदोदयश्च दाहकत्वाद् उष्णः, सर्वं वा मोहनीयमष्टप्रकारं वा कर्मोष्णम् । ततोऽपि तद्दाहकत्वाद् उष्णतरं तप इति गाथाशकलेन दर्शयति–**उष्णतरं तपो भवति** । किमिति ? यतः **कषायादिकमपि दहति**, आदिशब्दात् शोकादिपरिग्रह इति गाथार्थः ॥२१०॥ येनाभिप्रायेण द्रव्य-भावभेदभिन्ने परीषह-प्रमादोद्यमादिरूपे शीतोष्णे जगादा-चार्यस्तमभिप्रायमाविःकरोति–

**सी-उण्हफास-सुह-दुह-परीसह-कसाय-वेय-सोयसहो ।**
**होज्ज समणो सया उ[8]ज्जओ य तवसंज[9]मोवसमे ॥२११॥** दारं ॥

---

१. ०सुखम् अशेष० ख । २. ०कसातो ज । ३. उदिण्णवेदो ज । ४. इत्यादि । द० ङ । ५. "तत्प्राप्तिः इति यथासम्भवं घटना" जै०वि०प० । ६. ०रतिदाहकेन ख । ७. ०न दह्यते ख ग च । ८. उज्जुओ क, उज्जतो ज । ९. ०मोवसमो क ज ।

**सीउण्ह**[1] इत्यादिगाथा[2] । शीतं चोष्णं च शीतोष्णे तयोः स्पर्शः तम्, सहत इति सम्बन्धः, शीतस्पर्शोष्णस्पर्शजनितवेदनामनुभवन्[3] नार्तध्यानोपगतो भवतीति यावत् । शरीर-मनसोरनुकूलं सुखमिति,[4] तद्विपरीतं दुःखम्, तथा परीषह-कषाय-वेद-शोकान्[5] शीतोष्णभूतान् सहत[6] इति । तदेवं शीतोष्णादिसहः सन् **भवेत् श्रमणः** यतिः **सदोद्युक्तश्च,** क्व ? तपःसंयमोपशमे इति गाथार्थः ॥२११॥

साम्प्रतमुपसंहारव्याजेन साधुना[7] शीतोष्णातिसहनं कर्तव्यमिति दर्शयति–

**सीयाणि य उण्हाणि य भिक्खूणं होंति[8] विसहियव्वाइं[9] ।**
**कामा ण सेवियव्वा सीउसणिज्जस्स[10] निज्जुत्ती ॥२१२॥**

**णामणिप्फण्णो गैओ[11] ॥छ॥**

**सीयाणि य** इत्यादिगाथा । शीतानि परीषह-प्रमादोपशम-विरति-सुख-रूपाणि यान्यभिहितानि,[12] उष्णानि च परीषह-तपउद्यम-कषाय-शोक-वेदाऽरत्यात्मकानि प्रागभिहितानि तानि भिक्षूणां मुमुक्षूणां[13] विषोढव्यानि, न सुख-दुःखयोरुत्सेक-विषादौ विधेयौ । तानि चैवं सम्यग्दृष्टिना सह्यन्ते यदि कामपरित्यागो भवतीति गाथाशकलेनाह–**कामा** इत्यादि गाथार्धं सुगमम् ॥२१२॥ गतो नामनिष्पन्नो निक्षेपः । साम्प्रतं सूत्रानुगमेऽस्खलितादि-गुणोपेतमशेषदोषव्रातविकलं सूत्रमुच्चारयितव्यम् । तच्चेदम्–

**[ सू०१०६ ] सुत्ता अमुणी मुणिणो सया जागरंति ।**
**लोगंसि जाण अहियाय दुक्खं ।**
**समयं लोगस्स जाणित्ता एत्थ सत्थोवरते ।**

**सुत्ता** इत्यादि सूत्रम्[14] । अस्य चानन्तरसूत्रेण सम्बन्धो वाच्यः, स चायम्–

१. **सीउण्हमित्यादि०** खपुस्तकमृते । २. **इत्यादि । शीतं** ख । ३. "अहवा फासो (सा?) दंस-मसगफासो गहितो" चूर्णौ । ४. **सुखम्, तद्विप०** ख ग । ५. **०वेदान् शीतो०** ख । ६. **सहते । तदेवं** ख । ७. **साधूनां** ख । ८. **होति** झ, **हुंति** ठ । ९. **विसहियव्वाणि** ञ । १०. **सीउसिणिज्जस्स** ठ । ११. **गओ** इति नास्ति ठप्रतौ, **गओ ॥ सूत्रम्–॥** झ । १२. **रूपाण्यभिहितानि** ख । १३. **०णां षोढव्यानि** च । १४. **सूत्रम्** इति न वर्तते गपुस्तके ।

इह **दुःखी दुःखानामेवावर्तमनुपरिवर्तत**[१] इत्युक्तम्, तदिहापि, भावसुप्ता अज्ञानिनो दुःखिनो दुःखानामेवावर्तमनुपरिवर्तन्ते इति, उक्तं च—

**[२]नातः परमहं मन्ये, जगतो दुःखकारणम् ।**
**[३]यथाऽज्ञानमहारोगो दुरन्तः सर्वदेहिनाम् ॥** [ ] इत्यादि ।

इह सुप्ता [४]द्विधा—द्रव्यतो भावतश्च । तत्र निद्रा-[५]प्रमादवन्तो द्रव्यसुप्ताः, भावसुप्तास्तु मिथ्यात्वा-ऽज्ञानमयमहानिद्राव्यामोहिताः । ततो ये अमुनयः मिथ्यादृष्टयः सततं भावसुप्ताः, [६]सद्विज्ञानानुष्ठानरहितत्वात्, निद्रया तु भजनीयाः । **मुनयस्तु** सद्बोधोपेता मोक्षमार्ग[७]दचलन्तस्ते सततम् अनवरतं **जाग्रति** हिता-ऽहितप्राप्ति-परिहारं कुर्वते । [८]अतो द्रव्यनिद्रोपगता अपि क्वचिद् द्वितीयपौरुष्यादौ सततं जागरूका एवेति । एनमेव भावस्वापं जागरणं [९]च विषयीकृत्य **निर्युक्तिकारो** गाथां जगाद—

## सुत्ता अमुणी उ सया मुणी उ[१०] सुत्ता वि जागरा होंति ।
## धम्मं पडुच्च एवं निद्दासुत्तेण [११]भइयव्वं ॥२१३॥

**सुत्ता** इत्यादि । सुप्ता द्विधा—द्रव्यतो भावतश्च । तत्र निद्रया द्रव्यसुप्तान् गाथान्ते वक्ष्यति । भावसुप्तास्तु अमुनयः गृहस्था मिथ्यात्व-ऽज्ञानावृता हिंसा[१२]द्यास्रवद्वारेषु सदा प्रवृत्ताः, मुनयस्त्वपगत[१३]मिथ्यात्वनिद्राऽवाप्तसम्यक्त्वादिबोधा भावतो जागरूका एव । यद्यपि क्वचिदाचार्यानुज्ञाता द्वितीयपौरुष्यादौ दीर्घ[१४]संयमाधारशरीरस्थित्यर्थं निद्रा[१५]वशोपगता भवन्ति तथापि सदा जागरा एव । एवं च धर्मं प्रतीत्योक्ताः सुप्ता जाग्रदवस्थाश्च । द्रव्यनिद्रासुप्तेन तु भाज्यमेतत्—[१६]धर्मः स्याद्वा न वा, यद्यसौ भावतो जागर्ति ततो निद्रासुप्तस्यापि

---

१. ०**मनुवर्तत** क । २. **नातः कष्टतरं मन्ये** चूर्णौ । ३. **यथाऽज्ञानं महारोगं दुरन्तमतिदुर्जयम्** चूर्णौ । ४. **द्वेधा** ख ग च । ५. ०**प्रमादापन्ना द्रव्य**० ख ग च । ६. **तद्विज्ञाना**० ख । ७. ०**दवलन्तस्ते** ग । ८. **अतो** इति कप्रतौ न, **अतो निद्रो**० ख । ९. **वा** ग । १०. **उ** ख । ११. **भवितव्वं** ख, **भवियव्वं** छ ज, **भणियव्वं** ञ, **भतियव्वं** ठ । १२. ०**द्याश्रव**० ङ च । १३. ०**मिथ्यात्वादिनिद्रा अवाप्त**० ख च, ०**मिथ्यात्वादि-निद्रयाऽवाप्त**० घ, ०**मिथ्यात्वादिनिद्रावाप्त**० ङ । १४. ०**संयमाचार**० घ ङ । १५. ०**वशोपगा भ**० च । १६. "**तद्ध( ध )र्म** इति धर्माख्यं वस्तु" जै०वि०प० ।

धर्मः स्यादेव, यदि वा भावतो जाग्रतो [1]निद्राप्रमादावष्टब्धान्तःकरणस्य न स्यादपि, यस्तु द्रव्य-भावसुप्तस्तस्य न स्यादेवेति भजनार्थः । अथ किमिति द्रव्यसुप्तस्य धर्मो न भवतीति ? उच्यते—द्रव्यसुप्तो हि निद्रया भवति, सा च दुरन्ता । किमिति ? यतः स्त्यानर्द्धित्रिकोदये सम्यक्त्वावाप्तिर्भवसिद्धिकस्यापि न भवति, तद्बन्धश्च मिथ्यादृष्टि-सास्वादनयोरनन्तानुबन्धिबन्धसहचरितः, क्षय[2]स्त्वनिवृत्तिबादरगुणस्थानकालसङ्ख्येयभागेषु कियत्स्वपि गतेषु सत्सु भवति, निद्रा-प्रचलयोरप्युदये [3]प्राग्वदेव । [4]बन्धोपरमस्त्वपूर्वकरणकाल-सङ्ख्येयभागान्ते भवति, क्षयः पुनः क्षीणकषायद्विचरमसमये, उदय[5]स्तूपशमकोपशान्तमोहयोरपि भवतीत्यतो दुरन्तो निद्राप्रमादः ॥२१३॥ यथा च द्रव्यसुप्तो दुःख[6]मवाप्नोत्येवं भावसुप्तोऽपि [इति] दर्शयितुमाह—

**जह सुत्त मत्त मुच्छिय असहीणो [7]पावए बहुं दुक्खं ।**
**तिव्वं अप्पडियारं [8]विवट्टमाणो तहा लोगो ॥२१४॥**

**जह सुत्त** [9]इत्यादि । **सुप्तः** निद्रया, **मत्तः** [10]मदिरादिना, **मूर्छितः** गाढमर्मप्रहारादिना, **अस्वाधीनः** परायत्तो वातादिदोषोद्भवग्रहादिना यथा **बहु दुःख[11]मप्रतिकार**मवाप्नोति तथा भावस्वापे मिथ्यात्वा-ऽविरति-प्रमाद-कषायादि[12]के **विवर्तमानः** अवतिष्ठमानः **लोकः** प्राणिगणो नरकभवादिकं दुःखमवाप्नोतीति गाथार्थः ॥२१४॥ पुनरपि व्यतिरेकदृष्टान्तद्वारेणोपदेशदानायाह—

**एसेव [13]य उवएसो पलित्त [14]पवलाय [15]पंथमादीसु ।**
**अणुहवइ जह सचेओ [16]सुहाइं समणो [17]वि य तहेव ॥२१५॥**

[18]**सू० ॥ सीउसणिज्जं ॥**

१. **निद्रावष्टब्धा०** ख । २. **०स्त्वनिर्वृत्ति०** ग । ३. "**प्राग्वदेव** इति सम्यक्त्वं न प्राप्नोति" जै०वि०प० । ४. **बन्धोपरमोऽपूर्व०** ग । ५. "**उपशमक** इति श्रेणिसमारम्भकः" जै०वि०प० । ६. **०मवाप्नोतीत्येवं** ख च । ७. **पावती बहू** ञ । ८. **पि वट्टमाणो** ख ज, **वियट्टमाणो** झ ञ । ९. **इत्यादि गाथा** । ख ग न । १०. **मदिरया, मू०** ख । ११. **०मतिप्रकार०** ख, **०मप्रतीकार०** ङ । १२. **०केऽपि वर्तमानः** ख ग । १३. उ ञ । १४. **पवलाइ** ख ज ठ, **पवए य** छ, **पयलाइ** झ । १५. **पंथमाईसु** ख ज ठ । १६. **सुहाइ** झ १७. **पि** छ । १८. **सूत्रम्—॥** छ ॥ ख छ ज, **सूत्रः-(त्रम्)-॥ तृतीयाध्ययने प्रथमोद्देशकः** ॥ तृतीयाध्ययनम ॥ झ, **सूत्रम्—॥ सीओसणिज्जस्स णिज्जुत्ती** ॥ छ ॥ ञ, **सूत्रम्—॥ तृ० अध्ययनम्** ॥ ठ ।

**एसेव य** [१]इत्यादि गाथा । एष एव [२]पूर्वोक्त उपदेशो यो [★]विवेका-ऽविवेकजनितः, तथाहि—सचेतनो विवेकी प्रदीप्ते सति प्रपलायमानः सुखमनुभवति, पथि विषये च सापाय-निरपायविवेकज्ञः, **आदि**ग्रहणाद् अन्यस्मिन् वा दस्युभयादौ समुपस्थिते सति यथा विवेकी सुखेनैव तमपायं परिहरन् सुखभाग् भवति, एवं श्रमणोऽपि भावतः सदा विवेकित्वाद् जाग्रदव-स्थामनुभवन् समस्तकल्याणास्पदीभवति । अत्र च सुप्ता-ऽसुप्ताधिकारगाथाः—

**जागरह नरा णिच्चं जागरमाणस्स [३]वड्ढए बुद्धी ।**
**जो [४]सुयइ न सो धण्णो जो जग्गइ सो सया धण्णो ॥**
**[५]सुयइ [६]सुयंतस्स [७]सुयं संकियखलियं भवे पमत्तस्स ।**
**जागरणमाणस्स [८]सुयं थिरपरिचियमप्पमत्तस्स ॥**
**[९]नालस्सेण समं [१०]सोक्खं, न विज्जा सह निद्दया ।**
**न वेरग्गं [११]पमाएण, [१२]नारंभेण [१३]दयालुया ॥**
**जागरिया धम्मीणं आहम्मीणं तु सुत्तया सेया ।**
**वच्छाहिवभगिणीए अकहिंसु जिणो जयंतीए ॥**
**[१४]सुयइ य अयगरभूओ [१५]सुयं पि से [१६]नासई अमयभूयं ।**
**[१७]होहीइ गोणभूओ नट्ठम्मि सुए अमयभूए ॥** [ ]

तदेवं दर्शनावरणीयकर्मविपाकोदयेन क्वचित् स्वपन्नपि यः संविग्नो यतनावांश्च स दर्शन[१८]मोहनीयमहानिद्रापगमाद् जाग्रदवस्थ एवेति । ये तु सुप्तास्तेऽज्ञानोदयाद् भवन्ति, अज्ञानं च महादुःखम्, दुःखं च जन्तूनामहितायेति दर्शयति—

**[१९]लोयम्मि [२०]जाण** इत्यादि । लोके षड्जीवनिकाये **जानीहि** [२१]परिच्छिन्द्धि [२२]दुःखहेतुत्वाद् **दुःखम्** अज्ञानं मोहनीयं वा तद् **अहिताय** नरकादि-

---

१. इत्यादि । एष ङ। २. पूर्वोक्तोपदेशो च ॥ ★ विवेकजनितः ग ॥ ३. वद्धए ख ग । ४-५. सुअइ च । ६. सुअंतस्स च । ७-८. सुअं च । ९. नालस्सेणं च । १०. सुक्खं घ ङ। ११. पमादेण च । १२. नारंभेणं घ । १३. दयालुआ च । १४. सुअइ च । १५. सुअं च। १६. णासती च । १७. होही गोणगभूओ, ख, होही गोणब्भूओ ग च, होहिइ गोणब्भूओ घ ङ। १८. ०मोहनीयनिद्रा० ङ । १९. लोयंसि ख ग घ ङ।, लोअंसि च । २०. ज्जाण च । २१. परिच्छिन्द्धि ख । २२. ख-घ-ङ पुस्तकेषु दुःखहेतुत्वाद् इति पाठो नोपलभ्यते ।

भवव्यसनोपनिपाताय, इह वा बन्ध-वध[१]-शरीर-मनःपीडायै जायत इत्येतज्जानीहि । परिज्ञानाच्चैतत् फलम्, यदुत द्रव्य-भावस्वापादज्ञानरूपाद् दुःखहेतोरपसर्पणमिति । किञ्चान्यत्—

**समयमित्यादि** । **समयः** आचारोऽनुष्ठानं तं **लोकस्य** असुमद्व्रातस्य **ज्ञात्वा** [२]**अत्र शस्त्रोपरतो** [३]भवेदित्युत्तरसूत्रेण सम्बन्धः । 'लोको हि भोगाभिलाषितया प्राण्युपमर्दादिकषायहेतुकं[४] कर्मोपादाय नरकादियातनास्थानेषूत्पद्यते । ततः कथञ्चिद्[५]दुद्वृत्त्यावाप्य चाशेषक्लेशव्रातघ्नं धर्मकारणमार्यक्षेत्रादौ मनुष्यजन्म पुनरपि [६]महामोहमोहितमतिस्तत्तदारभते येन येनाधोऽधो व्रजति, संसारान्नोन्मज्जतीति[७] । अयं लोकाचारस्तं ज्ञात्वा । अथवा समभावः समता तां ज्ञात्वा । लोकस्य इति सप्तम्यर्थे षष्ठी, ततश्चायमर्थः—लोके जन्तुसमूहे समतां समशत्रुमित्रतां समात्म-परतां वा ज्ञात्वा । यदि वा सर्वेऽप्येकेन्द्रियादयो जन्तवः सदा स्वोत्पत्तिस्थानरिरंसवो मरणभीरवः सुखेप्सवो दुःखद्विष [८]इत्येवम्भूतां समतां ज्ञात्वा । किं कुर्यात् ? इत्याह—

**एत्थ [९]सत्थोवरए** । **अत्र** अस्मिन् षट्कायलोके **शस्त्रात्** द्रव्य-भावभेदादु**परतो** धर्मजागरणेन जागृहि । यदि वा यद्यत् संयमशस्त्रं प्राणातिपाताद्या[१०]श्रवद्वारं शब्दादिपञ्चप्रकारकामगुणाभिष्वङ्गो वा तस्माद्य उपरतः स मुनिरिति । आह [११]च—

**[ सू०१०७ ] जस्सिमे सद्दा य रूवा य गंधा य रसा य फासा य अभिसमण्णागता भवंति से आतवं नाणवं वेयवं धम्मवं बंभवं पण्णाणेहिं परिजाणति लोगं, मुणीति वच्चे धम्मविदु त्ति अंजू आवट्टसोए संगमभिजाणति । सीतो-**

---

१. ०वध-शारीरपीडायै ख, ०वध-शारीर-मानसपीडायै च । २. तत्र ख । ३. भवेदुत्तर० क-चप्रती विना । ४. ०हेतु कर्मो० ख । ५. ०दुद्वृत्त्यावाप्य क घ ङ । ६. महामोहितस्तत्तदा० ख । ७. ०ति । एवं लोका० च । ८. इत्येवम्भूता समता तां ज्ञात्वा घ ङ । ९. सत्थोवरये च । १०. ०द्यास्रव० घ । ११. च इति गप्रतौ नास्ति ।

**सिणच्चागी से णिग्गंथे अरति-रतिसहे फारुसियं णो वेदेति जागर-वेरोवरते वीरे ! एवं दुक्खा पमोक्खसि ।**

**जंस्सिमे**[1] इत्यादि । यस्य मुनेः **इमे** प्रत्यात्मवेद्याः समस्तप्राणिगणेन्द्रिय-प्रवृत्तिविषयभूताः शब्द-रूप[2]-गन्ध-रस-स्पर्शा मनोज्ञेतरभेदभिन्नाः **अभिसमन्वागताः** इति **अभिः** आभिमुख्येन **सम्यक्** इष्टा-ऽनिष्टावधारणतया **अन्विति** शब्दादिस्वरूपावगमात् पश्चात्, **आगताः** ज्ञाताः परिच्छिन्ना यस्य मुनेर्भवन्ति[3] स लोकं जानातीति सम्बन्धः । इदमुक्तं भवति—इष्टेषु न रागमुपयाति, नापीतरेषु द्वेषम् । एतदेवाभिसमन्वागमनं तेषाम्, नान्यदिति । यदि वेहैव शब्दादयो दुःखाय भवन्ति, आस्तां तावत् परलोक[4] इति, उक्तं च—

**रक्तः शब्दे हरिणः, स्पर्शे नागो, रसे च वारिचरः ।**
**कृपणपतङ्गो रूपे, भुजगो गन्धे ननु विनष्टः ॥**
**पञ्चसु रक्ताः पञ्च विनष्टा यत्रागृहीतपरमार्थाः ।**
**एकः पञ्चसु रक्तः प्रयाति भस्मान्तताममबुधः ॥ [ ]**

अथवा शब्दे **पुष्पशालाद्**[5] **भद्रा** ननाश, रूपे **अर्जुनकतस्करः**[6], गन्धे **गन्धप्रियकुमारः**, रसे **सौदासः**[7], स्पर्शे **सत्यकिः**, **सुकुमारिका**पतिर्वा **ललिताङ्गकः** । परत्र च नरकादियातनास्थान[8]भयमिति । एवं शब्दादीनुभय-दुःखस्वभावानवगम्य यः परित्यजेदसौ कं गुणमवाप्नुयात्[9] ? इत्याह—

**से आयवं**[10] इत्यादि । यो हि महामोहनिद्रावृते लोके दुःखमहिताय जानानो लोकसमयदर्शी[11] शस्त्रोपरतः सन्[12] शब्दादीन् कामगुणान् दुःखैकहेतूनभिसमन्वागच्छति ज्ञपरिज्ञया, प्रत्याख्यानपरिज्ञया च[13] प्रत्याचष्टे **स** मुमुक्षुः **आत्मवान्** आत्मा ज्ञानादिकोऽस्यास्तीत्यात्मवान्, शब्दादिपरित्यागेन ह्यात्माऽनेन

---

१. **यस्सिमे** क । २. **०रूप-रस-गन्ध-स्पर्शा** ग । ३. **०र्भवन्तीति स** ख । ४. "**परलोक** इति समन्वागता भवन्तीति योगः" जै०वि०प० । ५. "**पुष्पशालाद्** इति गायनात्" जै०वि०प० । ६. **अर्जुनतस्करः** ख, **अर्जुनकस्तस्करः** ग । ७. **सोदासः** क च. । ८. **०स्थानं भय०** ख. ९. **गुणमाप्नुयात्** ख । १०. **आयतमित्यादि** क, **आयवं इत्यादि** ख च, **यायवमित्यादि** ग । ११. **लोके समयोपदशी( र्शी )** ग । १२. **सन्** इति गप्रतौ न । १३. नास्ति **च** इति खपुस्तके ।

रक्षितो भवति, अन्यथा नारकैकेन्द्रियादिपाते सत्यात्मकार्याकरणात् कुतोऽस्यात्मेति । पाठान्तरं वा—**से [1]आयवी नाणवी,** आत्मानं श्वभ्रादिपतनरक्षणद्वारेण वेत्तीत्यात्मवित्, तथा ज्ञानं यथावस्थितपदार्थपरिच्छेदकं वे[3]त्तीति **ज्ञानवित्** । [2]तथा वेद्यते जीवादिस्वरूपमनेनेति वेदः **आचाराद्यागमः**, तं वेत्तीति **वेदवित्** । तथा दुर्गतिप्रसृतजन्तुधरणस्वभावं स्वर्गा-ऽपवर्गमार्गं धर्मं वेत्तीति **धर्मवित्** । एवं ब्रह्म अशेषमलकलङ्क[4]विकलयोगिशर्म वेत्तीति **[5]ब्रह्मवित्,** यदिवाऽष्टादशधा [6]ब्रह्मेति । एवम्भूतश्चासौ प्रकर्षेण ज्ञायते ज्ञेयं यैस्तानि प्रज्ञानानि मत्यादीनि तैः **लोकं** यथावस्थितं जन्तुलोकं तदाधारं वा क्षेत्रं **जानाति** परिच्छिनत्तीत्युक्तं भवति । य एव शब्दादिविषयसङ्गस्य परिहर्ता स एव यथावस्थितलोकस्वरूपपरिच्छेदीति । यश्चानन्तरगुणोपेतः स किं वाच्यः ? [7]इत्यत आह—

**मुणी** इत्यादि । यो ह्यात्मवान् ज्ञानवान् [8]वेदवान् धर्मवान् ब्रह्मवान् प्रज्ञानैर्व्यस्तैः समस्तैर्वा लोकं जानाति स मुनि**र्वाच्यः,** मनुते मन्यते वा जगतस्त्रिकालावस्थां मुनिरिति कृत्वा । किञ्च—

**धम्म** इत्यादि । धर्मं चेतना-[9]ऽचेतनद्रव्यस्वभावं श्रुत-चारित्ररूपं वा वेत्तीति **धर्मवित् । ऋजुः** इति ऋजोः [10]ज्ञान-दर्शन-चारित्राख्यस्य मोक्षमार्गस्यानुष्ठानादकुटिलो यथावस्थितपदार्थस्वरूपपरिच्छेदाद्वा ऋजुः सर्वोपाधिशुद्धोऽवक्र इति यावत् । तदेवं धर्मविदृजुर्मुनिः किम्भूतो भवति ? इत्याह—

**आवट्ट** इत्यादि । भावावर्तः जन्म-जरा-मरण-रोग-शोक-व्यसनोपनिपातात्म[11]कः संसार इति, उक्तं हि—

**राग-द्वेषवशाविद्धं, मिथ्यादर्शनदुस्तरम् ।**
**जन्मावर्ते [12]जगत् क्षिप्तं प्रमादा[13]द् भ्राम्यते भृशम् ॥** [ ]

[14]भावश्रोतोऽपि शब्दादिकामगुणविषयाभिलाषः, आवर्तश्च श्रोतश्चाऽऽवर्त-

---

१. **यायवी** ग । २. **तथा** इति खपुस्तके न वर्तते । ३. **वेत्ति वेद०** ख । ४. **०विकलं योगि०** ग । ५. "**ब्रह्मविद्** मलरहितः" झअव० । ६. **तैर्यथा०** ख । ७. **इत्याह मुणीत्यादि** ख । ८. **वेद-धर्मवान्** क । ९. **०ऽचेतनाद्रव्य०** ख । १०. **ज्ञान-चारित्रा०** ख घ । ११. **०कः स संसार** ख । १२. **जगत् सर्वं प्र०** चूर्णौ । १३. **०द्भ्रम्यते** ग । १४. **भावस्रोतोऽपि** ग घ ङ ।

[1]श्रोतसी तयोः, राग-द्वेषाभ्यां सम्बन्धः **सङ्ग**स्तम् अभिजानाति आभिमुख्येन परिच्छिनत्ति यथा—अयं सङ्ग आवर्त-[2]श्रोतसोः कारणम् । जानानश्च परमार्थतः कोऽभिधीयते ? योऽनर्थं ज्ञात्वा परिहरति । ततश्चायमर्थः—संसार[3]श्रोतःसङ्गं राग-द्वेषात्मकं ज्ञात्वा यः परिहरति स एवावर्त-[4]श्रोतसोः सङ्गस्याभिज्ञाता । सुप्त-जाग्रतां दोष-गुण[5]परिच्छेदी कं गुणमवाप्नुयात् ? इत्याह—

[6]**सीउसिणमि**त्यादि । सबाह्या-ऽऽभ्यन्तरग्रन्थरहितः सन् शीतोष्णत्यागी सुख-दुःखानभिलाषुकः शीतोष्णरूपौ वा परीषहावतिसहमानः संयमा-[7]ऽसंयमारति-रतिसहः सन् **परुषतां** कर्कशतां पीडाकारितां परीषहाणामुपसर्गाणां वा कर्मक्षपणायोद्यतः साहाय्यं मन्यमानो 'नो वेत्ति' [8]न तां पीडाकारित्वेन गृह्णातीत्युक्तं भवति । यदिवा संयमस्य तपसो वा परुषतां शरीरपीडोत्पादनात् [9]कर्मलेपापनयनाद्वा संसारोद्विग्नमना मुमुक्षुर्निराबाध[10]सुखोन्मुखः न वेत्ति, न संयम-तपसी पीडाकारित्वेन गृह्णातीति यावत् । किञ्च—

**जागर** इत्यादि । असंयमनिद्रापगमाद् जागर्तीति जागरः, अभिमान-समुत्थोऽमर्षा[11]वेशः परापकाराध्यवसायो **वैरम्,** तस्मा[12]दुपरतो वैरोपरतः, जागरश्चासौ वैरोपरतश्चेति विगृह्य कर्मधारयः । क एवम्भूतः ? [13]**वीरः** कर्मापनयनशक्त्युपेतः । एवम्भूतश्च त्वं [14]वीर ! आत्मानं परं वा दुःखाद् दुःखकारणाद्वा कर्मणः [15]प्रमोक्ष्यसीति । यश्च यथोक्ताद्विपरीत आवर्त-[16]स्रोतसोः सङ्गमुपगतोऽजागरः स किमाप्नुयात् ? इत्याह—

**[ सू०१०८ ] जरा-मच्चुवसोवणीते णरे सततं मूढे धम्मं णाभिजाणति ।**

---

१. ०स्रोतसी ग घ ङ । २. ०स्रोतसोः ग घ । ३. ०स्रोतः० घ ङ । ४. ०स्रोतसोः ग घ । ५. ०परिच्छेदे घ ङ । ६. सीओसिण इ० ख घ च । ७. ०ऽसंयमरत्यरतिसहः ख-चप्रतिभ्यामृते । ८. न तान् पीडा० ख-चपुस्तके विना । ९. कर्ममलापनयनाद्वा ख । १०. ०सुखोत्सुको न संयम० ख, ०सुखो न वेत्ति ग । ११. ०वेशपरापकारा० ख च । १२. ०दुपरतः, जागर० घ ङ । १३. धीरः च । १४. धीर ! च । १५. प्रमोक्ष[ य ]सीति क । १६. ०श्रोतसोः ख ङ च ।

**पासिय आतुरे पाणे अप्पमत्तो परिव्वए ।**

**मंता एयं मतिमं पास,**

**आरंभजं दुक्खमिणं ति णच्चा,**

**मायी पमायी पुणरेति गब्भं ।**

**उवेहमाणो सद्द-रूवेसु अंजू माराभिसंकी मरणा पमुच्चति ।**

**जरा** इत्यादि । जरा च मृत्युश्च [जरा मृत्यू] ताभ्यामात्मवशमुपनीतः **नरः** प्राणी **सततम्** अनवरतं **मूढः** [1]महामोहमोहितमतिः **धर्मं** स्वर्गा-ऽपवर्गमार्गं **नाभिजानीते** नावगच्छति, तत् संसारे स्थानमेव[2] नास्ति यत्र जरा-मृत्यू न स्तः । देवानां जराऽभाव इति चेत्, तन्न, तत्राप्युपान्तकाले लेश्या-बल-सुख-प्रभुत्व-वर्णहान्युपपत्तेरस्त्येव तेषामपि जरासद्भावः, उक्तं च—

**देवा णं भंते ! सव्वे [3]समवण्णा ? नो इणट्ठे समट्ठे । से केणट्ठेणं भंते ! एवं वुच्चइ ? [4]गोयमा ! देवा दुविहा—[5]पुव्वोववण्णा[6]गा पच्छोववण्णगा य[7] ।[9] तत्थ णं जे ते पुव्वोववण्णगा ते णं अविसुद्धवण्णयरा, जे णं [8]पच्छोववण्णगा ते णं विसुद्ध-वण्णयरा । [ ]**

एवं लेश्याद्यपीति । च्यवनकाले [10]तु सर्वस्यैवैतद् भवतीति, तद्यथा—

**माल्यम्लानिः कल्पवृक्षप्रकम्पः, श्री-ह्रीनाशो वाससां चोपरागः ।**
**दैन्यं [11]तन्द्रा काम-रागा-ऽङ्गभङ्गो, [12]दृष्टिभ्रान्तिर्वेपथुश्चारतिश्च ॥ [ ]**

यतश्चैवमतः सर्वं जरा-मृत्युवशोपनीतमभिसमीक्ष्य किं कुर्यात् ? इत्याह—

**पासिय** इत्यादि । स हि भावजागरस्तैस्तैर्भावस्वापजनितैः शारीर-मानसैर्दुःखैः **आतुरान्** [13]किङ्कर्तव्यतामूढान् दुःखसागरावगाढान् प्राणान्

१. **महामोहेन मोहित०** ग, **महामोहित०** च । २. **०मेव च नास्ति** ग । ३. **समावण्णा** ख । ४. **गोअमा** च । ५. **पुव्वोपवण्णगा** ख । ६. **०गा य पच्छो०** घ, **०गा या पच्चोववण्णगा** ङ । ७. **या** ङ । ८. **पच्चोववण्णगा** ङ । ९. **ते विसुद्ध०** घ ङ । १०. **तु** इति चप्रतौ नास्ति । ११. **तन्द्री( न्द्रिः )** ग घ । १२. **दृष्टिभ्रंशो वेपथु०** ख, **दृष्टिभ्रामो वेपथु०** ग च । १३. **किङ्कर्तव्यता-दुःख०** ख ।

अभेदोपचारात् प्राणिनः दृष्ट्वा ज्ञात्वाऽ**प्रमत्तः परिव्रजेत्** उद्युक्तः सन् संयमानुष्ठानं विदध्यात् । अपि च–

[१]**मन्ता** इत्यादि । हे **मतिमन्** ! सश्रुतिक ! भावसुप्ता-ऽऽतुरान् **पश्य**, मत्वा चैतज्जाग्रत्-सुप्तगुण-दोषापादनं मा स्वापमतिं कुरु । किञ्च–

**आरंभज**मित्यादि । आरम्भः [२]सावद्यक्रियानुष्ठानं तस्माज्जात**मारम्भजम्** । किं तत् ? **दुःखं** तत्कारणं वा कर्म । **इदम्** इति प्रत्यक्षगोचरापन्नमशेषारम्भ-प्रवृत्तप्राणिगणानुभूयमानमिति एतत् **ज्ञात्वा** परिच्छिद्य निरारम्भो भूत्वाऽऽत्महिते जागृहि । यस्तु विषय-[३]कषायाच्छादितचेता भावशायी स किमाप्नुयात् ? [४]इत्याह–

[५]**माई** इत्यादि । मध्यग्रहणाच्चाद्यन्तयोर्ग्रहणम्, तेन क्रोधादिकषायवान् मद्यादिप्रमादवान् [६]नरकदुःखमनुभूय [७]**पुन**स्तिर्यक्षु **गर्भ**मुपैति । यस्त्वकषायी प्रमादरहितः स किम्भूतो भवति ? इत्याह–

**उवेह** इत्यादि । बहुवचननिर्देशादाद्यर्थो गम्यते, शब्द-रूपादिषु यौ राग-द्वेषौ तौ उपेक्षमाणः अकुर्वन् **ऋजु**र्भव[८]ति यतिर्भवति, यतिरेव परमार्थत **ऋजुः**, अपरस्त्वन्यथाभूतस्त्र्यादि[९]पदार्थान्यथाग्रहाद् वक्रः । किञ्च–स ऋजुः शब्दादीनुपेक्षमाणो मरणं मारः तदभिशङ्की मरणादुद्विजं[१०]स्तत् करोति येन मरणात् प्रमुच्यते । किं तत् करोति ? इत्याह–

**[ सू०१०९ ] अप्पमत्तो कामेहिं, उवरतो पावकम्मेहिं, वीरे आतगुत्ते खेयण्णे । जे पज्जवजातसत्थस्स खेतण्णे से असत्थस्स खेतण्णे । जे असत्थस्स खेतण्णे से पज्जव-जातसत्थस्स खेतण्णे ।**

---

१. मंता कप्रतिं विना । २. सावद्यानुष्ठानं ख । ३. ०कषायच्छादित० ख । ४. इत्याह च ग । ५ माईत्यादि । मध्यग्रहणादाद्यन्त० ख च । ६. नारकं दुःख० ख, नरकं दुःख० च । ७. पुनस्तिर्यक्( ग? )गर्भ० ख । ८. ०ति यतिरेव क ग च । ९. ०पदार्थग्रहणाद् ख, ०पदार्थान्यथाग्रहणाद् ग घ ङ च । १०. ०स्तत् तत् करोति ख ।

## [ सू०११० ] अकम्मस्स ववहारो ण विज्जति । कम्मुणा उवाधि जायति ।

[1]**अपमत्त** इत्यादि । कामैर्यः प्रमादः [2]तस्मादप्रमत्तो भवेत् । कश्चाप्रमत्तः स्यात् ? यः कामारम्भकेभ्यः पापेभ्य उपरतो भवतीति दर्शयति—**उवरओ** इत्यादि । उपरतः मनो-वाक्-कायैः, कुतः ? पापोपादानकर्मभ्यः । कोऽसौ ? [3]वीरः । किम्भूतः ? **गुप्तात्मा** । कश्च गुप्तो भवति ? यः **खेदज्ञः** । यश्च खेदज्ञः स कं गुणमवाप्नुयात् ? इत्याह—

**जे पज्जव** इत्यादि । शब्दादीनां विषयाणां पर्यवाः विशेषाः तेषु तन्निमित्त जातं शस्त्रं **पर्यवजातशस्त्रं** शब्दादिविशेषोपादानाय यत् प्राण्युपघातकार्यनुष्ठानं तत् पर्यवजातशस्त्रं[4] तस्य यः पर्यवजातशस्त्रस्य खेदज्ञः निपुणः सः अशस्त्रस्य निरवद्यानुष्ठानरूपस्य[5] संयमस्य खेदज्ञः, यश्च अशस्त्रस्य[6] संयमस्य खेदज्ञः स पर्यवजातशस्त्रस्य[7] खेदज्ञः, इदमुक्तं भवति—यः शब्दादिपर्यायान् इष्टा-ऽनिष्टात्मकान् तत्प्राप्ति-परिहारानुष्ठानं च शस्त्रभूतं वेत्ति सोऽनुपघातकत्वात् संयममप्यशस्त्रभूतमात्म-परोपकारिणं वेत्ति, शस्त्रा-ऽशस्त्रे[8] च जानानस्तत्प्राप्ति-परिहारौ (स्तत्परिहार-प्राप्ती ?) विधत्ते, एतत्फलत्वाद् ज्ञानस्येति । यदि वा शब्दादिपर्यायेभ्यस्तज्जनितराग-द्वेषपर्यायेभ्यो वा जातं यद् ज्ञानावरणीयादि कर्म तस्य यत् शस्त्रं दाहकत्वात् तपस्तस्य[9] यः खेदज्ञस्तज्ज्ञानानुष्ठानतः सः अशस्त्रस्य संयमस्यापि खेदज्ञः, पूर्वोक्तादेव हेतोः । हेतुहेतुमद्भावाच्च [10]योऽशस्त्रस्य खेदज्ञः स पर्यवजातशस्त्रस्यापि खेदज्ञ इति । तस्य च संयम-तपःखेदज्ञस्या[11]श्रवनिरोधादनादिभवो[12]पात्तकर्मक्षयः । कर्मक्षयाच्च यद् भवति [13]तदप्यतिदिशति—

**अकम्मस्स** इत्यादि । न विद्यते[14] कर्माष्टप्रकारमस्येत्यकर्मा तस्य व्यवहारो

---

१. **अप्पमत्त** क-चपुस्तके विना । २. **तत्राप्रमत्तो** कआदर्शादृते । ३. धीरः च । ४. **०शस्त्रम्, तस्य यः खेदज्ञः** क ग च, **०शस्त्रम्, यः पर्यव०** ख । ५. **०स्य खेदज्ञः** ख घ । ६. **०स्य खेदज्ञः** ख । ७. **०शस्त्रखेदज्ञः** च । ८. **०ऽशस्त्रे विजानान०** ख । ९. **०स्तस्य शस्त्रस्य खेदज्ञ०** ख । १०. **योऽशस्त्रस्यापि खेदज्ञः** । घ । ११. **०स्यास्त्रव०** ख ग । १२. **०भवोपात्तकर्मक्षयाच्च यद्** ग । १३. **तदुपदिशति** ख च । १४. **०तेऽस्याष्टप्रकारं कर्मेत्यकर्मा** ख च ।

न विद्यते नासौ नारक-तिर्यङ्-नरा-ऽमर-पर्याप्तका-ऽपर्याप्तक-बाल-कुमारादि[1]संसारिव्यपदेशभाग् भवति । यश्च सकर्मा स नारकादिव्यपदेशेन व्यपदिश्यत इत्याह–

**कम्मुणा** इत्यादि । उपाधीयते व्यपदिश्यते येनेति उपाधिः विशेषणं स उपाधिः कर्मणा [2]ज्ञानावरणीयादिना जायते, तद्यथा–मति-श्रुता-ऽवधि-मनः-पर्यायवान् मन्दमतिस्तीक्ष्णो वेत्यादि, चक्षुर्दर्शनी अचक्षुर्दर्शनी निद्रालुरित्यादि, सुखी दुःखी [3]वेति, मिथ्यादृष्टिः सम्यग्दृष्टिः सम्यग्मिथ्यादृष्टिः स्त्री पुमान् नपुंसकः कषायीत्यादि, सोपक्रमायुष्को निरुपक्रमायुष्कोऽल्पायुरित्यादि, नारक[4]स्तिर्यग्योनिरेकेन्द्रियो द्वीन्द्रियः पर्याप्तकोऽपर्याप्तकः सुभगो दुर्भग इत्यादि, [5]उच्चैर्गोत्रो नीचैर्गोत्रो वेति, कृपणस्त्यागी निरुपभोगो निर्वीर्य इत्येवं कर्मणा संसारी [6]व्यपदिश्यते । यदि नामैवं ततः किं कर्तव्यम् ? इत्याह–

## [ सू०१११ ] कम्मं च पडिलेहाए कम्ममूलं च जं छणं, पडिलेहिय सव्वं समायाय दोहिं अंतेहिं अदिस्समाणे तं परिण्णाय मेधावी विदित्ता लोगं वंता लोगसण्णं से मतिमं परक्कमेज्जासि त्ति बेमि ।

**॥ सीओसणिज्जस्स पढमो उद्देसओ सम्मत्तो ॥**

**कम्मं च** इत्यादि । कर्म ज्ञानावरणीयादि तत् प्रत्युपेक्ष्य,[7] बन्धं वा प्रकृति-स्थित्यनुभाव-प्रदेशात्मकं पर्यालोच्य, तत्सत्ता-[8]विपाकापन्नाश्च प्राणिनो यथा भावनिद्रया शेरते तथाऽवगम्य, अकर्मतोपाये भावजागरणे यतितव्यमिति । तदभावश्चानेन प्रक्रमेण भवति, तद्यथा–अष्टविधसत्कर्माऽपूर्वादिकरण-क्षपकश्रेणिप्रक्रमेण मोहनीयक्षयं विधायान्तर्मुहूर्तमजघन्योत्कृष्टं कालं सप्त-

---

१. ०संसारव्यप० ख ग । २. ज्ञानावरणादिना ख । ३. नास्ति कप्रतौ **वेति** इति । ४. ०स्तिर्यग्योन एकेन्द्रियो ख च, ०स्तिर्यग्योनिक एकेन्द्रियो घ ङ । ५. उच्चैर्नीचैर्गोत्रो क । ६. व्यपदिश्यत इति । यदि ख । ७. ०क्ष्य, कर्मबन्धं वा ख । ८. ०विपाकापन्नांश्च ग-चप्रतीं विना ।

विधसत्कर्मा । ततः शेषघातित्रये क्षीणे[1] चतुर्विधभवोपग्राहिसत्कर्मा जघन्यतोऽन्तर्मुहूर्तम्, उत्कृष्टतो देशोनां पूर्वकोटिं यावत् । पुनरूर्ध्वं[2] पञ्चह्रस्वाक्षरोद्गिरणकालीयां शैलेश्यवस्थामनुभूयाकर्मा भवति ।

साम्प्रतमुत्तरप्रकृतीनां सदसत्कर्मताविधानमुच्यते—तत्र ज्ञानावरणीयाऽन्तराययोः प्रत्येकमुपात्तपञ्चभेदयोश्चतुर्दशस्वपि जीवस्थानकेषु[3] गुणस्थानकेषु च[4] मिथ्यादृष्टेरारभ्य केवलिगुणस्थानादारतोऽपरविकल्पाभावात् पञ्चविधसत्कर्मता ।

दर्शनावरणस्य त्रीणि सत्कर्मतास्थानानि, तद्यथा—नवविधं निद्रापञ्चकदर्शनचतुष्टयसमन्वयात्, एतत् सर्वजीवस्थानानुयायि, गुणस्थानेष्वप्यनिवृत्तिबादरकालसङ्ख्येयभागान् यावत् १, ततः कतिचित्सङ्ख्येयभागावसाने स्त्यानर्द्धित्रयक्षयात् षट्सत्कर्मतास्थानम् २, ततः क्षीणकषायद्विचरमसमये निद्राप्रचलाद्वयक्षयात् चतुःसत्कर्मतास्थानम्, तस्यापि क्षयः क्षीणकषायकालान्त इति ३।

वेदनीयस्य द्वे सत्कर्मतास्थाने, तद्यथा—द्वे अपि साता-ऽसाते इत्येकम्, अन्यतरोदयारूढशैलेश्यवस्थेतरद्विचरमक्षणक्षये सति सातमसातं[5] वा कर्मेति द्वितीयम् ।

मोहनीयस्य पञ्चदश सत्कर्मतास्थानानि, तद्यथा—षोडश[6]कषाय-नवनोकषाय[7]-दर्शनत्रये सति[8] अष्टाविंशतिः १, सम्यक्त्वोद्वलने[9] सप्तविंशतिः २, दर्शनद्वयोद्वलने[10] सम्यग्मिथ्यादृष्टेरनादिमिथ्यादृष्टेर्वा षड्विंशतिः ३, सम्यग्दृष्टेरष्टाविंशतिसत्कर्मणोऽनन्तानुबन्ध्युद्वलने क्षपणे वा चतुर्विंशतिः ४, मिथ्यात्वक्षये त्रयोविंशतिः ५, सम्यग्मिथ्यात्वक्षये द्वाविंशतिः ६, क्षायिकसम्यग्दृष्टेरेकविंशतिः ७, अप्रत्याख्यान-प्रत्याख्यानावरणक्षये त्रयोदश ८, अन्यतरवेदक्षये द्वादश ९,

---

१. **क्षीणे भवोपग्राहि०** ख । २. **०रूर्ध्वं ह्रस्वपञ्चाक्षरो०** क घ ङ **०रूर्द्ध पञ्च०** ख च. **०रूर्द्ध ह्रस्वपञ्चाक्षरो०** ग । ३. **जीवस्थानेषु गुणस्थानेषु च** ख च । ४. **तु** ग । ५. **०मसातं स( वा सत्? )कर्मेति** क । ६-७. **०कषाया** घ-ङपुस्तके विना । ८. **सति सम्यग्दृष्टेरष्टाविंशतिः** कआदर्शमृते । ९. **०ने सम्यग्मिथ्यादृष्टेः सप्तविंशतिः** ग च । १०. **०नेऽनादिमिथ्या०** क ग घ च ।

द्वितीयवेदक्षये सत्येकादश १०, हास्यादिषट्कक्षये पञ्च ११, स्ववेदाभावे[1] चत्वारि १२, सञ्ज्वलनक्रोधक्षये त्रयः १३, सञ्ज्वलनमानक्षये द्वौ १४, सञ्ज्वलनमायाक्षये सत्येको लोभः १५, तत्क्षये च मोहनीयासत्तेति ।

आयुषो द्वे सत्कर्मतास्थाने[2] सामान्येन, तद्यथा—परभवायुष्कबन्धोत्तरकालमायुष्कद्वयमेकम्[3], द्वितीयं तु तद्बन्धाभाव इति ।

नाम्नो द्वादश सत्कर्मतास्थानानि, तद्यथा—त्रिनवतिः ९३, द्विनवतिः ९२, एकोननवतिः ८९, अष्टाशीतिः ८८, षडशीतिः ८६, अशीतिः ८०, एकोनाशीतिः ७९, अष्टसप्ततिः ७८, षट्सप्ततिः ७६, पञ्चसप्ततिः ७५, नव ९, अष्टौ चेति ८ । तत्र त्रिनवतिः—गतयश्चतस्रः ४, पञ्च[4] जातयः ५, पञ्चशरीराणि[5] ५, पञ्च सङ्घाताः ५, बन्धनानि पञ्च ५, संस्थानानि षट् ६, अङ्गोपाङ्गत्रयम् ३, संहननानि षट् ६, वर्णपञ्चकम् ५, गन्धद्वयम् २, रसाः पञ्च ५, अष्टौ स्पर्शाः ८, आनुपूर्वीचतुष्टयम् ४, अगुरुलघु-उपघात-पराघात-उच्छ्वासा-ऽऽतप-उद्योताः षट् ६, प्रशस्तेतर-विहायोगतिद्वयम् २, प्रत्येकशरीर-त्रस-शुभ-सुभग-सुस्वर-सूक्ष्म-पर्याप्तक-स्थिरा-ऽऽदेय-यशांसि सेतराणीति विंशतिः २०, निर्माणम्, तीर्थकरत्वमिति, एवं सर्वसमुदाये[6] त्रिनवतिर्भवति ९३ । तीर्थकरनामाभावे द्विनवतिः[7] ९२ । त्रिनवतेराहारकशरीर-सङ्घात-बन्धना-ऽङ्गोपाङ्गचतुष्टयाभावे सत्येकोननवतिः ८९ । ततोऽपि तीर्थकरनामाभावेऽष्टाशीतिः ८८ । देवगति-तदानुपूर्वीद्वयोद्वलने षडशीतिः ८६, यदि वा अशीतिसत्कर्मणो नरकगतिप्रायोग्यं बध्नतस्तद्गत्या-ऽऽनुपूर्वीद्वय-वैक्रियचतुष्कबन्धकस्य षडशीतिः, देवगतिप्रायोग्यबन्धकस्य वेति। ततो नरकगत्यानुपूर्वीद्वय[8]-वैक्रियचतुष्टयोद्वलनेऽशीतिः ८० । पुनर्मनुष्य-गत्या-ऽऽनुपूर्वीद्वयोद्वलनेऽष्टसप्ततिः ७८ । एतान्यक्षपकाणां सत्कर्मतास्थानानि[9] । क्षपकश्रेण्यन्तर्गतानां तु प्रोच्यन्ते[10], तद्यथा—त्रिनवतेर्नरक[11]-

---

१. पुंवेदाभावे ख च, वेदाभावे ग । २. ०ने, तद्यथा घ ङ। ३. ०द्वये एकम् ङ। ४. पञ्च शरीराणि ५ पञ्च जातयः पञ्च सङ्घाताः ग । ५. ०णि ५ सङ्घाताः पञ्च ५ च । ६. ०समुदये ख च । ७. द्विनवतिर्भवति ९२ ग । ८. ०पूर्वी-वैक्रिय घ । ९. सत्कर्मस्थानानि ख । १०. प्रोच्यते ग । ११. ०र्नारक० च ।

तिर्यग्गति-तदानु-पूर्वीद्वय-एक-द्वि-त्रि-चतुरिन्द्रियजाति-आतप-उद्द्योत-स्थावर-सूक्ष्म-साधारण-रूपैर्नरकतिर्यग्गतिप्रायोग्यैस्त्रयोदशभिः क्षपितैर[1]-शीतिर्भवति । द्विनवतेस्त्वेभिस्त्रयोदशभिः क्षपितैरेकोनाशीतिः । याऽसावाहारक-चतुष्टयाप-गमेनैकोननवतिः सञ्जाता ततस्त्रयोदशनाम्नि क्षपिते षट्[3]सप्ततिर्भवति । तीर्थकर-नामाभावापादिता[2]ऽष्टाशीतिः, त्रयोदशनामाभावे पञ्चसप्ततिः । साऽपि तीर्थकरकेवलिशैलेश्यापन्नद्विचरमसमये तीर्थकरनाम्नः प्रक्षेपाद् वेद्यमान-नवकर्मप्रकृतिव्युदासेन क्ष[4]यमुपगच्छतीत्यतोऽन्त्यसमये नवसत्कर्मतास्थानम् । ताश्च वेद्यमाना नवेमाः, तद्यथा—मनुजगति-पञ्चेन्द्रियजाति-त्रस-बादर-पर्याप्तक-सुभगा-ऽऽदेय-यशःकीर्ति-तीर्थकररूपाः एता एव शैलेश्यन्तसमये सत्तां [5]बिभ्रति, शेषास्त्वेकसप्ततिः सप्तषष्टिर्वा द्विचरमसमये क्षय[6]मुपयान्ति[7], एता एव नव अतीर्थकरकेवलिनस्तीर्थकरनामरहिता अष्टौ भवन्ति, अतोऽन्त्यसमयेऽष्ट-सत्कर्मतास्थानमिति ।

सामान्येन गोत्रस्य द्वे सत्कर्मतास्थाने, तद्यथा—उच्च-नीच[8]गोत्रसद्भावे सत्येकं सत्कर्मतास्थानम्, तेजो-वायूच्चैर्गोत्रोद्वलने कालङ्कलीभावावस्थायां नीचैर्गोत्रसत्कर्मतेति द्वितीयम्, यदिवाऽयोगिद्विचरमसमये नीचैर्गोत्रक्षये सत्युच्चैर्गोत्र[9]सत्कर्मता, एवं द्विरूपगोत्रावस्थाने सत्येकं सत्कर्मतास्थानम् अन्यतरगोत्रसद्भावे [10]सति द्वितीयमिति ।

एवं कर्म प्रत्युपे[11]क्ष्य तत्सत्तापगमे यतिना यतितव्यमिति । किञ्च—

**कम्म** इत्यादि । कर्मणो मूलं कारणं मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगाः, [12]चः समुच्चये, कर्ममूलं च प्रत्युपेक्ष्य **यत् क्षणम्** इति क्षणु हिंसायाम् [पा०धा० १४६६] क्षणनं हिंसनं यत् किमपि प्राण्युपघातकारि तत् कर्ममूलतया

---

१. ०भिः **कर्मभिः क्षपितै०** क-खआदर्शौ विना । २. ०ऽष्टाशीतै(ते)स्त्रयोदश० घ । ३. तिः, तत्राशीतेः षट्सप्ततेर्वा तीर्थकर० क-खपुस्तके ऋते । ४. **क्षयमुपगते शेषनाम्नि अन्त्यसमये** क-खप्रतिभ्यामृते । ५. **प्रबिभ्रति** ख । ६. ०**मुपयाति** घ च । ७. ०**न्ति, एवं नव** क । ८. ०**गोत्रद्वयसद्भावे** ख च । ९. ०**सत्कर्मतेति, एवं** ख ग, **सत्कर्मता, द्विरूप०** च । १०. क-घ-ङप्रतिषु **सति** इति न वर्तते । ११. ०**क्ष्य सत्तापगमे** क, ०**क्ष्य तत्सत्तापगमाय यतिना** ग । १२. "**च** पूरणे" चूर्णौ ।

प्रत्युपेक्ष्य परित्यजेत् । पाठान्तरं वा **कम्ममाहूय जंछणं** य उपादानक्षणोऽस्य कर्मणः [१]तद्यत्[२]क्षणं कर्म आहूय कर्मोपादाय तत्क्षणमेव निवृत्तिं कुर्यात्, इदमुक्तं भवति—अज्ञान-प्रमादादिना यस्मिन्नेव क्षणे कर्महेतुकमनुष्ठानं कुर्यात् तस्मिन्नेव क्षणे लब्धचेतास्तदुपादानहेतोर्निवृत्तिं विदध्यादिति । पुनरप्युपदेशदानायाह—

**पडिलेहिय** इत्यादि । प्रत्युपेक्ष्य पूर्वोक्तं कर्म तद्विपक्षमुपदेशं च **सर्वं समादाय** गृहीत्वा [३]अन्तहेतुत्वाद् **अन्तौ** राग-द्वेषौ ताभ्यां सहाऽ**दृश्यमानः** ताभ्यामनपदिश्यमानो वा **तत्** कर्म तदुपादानं वा रागादिकं ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञ[४]या परिहरेदिति । रागादिमोहितं **लोकं** [५]विषयकषायलोकं वा ज्ञात्वा, **वान्त्वा च लोकसंज्ञां** विषयपिपासासंज्ञितां [६]धनाद्याग्रहग्रहरूपां वा [७]स **मेधावी** मर्यादाव्यवस्थितः सन् **पराक्रमेत** [८]संयमानुष्ठाने उद्युक्तो भवेत् विषय-पिपासामरिषड्वर्गं वाऽष्टप्रकारं वा कर्माविष्टभ्यात् । [९]**इतिः** परिसमाप्तौ । **ब्रवीमि** इति पूर्ववत् ॥

[१०]इति **शीतोष्णीया[११]ध्ययनप्रथमोद्देशकटीका समाप्[१२]ता** ॥ छ ॥

● ● ●

---

१. तत् क्षणं च । २. क्षणमाहूय कर्मो० ख । ३. "अन्तहेतुत्वाद् इ[ति] सुर्गानिविनाशकत्वात्" जै०वि०प० । ४. ०या च परि० ग । ५. विषयकषायादिकं वा ज्ञात्वा ख, विषयलोकं क । ६. धनायाग्रहग्रहरूपां क ग घ , धनायाग्रहरूपां ङ च । ७. स इति चपुस्तके नास्ति । ८. संयमानुष्ठानोद्युक्तो ख । ९. इति घ च । १०. खप्रतौ इति इति न वर्तते। ११. ०ध्ययनस्य प्रथमोद्देशकटीका परिसमाप्तेति ।छ।। ख । १२. ०प्ता ।छ।। श्रीः ।। ङ ।

उक्तः प्रथमोद्देशकः । साम्प्रतं द्वितीय आरभ्यते । अस्य चायमभिसम्बन्धः—पूर्वोद्देशके भावसुप्ताः प्रदर्शिताः, इह तु तेषां स्वापविपाकफलमसातमुच्यते इति । अनेन सम्बन्धे[1]नायातस्यास्य सूत्रानुगमे सूत्रमुच्चारयितव्यम् तच्चेदम्—

**[ सू०११२ ] जातिं च वुड्ढिं च इहऽज्ज पास,**
**भूतेहिं जाण पडिलेह सातं ।**
**तम्हाऽतिविज्जं परमं ति णच्चा**
**सम्मत्तदंसी ण करेति पावं ॥४॥**

**[ सू०११३ ] उम्मुंच पासं इह मच्चिएहिं,**
**आरंभजीवी उभयाणुपस्सी ।**
**कामेसु गिद्धा णिचयं करेंति,**
**संसिच्चमाणा पुणरेंति गब्भं ॥५॥**

[2]**जाइं च०** इत्या[3]दि वृत्तम् । **जातिः** प्रसूतिः । [4]बाल-कुमार-यौवन-[5]वृद्धावस्थावसाना **वृद्धिः** । **इह** मनुष्यलोके संसारे वा । **अद्यैव** कालक्षेपमन्तरेण, जातिं च वृद्धिं च पश्य अवलोकय । इदमुक्तं भवति—जायमानस्य यद् दुःखं वृद्धावस्थायां च यत् शारीर-मानसमुत्पद्यते तद् विवेकचक्षुषा पश्य, उक्तं च—

[6]जायमाणस्स जं दुक्खं, मरमाणस्स जंतुणो ।
तेण दुक्खेण [7]संतत्तो, न सरइ जाइमप्पणो ॥
विरसरसियं रसंतो तो [8]सो जोणीमुहाउ [9]निप्फिडइ ।
[10]माऊए अप्पणो वि य वेयण[11]मउलं जणेमाणो ॥ [ ]

१. ०नायातस्य सूत्रा० ग । २. जाई च क । ३. ०दि सूत्रम् । जातिः च । ४. "बाल कुमारादि अवस्था १०" झअत्र० । ५. ०वृद्धावसाना ख । ६. जाइमाणस्स ग । ७. सम्मूढो जातिं ण सरति अप्पणो चूर्णौ । ८. से ख । ९. निप्फिडइ क, निप्फडइ ग । १०. मायाए क च । ११. ०मतुलं ख ।

तथा—

**हीण-[१]भिण्णसरो दीणो, विवरीओ विचित्तओ ।**
**दुब्बलो दुक्खिओ वसइ, संपत्तो[२] चरिमं दसं ॥** [ ] इत्यादि ।

अथवा **आर्य** इत्यामन्त्रणम्, भगवान् गौतममामन्त्रयति—इह आर्य ! जातिं वृद्धिं च, तत्कारणं कर्म, कार्यं च दुःखं पश्य, दृष्ट्वाऽवबुध्यस्व, यथा च जात्यादिकं न स्यात् तथा [३]विधत्स्व । किञ्चापरम्—

[४]**भूएहि**मित्यादि । भूतानि चतुर्दश भूतग्रामास्तैः सममात्मनः **सातं** सुखं **प्रत्युपेक्ष्य** पर्यालोच्य [५]**जानीहि**—यथा त्वं सुखप्रिय एवमन्येऽपीति, यथा [६]वा त्वं दुःखद्विड् एवमन्येऽपि [७]जन्तवः । एवं मत्वाऽन्येषामसातोत्पादनं न विदध्याः, एवं च जन्मादिदुःखं न प्राप्स्यसीति, उक्तं च—

**यथेष्ट[८]विषयाः सातमनिष्टा इतरत् तव ।**
**अन्यत्रापि विदित्वैवं, न कुर्या[९]दप्रियं जने ॥** [ ]

यद्येवं ततः किम् ? इत्याह—

**तम्हा** इत्यादि । तस्मात् जाति-वृद्धि-सुख-दुःखदर्शनात्, अतीव **विद्या** तत्त्वपरिच्छेत्त्री यस्यासा**वतिविद्यः**, सः **परमं** मोक्षं ज्ञानादिकं वा तन्मार्गं **ज्ञात्वा सम्यक्त्वदर्शी** सन् **पापं न [१०]करोति**, [११]सावद्यमनुष्ठानं न विदधातीत्युक्तं भवति।

पापस्य [१२]च मूलं स्नेहपाशास्तदपनोदार्थमाह—[१३]**उम्मुंच०** इत्यादि [१४]वृत्तम् । इह मनुष्यलोके चतुर्विध[१५]कषाय-[१६]विषयविमोक्षक्षमाधारे **मर्त्यैः** सार्धं द्रव्य-भाव-भेदभिन्नं पाशम् उत् प्राबल्येन मुञ्च अपाकुरु । स हि कामभोगलालसस्तदा-दानहेतोर्हिंसादीनि पापान्यारभते अतोऽपदिश्यते—

**आरंभ०** इत्यादि । [१७]आरम्भेण जीवितुं शीलमस्येत्या**रम्भजीवी** महारम्भ-

१. ०**भिन्नस्सरो** ख ग, **भीणसरो** ङ । २. ०**त्तो दसमिं दसं** ख । ३. **विधत्स्वेति । किञ्चा०** ख । ४. **भूएहिं इत्यादि** ख । ५. **जानीहि, तथा हि—यथा** च । ६. **वा** इति खप्रतौ नास्ति, **च** ग घ ङ च । ७. **जन्तव इति । एवं** ख ग । ८. ०**विषयात् सातमनिष्टादितरत्** चूर्णौ । ९. ०**दप्रियं परे** चूर्णौ । १०. **करोतीति** ख । ११. **सावद्यानुष्ठानं** च । १२. **च** इति ख-ङपुस्तकयोर्नास्ति । १३. **उम्मुच्च** ख च । १४. **वृत्तम्** इति कप्रतौ न । १५. ०**कषायविमोक्ष०** च । १६. ०**विषयमोक्ष०** ग । १७. **आरम्भे जीवितुं** क ।

परिग्रहप्रकल्पितजीवनोपाय:[१] उभयं शारीर-मानसमैहिका-ऽऽमुष्मिकं वा द्रष्टुं शीलमस्येति स तथा । किञ्च—

**कामेसु०** इत्यादि । कामाः इच्छा-मदनरूपास्तेषु **गृद्धाः** अध्युपपन्ना **निचयं** कर्मोपचयं **कुर्वन्ति** । यदि नामैवं ततः किम् ? इत्याह—**संसिच्च०** इत्यादि । तेन कामोपादानजनितेन कर्मणा संसिच्यमानाः आपूर्यमाणा गर्भाद् गर्भान्तरमुपयान्ति, संसारचक्रवाले[२]ऽरघट्टघटीयन्त्रन्यायेन पर्यटन्ते आसत इत्युक्तं भवति । तदेवमनिभृतात्मा किम्भूतो भवति ? इत्याह—

**[ सू०११४ ] अवि से हासमासज्ज, हंता णंदीति मण्णति ।**
**अलं बालस्स संगेणं, वेरं वड्ढेति अप्पणो ॥६॥**

**[ सू०११५ ] तम्हाऽतिविज्जं परमं ति णच्चा,**
**आयंकदंसी ण करेति पावं ।**
**अग्गं च मूलं च विगिंच धीरे,**
**पलिछिंदियाणं णिक्कम्मदंसी ॥७॥**

**अवि से०** इत्यादि[३]श्लोकः । ह्री-भयादिनिमित्तश्चेतोविप्लवो **हासस्तम्** आसाद्य अङ्गीकृत्य स कामगृध्नु**र्हत्वा**ऽपि प्राणिनः **नन्दीति** क्रीडेति मन्यते, वदति च महामोहा[४]वृतशुभाध्यवसायो यथा—एते पशवो मृगयार्थं सृष्टाः, मृगया च सुखिनां क्रीडायै भवतीति । एवं मृषावादा-[५]ऽदत्तादानादिष्वप्यायोज्यम् । यदि नामैवं ततः किम् ? इत्याह—

[६]**अल**मित्यादि । **अलं** पर्याप्तं **बालस्य** अज्ञस्य यः [७]प्राणातिपातादिरूपः सङ्गो विषय-कषायादिमयो वा तेनालम्, बालस्य हास्यादिसङ्गेनालम् । किम् ? इति चेद्, उच्यते—

---

१. ०नोपायः **स उभयं शा०** च । २. **०ऽरहट्ट०** ग । ३. **०श्लोकः** इति ग-घ-ङपुस्तकेषु नास्ति । ४. **०वृता( त )शुभा०** क च. **०वृतोऽशुभा०** ख घ ङ । ५. **०ऽदत्तादानेष्वप्या०** ख । ६. **अलं इत्यादि** ख । ७. **प्राणातिपातरूपः** च ।

**वेर**मित्यादि । पुरुषादिवधसमुत्थं वैरम्, तद् बालसङ्गानुषङ्गी सन्नात्मनो वर्धयति, तद्यथा—**गुणसेनेन** हास्यानुषङ्गाद् **अग्निशर्माणं** [1]नानाविधैरुपायैरुप-हसता नव[2]भवानुषङ्गि वैरं वर्धितम् । एवमन्यत्रापि विषयसङ्गादावायोज्यम् । यतश्चैवमतः किम् ? इत्याह—

**तम्हा०** इत्यादि [3]वृत्तम् । यस्माद् बालसङ्गिनो वैरं वर्धते तस्माद् अतिविद्वान् परमं मोक्षपदं [4]सर्वसंवररूपं चारित्रं वा सम्यग्ज्ञानं सम्यग्दर्शनं वा एतत् परममिति ज्ञात्वा किं करोति ? इत्याह—

**[5]आयंक** इत्यादि । आतङ्कः नरकादिदुःखम्, तद् द्रष्टुं शीलमस्येत्यातङ्कदर्शी स **पापं** पापानुबन्धि कर्म **न करोति,** उपलक्षणार्थत्वाद् न कारयति नानुमन्यते च । पुनरप्युपदेशदानायाह—

**अग्गं च०** इत्यादि । **अग्रं** भवोपग्राहिकर्मचतुष्टयम्, **मूलं** घातिकर्म-चतुष्टयम् । यदिवा मोहनीयं मूलम्, शेषाणि त्वग्रम् । यदि वा मिथ्यात्वं मूलम्, शेषं त्वग्रम् । तदेवं सर्वमग्रं मूलं च **[6]विगिंच** इति त्यजाऽपनय पृथक्कुरु । तदनेनेदमुक्तं भवति—न कर्मणः पौद्गलिकस्यात्यन्तिकः क्षयः, अपि त्वात्मनः पृथक्करणम् । कथं मोहनीयस्य मिथ्यात्वस्य [7]वा मूलत्वम् ? इति चेत्, तद्वशात् शेषप्रकृतिबन्धः, यत उक्तम्—

**न मोहमतिवृत्य बन्ध उदितस्त्वया कर्मणां,**
**न चैकविधबन्धनं प्रकृतिबन्धविभवो महान् ।**
**अनादिभवहेतुरेष न च बध्यते नासकृत्**
**त्वयाऽतिकुटिला गतिः कुशल ! कर्मणां दर्शिता ॥** [ ]

तथा चागमः—

**[8]कहं भंते ! जीवा अट्ठ [9]कम्मपयडीयो बंधंति ? गोयमा ! [10]णाणावरणिज्जस्स**

---

१. **नानाविधैरुपहसता** ग । २. **०भवानुषङ्गिकं** ख । ३. **वृत्तम्** इति ख-चप्रत्योर्विनाऽन्यत्र नास्ति । ४. **सर्वसंवरचारित्रं** ख, **सर्वसंवररूपचारित्रं** घ । ५. आयंकेत्यादि ग घ । ६. **विगिंच त्ति त्यजा०** ख । ७. **च** च । ८. **कहन्नं भंते** घ ङ । ९. **कम्मप्पगडीओ** ख, **कम्मपगडीओ** ग घ ङ च । १०. **णाणावरणिज्जस्सोदएणं दंसणावरणस्स ( ०वरणं ) कम्मं** *नियच्छइ, दंसणावरणि-ज्जस्सोदएणं दंसणमोहणिज्जं कम्मं ख ।*

[१]उदएणं दरिसणावरणिज्जं कम्मं नियच्छइ, दरिसणावरणि[२]ज्जस्स कम्मस्स उदएणं दंसण[३]मोहणीयं कम्मं [४]नियच्छइ, दंसणमोहणि[५]ज्जस्स कम्मस्स उदएणं मिच्छत्तं [६]नियच्छइ, मिच्छत्तेणं [७]उदिण्णेणं एवं खलु जीवे अट्ठ [८]कम्मपयडीओ [९]बंधइ । [ ]

क्षयोऽपि मोहनीयक्षयाविनाभावी, उक्तं च—

**णायगम्मि [१०]हते [११]संते, जहा सेणा [१२]विणस्सई ।**
**एवं कम्मा विणस्संति, मोहणिज्जे खयं गए ॥** [ ] इत्यादि ।

अथवा मूलम् असंयमः कर्म वा, अग्रं संयम-तपसी मोक्षो वा । ते मूला-ऽग्रे **धीरः** अक्षोभ्यो धीविराजितो वा विवेके[१३]न दुःख-सुखकारण-तया[१४]ऽवधारय । किञ्च—

[१५]**पलिछिंदिया[१६]णं** इत्यादि । तपः-संयमाभ्यां [१७]रागादीनि बन्धनानि तत्कार्याणि वा कर्माणि छित्त्वा **निष्कर्मदर्शी** भवति, निष्कर्माणमात्मानं [१८]पश्यति, तच्छीलश्च निष्कर्मत्वाद्वा अपगतावरणः सर्वदर्शी सर्वज्ञानी [१९]च भवति। यश्च निष्कर्मदर्शी भवति सोऽपरं किमाप्नुयात् ? [२०]इत्याह—

**[ सू०११६ ] एस मरणा पमुच्चति, से हु दिट्ठभये मुणी ।**

**लोगंसि परमदंसी विवित्तजीवी उवसंते समिते सहिते सदा जते कालकंखी परिव्वए ।**

**बहुं च खलु पावं कम्मं पगडं ।**

**एस** इत्यादि । **एष** इत्यनन्तरोक्तो [२१]मूला-ऽग्रविवेचको निष्कर्मदर्शी

---

१. उदएण च । २. ०ज्जस्स उदएणं ग । ३. ०मोहणिज्जकम्मं च । ४. नियच्छति ख । ५. ०ज्जस्स उदएणं क ग । ६. नियच्छति ख । ७. उदिण्णे खलु ख । ८. कम्मप्पगडीओ ख, कम्मपगडीओ ग घ ङ च । ९. बंधति ख, बंधंति ग । १०. हए ख च । ११. सन्ते ङ । १२. विणस्सति ख ङ च, विणस्सइ ग । १३. ०न सुख-दुःखकरण० ख । १४. ०ऽवधारयेति । किञ्च ग । १५. पलिच्छिदिया क ख । १६. ण इत्यादि ख च, णमित्यादि घ ङ । १७. रागादिनिबन्धनानि झअव० । १८. पश्यतीति घ ङ । १९. च इति कप्रतौ नास्ति । २०. इत्याह च ख । २१. मूला-ऽग्रेचको कआदर्शमृते ।

**मरणात्** आयुःक्षयलक्षणाद् **मुच्यते**, आयुषो बन्धनाभावात् । यदि वा आजवञ्जवीभावादावीचीमरणाद्वा सर्व एव संसारो मरणम्, तस्मात् प्रमुच्यते । यश्चैवं स किम्भूतो भवति ? इत्याह—**से हु०** इत्यादि । सः अनन्तरोक्तो मुनिः । दृष्टं संसाराद्[1]भयं सप्तप्रकारं वा येन स तथा । **हुः** अवधारणे, दृष्टभय एव । [2]किञ्च—

[3]**लोयंसि०** इत्यादि । लोके द्रव्याधारे चतुर्दश[4]भूतग्रामात्मके वा परमः मोक्षस्तत्कारणं वा संयमः तं द्रष्टुं शीलमस्येति **परमदर्शी** । तथा विविक्तं स्त्री-पशु-पण्डकसमन्वितशय्यादिरहितं द्रव्यतः, भावतस्तु राग-द्वेषरहितमसङ्क्लिष्टं जीवितुं शीलमस्येति **विविक्तजीवी** । यश्चैवम्भूतः स इन्द्रिय-नोइन्द्रियोपशमाद् **उपशान्तः** । यश्चोपशान्तः स पञ्चभिः समितिभिः सम्यग् वा इतः गतो मोक्षमार्गे **समितः** । यश्चैवं स ज्ञानादि[5]भिः **सहितः** समन्वितः । यश्च ज्ञानादिसहितः [6]स **सदा यतः** अप्रमादी । किमवधिश्चायमनन्तरोक्तो गुणोपन्यासः ? इत्याह—

**काल०** इत्यादि । [7]कालः मृत्युकालस्तमाकाङ्क्षितुं शीलमस्येति **कालाकाङ्क्षी** । स एवम्भूतः [8]परि समन्ताद् व्रजेत् **परिव्रजेत्**, यावत् पर्यायागतं पण्डित[9]मरणम् तदाकाङ्क्षमाणो विविक्तजीवित्वादिगुणोपेतः संयमानुष्ठानमार्गे परिष्वष्केदिति । स्यादेतत्—किमर्थमेवं क्रियते ? इत्याह—

**बहुं च०** इत्यादि । मूलोत्तरप्रकृतिभेदभिन्नं प्रकृति-स्थित्यनुभाव-प्रदेशबन्धात्मकं बन्ध-उदय-सत्कर्मताव्यवस्थामयं तथा बद्ध-स्पृष्ट-निधत्त-निकाचितावस्थागतं कर्म, तच्च न ह्रसीयसा कालेन क्षयमुपयातीत्यतः **काला-काङ्क्षीत्युक्तम्** ।

तत्र बन्धस्थानापेक्षया तावन्मूलोत्तरप्रकृतीनां बहुत्वं प्रदर्श्यते, [11]तद्यथा—सर्वमूलप्रकृती[12]र्बध्नतोऽन्तर्मुहूर्तं यावदष्टविधम् । आयुष्कवर्जं सप्तविधम् ।

---

१. ०**द्भयं येन स** क । २. **किञ्च** इति ङपुस्तके नास्ति । ३. **लोगंसीत्यादि** ख च । ४. ०**भूतात्मके** ख । ५. ०**भिः समन्वितः सहितः । यश्च** क ग । ६. **स हि सदा** ङ । ७. ०**कालं मृत्युमाकाङ्क्षितुं** ख । ८. **परिः** ख च । ९. ०**मरणं तावदाकाङ्क्षमाणो** ख च । ११. **तद्यथा** इति खप्रतौ नास्ति । १२. ०**र्बध्नतो मुहूर्तं** ख ।

तज्जघन्येनान्तर्मुहूर्तम् [1]उत्कृष्टतस्तद्रहितानि त्रयस्त्रिंशत्सागरोपमाणि पूर्वकोटित्रिभागाभ्यधिकानि । सूक्ष्म[2]सम्परायिकस्य [3]मोहनीयबन्धोपरमे आयुष्क[4]बन्धाभावात् षड्विधम्, एतच्च जघन्यतः सामयिकम्, उत्कृष्ट[5]तस्त्वन्तर्मुहूर्तमिति । तथोपशान्त–क्षीणमोह–सयोगिकेवलिनां सप्तविधबन्धोपरमे सातमेकं [6]बध्नतामेकविधं बन्धस्थानम्, तच्च जघन्येन सामयिकम्, उत्कृष्टतो देशोनपूर्वकोटिकालीयम् ।

इदानीमुत्तरप्रकृतिबन्धस्थानान्यभिधीयन्ते—तत्र ज्ञानावरणा–ऽन्तराययोः पञ्चभेदयोरप्येकमेव ध्रुवबन्धित्वाद् बन्धस्थानम् ।

दर्शनावरणीयस्य त्रीणि बन्धस्थानानि—निद्रापञ्चक–दर्शनचतुष्टयसमन्वयाद् ध्रुवबन्धित्वाद् नवविधम्, ततः स्त्यानर्धित्रिकस्या[7]नन्तानुबन्धिभिः सह [8]बन्धोपरमे षड्विधम्, अपूर्वकरणसङ्ख्येयभागे निद्रा–प्रचलयोर्बन्धोपरमे चतुर्विधं बन्धस्थानम् ।

वेदनीयस्यैकमेव बन्धस्थानं सातमसातं वा बध्नतः, उभयोरपि यौगपद्येन विरोधितया बन्धाभावात् ।

[9]मोहनीयस्य बन्धस्थानानि दश, तद्यथा—द्वाविंशतिः, मिथ्यात्वं षोडश कषाया [10]अन्यतरो वेदो हास्य–रतियुग्मा–ऽरति–शोकयुग्मयोरन्यतरद् भयं जुगुप्सा चेति, मिथ्यात्वबन्धोपरमे सास्वादनस्य सैवैकविंशतिः, सैव सम्यग्मिथ्यादृष्टेरविरतसम्यग्दृष्टेर्वाऽनन्तानुबन्ध्यभावे सप्तदशविधं बन्धस्थानम्, तदेव देशविरतस्याप्रत्याख्यानबन्धाभावे त्रयोदशविधम्, तदेव प्रमत्ता–ऽप्रमत्ता–ऽपूर्वकरणानां [11]यतीनां प्रत्याख्यानावरणबन्धाभावाद् नवविधम्, एतदेव हास्यादियुग्मस्य भय-

---

१. "तद्रहितानि देव–मनुज(जा)युर्बन्धान्तर्मुहूर्ताभ्यां रहितानि" जै०वि०प०. **०स्तद्रहित–त्रयस्त्रिंश०** ख । २. **०सम्परायस्य** कप्रतिमृते । ३. **मोहनीयस्य बन्धो०** ख । ४. **०बन्धाभावाच्च षड्विधम्** ख । ५. **०तस्त्वान्तर्मौहूर्तिकमिति** ख । ६. **बध्नतामेकं बन्ध०** क । ७. "**अनन्तानुबन्धि[ भि ]रिति** एतैर्बध्यमानैरेव एतद्बध्यते इति सूचयति" जै०वि०प० । ८. **बन्धोपरमात् षड्विधम्** ग । ९. **मोहनीयबन्ध०** च । १०. **अन्यतरवेदो** घ ङ । ११. **यतीनां** इति खप्रतौ नास्ति ।

जुगुप्सयोश्चा[1]पूर्वकरणचरमसमये बन्धोपरमात् पञ्चविधम्, ततोऽनिवृत्तिकरण[2]सङ्ख्येयभागावसाने पुंवेदबन्धोपरमात् चतुर्विधम्, ततोऽपि तस्मिन्नेव[3] सङ्ख्येयभागे क्षयमुपगच्छति सति क्रोध-मान-मायासञ्ज्वलनानां[4] क्रमेण बन्धोपरमात् त्रिविधं द्विविधमेकविधं चेति, तस्याप्यनिवृत्तिकरणचरमसमये बन्धोपरमान्मोहनीयस्याबन्धकः[5] ।

आयुषः सामान्येनैकविधं बन्धस्थानं चतुर्णामन्यतरत्, द्व्यादेर्यौगपद्येन बन्धाभावो विरोधादिति ।

नाम्नोऽष्टौ बन्धस्थानानि, तद्यथा—त्रयोविंशतिः, तिर्यग्गतिप्रायोग्यं बध्नतस्तिर्यग्गतिरेकेन्द्रियजातिरौदारिक-तैजस-कार्मणानि हुण्डसंस्थानं वर्ण-गन्ध-रस-स्पर्शास्तिर्यग्गतिप्रायोग्या[6] आनुपूर्वी अगुरुलघु उपघातं स्थावरं बादर-सूक्ष्मयोरन्यतरद् अपर्याप्तक प्रत्येक-साधारणयोरन्यतरद् अस्थिरम् अशुभं दुर्भगम् अनादेयम् अयशःकीर्तिः निर्माणमिति, इयमेकेन्द्रियापर्याप्तकप्रायोग्यं बध्नतो मिथ्यादृष्टेर्भवति । इयमेव पराघात-उच्छ्वाससहिता पञ्चविंशतिः, नवरमपर्याप्तकस्थाने पर्याप्तक[7] एव वाच्यः । इयमेव चातप-उद्द्योतान्यतर-समन्विता षड्विंशतिः, नवरं बादर-प्रत्येके एव वाच्ये[8] । तथा[9] देवगतिप्रायोग्यं बध्नतोऽष्टाविंशतिः, तथाहि[10]—देवगतिः पञ्चेन्द्रियजातिः वैक्रिय-तैजस-कार्मणानि शरीराणि[11] समचतुरस्रम् अङ्गोपाङ्गं वर्णादिचतुष्कम्[12] आनुपूर्वी अगुरुलघु उपघातं[13] पराघातम् उच्छ्वासः प्रशस्तविहायोगतिः त्रसं बादरं पर्याप्तकं प्रत्येकं स्थिरा[14]-ऽस्थिरयोरन्यतरत् शुभा-ऽशुभयोरन्यतरत् सुभगं सुस्वरम् आदेयं यशःकीर्ति-अयशःकीर्त्योरन्यतरत् निर्माणमिति । एषैव तीर्थकरनामसहिता एकोनत्रिंशत् । साम्प्रतं त्रिंशत्—देवगतिः पञ्चेन्द्रियजातिः वैक्रिया-ऽऽहारका[15]ङ्गोपाङ्गचतुष्टयं

---

१. ०श्चापूर्वकरणे चरम० च । २. ०करणबन्धभागा० ख । ३. तस्मिन्नेवासङ्ख्येयभागे ख । ४. ०माया-लोभञ्ज्वलनानां ग । ५. ०स्याबन्धः ख । ६. ०प्रायोग्यानुपूर्वी घ ङ च । ७. पर्याप्तकमेव वाच्यम् । इय० ख घ. पर्याप्तकमेव वाच्यम् । तथा इय० ङ । ८. "वाच्ये [इ]ति कर्मणीति शेषः" जै०वि०प० । ९. तथा इति क-चप्रत्योर्न, ततो च । १०. तद्यथा-देव० ख । ११. शरीराणि क- चआदर्शयोर्नास्ति । १२. ०चतुष्टयं घ ङ च । १३. उपघात क ख घ च । १४. स्थिरं शुभं सुभगं सुस्वरं च । १५. ०ऽऽहारकशरीरा-ऽङ्गोपाङ्गचतुष्कं तैजस० ख ।

तैजस-कार्मणे संस्थानमाद्यं वर्णादिचतुष्कम् आनुपूर्वी अगुरुलघु उपघातं पराघातम् उच्छ्रासः[१] प्रशस्तविहायोगतिः त्रसं बादरं पर्याप्तकं[२] प्रत्येकं स्थिरं शुभं सुभगं सुस्वरम् आदेयं यशःकीर्तिः निर्माणमिति च[३] बध्नत एकं बन्धस्थानम् । एषैव त्रिंशत् तीर्थकरनामसहिता एकत्रिंशत् । एतेषां च[४] बन्धस्थानानामेकेन्द्रिय-[५]द्वीन्द्रिय-त्रीन्द्रिय-नरकगत्यादिभेदेन[६] बहुविधता **कर्मग्रन्था**दवसेया । अपूर्व-करणादिगुणस्थानकत्रये देवगतिप्रायोग्यबन्धोपरमाद् यशःकीर्तिमेव बध्नत[७] एकविधं बन्धस्थानमिति । तत ऊर्ध्वं[८] नाम्नो बन्धाभाव इति ।

गोत्रस्य सामान्येनैकं बन्धस्थानम्—उच्च-नीचयोरन्यतरत्, यौगपद्येनोभयो-र्बन्धाभावो विरोधादिति ।

तदेवं बन्धद्वारेण लेशतो बहुत्वमावेदितं कर्मणाम्, तच्च बहुकर्म **प्रकृतं** बद्धं **प्रकटं** वा, तत्कार्यदर्शनात्[९] । **खलु**शब्दः वाक्यालङ्कारे अवधारणे वा, बह्वेव तत् कर्म । यदि नामैवं ततस्तदपनयनार्थं किं कर्तव्यम् ? इत्याह—

**[ सू०११७ ] सच्चंसि धितिं कुव्वह । एत्थोवरए मेहावी सव्वं पावं कम्मं झोसेति ।**

**[ सू०११८ ] अणेगचित्ते खलु अयं पुरिसे, से केयणं अरिहइ पूरइत्तए ।**

**से अण्णवहाए अण्णपरियावाए अण्णपरिग्गहाए जणवयवहाए जणवयपरिवायाए जणवयपरिग्गहाए ।**

**[ सू०११९ ] आसेवित्ता एयमट्ठं इच्चेवेगे समुट्ठिता ।**
**तम्हा तं बिइयं नासेवते णिस्सारं पासिय णाणी ।**

---

१. उच्छ्रासं ग-चपुस्तके ऋते । २. पर्याप्तं क । ३-४. च इति खप्रतौ न । ५. ०मेकेन्द्रिय-नरक० च । ६. ०द्वीन्द्रिय-नरक० क ख, ०द्विन्द्रिय-नारक० ग । ७. बध्नत इत्येकविधं ख । ८. ऊर्द्धं ख ग च । ९. तत्कार्यप्रदर्शनात् ग ।

**उववायं चयणं णच्चा अणण्णं चर माहणे ।**

**से ण छणे, न छणावए, छणंतं णाणुजाणति ।**

**णिव्विदं णंदिं अरते पयासु अणोमदंसी णिसण्णे पावेहिं कम्मेहिं ।**

**संच्चे**[१] इत्यादि । सद्भ्यो हितः सत्यः संयमस्तत्र धृतिं कुरुध्वम्, सत्यो वा मौनीन्द्रागमो यथावस्थितवस्तु[२]स्वरूपाविर्भावनात् । तत्र भगवदाज्ञायां धृतिं कुमार्गपरित्यागेन [३]कुरुध्वमिति । किञ्च–

**एत्थोवरए०** इत्यादि । **अत्र** अस्मिन् संयमे भगवद्वचसि वा **उप** सामीप्येन **[४]रतः** व्यवस्थितः **मेधावी** तत्त्वदर्शी **सर्वम्** अशेषं **पापं कर्म** संसारार्णवपरिभ्रमण[५]हेतुं **[६]झोषयति** शोषयति क्षयं नयतीति यावत् । उक्तोऽप्रमादः, तत्प्रत्यनीकस्तु प्रमादः । तेन च कषायादिप्रमादे[७]न प्रमत्तः किंगुणो भवति ? इत्याह–

**अणेगचित्ते०** इत्यादि । अनेकानि चित्तानि कृषि–वाणिज्या–ऽवलगना–दीनि यस्यासाव**नेकचित्तः** । **खलुः** अवधारणे, संसारसुखाभिलाष्यनेकचित्त एव भवति । **अयं पुरुषः** इति प्रत्यक्षगोचरीभूतः [८]संसार्यपदिश्यते । अत्र च प्रागुपन्यस्तदधि[९]घटिकया [१०]कपिलदरिद्रेण च दृष्टान्तो वाच्य इति । यश्चानेकचित्तो भवति स किं कुर्यात् ? इत्याह–

**से [११]केयण**मित्यादि । द्रव्यकेतनं [१२]चालनी परिपूर्णकः समुद्रो वेति । भावकेतनं लोभेच्छा । तदसावनेकचित्तः केनाप्यभूतपूर्वं **पूरयितुमर्हति**, अर्थितया शक्या–ऽशक्यविचाराक्षमोऽशक्यानुष्ठानेऽपि प्रवर्तत इत्युक्तं भवति । स च

---

१. **सच्चेत्यादि** ग । २. **०स्वरूपाविर्भावात्** ग । ३. **कुरु त्वमिति** च । ४. "**एत्थोवरते** त्ति सच्चपडिपक्खे अलिए सच्चाधिट्ठितवताण वा पडिपक्खे **उवरतो** णिव्विन्नो" चूर्णौ । ५. **०हेतुः** क घ ङ **०हेतु** च । ६. **झोषयति** इति खप्रतौ नास्ति । ७. **०न च प्रमत्तः** ख । ८. **संसार्युपदिश्यते** घ ङ । ९. **०घटिकाया** च । १०. **कपिलेन च** ख । ११. **केयणं इत्यादि** ख ग च । १२. "**चालिनीपरिपूर्णक** इति सुघरीगृहम्" जै०वि०प० ।

लोभेच्छापूरणव्याकुलितमतिः किं कुर्यात् ? इत्याह–

**से अन्नवहाए०** इत्यादि । स लोभपूरणप्रवृत्तोऽन्येषां प्राणिनां वधाय भवति । तथा[1]ऽन्येषां शारीर-मानस**परितापनाय** । तथाऽन्येषां द्विपद-चतुष्पदादीनां **परिग्रहाय** । जनपदे भवा **जानपदाः** कालप्रष्ठादयो[2] राजादयो वा[3] मगधादिजनपदा वा तद्वधाय । तथा जनपदानां लोकानां **परिवादाय** दस्युरयं पिशुनो वा इत्येवं मर्मोद्घट्टनाय । तथा जनपदानां **मगधादीनां** परिग्रहाय । प्रभवतीति[4] सर्वत्राध्याहारः[5] । किं य एते[6] लोभप्रवृत्ता वधादिकाः क्रियाः कुर्वन्ति ते तथाभूता एवासते उतान्यथा[7] ? अन्यथाऽपीति दर्शयति–

**आसेवित्ता०** इत्यादि । **एनम्**[8] अनन्तरोक्तमर्थमन्यवध-परिग्रह-परितापनादिकमासेव्य **इत्येव** इति लोभेच्छाप्रतिपूरणायैव **एके भरतराजादयः समुत्थिताः** सम्यग् योगत्रिकेणोत्थिताः संयमानुष्ठानेनोद्यतास्तेनैव[9] भवेन सिद्धिमासादयन्ति । संयमसमुत्थानेन[10] च समुत्थाय कामभोगान् हिंसादीनि चाश्रवद्वाराणि[11] हित्वा किं विधेयम् ? इत्याह–

**तम्हा०** इत्यादि । यस्माद्वान्तभोगतया कृतप्रतिज्ञस्तस्माद् भोगलिप्सुतया तद्[12] **द्वितीयं** मृषावादमसंयमं वा **नासेवेत**[13] । विषयार्थमसंयमः सेव्यते, ते च विषया निःसारा इति दर्शयति–

**निस्सारं०**[14] इत्यादि । सारो हि विषयगणस्य तत्प्राप्तौ तृप्तिः, तदभावाद् निःसारस्तं **दृष्ट्वा ज्ञानी** तत्त्ववेदी न विषयाभिलाषं विदध्यात् । न केवलं मनुष्याणाम्, देवानामपि विषयसुखास्पदमनित्यं जीवितमिति च[15] दर्शयति–

---

१. **तथा तेषां** क । २. "**कालप्रष्टादय** इति म्लेच्छादयः" जै०वि०प०, "तृतीयाध्ययने उद्दे० २-**कालप्रष्टादयः** म्लेच्छादयः" स०वि०प० । ३. **वा तद्वधाय** ग-ङपुस्तके विना । ४. **भवतीति** ङ । ५. **सर्वदाध्याहारः** ख । ६. **किं ये ते लोभ०** क । ७. **उतान्यथाऽपि ? इति दर्श०** ख ग च । ८. **एवम्** क च । ९. **संयमानुष्ठानोद्यता०** ख च । १०. **०न चोत्थाय** ख च । ११. **चास्रव०** ङ । १२. **तत्र** ग, **तं** घ ङ "**बितियं** णाम पुणो पुणो तमिति विसयसुहं असंजमं वा । आसेवणं करणं । सहस्ससो वि आसेविज्जमाणाणं विसयाणं तित्तिअभावे" चूर्णौ । १३. **नासेवते** क । १४. **निस्सार** क ख ग । १५. **च** इति ख-चप्रत्योर्न ।

**उववायं [1]चयणं नच्चा**, उपपातं जन्म, च्यवनं पातः, [2]तच्च ज्ञात्वा न विषयसङ्गोन्मुखो भवेदिति । यतो निःसारो विषयग्रामः [3]समस्तसंसारो वा सर्वाणि च स्थानान्यशाश्वतानि । ततः किं कर्तव्यम् ? इत्याह—

[4]**अणन्नमि**त्यादि । मोक्षमार्गाद् अन्यः असंयमः, नान्यः अनन्यः [5]ज्ञानादिः, तं **चर माहण** इति मुनिः । किञ्च—

**से न [6]छणे०** इत्यादि । स मुनिः अनन्यसेवी प्राणिनो **न क्षणुयात्** न हन्यात्, [7]नापरं घातये[8]त्, घ्नन्तमन्यं न [9]समनुजानीत । चतुर्थव्रतसिद्धये त्विदमुपदिश्यते—

**निर्व्विद०** इत्यादि । **निर्विन्दस्व** जुगुप्सस्व विषय[10]जनितां **नन्दीं** प्रमोदम्। किम्भूतः सन् ? **प्रजासु** स्त्रीषु **अरक्तः** रागरहितः, भावयेच्च यथा—एते विषयाः किम्पाकफलोपमा[11]स्त्रपुषीफलनिबन्धन[12]कटवः । अतस्तदर्थं परिग्रहाग्रहयोग-पराङ्मुखो भवेदिति । उत्तमधर्मपालनार्थमाह—

**अणोम०** इत्यादि । अवमं हीनं मिथ्यादर्शना-ऽविरत्यादि तद्विपर्यस्त-मनवमम् तद् द्रष्टुं शीलमस्येत्यनवमदर्शी [13]सम्यग्दर्शन-ज्ञान-चारित्रवान्, [14]एवम्भूतः सन् प्रजानुगां नन्दीं निर्विन्दस्वेति सण्टङ्कः । [15]यश्चानवमसन्दर्शी स किम्भूतो भवति ? इत्याह—

**निसन्न०** इत्यादि । पापोपादानेभ्यः कर्मभ्यः **निषण्णः** निर्विण्णः पाप-कर्मभ्यः पापकर्मसु वा कर्तव्येषु निवृत्त इति यावत् । किञ्च—

## [ सू०१२० ] कोधादिमाणं हणिया य वीरे,
## लोभस्स पासे णिरयं महंतं ।

---

१. **चवणं** ग घ ङ । २. **तज्ञा( ज्ज्ञा )त्वा** ख । ३. **समस्तं संसारो** घ, **समस्तः संसारो** च । ४. **अणण्णं इत्यादि** च । ५. **ज्ञानादिकः** घ ङ । ६. **छण** घ ङ । ७. **नाप्यपरं** ख च, **न परं** घ, ङप्रतौ पाठभङ्गः । ८. **०त्, घातयन्तं न सम०** ख-चप्रती ऋते । ९. **समनुजानीयात्** ग । १०. **०जनितनन्दीं** ख । ११. "**त्रपुषीफलनिबन्धनं** कटुकर्कटीवृन्तम्" स०वि०प० । १२. "**निबन्धन** इति वृन्तम्" जं०वि०प० । १३. **सम्यग्ज्ञान-दर्शन-चारित्रवान्** च । १४. **एवभूतं ( तां ? ) नन्दीं** ख । १५. **यश्चानवमदर्शी** च ।

तम्हा हि वीरे विरते वधातो,
छिंदिज्ज सोतं लहुभूयगामी ॥८॥
[ सू०१२१ ] गंथं परिण्णाय इहऽज्ज वीरे,
सोयं परिण्णाय चरेज्ज दंते ।
उम्मुग्ग लद्धुं इह माणवेहिं,
णो पाणिणं पाणे समारभेज्जासि ॥९॥
त्ति बेमि ।

॥ सीओसणिज्जस्स बीओ उद्देसओ सम्मत्तो ॥

**कोहादी**[1]त्यादि वृत्तम् । क्रोध आदिर्येषां ते क्रोधादयः [2]मीयते परिच्छिद्यतेऽनेनेति मानं स्वलक्षणम् अनन्तानुबन्ध्यादिविशेषः, क्रोधादीनां मानं क्रोधादिमानम्, [3]क्रोधादिर्वा यो मानः [4]गर्वः, तं हन्यात् । कोऽसौ ? [5]**वीरः** । [6]द्वेषापनोदमुक्त्वा रागापनोदार्थमाह–

**लोहस्स०** इत्यादि । लोभस्यानन्तानुबन्ध्यादेश्चतुर्विधस्यापि स्थितिं विपाकं च पश्य । स्थितिर्महती सूक्ष्मसम्परायानुयायित्वात्, विपाकोऽप्यप्रतिष्ठानादि-नरकापत्तेर्महान्, यत आगमः–**मच्छा मणुया य सत्तमिं पुढविं** [ ] ते च महालोभाभिभूताः सप्तमपृथिवीभाजो भवन्तीति भावार्थः । यद्येवं ततः किं कर्तव्यम् ? इत्याह–

**तम्हा०** इत्यादि । यस्माद् लोभाभिभूताः [8]प्राणिवधादिप्रवृत्तितया महा-नरकभाजो [9]भवन्ति तस्माद् वीरो लोभहेतोर्वधाद्विरतः [10]स्यादिति । किञ्च–

**छिंदिज्ज०** इत्यादि । शोकं [11]भावश्रोतो वा **छिन्द्यात्** अपनयेत् ।

---

१. कोहाइ इत्यादि ख च । २. मीयतेऽनेनेति क ङ, मीयतेऽनेन मानं घ । ३. क्रोधादेर्वा क । ४. गर्वः क्रोधकारणः, तं ख ग च । ५. धीरः घ ङ च । ६. द्वेषापनोदार्थमुक्त्वा क ग । ७. ते च लोभाभिभूताः घ ङ । ८. प्राणवधादि० च । ९. भवन्तीति घ । १०. स्यात् । किञ्च घ ङ । ११. भावस्रोतो ग ङ ।

किम्भूतः ? **लघुभूतः** मोक्षः संयमो वा, तं गन्तुं शीलमस्येति **लघुभूतगामी** । लघुभूतं वा कामयितुं शीलमस्येति **लघुभूतकामी** । पुनरप्युपदेशदानायाह—

[१]**गंथ**मित्यादि वृत्तम् । [२]ग्रन्थं बाह्या-ऽऽभ्यन्तरभेदभिन्नं ज्ञपरिज्ञया परिज्ञाय **इह अद्यैव** कालानतिपातेन [३]**वीरः** सन् प्रत्याख्यानपरिज्ञया परित्यजेत् । किञ्च—

[४]**सोय**मित्यादि । विषयाभिष्वङ्गः [५]संसार[६]स्रोतस्तद् ज्ञात्वा दान्त इन्द्रिय-[७]नोइन्द्रियदमेन संयमं **चरे**दिति । किमभिसन्धाय संयमं चरेत् ? इत्याह—

[८]**उम्मग्ग** [९]**लद्धु**मित्यादि । इह मिथ्यात्वादिशैवला[१०]च्छादिते संसारहृदे जीवकच्छपः श्रुति-श्रद्धा-संयम-वीर्यरूपमुन्मज्जनम् आसाद्य लब्ध्वा, अन्यत्र सम्पूर्णमोक्षमार्गासम्भवाद् [११]मानुषेष्वित्युक्तम् । क्त्वाप्रत्यय[१२]स्योत्तरक्रिया[१३]सव्यपेक्षित्वाद् उत्तरक्रियामाह—

**नो** [१४]**पाणिण**मित्यादि । प्राणा विद्यन्ते येषां ते प्राणिनस्तेषां प्राणान् पञ्चेन्द्रिय-त्रिविधबलोच्छ्वास-[१५]निःश्वासाऽऽयुष्कलक्षणान् नो समारभेथाः न [१६]व्यपरोपयेः, तदुपघात[१७]कार्यनुष्ठानं मा कृथा इत्युक्तं भवति । [१८]**इतिः** परिसमाप्तौ । ब्रवीमि इति पूर्ववत् ।

**शीतोष्णी[१९]याध्ययनद्वितीयोद्देशकटीका [२०]समाप्ता ॥ छ ॥ छ ॥**

● ● ●

---

१. *गंथं इत्यादि ख च, गंथमित्यादि ङ । २. "ग्रन्थ १४ [आभ्यन्तर]" झअव० ।* ३. धीरः घ ङ च । ४. **सोयं इत्यादि** ख च । ५. **संसारस्त्रोत०** ग घ ङ । ६. **०श्रोतस्तं ज्ञात्वा** ख ग । ७. **०नोइन्द्रियसंयमेन** ख । ८. **उम्मग** क ख, **उम्मुग** च । ९. **लद्धुं इत्यादि** ख च । १०. **०च्छादितसंसार०** कप्रत्या विना । ११. **मानुष्येष्वित्युक्तम्** ग । १२. **०स्योत्तरकाल-सव्यपेक्षत्वाद्** ख । १३. **०सव्यपेक्षत्वाद्** ग । १४. **पाणिणं इत्यादि** ख च । १५. **०निश्वासा०** ख च । १६. **व्यपरोपयेत्** ग । १७. **०कार्यमनुष्ठानं** ङ । १८. **इति** ङ च । १९. **०याध्ययने** ग । २०. *समाप्तेति घ, समाप्ता इति ङप्रतौ नास्ति, परिसमाप्तेति च ।*

उक्तो द्वितीयोद्देशकः साम्प्रतं तृतीय आरभ्यते । अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके दुःखं तत्सहनं च प्रतिपादितम्, न च तत्सहनेनैव संयमानुष्ठानरहितेन पापकर्माकरणतया वा श्रमणो भवतीत्येतत् [१]प्रागुद्देशार्थाधिकारनिर्दिष्टमुच्यते । [२]अतोऽनेन सम्बन्धेनायातस्यास्योद्देशकस्य सूत्रानुगमे सूत्रमुच्चारयितव्यम्, तच्चेदम्—

**[ सू०१२२ ] संधिं लोगस्स जाणित्ता आततो बहिया पास । तम्हा ण हंता ण विघातए ।**

**जमिणं अण्णमण्णवितिगिंछाए पडिलेहाए ण करेति पावं कम्मं किं तत्थ मुणी कारणं सिया ?**

**[ सू०१२३ ] समयं तत्थुवेहाए अप्पाणं विप्पसादए ।**
**अणण्णपरमं णाणी णो पमादे कयाइ वि ।**
**आतगुत्ते सया वीरे जातामाताए जावए ॥१०॥**
**विरागं रूवेहिं गच्छेज्जा महता खुड्डएहिं वा ।**

**आगतिं गतिं परिण्णाय दोहिं वि अंतेहिं अदिस्समाणेहिं से ण छिज्जति, ण भिज्जति, ण डज्झति, ण हम्मति कंचणं सव्वलोए ।**

**संधिं लोयस्स [३]जाणित्ता** । तत्र सन्धिर्द्रव्यतो भावतश्च । [४]तत्र द्रव्यतः कुड्यादिविवरम्, भावतः कर्मविवरम् । तत्र दर्शनमोहनीयं यदुदीर्णं तत् क्षीणम्, शेषमुपशान्तमित्ययं सम्यक्त्वावाप्तिलक्षणो भावसन्धिः । यदि वा ज्ञानावरणीयं विशिष्टक्षायोपशमिकभावमुपगतमिति अयं सम्यग्ज्ञानावाप्तिलक्षणः सन्धिः अथवा चारित्रमोहनीयक्षयोपशमात्मकः सन्धिः । तं ज्ञात्वा न प्रमादः श्रेयानिति,

---

१. **प्रागुद्देशाधिकार०** क । २. **अथोऽनेन** ङ । ३. **जाणेत्ता** । **ततः सन्धि०** ख । ४. तत्र इति ख-चप्रत्योर्नास्ति ।

यथा हि लोकस्य चारकाद्यवरुद्धस्य कुड्यनिगडादीनां सन्धिं छिद्रं ज्ञात्वा उपलभ्य न प्रमादः श्रेयान् । एवं मुमुक्षोरपि कर्मविवर[1]मासाद्य क्षणमपि पुत्र-कलत्रसंसारसुखव्यामोहो न श्रेयसे भवतीति । यदि वा सन्धानं सन्धिः, स च भावसन्धिर्ज्ञान-दर्शन-चारित्राध्यवसायस्य कर्मोदयात् त्रुट्यतः पुनः सन्धानं मीलनम् एतत्क्षायोपशमिकादिभावलोकस्य विभक्तिपरिणामाद्वा लोके ज्ञान-दर्शन-चारित्रार्हे भावसन्धिं ज्ञात्वा तदक्षूणप्रतिपालनाय [2]विधेयमिति । यदि वा सन्धिः अवसरो धर्मानुष्ठानस्य तं ज्ञात्वा लोकस्य भूतग्रामस्य दुःखोत्पादनानुष्ठानं न कुर्यात्, [3]सर्वत्रात्मौपम्यं समाचरे[4]दित्याह—

**आयओ** इत्यादि । यथा ह्यात्मनः सुखमिष्टम् इतरत् त्वन्यथा तथा बहिरपि आत्मनो व्यतिरिक्तानामपि जन्तूनां सुखप्रियत्वमसुखाप्रियत्वं [5]च **पश्य** अवधारय । तदेवमात्मसमतां सर्वप्राणिनामवधार्य किं कर्तव्यम् ? इत्याह—

**तम्हा** इत्यादि । यस्मात् [6]सर्वेऽपि जन्तवो दुःखद्विषः सुखलिप्सव-स्तस्मात् तेषां **न हन्ता** न [7]व्यापादकः स्यात् नाप्यपरैस्तान् जन्तून् विविधैः नानाप्रकारैरुपायै**र्घातयेत्** विघातयेदिति, यद्यपि कांश्चित् स्थूलान् सत्त्वान् स्वयं पाषण्डिनो न घ्नन्ति तथाप्युद्देशिक-सन्निध्यादिपरिभोगानुमतेरपरैर्घातयन्ति । न चैकान्तेन पापकर्माकरणमात्रतया श्रमणो भवतीति दर्शयति—

**जमिण**मित्यादि । **यदिदं** यदेतत् पापकर्मा[8]करणताकारणं किं [9]तत् ? दर्शयति—अन्योन्यस्य परस्परं या **विचिकित्सा** आशङ्का परस्परतो भयं लज्जा वा तया तां वा प्रत्युप्रेक्ष्य [10]परस्पराशङ्कयाऽपेक्षया वा पापं पापोपादानं कर्म अनुष्ठानं न करोति न विधत्ते । **किं** प्रश्ने क्षेपे वा । तत्र तस्मिन् पापकर्माकरणे किं मुनिः कारणं स्यात् ? किं मुनिरिति कृत्वा [11]पापकर्म न करोति ? [12]काक्वा पृच्छति । यदि वा यदि नामासौ यथोक्तनिमित्तात् पापानुष्ठानविधायी न सञ्जज्ञे किमेतावतैव

---

१. *०मासाद्य लवक्षणमपि* घ ङ । २. *विधिरयमिति* घ ङ "*विधेयम्* इति *मीलितमित्यनेन सम्बन्धः*" जै०वि०प० । ३. **सर्वत्रात्मौपयिकमाचरेदित्याह** ख । ४. **०दिति ।** *आह च–* च । ५. **च** *इति कप्रतौ नास्ति* । ६. ***सर्वे जन्तवो*** ग । ७. ***व्याघातकः*** ख । ८. **०करणतया कारणं** ख । ९. **तत्** इति ख-चप्रत्योर्न । १०. **परस्पराशङ्कापेक्षया** च । ११. **पापं कर्म** ख च । १२. "**काक्वा** इति परस्पराशङ्कया" जै०वि०प० ।

मुनिरसौ ? नैव मुनिरित्यर्थः । अद्रोहाध्यवसायो हि मुनिभावकारणम्, स च तत्र न विद्यते, अपरोपाध्यावेशात् । विनेयो वा पृच्छति—यदिदं परस्पराशङ्क्या [1]आधाकर्मादिपरिहरणं तन्मुनिभावाङ्गतां यात्याहोस्विन्नेति ? आचार्य आह—सौम्य ! निरस्तापरव्यापारः शृणु—

[2]**जमिण**मित्यादि । अपरोपाधिनिरस्तहेयव्यापारत्वमेव मुनिभावकारणमिति भावार्थः, यतः शुभान्तःकरणपरिणामव्यापारापादितक्रियस्य [3]मुनिभावः, नान्यथेति । अयं तावन्निश्चयनयाभिप्रायः । व्यवहाराभिप्रायेण तूच्यते—यो हि सम्यग्दृष्टि-रुत्क्षिप्तपञ्चमहाव्रतभारस्तद्वहने प्रमाद्यन्नप्यपरसमानसाधुलज्जया गुर्वाद्याराध्यभयेन गारवेण वा केनचिदाधाकर्मादि परिहरन् प्रत्युपेक्षणादिकाः क्रियाः करोति, यदि च तीर्थोद्भासनाय मासक्षपणा-ऽऽतापनादिका जनविज्ञाताः क्रियाः करोति तत्र तस्य मुनिभाव एव कारणम्, तद्व्यापारापादितपारम्पर्यशुभाध्यवसायोपपत्तेः ।

तदेवं शुभान्तःकरणव्यापारविकलस्य मुनित्वे सदसद्भावः प्रदर्शितः, कथं तर्हि नैश्चयिको मुनिभावः ? इत्यत आह—

[4]**समय**मित्यादि । [5]समभावः **समता** [6]तां **तत्रोत्प्रेक्ष्य** पर्यालोच्य समता-व्यवस्थितो यद्यत् करोति येन केनचित् प्रकारेणानेषणीयपरिहरणं लज्जादिना जनविदितं चोपवासादि तत् सर्वं मुनिभावकारणमिति । यदि वा **समयम्** आगमं तत्रोत्प्रेक्ष्य यदागमोक्त[7]विधिनानुष्ठानं तत् सर्वं मुनिभावकारणमिति भावार्थः । तेन चागमोत्प्रेक्षणेन समतोत्प्रेक्षया वा**ऽऽत्मानं विप्रसादयेद्** विविधं प्रसादयेद् आगमपर्यालोचनेन समतादृष्ट्या वाऽऽत्मानं विविधैरुपायैरिन्द्रियप्रणिधाना-ऽप्रमादादिभिः प्रसन्नं विदध्यात् । आत्मप्रसन्नता च संयमस्थस्य भवति, तत्राप्रमादवता भाव्यमिति । आह च—

[8]**अणन्नपरम**मित्याद्यनुष्टुप् । न विद्यतेऽन्यः परमः प्रधानोऽस्मादित्य-

---

१. **अधर्मादिपरिहरणं** ख। २. **जमिणं इत्यादि** ख च । ३. **मुनेर्भाव** घ । ४. **समयं इत्यादि** ख ग च । ५. **समभावं समतां वा तत्रोत्प्रेक्ष्य समताव्यवस्थितो** ख। ६. **तां स तत्रो०** ङ। ७. **०विधानानुष्ठानं** ख-चप्रती विना । ८. **अणण्णपरमं इत्याद्य०** च।

**नन्यपरमः** संयमस्तं **ज्ञानी** परमार्थवित् **नो प्रमादयेत्** तस्य प्रमादं न कुर्यात् कदाचिदपि। यथा [१]चाप्रमादता भवति तथा दर्शयितुमाह–

[२]**आयगुत्ते** इत्यादि। इन्द्रिय–नोइन्द्रियात्मना गुप्तः **आत्मगुप्तः सदा** सर्वकालं यात्रा संयमयात्रा [३]तस्यां मात्रा **यात्रा**[४]**मात्रा,** मात्रा च '**अच्चाहारो न** [५]**सहे**' [ ] इत्यादि, तयाऽऽत्मानं **यापयेत्** [६]यथा विषयानुदीरणेन दीर्घकालं संयमाधारदेहप्रतिपालनं भवति तथा [७]कुर्यात्, उक्तं च–

> [८]**आहारार्थं कर्म कुर्या**[९]**दनिन्द्यम्, स्यादाहारः प्राणसन्धारणार्थम्।**
> [१०]**प्राणा धार्यास्तत्त्व**[११]**जिज्ञासनाय,** [१२]**तत्त्वं ज्ञेयं येन भूयो न भूयात्॥** [ ]
>
> [१३]सैवाऽऽत्मगुप्तता कथं स्यात्? इति चेद् आह–

[१४]**विरागमि**त्यादि। विरजनं विरागस्तं विरागं **रूपेषु** मनोज्ञेषु चक्षुर्गोचरीभूतेषु [१५]**गच्छेत्** यायात्। रूपमतीवाऽऽक्षेपकारि अतो रूपग्रहणम्, अन्यथा शेष[१६]विषयेष्वपि विरागं गच्छेदित्युक्तं स्यात्। **महता** दिव्यभावेन यद् व्यवस्थितं रूपं **क्षुल्लकेषु वा** [१७]मनुष्यरूपेषु सर्वत्र विरागं कुर्यादिति। अथवा दिव्यादि प्रत्येकं [१८]महत् क्षुल्लकं चेति, क्रिया [१९]पूर्ववत्। **नागार्जुनीया**स्तु पठन्ति–

> **विसयम्मि** [२०]**पंचगम्मी, दुविहम्मि तियं तियं।**
> **भावओ सुट्ठु** [२१]**जाणित्ता, से न लिप्पइ दोसु वि॥**

शब्दादिविषयपञ्चकेऽपि इष्टा–ऽनिष्टरूपतया [२२]द्विविधे हीन–मध्यमो-

---

१. **चाप्रमादवत्ता** घ च। २. **आयगुत्तेत्यादि** ग। ३. **तस्या** च। ४. **०मात्रा, सा च** ग। ५. **सहईत्यादि** क ग, **सहइ इत्यादि** घ ङ। ६. **यथा** इति खपुस्तके नास्ति। ७. **कुर्यादिति, उक्तं च** घ ङ। ८. **आहारस्यार्थं** ग, **आहाराद्यर्थं** च। ९. **०निन्द्यं, कुर्यादाहारं प्राण०** चप्रतिमृते, चूर्णौ च। १०. **प्राणाः सन्धार्या०** चप्रत्या विना, चूर्णौ च। ११. **०जिज्ञासनार्थं** ग च, चूर्णौ च। १२. **तत्त्वं जिज्ञास्यं येन निष्ठां समेयात्** चपुस्तकं विना, **तत्त्वं जिज्ञास्यं येन दुःखाद्विमुच्चे( च्येत्)** चूर्णौ। १३. **असौ चात्मगुप्तता** ग। १४. **विरागं इत्यादि।** **विरंजनं** ख च। १५. **गच्छेत्** इति खप्रतौ नास्ति। १६. **०विषयेऽपि** ग। १७. **मनुष्येषु सर्वत्र** ख। १८. "**महतु( त्) क्षुल्लक[ म्]** इति उत्कृष्टं रूपं मह[त्], काल–कुब्जादि क्षुल्लकम्, शेषं मध्यमम्" जै०वि०प०। १९. "**पूर्ववत्** इति विरागं कुर्यात्" जै०वि०प०। २०. **पंचगम्मि वि०** ख चूर्णौ च, **पंचगम्मि,** च। २१. **जाणेत्ता** ख। २२. **द्विविधं( धे) 'त्रिविधं' हीन०** ग।

[१]त्कृष्टभेदमित्येतत् **भावतः** परमार्थतः **सुष्ठु ज्ञात्वा स** मुनिः पापेन कर्मणा **द्वाभ्यामपि** राग-द्वेषाभ्यां **न लिप्यते,** तदकरणादिति भावः । स्यात्– किमालम्ब्यैतत् कर्तव्यम् ? इत्याह–

[२]**आगइ**मित्यादि । आगमनम् आगतिः । सा च तिर्यङ्-मनुष्ययोश्चतुर्द्धा, चतुर्विधनरकादिगत्यागमनसद्भावात् । देव-[३]नारकयोर्द्वेधा तिर्यङ्-मनुष्यगतिभ्यामेवागमनसद्भावात् । एवं गतिरपि । मनुष्येषु तु पञ्चधा, तत्र मोक्षगतिसद्भावात् । अतस्ता**मागतिं गतिं** [४]च **परिज्ञाय** संसारचक्रवाले[५]ऽरघट्टघटीयन्त्रन्यायमवेत्य मनुष्यत्वे च मोक्षगतिसद्भावमाकलय्यान्तहेतुत्वाद् [६]अन्तौ राग-द्वेषौ ताभ्यां द्वाभ्यामन्ताभ्यामदृश्यमानाभ्यामनपदिश्यमानाभ्यां [७]वा, क्त्वाप्रत्ययस्योत्तरक्रियामाह–

**से** इत्यादि । सः आगति-[८]गतिपरिज्ञाता राग-द्वेषाभ्यामनपदिश्यमानो **न छिद्यते** अस्यादिना, **न भिद्यते** कुन्तादिना, **न दह्यते** पावकादिना, [९]**न हन्यते** नरकगत्यानुपूर्व्यादिना [१०]भूयशः, अथवा राग-द्वेषाभावात् [११]सिद्ध्यत्येव । तदवस्थस्य चैतानि छेदनादीनि विशेषणानि [१२]**कंचण**मिति विभक्तिपरिणामात् केनचित् सर्वस्मिन्नपि लोके न छिद्यते नापि भिद्यते राग-द्वेषोपशमादिति । तदेवमागतिगतिपरिज्ञानाद् राग-द्वेषपरित्यागः, तदभावाच्च छेदनादिसंसारदुःखाभावः । अपरे च साम्प्रतेक्षिणः कुतो वयमागताः ? क्व यास्यामः ? किं वा तत्र नः [१३]सम्पत्स्य[१४]ते ? नैवं भावयन्ति, अतः संसारभ्रमणपात्रतामनुभवन्तीति दर्शयितुमाह–

**[ सू०१२४ ] अवरेण पुव्वं ण सरंति एगे,**
**किमस्स तीतं किं वाऽऽगमिस्सं ।**

---

१. **०त्कृष्टमित्येतत्** क । २. **आगइं इत्यादि** । ख च । ३. **०नारकयोर्द्विधा** च । ४. **वा** च । ५. ०ऽरहट्ट० ग । ६. **अन्तौ च राग०** ख । ७. **च** घ ङ च । ८. ०गतिज्ञाता ङ । ९. "**न हन्यते** इति न नीयते" जै०वि०प० । १०. **बहुशः** ख घ ङ । ११. **सिद्ध्यते च** । **तद०** ग ङ । १२. **कञ्चनमिति** क । १३. **सम्पद्यते** ङ । १४. ०ते ? **इत्याद्यनालोचकाः संसार०** ख ।

**भासंति एगे इह माणवा तु,**
**जमस्स तीतं तं आगमिस्सं ॥११॥**
**णातीतमट्ठं ण य आगमिस्सं अट्ठं णियच्छंति तथागता उ।**
**विधूतकप्पे एताणुपस्सी णिज्झोसइत्ता ।**
**का अरती के आणंदे ? एत्थंपि अग्गहे चरे ।**
**सव्वं हासं परिच्चज्ज अल्लीणगुत्तो परिव्वए ॥**

**[ सू०१२५ ] पुरिसा ! तुममेव तुमं मित्तं, किं बहिया मित्तमिच्छसि ?**

**जं जाणेज्जा उच्चालयितं तं जाणेज्जा दूरालयितं, जं जाणेज्जा दूरालइतं तं जाणेज्जा उच्चालयितं ।**

[1]**अवरेण** इत्यादि रूपकम् । अपरेण पश्चात्कालभाविना सह पूर्वम् अतिक्रान्तं **न** [2]**स्मरन्ति** [3]**एके** [4]अन्ये [5]मोहाज्ञानावृतबुद्धयो यथा किमस्य जन्तोर्नरकादिभवोद्भूतं बाल-[6]कुमारादिवयोपचितं वा दुःखाद्यतीतं किं [7]वाऽऽगमिष्यति आगामिनि काले किमस्य सुखाभिलाषिणो दुःखद्विषो भावीति । यदि पुनरतीता-ऽऽगामिपर्यालोचनं स्यात् न तर्हि [8]संसाररतिः [9]स्यादिति, उक्तं च—

**केण ममेत्थुप्पत्ती ? कहं इओ तह पुणो वि गंतव्वं ? ।**
**जो एत्तियं पि [10]चिंतेइ एत्थ सो को न निव्विण्णो ? ॥ [ ]**

**एके** पुनर्महामिथ्याज्ञानिनो **भाषन्ते इह** अस्मिन् संसारे मनुष्यलोके वा **मानवा** मनुष्या यथा—यदस्य जन्तोरतीतं स्त्री-पुं-नपुंसक-सुभग-दुर्भग-श्व-गोमायु-ब्राह्मण-क्षत्रिय-विट्-शूद्रा[11]दि तदावेशात् पुनरप्यन्यजन्मानुभूतं [12]तदेवागामीति । यदि वा न विद्यते परः प्रधानोऽस्मादित्यपरः संयमस्तेन

१. अवरे इत्यादि रू० ख । २. "**स्मरन्ति** इति यथाक्रमं योगः" जै०वि०प० । ३. **एके** इति क-चप्रत्योर्नास्ति । ४. **अन्ये** इति ख-गपुस्तकयोर्न । ५. **मोहाज्ञानवृत्तबुद्धयो** च । ६. **०कुमारादिचयोप०** घ ङ। ७. **चागमिष्यति** ख । ८. **संसारे रतिः** कप्रतिमृते । ९. **स्यात्, उक्तं च** ग । १०. **चिन्तेइ** ङ। ११. **०दि तदादेशात्** घ, **०दिभेदावेशात्** च । १२. **तदेवागमिष्यति । यदि** ग ।

वासितचित्ताः सन्तः पूर्वं पूर्वानुभूतं विषय[1]सुखोपभोग्यादि न स्मरन्ति न तदनुस्मृतिं कुर्वते एके राग-द्वेषविप्रमुक्ताः, तथाऽनागतदिव्याङ्गनाभोगमपि नाकाङ्क्षन्ति । [2]किञ्चास्य जन्तोरतीतं सुख-दुःखादि [3]किं वाऽऽगामि ? इत्येतदपि न स्मरन्ति । यदि वा कियान् कालोऽतिक्रान्तः ? [4]कियानेष्यति ? लोकोत्तरास्तु भाषन्ते—एके राग-द्वेषरहिताः केवलिनश्चतुर्दशपूर्वविदो वा यदस्य जन्तोरनादिनिधनत्वात् काल-शरीरसुखाद्यतीत[5]मागाम्यपि तदेवेति । **अपरे तु पठन्ति—**

**अवरेण पुव्वं किह से [6]अईअं, किह आगमिस्सं ? न सरंति एगे ।**
**भासंति एगे इह माणवा उ, जह से [7]अईयं तह आगमिस्सं ॥ [ ]**

अपरेण जन्मादिना सार्धं पूर्वम् [8]अतिक्रान्तं जन्मादि न स्मरन्ति, कथं वा केन [9]वा प्रकारेणातीतं सुख-[10]दुःखादि ? कथं [11]चैष्यम् ? इत्येतदपि न स्मरन्ति, एके भाषन्ते—किमत्र ज्ञेयम् ? यथैवास्य राग-द्वेष-मोहसमुत्थैः कर्मभिर्बध्यमानस्य जन्तोस्तद्विपाकांश्चानुभवतः संसारस्य यदतिक्रान्तमागाम्यपि [12]तत् तत्प्रकारमेवेति । यदि वा प्रमाद-विषय-कषायादिना कर्माण्युपचित्येष्टा-ऽनिष्टविषयाननुभवतः सर्वज्ञवाक्सुधास्वादासंविदो यथा संसारोऽतिक्रान्तस्तथा-ऽऽगाम्यपि यास्यति ।

ये तु पुनः संसारार्णव[13]तीरभाजस्ते पूर्वोत्तरवेदिन [14]इत्येतद् दर्शयितुमाह—[15]**नाईय**मित्यादि । तथैव अपुनरावृत्त्या गतं गमनं येषां ते **तथागताः** सिद्धाः । यदि वा यथैव ज्ञेयं तथैव गतं ज्ञानं येषां ते **तथागताः** सर्वज्ञाः । ते [16]तु नातीत[17]मर्थमनागतरूपतयैव **नियच्छन्ति** अवधारयन्ति नाप्यनागतमतिक्रान्त-

---

१. **०सुखोपभोगादि** क-खप्रती विना । २. **किं वास्य** ख ग । ३. **किं चागामि ?** ख, **किं वागमिष्यत्येतदपि** ग । ४. **कियानेष्यते ? इति लोको०** ख, **कियानेष्यः ? इति लोको०** ग । ५. **०मागामिन्यपि** घ ङ, **०मागान्यपि** च । ६. **अतीतं** घ ङ च । ७. **अतीतं** ख । ८. **अतिक्रान्तजन्मादि** ख घ । ९. **वा** इति ग-घ-चप्रतिषु नास्ति । १०. **०दुःखादिकं चैष्यम् ?** घ ङ । ११. **वे( वै )ष्यम् ?** क । १२. **तत्प्रकारमेवेति** कआदर्शमृते । १३. **०तीरभागभाजस्ते** ख ग । १४. **इत्येतच्च दर्श०** ग । १५. **णातीय०** ख । १६. **तु** इति घप्रतौ नास्ति । १७. "**अर्थम्** इति सुखादिकम्" जै०वि०प० ।

रूपतयैव, विचित्रत्वात् परिणतेः, पुनरर्थग्रहणं [1]पर्यायरूपार्थार्थम्, द्रव्यार्थतया [2]त्वेकत्वमेवेति । यदि वा नातीतमर्थं विषयभोगादिकं नाप्यनागतं दिव्याङ्गनासङ्गादिकं स्मरन्ति अभिलषन्ति[3] । के ? **तथागताः** राग-द्वेषाभावात् पुनरावृत्तिरहिताः । तुशब्दो विशेषमाह यथा—[4]मोहोदयादेके पूर्वमागामि वाऽभिलषन्ति, सर्वज्ञास्तु नैवमिति । तन्मार्गानुयाय्यप्येवम्[5]भूत एवेति दर्शयितुमाह—**विहूयकप्पे** इत्यादि । विविधम् अनेकधा धूतम् अपनीतमष्टप्रकारं कर्म येन स विधूतः । कोऽसौ ? कल्पः आचारः, विधूतः [6]कल्पो यस्य साधोः स **विधूतकल्पः** स [7]एतदनुदर्शी भवति, अतीता-ऽनागतसुखाभिलाषी न भवतीति यावत् । एतदनुदर्शी च किंगुणो भवति ? इत्याह—

**निज्झोस** इत्यादि । पूर्वोपचितकर्मणां निर्झोषयिता क्षपकः क्षपयिष्यति वा, तृजन्तमेतद् लुडन्तं वा । कर्मक्षपणायोद्यतस्य च धर्मध्यायिनः शुक्लध्यायिनो वा महायोगीश्वरस्य निरस्त[8]संसारसुख-दुःखविकल्पाभासस्य यत् स्यात् तद् दर्शयति—

**का अरई के [9]आणंदे** इष्टाप्राप्ति-विनाशोत्थो मानसो विकारोऽरतिः, अभिलषितार्थावाप्तावानन्दः । योगिचित्तस्य [10]तु धर्म-शुक्लध्यानावेशावष्टब्धध्येयान्तरावकाशस्यारत्यानन्दयोरुपादानकारणाभावादनु[11]त्थानमेवेत्यतोऽपदिश्यते—केय[12]मरतिर्नाम ? को वाऽऽनन्द इति ? नास्त्येवेतरजनक्षुण्णोऽयं विकल्प इति । एवं तर्ह्यरतिरसंयमे संयमे चानन्द इत्ये[13]तदन्यत्रानुमतमनेनाभिप्रायेण न विधेयमित्येतदनिच्छतोऽप्यापन्नमिति [14]चेत्, न, अभिप्रायापरिज्ञानात्, यतोऽत्रारतिरतिविकल्पाध्यवसायो निषिषित्सितः, न प्रसज्यायाते अप्यरति-रती, तदाह—

---

१. "**पर्यायरूपा०** इति पर्यायमाश्रित्य तदेव वस्तु तदेव न, किन्तु भिन्नाऽभिन्नरूपा" जै०वि०प० । २. **त्वेकत्वमिति** ग । ३. **०न्ति वा । के ?** क-खपुस्तके विना । ४. **मोहभयादेके** ख । ५. **०म्भूत इति दर्शयति-विहूय०** ख । ६. **कल्पो येन स** ख । ७. **एवैतदनु०** क । ८. **०संसारिसुख०** ग, **०संसारदुःख०** च । ९. **याणंदे** ग । १०. **च** ख । ११. **०त्थानमित्यतो०** ख । १२. **०मरतिः ? को** ख, **०मरतिनाम ?** ग । १३. "[ए]**तदन्यत्र** इति इहैव ग्रन्थे अन्यत्र प्रक्रमे" जै०वि०प० १४. **चेत् तद् न** ख ।

[१]**एत्थं पी**त्यादि । अत्राप्यरतावानन्दे वोपसर्जनप्राये न विद्यते ग्रहः गार्द्ध्यं तात्पर्यं [२]यस्य सो**ऽग्रहः** । स एवम्भूतः चरेत् अवतिष्ठेत । इदमुक्तं भवति–शुक्लध्यानादारतोऽरत्यानन्दौ कुतश्चिन्निमित्तादायातौ [३]तदाग्रहग्रहरहितस्तावप्यनुचरेदिति । पुनर[४]प्युपदेशदानायाह–

[५]**सव्व**मित्यादि । सर्वं हास्यं तदास्पदं वा [६]परित्यज्य आङ् मर्यादयेन्द्रियनिरोधादिकया लीनः आलीनः गुप्तः मनो-वाक्-कायकर्मभिः कूर्मवद्वा संवृतगात्रः, आलीनश्चासौ गुप्तश्चा**लीनगुप्तः** स एवम्भूतः [७]परिः समन्ताद् व्रजेत् **परिव्रजेत्** संयमानुष्ठानविधायी भवेदिति । तस्य च मुमुक्षोरात्मसामर्थ्यात् संयमानुष्ठानं फलवद् भवति, न [८]परोपाधिनेति दर्शयति–

**पुरिसा** इत्यादि । यदि वा त्यक्तगृह-पुत्र-कलत्र-धन-धान्य-हिरण्यादितया अकिञ्चनस्य समतृण-मणि-[९]मुक्ता-लेष्टु-काञ्चनस्य मुमुक्षोरुपसर्गव्याकुलितमतेः कदाचिन्मित्राद्याशंसा भवेत् तदपनोदार्थमाह–**पुरिसा** इत्यादि । पूर्णः सुख-दुःखयोः पुरि शयनाद्वा **पुरुषः** जन्तुः, पुरुष[१०]द्वारामन्त्रणं तु पुरुषस्यैवोपदेशार्हत्वात् [११]तदनुष्ठानसमर्थत्वाच्चेति । कश्चित् [१२]संसारोद्विग्नो [१३]विषमस्थितो वाऽऽत्मान[१४]मनुशास्ति, परेण वा साध्वादिनाऽनुशास्यते यथा–हे पुरुष ! हे [१५]जीव ! तव सदनुष्ठानविधायित्वात् **त्वमेव मित्रम्**, विपर्ययाच्चामित्रः, **किमिति बहिर्मित्रम् इच्छसि** [१६]मृगयसे, यतो ह्युपकारि मित्रम्, स चोपकारः पारमार्थिकात्यन्ति[१७]कैकान्तिक[१८]गुणोपेतं सन्मार्गपतितमात्मानं विहाय नान्येन शक्यो विधातुम् । योऽपि संसारिसुखसाहा[१९]य्योपकारितया मित्राभासाभिमानस्तन्मोहविजृम्भितम्, यतो महाव्यसनोपनिपातार्णवपतनहेतुत्वाद् अमित्र एवासौ । इदमुक्तं भवति–आत्मैवाऽऽत्मनोऽप्रमत्तो मित्रम्, आत्यन्तिकैकान्तिकपरमार्थसुखो-

१. एत्थं पि इत्यादि । तत्रा० ख । २. यस्येत्यग्रहः ख । ३. तदाग्रहग्रहग्रहरहित० ग । ४. ०प्युपदेशनायाह घ । ५. सव्वं इत्यादि ख । ६. परित्यजेत( त् ) मर्या० ख । ७. परि ख ग च । ८. परोपरोधेनेति घ ङ । ९. ०मुक्त० घ ङ विना । १०. ०द्वाराद्वामन्त्रणं ख । ११. तत्तदनुष्ठान० च । १२. संसारादुद्विग्नो कपुस्तकं विना । १३. विषमस्थो ख । १४. ०मनुशास्ते ख । १५. जीव ! ते तव घ ङ । १६. मृगयसि ग । १७. ०कैकान्तगुणोपेतः सन्मार्ग० ग । १८. ०गुणोपेतः सुमार्ग० ख । १९. ०य्योपकार्यता-मित्रा० ङ ।

त्पादनात्, विपर्ययाच्च विपर्ययः, न बहिर्मित्रमन्वेष्टव्यमिति, यस्त्वयं बाह्यो मित्राऽमित्रविकल्पः सोऽदृष्टोदयनिमित्तवशादौपचारिक इति, उक्तं हि—

**दुप्पत्थिओ [१]अमित्तं अप्पा सुप्पत्थिओ [२]य ते मित्तं ।**
**सुह-दुक्ख[३]कारणा उ अप्पा मित्तं अमित्तं च ॥** [ ]

तथा—

**अप्येकं मरणं कुर्यात्, सङ्क्रुद्धो बलवानरिः ।**
**मरणानि त्वनन्तानि, जन्मानि च करोत्ययम् ॥** [ ]

यो हि निर्वाणनिर्वर्तकं वृत्तमाचरति स आत्मनो मित्रम्, स चैवम्भूतः कुतोऽवगन्तव्यः ? किम्फलश्च ? इत्याह—

**जं [४]जाणिज्जा** इत्यादि । **यं** पुरुषं **जानीयात्** परिच्छिन्द्यात् कर्मणां विषयसङ्गानां [५]**चोच्चालयितारम्** अपनेतारं **तं जानीयात् दूरालयिकम्** इति दूरे सर्वहेयधर्मेभ्य इत्यालयो दूरालयः मोक्षस्तन्मार्गो वा स विद्यते यस्येति मत्वर्थीयष्ठन् [६]दूरालयिकस्तमिति । हेतुहेतुमद्भावं दर्शयितुं गतप्रत्यागतसूत्रमाह—

**जं [७]जाणेज्जा** इत्यादि । यं जानीयाद् दूरालयिकं तं जानीयादुच्चालयितारमिति । [८]एतदुक्तं भवति—यो हि कर्मणां [९]तदाश्रवद्वाराणां [१०]चोच्चालयिता अपनेता स मोक्षमार्गव्यवस्थितो [११]मुक्तो वेति, यो वा सन्मार्गानुष्ठायी स कर्मणामुच्चालयितेति । स चात्मनो मित्रमतोऽपदिश्यते—

**[ सू०१२६ ] पुरिसा ! अत्ताणमेव अभिणिगिज्झ, एवं दुक्खा पमोक्खसि ।**

**[ सू०१२७ ] पुरिसा ! सच्चमेव समभिजाणाहि । सच्चस्स आणाए से उवट्ठिए मेधावी मारं तरति ।**

---

१. **अमित्तो** ग । २. **अ** ग । ३. **०कारणो उ** ग, **०कारणाओ** ख घ च । ४. **जाणेज्जा** ग च । ५. **वोच्चालयितारम्** ग च । ६. **दूरालयिकमिति** घ ङ । ७. **जाणेज्ज** ख च, **जाणेत्यादि । यज्जानीयाद्** घ ङ । ८. **इदमुक्तं भवति** ख च । ९. **तदास्रव०** घ । १०. **वोच्चालयिता** ग घ । ११. **मोक्षो वेति** च ।

**सहिते धम्ममादाय सेयं समणुपस्सति ।**

**दुहतो जीवियस्स परिवंदण-माणण-पूयणाए, जंसि एगे पमादेंति ।**

**सहिते दुक्खमत्ताए पुट्ठो णो झंझाए ।**

**पासिमं, दविए लोगालोगपवंचातो मुच्चति त्ति बेमि ।**

**॥ सीओसणिज्जस्स तृतीयोद्देशकः ।**

**पुरिसा** इत्यादि । हे जीव ! आत्मानमेव **अभिनिगृह्य** धर्मध्यानाद् बहिर्विषयाभिष्वङ्गाय निःसरन्तमवरुध्य ततः **एवम्** [1]अनेन प्रकारेण **दुःखात्** सकाशादात्मानं **प्रमोक्ष्यसि**, एवमात्मा कर्मणामुच्चालयिताऽऽत्मनो मित्रं भवति । अपि च—

**पुरिसा** इत्यादि । [2]हे **पुरुष** ! सद्भ्यो हितः सत्यः संयमस्तमेवापरव्यापारनिरपेक्षः **समभिजानीहि** आसेवनापरिज्ञया समनुतिष्ठ । यदि वा सत्यमेव समभिजानीहि गुरुसाक्षिगृहीतप्रतिज्ञानिर्वाहको भव । यदि वा सत्यः आगमस्[3]तत्परिज्ञानं च मुमुक्षोस्तदुक्तप्रतिपालनम् । [4]किमर्थमेतत् ? इति चेदाह—

[5]**सच्चस्से**त्यादि । सत्यस्य आगमस्याज्ञयोपस्थितः [6]सन् **मेधावी मारं संसारं** तरति । किञ्च—

[7]**सही**त्यादि । सहितः ज्ञानादियुक्तः सह हितेन वा [8]युक्तः सहितः धर्मं श्रुत-चारित्राख्यम् आदाय गृहीत्वा किं करोति ? इत्याह—**श्रेयः** पुण्यमात्महितं वा सम्यक् अविपरीत[9]तयाऽनुपश्यति [10]समनुपश्यति । उक्तोऽप्रमत्तः तद्गुणाश्च, तद्विपर्ययमाह—

**दुहओ** इत्यादि । द्विधा राग-द्वेषप्रकारद्वयेनात्म-परनिमित्तमैहिका-

---

१. **अनेन दुःखात्** क घ ङ । २. हे इति गप्रतौ नास्ति । ३. **०स्तस्य परिज्ञानं** ख । ४. **किमर्थम् ? इति** ख । ५. **सच्चस्स इत्यादि** च । ६. **सन् मारं** ख, **सन् मेधावी** घ । ७. **सहि इत्यादि** ख च । ८. **युक्तो धर्मं** क घ ङ । ९. **०तया पश्यति** च । १०. **सम्यक् पश्यति** ख च ।

ऽऽमुष्मिकार्थं वा, [1]यदि वा द्वाभ्यां राग-द्वेषाभ्यां हतो द्विहतः, दुष्टं हतो वा दुर्हतः । स किं कुर्यात् ? जीवितस्य कदलीगर्भनिःसारस्य तडिल्लतासमुल्लसितचञ्चलस्य परिवन्दन-[2]मानन-पूजनार्थं हिंसादिषु प्रवर्तते । परिवन्दनं परिसंस्तवस्तदर्थमाचेष्टते, लावकादिमांसोपभोग[3]पुष्टसर्वाङ्गोपाङ्गसुन्दरमालोक्य मां जनाः सुखमेव परिवन्दिष्यन्ते, 'श्रीमान् ! जीव्यास्त्वं बहूनि [4]वर्षशतसहस्राणि' इत्येवमादि परिवन्दनम् । तथा माननार्थं कर्मोपचिनोति, 'दृष्टैरसबलपराक्रमं मामन्येऽभ्युत्थान-विनया-ऽऽसनादानाञ्जलिप्रग्रहैर्मानयिष्यन्ति' इत्यादि माननम् । तथा पूजनार्थमपि प्रवर्तमानः [5]कर्माश्रवैरात्मानं भावयति, 'मम हि कृतविद्यस्योपचितद्रव्यप्राग्भारस्य परो दान-मान-सत्कार-प्रणाम-सेवाविशेषैः पूजां करिष्यति' इत्यादि पूजनम् । तदेवमर्थं कर्मोपचिनोति । किञ्च—

[6]**जंसि एगे** इत्यादि । यस्मिन् परिवन्दनादिनिमित्ते एके राग-द्वेषोपहताः प्रमाद्यन्ति, न ते आत्मने हिताः । एतद्विपरीतं त्वाह—

[7]**सहिए** इत्यादि । सहितः ज्ञानादिसमन्वितः हितयुक्तो वा दुःखमात्रया उपसर्गजनितया व्याध्युद्भवया वा [8]स्पृष्टः सन् **नो झंझाए** [9]त्ति नो व्याकुलितमतिर्भवेत्, तदपनयनाय नोद्यच्छेत् । इष्टविषयावाप्तौ रागझञ्झा, अनिष्टावाप्तौ [10]च द्वेषझञ्झेति । तामुभयप्रकारामपि व्याकुलतां परित्यजेदिति भावः । किञ्च—

[11]**पासिम**मित्यादि । यदुक्तमुद्देशकादेरारभ्या[12]नन्तरसूत्रं यावत् तमिममर्थं पश्य परिच्छिन्द्धि कर्तव्या-ऽ[13]कर्तव्यतया विवेकेनावधारय । कोऽसौ ?—द्रव्यभूतः मुक्तिगमनयोग्यः साधुरित्यर्थः । एवम्भूतश्च कं गुणमवाप्नोति ? आलोक्यत इत्यालोकः, कर्मणि घञ्, लोके चतुर्दशरज्ज्वात्मके आलोको लोकालोकस्तस्य

---

१. **यद्वा** ख । २. **०मान-पूजनार्थं** ग, **०मानन-पूजार्थं** च । ३. **०पुष्टं सर्वाङ्गोपाङ्गसुन्दरमवलोक्य** ख । च । ४. **वर्षसहस्राणि** च । ५. **कर्मास्त्रवै०** घ । ६. **जंसेगे इत्यादि** ख ग च, **जंसेगेत्यादि** घ ङ । ७. **सह्विए** क, **सहिओ** घ ङ । ८. **पृष्टः** ख च, **स्पष्टः** ग । ९. *त्ति इति घप्रतौ न* । १०. **च** *इति घ-ङ प्रत्योर्नास्ति* । ११. **पासिमं इत्यादि** ख च । १२. **०नन्तरं सूत्रं** ग घ । १३. **०ऽकर्तव्यताविवेकेना०** ।

प्रपञ्चः पर्याप्तका-ऽपर्याप्तक-सुभगादिद्वन्द्वविकल्पः, तद्यथा—नारको नारकत्वेनावलोक्यते, एकेन्द्रियादिरेकेन्द्रिय(यादि)त्वेन, एवं [1]पर्याप्तका-ऽपर्याप्तकाद्यपि वाच्यम् । तदेवम्भूतात् प्रपञ्चान्मुच्यते चतुर्दशजीवस्थानान्यतरव्यपदेशार्हो न भवतीति यावत् । **[2]इतिः** परिसमाप्तौ । **ब्रवीमि** इति पूर्ववत् । छ ॥

**इति शीतोष्णीया[3]ध्ययने तृतीयोद्देशक[4]टीका [5]समाप्तेति ॥ छ ॥ छ ॥**

● ● ●

---

१. **पर्याप्तकाद्यपि** ख घ । २. **इति** ग च । ३. **०ध्ययनतृतीयो०** ख । ४. **०टीका परिसमाप्तेति** ख च, **०टीका परिसमाप्ता** ङ । ५. **समाप्ता** ग ।

उक्तस्तृतीयोद्देशकः । साम्प्रतं चतुर्थ आरभ्यते । अस्य चायमभिसम्बन्धः । इहानन्तरोद्देशके पापकर्माकरणतया दुःखसहनादेव केवलात् श्रमणो न भवतीति अपि तु निष्प्रत्यूहसंयमानुष्ठानादित्येतत् प्रतिपादितम्, निष्प्रत्यूहता च कषायवमनाद् भवति, तदधुना प्रागुद्देशार्थाधिकारनिर्दिष्टं प्रतिपाद्यते । तदनेन सम्बन्धेनायातस्यास्योद्देशकस्य सूत्रानुगमे सूत्रमुच्चारयितव्यम्, तच्चेदम्–

**[ सू०१२८ ] से वंता कोहं च मायं च लोभं च । एतं पासगस्स दंसणं उवरतसत्थस्स पलियंतकरस्स, आयाणं सगडब्भि ।**

**से वंता** इत्यादि । स ज्ञानादिसहितो दुःखमात्रास्पृष्टोऽव्याकुलितमतिर्द्रव्यभूतो लोका-ऽलोकप्रपञ्चाद् मुक्तदेश्यः[1] स्व-परापकारिणं क्रोधं[2] वमिता, **टुवम् उद्गिरणे** [पा० धा० ८४९] इत्यस्मात्ताच्छीलिकस्तृन्, तद्योगे च षष्ठ्याः प्रतिषेधे क्रोधशब्दाद् द्वितीया । लुडन्तं वैतत्, यो हि यथोक्तसंयमानुष्ठायी सोऽचिरादेव[3] क्रोधं वमिष्यति । एवमुत्तरत्रापि यथासम्भवमायोज्यम् । तत्रात्मात्मीयोपघातकारिणि क्रोधकर्मविपाकोदयात् क्रोधः । जाति-कुल-रूप-बलादिसमुत्थो गर्वो मानः । परवञ्चनाध्यवसायो माया । तृष्णापरिग्रहपरिणामो लोभः । क्षपणोपशमक्रममाश्रित्य च[4] क्रोधादिक्रमोपन्यासः । अनन्तानुबन्धि-अप्रत्याख्यान-प्रत्याख्यानावरण-सञ्ज्वलनस्वगतभेदाविर्भावनाय व्यस्तनिर्देशः । चशब्दस्तु पर्वत-पृथिवी[5]-रेणु-जलराजिलक्षणलक्षकः क्रोधस्य । शैलस्तम्भा-ऽस्थि-काष्ठ-तिनिशलता[6]लक्षणलक्षको मानस्य । वंशकुडङ्गी-मेषशृङ्ग-गोमूत्रिका-ऽवरंबक[7]लक्षणलक्षको मायायाः । कृमिराग-कर्दम-खञ्जन-हरिद्रालक्षणसूचको लोभस्य । तथा यावज्जीव-संवत्सर-चतुर्मास-पक्षस्थित्या-विर्भावकश्चेति । तदेवं

---

१. **मुक्तदेशकः** ङ । २. **क्रोधं च वमिता** घ ङ । ३. **सोऽचिरात् क्रोधं** घ ङ च । ४. **च** इति घ-ङ-चप्रतिषु नास्ति । ५. **०पृथ्वी०** कप्रतिमृते । ६. **०तिनिशलक्षण०** ग । ७. **०ऽवलेक्खिख( खि ! )कलक्षण०** ग, **०ऽवलेखलक्षण०** च, "**अवरंवच्च( बक )** इति अवहेलिका" जै०वि०प० ।

क्रोध-मान-माया-लोभवमनादेव [1]पारमार्थिकः श्रमणभावः, न तत्सम्भवे सति, यत उक्तम्–

**सामण्णमणुचरंतस्स कसाया जस्स उक्कडा [2]होंति ।**
**मन्नामि उच्छुपुप्फं व निप्फलं तस्स सामण्णं ॥**
**जं अज्जियं चरित्तं देसूणाए वि पुव्वकोडीए ।**
**तं पि कसाइयमेत्तो [3]हारेइ नरो मुहुत्तेणं ॥** [ ]

स्वमनीषिकापरिहारार्थं **गौतमस्वाम्याह–**

**एय**मित्यादि । एतत् यत्कषायवमनमनन्तरमुपादेशि तत् **पश्यकस्य दर्शनं** सर्वं निरावरणत्वात् पश्यति उपलभते इति पश्यः, स एव पश्यकः तीर्थकृत् श्री**वर्धमानस्वामी** तस्य दर्शनम् अभिप्रायः । यदि वा दृश्यते यथावस्थित-वस्तुतत्त्वमनेनेति दर्शनम् उपदेशः, न स्वमनीषिका । किम्भूतस्य पश्यकस्य दर्शनम् ? इत्याह–

[4]**उवरय** इत्यादि । उपरतं द्रव्य-भावशस्त्रं यस्यासावुपरतशस्त्रः । शस्त्राद्वोपरतः शस्त्रोपरतः । [5]भावशस्त्रं त्वसंयमः [6]कषाया वा तस्मादुपरतः । इदमुक्तं भवति–तीर्थकृतोऽपि [7]कषायवमनमृते न निरावरणसकलपदार्थग्राहिपरम-ज्ञानावाप्तिः, तदभावे [8]च सिद्धिवधूसमागमसुखाभावः । एवमन्येनापि मुमुक्षुणा तदुपदेशवर्तिना [9]तन्मार्गानुयायिना कषायवमनं विधेयमिति । शस्त्रोपरमकार्यं दर्शयन् पुनरपि [10]तीर्थकरविशेषणमाह–

[11]**पलियंतकडस्स** पर्यन्तं कर्मणां संसारस्य वा करोति तच्छीलश्चेति पर्यन्तकर[12]स्तस्यैतद् दर्शनमिति [13]सण्टङ्कः । यथा च तीर्थकृत् संयमापकारि-कषायशस्त्रोपरमात् कर्मपर्यन्तकृद् एवमन्योऽपि तदुक्तानुसारीति दर्शयितुमाह–

[14]**आयाण**मित्यादि । आदीयते गृह्यते आत्मप्रदेशैः सह श्लिष्यतेऽष्टप्रकारं

---

१. **पारमार्थिकश्रमण०** ख । २. **हुंति** घ ङ च । ३. **नारेइ** ग । ४. **उवर इत्यादि** । ख ग । ५. **भावे शस्त्रं** घ च । ६. **कषायो** ख । ७. **कषायकलाषवमनमृते** ख । ८. **वा** ग । ९. **तन्मार्गानुयायि कषाय०** ख । १०. **तीर्थङ्कर०** ख । ११. **पलियंतकरस्स** ख-गप्रती विना । १२. **०स्तस्यैव तद्** च । १३. **सम्बन्धः** ख । १४. **आयाणं इत्यादि** ख ।

कर्म येन तद् आदानं हिंसाद्याश्रवद्वारमष्टादशपापस्थानरूपं वा तत्स्थितेर्निमित्तत्वात् कषाया वाऽऽदानं तद्गमिता स्वकृतभिद् भवति, स्वकृतम् अनेकजन्मोपात्तं कर्म भिनत्तीति [1]स्वकृतभित्, यो ह्यादानं कर्मणां कषायादि निरुणद्धि सोऽपूर्वकर्मप्रतिषिद्धप्रवेशः स्वकृतकर्मणां भेत्ता भवतीति भावः । तीर्थकरोपदेशेनापि [2]परकृतकर्मक्षपणोपायाभावात् स्वकृतग्रहणम् । तीर्थकरेणापि [3]परकृतकर्मक्षपणोपायो न व्यज्ञायीति चेत्, तन्न, तज्ज्ञानस्य सकलपदार्थसत्ता[4]व्यापित्वेनावस्थानात् । ननु च हेयोपादेयपदार्थहानोपादानोपदेशज्ञोऽसौ, न सर्वज्ञ इति सङ्गिरामहे, एतावतैव परोपकार[5]कर्तृत्वेन [6]तीर्थकरत्वोपपत्तेः, तदेतन्न सतां मनांस्यानन्दयति, युक्तिविकलत्वात्, यतः सम्यग्ज्ञानमन्तरेण हिता-ऽहित-प्राप्ति-परिहारोपदेशासम्भवः । यथावस्थितैकपदार्थपरिच्छेदश्च न सर्वज्ञतामन्तरेणेति [7]दर्शयितुमाह—

**[ सू०१२९ ] जे एगं जाणति से सव्वं जाणति, जे सव्वं जाणति से एगं जाणति । सव्वतो पमत्तस्स भयं, सव्वतो अप्पमत्तस्स णत्थि भयं ।**

**जे एगणामे से बहुणामे, जे बहुणामे से एगणामे ।**

**दुक्खं लोगस्स जाणित्ता, वंता लोगस्स संजोगं, जंति वीरा महाजाणं । परेण परं जंति, णावकंखंति जीवितं ।**

**एगं विगिंचमाणे पुढो विगिंचइ, पुढो विगिंचमाणे एगं विगिंचइ सड्ढी आणाए मेधावी ।**

**लोगं च आणाए अभिसमेच्चा अकुतोभयं ।**

---

१. **स्वकृतभित्** इति पाठो गप्रतौ न । २. **परकृतकर्मोपा( प? )क्षपणो०** ख । ३. **परकृतक्षपणोपायो न चाज्ञायीति** ख । ४. **०व्यापित्वेनास्थानात्** ग । ५. **०कर्तृकत्वेन** ङ । ६. **तीर्थकरोपपत्तेः, तदेव न सतां** ख । ७. **दर्शयति-जे एगं** ग ।

## अत्थि सत्थं परेण परं, णत्थि असत्थं परेण परं ।

**जे एगं जाणइ** इत्यादि । **यः** कश्चिदविशेषितः **एकं** परमाण्वादि द्रव्यं पश्चात्पुरस्कृतपर्यायं स्व-परपर्यायं वा **जानाति** परिच्छिनत्ति **स सर्वं** स्व-परपर्यायं जानाति, अतीता-ऽनागतपर्यायिद्रव्यपरिज्ञानस्य समस्तवस्तुपरिच्छेदाविना-भावित्वात् । इदमेव हेतुहेतुमद्भावेन लगयितुमाह—

**जे सव्व**[२]मित्यादि । **यः सर्वं** संसारोदरविवरवर्ति वस्तु **जानीते**[३] **स एकं** घटादि वस्तु जानाति[४], तस्यैवातीता-ऽनागतपर्यायभेदैस्त[५]त्तत्स्वभावापत्त्या-ऽनाद्यनन्तकालतया समस्तवस्तुस्वभावगमनादिति, तदुक्तम्—

**एगदवियस्स जे अत्थपज्जवा**[६] **वयणपज्जवा वा वि ।**
**तीया-ऽणागयभूया**[७] **तावइयं**[८] **तं हवइ दव्वं ॥** [ ]

तदेवं[९] सर्वज्ञस्तीर्थकृत् । सर्वज्ञश्च सम्भविनमेव सर्वसत्त्वोपकारिणमुपदेशं ददातीति दर्शयति—

**सव्वओ**[१०] इत्यादि । **सर्वतः** सर्वप्रकारेण द्रव्यादिना यद् भयकारि[११] कर्मोपादीयते ततः[१२] **प्रमत्तस्य** मद्यादिप्रमादवतः भयं भीतिः, तद्यथा—प्रमत्तो हि कर्मोपचिनोति द्रव्यतः सर्वैरात्मप्रदेशैः, क्षेत्रतः षड्दिग्व्यवस्थितम्, कालतो-ऽनुसमयम्, भावतो हिंसादिभिः । यदि वा[१३] **सर्वतः** सर्वत्र[१४] भयमिहामुत्र च । एतद्विपरीतस्य च नास्ति भयमिति । आह च—

**सव्वओ** इत्यादि । **सर्वतः** ऐहिका-ऽऽमुष्मिकापायात् **अप्रमत्तस्य** आत्महितेषु जाग्रतो **नास्ति भयं** संसारापशदात्[१५] सकाशात् कर्मणो वा ।

---

१. ०ति परिच्छिनत्ति, अतीता० ख । २. सव्वं इत्यादि ख । ३. जानाति ग घ ङ । ४. जानीते ख । ५. ०स्तत्स्वभावा० क । ६. ''अत्थपज्जवा इति यावद्भिर्घट-पटादिभिः पर्यायैः परमाण्वादिकं वस्तु परिणतम्'' जै०वि०प० । ७. ०भूता तावइयं हवति तं दव्वं ख । ८. ''तावइयमिति अनन्तम्''जै०वि०प० । ९. तदेवं तीर्थकृत् सर्वज्ञः । सर्वज्ञश्च ग । १०. सव्व इत्यादि ख । ११. भयकारणं ख ग । १२. तत् क । १३. वा सर्वत्र सर्वतो भय० ख, वा सर्वतोऽत्र सर्वतो भयं० घ ङ, वा सर्वतो भय० ग । १४. सर्वतो भय० क । १५. संसारापसदात् घ ङ ।

अप्रमत्तता च कषायाभावाद् भवति, [१]तदभावाच्चाशेषमोहनीयाभावः, ततोऽप्यशेषकर्मक्षयः। तदेवमेकाभावे सति बहूनामभावसम्भवः, [२]एकाभावोऽपि [३]च [४]बह्वभावनान्तरीयक इत्येवं गतप्रत्यागतसूत्रेण हेतुहेतु[५]मद्भावं दर्शयितुमाह–

**जे** [६]**एग**मित्यादि। यो हि प्रवर्धमानशुभाध्यवसायाधिरूढकण्डकः **एकम्** अनन्तानुबन्धिनं क्रोधं **नामयति** क्षपयति **स बहून**पि मानादीन् **नामयति** क्षपयति, अप्रत्याख्यानादीन् वा स्वभेदान् नामयति। मोहनीयं वैकं यो नामयति स शेषा अपि प्रकृतीर्नामयति। यो वा बहून् [७]स्थितिविशेषान् नामयति सोऽनन्तानुबन्धिनमेकं नामयति, मोहनीयं वा, तथाहि–एकोनसप्ततिभिर्मोहनीयकोटीकोटिभिः क्षय[८]मुपागताभिः ज्ञानावरणीय-दर्शनावरणीय-वेदनीयाऽन्तरायाणामेकोनत्रिंशद्भिः नाम-गोत्रयोरेकोनविंशतिभिः शेषकोटी-कोट्याऽपि देशोनया मोहनीयक्षपणार्हो भवति, नान्यदेति। अतोऽपदिश्यते–**यो बहुनामः स** एव परमार्थत **एकनाम** इति। **नामः** इति क्षपकोऽभिधीयते, उपशा(श)मको वा। उपशमश्रेण्याश्रयेणैकबहूपशमता बह्वेकोपशमता वा वाच्येति। तदेवं [९]बहुकर्माभावमन्तरेण [१०]मोहनीयक्षयस्योपशमस्य वाऽभावः। तदभावे च जन्तूनां बहुदुःखसम्भव इति दर्शयति–

[११]**दुक्ख**मित्यादि। दुःखम् असातोदयस्तत्कारणं वा कर्म तत् **लोकस्य** भूतग्रामस्य ज्ञपरिज्ञया **ज्ञात्वा** प्रत्याख्यानपरिज्ञया च यथा तदभावो भवति तथा विदध्यात्। कथं तदभावः? का वा [१२]तदभावे गुणावाप्तिः? इत्युभयमपि दर्शयितुमाह–

**वंता** इत्यादि। **वान्त्वा** त्यक्त्वा **लोकस्य** आत्मव्यतिरिक्तस्य धन-पुत्र-शरीरादेः **संयोगं** ममत्वपूर्वकं सम्बन्धं शारीरदुखादिहेतुं [१३]तद्धेतुककर्मो-

---

१. **तदभावाच्च शेष०** क। २. **एकाभावो** हि बह्व० ख, **एकभावोऽपि** बहुभाव० ङ। ३. **च** इति कप्रतावेव। ४. **बह्वभावानन्तरीयक** घ ङ **बह्वभावानान्तरीयक** च। ५. **०मद्भावेन दर्श०** ग। ६. **एगं इत्यादि** ख, **एगेत्यादि** ग। ७. **स्थितिशेषान्** ग। ८. **०मुपगताभिः** ख घ। ९. **बह्वेककर्माभाव०** ग। १०. **मोहनीयस्य क्षयोपशमस्य** ख, **मोहनीयस्य क्षयस्योप०** ग च। ११. **दुक्खं इत्यादि** ख च। १२. **तदभावात(त्)** च। १३. **तद्धेतुकर्मो०** ख च।

पादानकारणं वा **यान्ति** गच्छन्ति [1]**वीराः** कर्मविदारणसहिष्णवः यान्त्यनेन मोक्षमिति **यानं** चारित्रम्, तच्चानेकभवकोटिदुर्लभम् लब्धमपि प्रमाद्यतस्तथाविधकर्मोदयात् स्वप्नावाप्तनिधिसमतामवाप्नोत्यतो महच्छब्देन विशेष्यते महच्च तद् यानं च **महायानम्**, यदि वा महद्यानं सम्यग्दर्शनादित्रयं यस्य स **महायानः** मोक्षस्तं यान्तीति सम्बन्धः । स्यात्—किमेकेनैव भवेनावाप्तमहायानदेश्यचारित्रस्य मोक्षावाप्तिरुत पारम्पर्येण ? उभयथाऽपि[2] ब्रूमः, तद्यथा—[3]अवाप्ततद्योग्यक्षेत्र-कालस्य लघुकर्मणस्तेनैव भवेन मुक्त्यवाप्तिः । अपरस्य त्वन्यथेति दर्शयति—

**परेण** [4]**पर**मित्यादि । सम्यक्त्वप्रतिषिद्धनरक[5]-तिर्यग्गतयो [6]ज्ञानावाप्तयथाशक्तिप्रतिपालितसंयमा आयुषः क्षयात् सौधर्मादिकं देवलोकमवाप्नुवन्ति । ततोऽपि पुण्यशेषतया कर्मभूम्यार्यक्षेत्र-सुकुलोत्पत्त्या-ऽऽरोग्य-श्रद्धा-श्रवण-संयमादिकमवाप्य विशिष्टतरं स्वर्गमनुत्तरोपपातिकपर्यन्तमधितिष्ठन्ति । पुनरपि ततश्च्युतस्यावाप्तमनुष्यादिसंयम[7]भावस्याशेषकर्मक्षयाद् मोक्षः । तदेवं परेण संयमेनोद्दिष्टविधिना परं स्वर्गं पारम्पर्येणापवर्गमपि यान्ति । यदि वा परेण सम्यग्दृष्टिगुणस्थानेन परं देशविरत्याद्ययोगिकेवलिपर्यन्तं[8] गुणस्थानकमधितिष्ठन्ति। परेण वाऽनन्तानुबन्धिक्षयेणोल्लसत्कण्डकस्थानाः परं दर्शनमोहनीयचारित्रमोहनीयक्षयं घातिभवोपग्राहिकर्मणां वा क्षयमवाप्नुवन्ति । एवंविधाश्च कर्मक्षपणोद्यता जीवितं कियद् गतं किं वा शेषम् ? इत्येवं नावकाङ्क्षन्ति, दीर्घजीवित्वं[9] नाभिलषन्तीत्यर्थः, असंयमजीवितं वा [10]नावकाङ्क्षन्तीति । यदि वा परेण परं यान्तीत्युत्तरोत्तरां[11] [12]तेजोलेश्यामवाप्नुवन्तीति, उक्तं च—

**जे इमे [13]अज्जत्ताए समणा निग्गंथा विहरंति एए णं [14]कस्स [15]तेयलेस्सं**

१. धीराः घ-ङप्रती विना । २. ०पि **क्रमः, तथा चावाप्त०** क । ३. **अवाप्तयोग्य०** ङ **अवाप्ततद्योगक्षेत्र०** च । ४. **परं इत्यादि** ख च । ५. **०नरकगति-तिर्य०** घ ङ । ६. **ज्ञानावाप्तियथा०** ख ग च विना । ७. **०भावस्य शेष०** ग । ८. **०पर्यन्तगुण०** ख ग च । ९. **०जीवितं** ख । १०. **नाकाङ्क्षन्तीति** घ च । ११. ०त्युत्तरोत्तरं ख । १२. "**तेजोलेश्याम्** इति सुखलेश्य(श्या)म्" जै०वि०प० । १३. "**अज्झत्ता[ए]** इति अज्झत्तया" जै०वि०प० । १४. **कस्स** इति देवादेः" जै०वि०प० । १५. **तेयालेस्सं** क, **तेउल्लेस्सं** ख, **तेअलेस्सं** ङ ।

**[1]वीईवयंति ? गोयमा ! [2]मासपरियाए समणे निग्गंथे वाणमंतराणं देवाणं [3]तेयलेस्सं [4]वीईवयंति । एवं दुमासपरियाए असुरिंदवज्जियाणं भवणवासीणं देवाणं, तिमासपरियाए असुरकुमाराणं देवाणं, चउमासपरियाए [5]गह-नक्खत्त-तारारूवाणं [6]जोइसियाणं देवाणं, पंचमासपरियाए चंदिम-सूरियाणं [7]जोइसिंदाणं [7]जोइसराईणं तेजोलेस्सं, छम्मासपरियाए सोहम्मीसाणाणं देवाणं, सत्तमासपरियाए सणंकुमार-माहिंदाणं देवाणं, अट्ठमासपरियाए बंभलोग-लंतगाणं देवाणं, नवमासपरियाए महसुक्क-सहस्साराणं देवाणं, दसमासपरियाए आणय-पाणय-[9]आरण-अच्चुयाणं देवाणं, [10]एँगारसमासपरियाए गेवेज्जाणं, बारसमासे समणे निग्गंथे अणुत्तरोव-वाइयाणं देवाणं [11]तेयलेसं [12]वीईवयइ, तेण परं [13]सुक्के सुक्काभिजाई भवित्ता [14]तओ पच्छा [15]सिज्झइ । [ ]**

यश्चानन्तानुबन्ध्यादिक्षपणोद्यतः स [16]किमेकक्षयादेवापवर्तते उत न ? [17]इत्याह—

**एगं विगिंच[18]माणे** इत्यादि । **एकम्** अनन्तानुबन्धिनं क्रोधं क्षपक-श्रेण्यारूढः क्षपयन् **पृथक्** अन्यदपि दर्शनादिकं क्षपयति । बद्धायुष्कोऽपि दर्शनसप्तकं यावत् क्षपयति पृथक् अन्यदपि क्षपयन्नवश्यमनन्तानुबन्धिनमेकं क्षपयति, [19]पृथक् क्षयान्यथानुपपत्तेः । किंगुणः पुनः क्षपकश्रेणियोग्यो भवति ? इत्याह—

**[20]सड्ढी** इत्यादि । श्रद्धा मोक्षमार्गोद्यमेच्छा [21]विद्यते यस्यासौ श्रद्धावान् **आज्ञया** [22]तीर्थकरप्रणीतागमानुसारेण यथोक्तानुष्ठानविधायी **मेधावी** अप्रमत्तयतिः मर्यादाव्यवस्थितः श्रेण्यर्हो नापर इति । किञ्च—

---

१. **वीयवयंति** क, **वीतीवयंति** ग, **वीइवयंति** घ ङ । २. **एगमासपरियाए** ख । ३. **तेउल्लेस्सं** ख, **तेअलेस्सं** ङ । ४. **वीइवयइ** क घ, **वीयीवयेति** ग, **वीइवइई** ङ, **वीईवयति** च । ५. **गहगण-णक्खत्त०** ख घ च । ६. **जोइसियाणं जोइसरातीणं** ख च, ग-ङप्रत्योः पाठपतनम् । ७. **जोइसराणं** क । ८. **तेयल्लेस्सं** ख, **तेयलेस्सं** च । ९. **आरण-ऽच्चुयाणं** ग घ च । १०. **एक्कारसमासे मेवे०** ख, **एक्कारसमासपरि०** च । ११. **तेउल्लेसं** ख, **तेउलेसं** ग, **तेयलेस्सं** च । १२. **वीतीवयइ** ग, **वीइवयइ** ङ । १३. **मुक्के मुक्काभिजाई** ग, "शुक्लाभिज्झस (**सुक्काभिजाई सिज्झइ ?**) इति शुक्लं सिद्धम्" जै०वि०प० । १४. **ततो** ख च । १५. **सिज्झाइ** क । १६. **किमेकादिक्षपणादेवाप०** ख । १७. **इत्यत्राह** ख ग च । १८. **०माणेत्यादि** ख च । १९. **पृथगन्यक्षया०** ग । २०. **सड्ढीत्यादि** क ग । २१. **वर्तते** च । २२. **तीर्थकरागमा०** क ।

**लोगं च** इत्यादि । **चः** समुच्चये **लोकं** षड्जीवनिकायात्मकं कषायलोकं वा आज्ञया मौनीन्द्रागमोपदेशेन **अभिसमेत्य** ज्ञात्वा षड्जीवनिकायलोकस्य यथा न कुतश्चिन्निमित्ताद्भयं भवति तथा विधेयम् । कषायलोकप्रत्याख्यानपरिज्ञानाच्च तस्यैव परिहर्तुर्न कुतश्चिद्भयमुपजायत इति । लोकं वा चरा-ऽचरम् आज्ञया आगमाभिप्रायेणाभिसमेत्य **न कुतश्चि**दैहिका-ऽऽमुष्मिकापायसन्दर्शनतो **भयं** [1]भवति । [2]तच्च भयं शस्त्राद्भवति, तस्य च शस्त्रस्य प्रकर्षगति[3]रस्त्युत नेति ? अस्तीति दर्शयति—

**अत्थि** इत्यादि । तत्र द्रव्यशस्त्रं कृपाणादि तत् **परेणा**पि **पर**मस्ति तीक्ष्णादपि तीक्ष्णतरमस्ति, लोहकर्तृसंस्कारविशेषात् । यदि वा शस्त्रमित्युपघातकारि, तत एकस्मात् पीडाकारिणोऽन्यत् पीडाकार्युत्पद्यते, [4]ततोऽप्यपरम्, ततोऽप्यपरमिति । तद्यथा—कृपाणाभिघाताद् [5]वातोत्कोपः, ततः शिरोऽर्तिः, [6]तस्या ज्वरः, ततोऽपि मुखशोष-मूर्च्छादय इति । भावशस्त्रपारम्पर्यं त्वेकसूत्रान्तरितं स्वत एव प्रत्याख्यानपरिज्ञा[7]द्वारेण वक्ष्यति । यथा च शस्त्रस्य प्रकर्षगति[8]रस्ति [9]पारम्पर्यं वा विद्यते अशस्त्रस्य तथा नास्तीति दर्शयितुमाह—

**नत्थि** इत्यादि । नास्ति न विद्यते, किं तद् ? अशस्त्रं संयमः तत् परेण परम् इति प्रकर्षगत्यापन्नमिति, तथाहि—पृथिव्यादीनां सर्वत्र तुल्यता कार्या, [10]न मन्द-तीव्रभेदोऽस्ति, पृथिव्यादिषु समभावत्वात् सामायिकस्य, अथवा शैलेश्यवस्थासंयमादपि [11]परः संयमो नास्ति, तदूर्ध्वं गुणस्थानाभावादिति भावः । यो हि क्रोधमुपादानतो बन्धनतः स्थितितो विपाकतोऽनन्तानुबन्धिलक्षणतः क्षयमाश्रित्य प्रत्याख्यानपरिज्ञया जानाति सोऽपरमानादिदर्श्यपीत्येतदेव प्रतिसूत्रं लगयितव्यमित्याह—

---

१. **भवतीति** ग । २. **तच्च शस्त्राद्भयं भवति** ख । ३. **०स्त्युत न ? इति दर्शयति** ख-चप्रती विना । ४. **ततश्चापरम्** ख, ग-घ-ङप्रतिषु पाठभङ्गः । ५. **वातोत्कोचः** ख च । ६. **तस्माद् ज्वरः** ख च । ७. **०द्वारेणैव वक्ष्यति** ग । ८. **०रस्तीति** ङ । ९. **पारम्पर्येण वा** ग । १०. **न तीव्र-मन्दभेदोऽस्तीति** ग । ११. **परं** क ।

**[ सू०१३० ] जे कोहदंसी से माणदंसी, जे माणदंसी से मायदंसी, जे मायदंसी से लोभदंसी, जे लोभदंसी से पेज्जदंसी, जे पेज्जदंसी से दोसदंसी, जे दोसदंसी से मोहदंसी, जे मोहदंसी से गब्भदंसी, जे गब्भदंसी से जम्मदंसी, जे जम्मदंसी से मारदंसी, जे मारदंसी से णिरयदंसी, जे णिरयदंसी से तिरियदंसी, जे तिरियदंसी से दुक्खदंसी ।**

**से मेहावी अभिणिवट्टेज्जा कोधं च माणं च मायं च लोभं च पेज्जं च दोसं च मोहं च गब्भं च जम्मं च मारं च णरगं च तिरियं च दुक्खं च ।**

**एयं पासगस्स दंसणं उवरयसत्थस्स पलियंतकरस्स, आयाणं निसिद्धा सगडब्भि ।**

**जे कोहदंसी**त्यादि । यो हि क्रोधं स्वरूपतो वेत्ति अनर्थपरित्याग[1]रूपत्वाद् ज्ञानस्य परिहरति च स मानमपि पश्यति परिहरति चेति । यदि वा यः क्रोधं पश्यत्याचरति स मानमपि पश्यति मानाध्मातो भवतीत्यर्थः एवमुत्तरत्रा[2]पि आयोज्यं यावत् स दुःखदर्शीति, सुगमत्वाद् न विव्रियते । साम्प्रतं क्रोधादेः साक्षान्निवर्तनमाह—

**से** इत्यादि । स मेधावी **अभिनिवर्तयेत्** व्यावर्तयेत् । किं तत् ? **क्रोध**मित्यादि यावद् **दुःखम्**, सुगमत्वाद् व्याख्यानाभावः । स्वमनीषिकापरिहारार्थमाह—

[3]**एय**मित्यादि । एतत् अनन्तरोक्त[4]मुद्देशकादेर्वारभ्य **पश्यकस्य** तीर्थकृतः

---

१. ०रूपाद् घ । २. **०पि योज्यं** ख-चप्रती विना । ३. **एयं इत्यादि** ख च । ४. **०मुद्देशादेर्वा०** ख, **०मुद्देशकादेरारभ्य** घ ङ ।

**दर्शनम्** अभिप्रायः । किम्भूतस्य ? **उपरतशस्त्रस्य पर्यन्तकृतः** । पुनरपि किम्भूतोऽसौ ?—[1]**आयाण**मित्यादि । आदानं कर्मोपादानं **निषेध्य पूर्वस्वकृतकर्मभिद**साविति । किं चास्य भवति ? इत्याह—

**[ सू०१३१ ] किमत्थि उवधी पासगस्स, ण विज्जति ? णत्थि त्ति बेमि ।**

॥ सीतोसणिज्जं ततियमज्झयणं सम्मत्तं ॥

[2]**किमत्थि** इत्यादि । पश्यकस्य केवलिनः उपाधिः विशेषणम्, उपाधीयत [3]इति वोपाधिः, द्रव्यतो [4]हिरण्यादिर्भावतोऽष्टप्रकारं कर्म । स द्विविधोऽप्युपाधिः किमस्त्याहोस्विन्न विद्यते ? **नास्तीति** । एतदहं **ब्रवीमि**, [5]सुधर्मस्वामी जम्बूस्वामिने कथयति यथा—सोऽहं ब्रवीमि येन मया भगवत्पादारविन्दमुपासता सर्वमेतदश्रावि तद्भवते तदुपदिष्टार्थानुसारितया कथयामि न पुनः स्वमतिविकल्पशिल्परचनयेति ॥

गतः सूत्रानुगमः, तद्गतौ च समाप्तश्चतुर्थोद्देशकः । [6]तत्समाप्तौ चातीताऽनागतनयविचारातिदेशात् **समाप्तं शीतोष्णीयाध्ययनमिति** । छ ॥ [7]ग्रन्थशत ७९० ॥ छ ॥

• • •

---

१. **आयाणं इत्यादि** ख च । २. **किमत्थीत्यादि** ग घ ङ । ३. **इत्युपाधिः** ख । ४. **हिरण्यादि भावतो** ख च । ५. **गौतमस्वामी** घ ङ । ६. **तत्परिसमाप्तौ** ख च । ७. **ग्रन्थाग्रम् ७९० ॥ छ ॥** घ ङ च, ७९० मात्रं गप्रतौ, खप्रतौ त्वसौ ग्रन्थाग्रसूचको न वर्तते पाठः ।

उक्तं तृतीयमध्ययनम् । साम्प्रतं चतुर्थमारभ्यते । अस्य चायमभिसम्बन्धः—इह **शस्त्रपरिज्ञा**यामन्वय-व्यतिरेकाभ्यां षड्जीवनिकायान् व्युत्पादयता जीवा-ऽजीवपदार्थद्वयं [1]व्युदपादि, [2]तद्वधे बन्धं विरतिं च भणताऽऽश्रव-[3]संवरपदार्थद्वयमूचे, तथा **लोकविजयाध्ययने** लोको यथा बध्यते [4]यथा च मुच्यते इति वदता बन्ध-निर्जरे गदिते, **शीतोष्णीयाध्ययने** तु शीतोष्णरूपाः परीषहाः सोढव्या इति भणता तत्फललक्षणो मोक्षोऽभिहितः, ततश्चाध्ययनत्रयेण सप्तपदार्थात्मकं तत्त्वमभिहितम्, तत्त्वार्थश्रद्धानं [5]च सम्यक्त्वमुच्यते, तदधुना प्रतिपाद्यते । [6]अनेन सम्बन्धेनायातस्यास्याध्ययनस्य चत्वार्यनुयोगद्वाराणि व्यावर्ण्योपक्रमेऽर्थाधिकारो [7]द्वेधा । तत्राध्ययनार्थाधिकारः सम्यक्त्वाख्यः **शस्त्रपरिज्ञा**यां प्रागेवाभाणि । [8]उद्देशकार्थाधिकारप्रतिपादनाय तु **निर्युक्तिकार** आह—

**पढमे सम्मावाओ [9]बितिए धम्म[10]प्पवादियपरिक्खा ।**
**[11]तइए अणवज्जतवो न हु बालतवेण [12]मोक्खो त्ति ॥२१६॥**
**[13]उद्देसे [14]उ चउत्थे समासवयणेण णियमणं भणियं ।**
**तम्हा य नाण-दंसण-तव-चरणे [15]होइ जइयव्वं ॥२१७॥**

**[16]पढमे** इत्यादि गाथा । **उद्देसम्मि** गाहा । प्रथमोद्देशके सम्यग्वाद इत्ययमर्थाधिकारः, सम्यग् अविपरीतो वादः सम्यग्वादः यथावस्थितवस्त्वाविर्भावनम् । द्वितीये तु धर्मप्रवादिकपरीक्षा, धर्मं प्रवदितुं शीलं येषां ते धर्मप्रवादिनस्त एव धर्मप्रवादिकाः धर्मप्रावादुका इत्यर्थः, तेषां परीक्षा युक्ताऽयुक्तविचारणमिति । तृतीयेऽनवद्यतपोव्यावर्णनम्, न च बालतपसा [17]अज्ञानितपश्चरणेन मोक्ष इत्ययमर्थाधिकारः । चतुर्थोद्देशके तु समासवचनेन सङ्क्षेप-

---

१. व्युत्पादितम्, तद्वधे च । २. तद्वधे च बन्धं ग । ३. ०ऽऽस्रव० ग घ च । ४. *यद्वा मुच्यते* क । ५. *तु* ख । ६. *तदनेन* ख । ७. *द्वेधा । अध्ययना०* ख । ८. *उद्देशार्था०* ख ग च । ९. बिइए ख जझ ठ, बीए ञ । १०. ०प्पवाइय० ख छ ज झ ठ, ०प्पवातिय० ञ । ११. ततिते ञ । १२. मुक्खो ज झ, मुक्ख ठ । १३. उद्देसम्मि चउत्थे क-छप्रती विना । १४. य छ । १५. होति जतियव्वं ञ । १६. पढमे गाहा । ख च । १७. अज्ञानतप० ख ।

वचनेन नियमनं भणितं संयम उक्त इति । तदेवं प्रथमोद्देशके सम्यग्दर्शनमुक्तम्, [1]द्वितीये सम्यग्ज्ञानम्, [2]तृतीये बालतपोव्युदासेन सम्यक्तपः, चतुर्थे तु सम्यक्चारित्रमिति । [3]**तस्मात् च**शब्दः हेतौ, यतश्चतुष्टयमपि मोक्षाङ्गं प्रागुक्तं तस्माद् ज्ञान-दर्शन-तपश्चरणेषु मुमुक्षुणा यतितव्यं तत्प्रतिपालनाय यावज्जीवं यत्नो विधेय इति गाथाद्वयार्थः ॥२१६-२१७॥

अधुना नामनिष्पन्ननिक्षेपायातस्य सम्यक्त्वाभिधानस्य निक्षेपं चिकीर्षुराह—

**नामं ठवणा सम्मं दव्वसम्मं च भावसम्मं च ।**
**एसो खलु सम्मस्सा [4]निक्खेवो चउव्विहो होइ ॥२१८॥**

**नामं॰** गाहा । अक्षरार्थः सुगमः ॥२१८॥ भावार्थं तु सुगमनाम-स्थापना-व्युदासेन द्रव्य-भावगतं **निर्युक्तिकारः** प्रतिपिपादयिषुराह—

**अह [5]दव्वसम्म इच्छाणुलोमियं तेसु तेसु [6]दव्वेसु ।**
**कय संखय [7]संजुत्ती पउत्त जढ भिन्न छिण्णं [8]च ॥२१९॥**

**अह दव्व॰** गाहा । अथ इत्यानन्तर्ये, ज्ञशरीर-भव्यशरीरव्यतिरिक्तं द्रव्यसम्यक्त्वमित्याह—**ऐच्छानुलोमिकम्**, इच्छा चेतःप्रवृत्तिः अभिप्रायस्त-स्यानुलोमम् अनुकूलम् तत्र भवमैच्छानुलोमिकम् । [9]तच्च **तेषु** [10]तेष्विच्छा-भावानुकूल्यताभाक्षु कृताद्युपाधिभेदेन सप्तधा भवति, तद्यथा—**कृतम्** अपूर्वमेव निर्वर्तितं रथादि, [11]तस्य यथाऽवयवलक्षणनिष्पत्तेर्द्रव्यसम्यक् कर्तुस्तन्निमित्त-चित्तस्वास्थ्योत्पत्तेः, यदर्थं वा [12]कृतं तस्य शोभनाऽऽशुकरणतया समा-[13]धानहेतुत्वाद्वा द्रव्यसम्यक् १। एवं **संस्कृते**ऽपि योज्यम्, तस्यैव रथादेर्भग्न-जीर्णाऽपोढापरावयव[14]संस्करणादिति २। तथा ययोर्द्रव्ययोः संयोगो गुणान्तराधानाय

१. **द्वितीये तु सम्य॰** क ग । २. **तृतीयेऽज्ञानितपो** ख च । ३. **तस्माच्च चशब्दः** ग । ४. **निक्खेवो चउविहो** ख ज । ५. **दव्वसम्ममिच्छा॰** ज ठ । ६. **दव्वेसुं** छ । ७. **संजुत्तोपउत्त** कप्रतिमृते । ८. **वा** ख छ ज ठ । ९. **तत्र तेष्विच्छा-विशेषभाक्षु द्रव्येषु कृताद्युपाधि॰** ख । १०. **तेष्विच्छानुकूल्य॰** ग । ११. **तस्य च यथा॰** ख । १२. **कृतस्तस्य** ख ग । १३. **॰हेतुत्वाद् द्रव्य॰** च । १४. **॰संस्कारादिति** घ ङ च ।

नोपमर्दाय [१]उपभोक्तुर्वा मनःप्रीतये पयःशर्करयोरिव तत् **संयुक्त**द्रव्यसम्यक् ३। तथा यत् **प्रयुक्तं** द्रव्यं लाभहेतुत्वाद् आत्मनः समाधानाय प्रभवति तत् प्रयुक्तद्रव्यसम्यक्, पाठान्तरं वा **उवउत्त** त्ति यत् उपयुक्तम् अभ्यवहृतं द्रव्यं मनःसमाधानाय प्रभवति तद् उपयुक्तद्रव्यसम्यक् ४। तथा **जढं** परित्यक्तं यद् भारादि तत् त्यक्तद्रव्यसम्यक् ५। तथा दधिभाजनादि **भिन्नं** सत् काकादिसमाधानोत्पत्तेः भिन्नद्रव्यसम्यक् ६। तथाऽधिकमांसादि[२]च्छेदात् [३]**च्छिन्न**द्रव्यसम्यक् ७। सर्वमप्येतत् [४]समाधानकारणत्वाद् द्रव्यसम्यक्, विपर्ययादसम्यगिति गाथार्थः ॥२१९॥ [५]भावसम्यक्प्रतिपादनायाह—

**तिविहं तु भावसम्मं दंसण नाणे तहा चरित्ते य ।**
**दंसण-चरणे [६]तिविहे नाणे दुविहं तु नायव्वं ॥२२०॥**

**तिविहं०** गाहा । त्रिविधं भावसम्यग् दर्शन-ज्ञान-चारित्रभेदात् । पुनरप्येकैकं भेदत आचष्टे—तत्र दर्शन-चरणे प्रत्येकं त्रिविधे, तद्यथा—अनादिमिथ्यादृष्टेरकृतत्रिपुञ्जस्य यथाप्रवृत्तकरणक्षीणशेष[७]कर्मदेशोनसागरोपम-कोटीकोटिस्थितिकस्यापूर्वकरणभिन्नग्रन्थेर्मिथ्यात्वानुदयलक्षणमन्तरकरणं विधायानिवृत्तिकरणेन प्रथमं सम्यक्त्वमुत्पादयत औपशमिकं दर्शनम्, उक्तं च—

**ऊसरदेसं दड्ढेल्लयं [८]वि विज्झाइ वणदवो पप्प ।**
**इय मिच्छत्ता[९]णुदये उवसमसम्मं लहइ जीवो ॥** [ ]

उपशमश्रेण्यां वौपशमिकमिति १। तथा सम्यक्त्वपुद्गलोपष्टम्भजनिता-ध्यवसायः क्षायोपशमिकम् २। दर्शनमोहनीयक्षयात् क्षायिकम् ३।

चारित्रमप्युपशमश्रेण्यामौपशमिकम् १, कषायक्षयोपशमात् क्षायोप-शमिकम् २, चारित्रमोहनीयक्षयात् [१०]क्षायिकम् ३।

ज्ञाने तु भावसम्यग् द्विधा ज्ञातव्यम्, तद्यथा—क्षायोपशमिकं क्षायिकं च ।

---

१. **उपभोक्तुर्मनः०** च । २. **०च्छेदे च्छिन्न०** ख । ३. **च्छिन्नसम्यक्** कपुस्तकं विना । ४. **समाधानकारित्वाद्** ग । ५. नास्तीयमुत्थानिका गप्रतौ । ६. **तिविहं** ख छ झ ठ. **तिविहं दुविहं णाणे उ नायव्वं** ञ । ७. **०कर्मणो देशोन०** ग च । ८. **व्व** ग, **च** घ ङ च । ९. **०णुदए** ख घ ङ च । १०. ***क्षायिकमिति*** ३ ख ङ ।

तत्र चतुर्विधज्ञानावरणीयक्षयोपशमाद् मत्यादि चतुर्विधं क्षायोपशमिकं ज्ञानम् । समस्तक्षयात् क्षायिकं केवलज्ञानमिति ॥२२०॥

तदेवं त्रिविधेऽपि भावसम्यक्त्वे दर्शिते सति परश्चोदयति—यद्येवं त्रयाणामपि सम्यग्वादसम्भवे कथं दर्शनस्यैव सम्यक्त्ववादो रूढो यदिहाध्ययने व्यावर्ण्यते ? उच्यते—तद्भावभावित्वादितरयोः, तथाहि—मिथ्यादृष्टेस्ते न स्तः । अत्र च सम्यक्त्वप्राधान्यख्यापनाय अन्धेतरराजकुमारद्वयेन बाला-ऽङ्गनाद्य[1]व-बोधार्थं दृष्टान्तमाचक्षते, तद्यथा—

[2]**उदयसेन**स्य राज्ञो **वीरसेन-सूरसेन**कुमारद्वयम् । तत्र **वीरसेनो**ऽन्धः । स [3]च तत्प्रायोग्या गान्धर्वादिकाः कला ग्राहितः । इतरस्त्वभ्यस्त**धनुर्वेदो** लोकश्लाघ्यां पदवीमगमत् । एतच्च समाकर्ण्य वीरसेनेनापि राजा विज्ञप्तो यथा— अहमपि **धनुर्वेदा**भ्यासं विदधे । राज्ञाऽपि तदाग्रहमवगम्यानुज्ञातः । ततोऽसौ सम्यगुपाध्यायोपदेशात् प्रज्ञातिशयादभ्यासविशेषाच्च शब्दवेधी सञ्जज्ञे । तेन चारूढयौवनेन स्वभ्यस्त**धनुर्वेद**विज्ञानक्रियेणाऽगणित[4]चक्षुर्दर्शनसदसद्भावेन शब्दवेधित्वावष्टम्भात् परबलोपस्थाने सति राजा [5]युद्धायादेशं याचितः । तेनापि याच्यमानेन वितेरे । **वीरसेनेन** च [6]शब्दानुवेधितया परानीके जजृम्भे । परैश्चावगतकुमारान्धभावैर्मूकतामालम्ब्यासौ जगृहे । **सूरसेनेन** च विदितवृत्तान्तेन राजानमापृच्छ्य निशित[7]शरशतजालावष्टब्धपरानीकेन मोचितः ।

तदेवमभ्यस्तविज्ञान-क्रियोऽपि चक्षुर्विकलत्वाद् नालमभिप्रेतकार्यसिद्धये इति । एतदेव **निर्युक्तिकारो** गाथयोपसंहर्तुमाह—

**कुणमाणो वि य किरियं परिच्चयंतो वि सयण-धण-भोए ।**
**[8]दिंतो वि दुहस्स उरं ण जिणइ अंधो पराणीयं ॥२२१॥**

**कुणमाणो०** गाहा । कुर्वन्नपि क्रियां परित्यजन्नपि स्वजन-धन-भोगान् दददपि दुःखस्योरः न जयत्यन्धः परानीकमिति गाथार्थः ॥२२१॥

---

१. **०द्यवबोधनार्थं** ग च । २. **उदयवर्मणो राज्ञो** ग, **उदयसेनराज्ञो** ग ङ । ३. **च** इति खप्रतौ न । ४. **०चक्षुर्दर्शनासद्भावेन** ग । ५. **युद्धादेशं** ग । ६. **शब्दवेधितया** ख । ७. **०शरजाला०** क । ८. **दंतो** ख झ, **देंतो** ज ।

तदेवं दृष्टान्तमुपदर्श्य दार्ष्टान्तिकमाह—

**कुणमाणो वि [१]णिवित्तिं परिच्चयंतो वि सयण-धण-भोए ।**
**[२]दिन्तो वि दुहस्स उरं मिच्छद्दिट्ठी ण सिज्झइ [३]उ ॥२२२॥**

**कुणमाणो**० गाहा । कुर्वन्नपि निवृत्तिम् अन्यदर्शनाभिहिताम्, तद्यथा— 'पञ्च यमाः, पञ्च नियमाः' इत्यादिकाम्, तथा परित्यजन्नपि स्वजन-धन-भोगान्, पञ्चाग्नितपआदिना दददपि दुःखस्योरः, मिथ्यादृष्टिर्न सिध्यति । तुः अवधारणे नैव सिध्यति, दर्शनविकलत्वाद् अन्धकुमारवदसमर्थः कार्यसिद्धये । यत एवं ततः किं कर्तव्यम् ? इत्याह—

**तम्हा कम्माणीयं जेउमणो दंसणम्मि [४]पयएज्जा ।**
**[५]दंसणवयो हि सफलाणि होंति तव-णाण-[६]चरणाइं ॥२२३॥**

**तम्हा**० गाहा । यस्मात् सिद्धिमार्ग[७]मूलास्पदसम्यग्दर्शनमन्तरेण न कर्मक्षयः स्यात् तस्मात् कारणात् कर्मानीकं जेतुमनाः सम्यग्दर्शने प्रयतेत । तस्मिंश्च सति यद् भवति तद् दर्शयति—दर्शनवतो हि, [८]**हिः** हेतौ, यस्मात् [९]सम्यग्दर्शनिनः सफलानि भवन्ति तपो-ज्ञान-चरणानि, अतस्तत्र यत्नवता भाव्यमिति [१०]गाथार्थः ॥२२३॥

प्रकारान्तरेणापि [११]सम्यग्दर्शनस्य तत्पूर्वकाणां च गुणस्थानकानां गुणमाविर्भावयितुमाह—

**सम्मत्तुप्पत्ती [१२]सावए य विरए [१३]अणंतकम्मंसे ।**
**दंसणमोह[१४]क्खमए उवसामंते य उवसंते ॥२२४॥**

---

१. **णियत्तिं** क-जप्रती विना । २. **दैंतो** छ ज, **दिंतो** ख ठ, **दंतो** झ ञ । ३. **हु** ख छ ज ठ । ४. **पययेज्जा** ञ, **पयइज्जा** ठ । ५. **दंसणवतो** ख ञ **दंसणवओ** ज झ ठ । ६. **०चरणाणि** ञ । ७. **०मूलास्पदं** ग घ ङ च । ८. **हिः** इति ख-गप्रत्योर्नास्ति, **हि** ङ । ९. **सम्यग्दर्शनेन सफलानि** क । १०. **गाथार्थः** इति पाठः खप्रतौ न । ११. **सम्यक्त्वस्य** ख । १२. **सावओ** क, **सावते** ञ । १३. **यऽणंतकम्मंसे** क ठ । १४. **०क्खवमो** ञ ।

**[1]खवए य खीणमोहे जिणे य सेढी भवे [2]असंखेज्जा ।**
**[3]तव्विवरीओ कालो [4]संखेज्जगुणाए सेढीए ॥२२५॥**

**सम्मत्तुप्पत्ती०** गाहा । **खवए य०** गाहा । सम्यक्त्वस्योत्पत्तिः सम्यक्त्वोत्पत्तिस्तस्यां विवक्षितायामसङ्ख्येय[5]गुणा श्रेणिर्भवेदित्युत्तरगाथार्धान्ते क्रियामपेक्ष्य सम्बन्धो लगयितव्यः । कथमसङ्ख्येयगुणा श्रेणिर्भवेदिति ? अत्रोच्यते—इह मिथ्यादृष्टयो देशोन[6]कोटीकोटिकर्म[7]स्थितिका ग्रन्थिकसत्त्वास्ते कर्म-निर्जरामाश्रित्य तुल्याः, धर्मप्रच्छनोत्पन्न[8]संज्ञस्तेभ्योऽसङ्ख्येयगुणनिर्जरकः । ततो पिपृच्छिषुः [9]सन् साधुसमीपं जिगमिषुः । तस्मादपि क्रियाविष्टः पृच्छन् । [10]अतोऽपि [11]धर्मं प्रतिपित्सुः । अस्मादपि क्रियाविष्टः [12]प्रतिपद्यमानः । तस्मादपि पूर्वप्रति-पन्नोऽसङ्ख्येयगुणनिर्जरक इति सम्य[13]क्त्वोत्पत्तिर्व्याख्याता ।

तदनन्तरं विरताविरतिं प्रतिपित्सु-प्रतिपद्यमान-पूर्वप्रतिपन्नानामुत्तरोत्तर-स्यासङ्ख्येय[14]गुणा निर्जरा योज्या । एवं सर्वविरतावपीति । ततोऽपि पूर्वप्रतिपन्नसर्वविरतेः सकाशात् **अणंतकम्मंसे** त्ति पदैकदेशे पदप्रयोग इति यथा [15]**भीमसेनो भीमः, सत्यभामा भामा** एवमनन्तशब्दोपलक्षिता अनन्तानु-बन्धिनः, ते हि मोहनीयस्यांशाः भागाः, तांश्चिक्षपयिषुरसङ्ख्येयगुणनिर्जरकः । ततोऽपि क्षपकः । तस्मादपि क्षीणानन्तानुबन्धिकषायः । [16]एतदेव दर्शनमोहनीय-त्रयेऽभिमुख-क्रियारूढाऽ[17]पवर्गत्रयमायोज्यम् । ततोऽपि क्षीणसप्तकात् क्षीण-सप्तक एवोपशमश्रेण्यारूढोऽसङ्ख्येयगुणनिर्जरकः । ततोऽप्युपशान्तमोहः । तस्मादपि चारित्रमोहनीयक्षपकः । ततोऽपि क्षीणमोहः । अत्र चाभिमुखादित्रयं यथा-सम्भवमायोजनीयम् । अस्मादपि जिनः भवस्थकेवली । तस्मादपि

---

१. **खवगे** अ । २. **असंखिज्जा** ठ । ३. **तव्विवरीतो** अ । ४. **संखिज्ज०** ठ । ५. **०गुणश्रेणि०** ख । ६. **०कोटिकोटीकर्म०** ङ । ७. **०स्थितिकाश्च ग्रन्थिक०** च । ८. **०संज्ञास्तेभ्योऽसङ्ख्येयगुणनिर्जरकाः । ततोऽपि पिपृच्छिषुः** क-खपुस्तके विना । ९. **सत्साधुसमीपं** ख ङ च, **स साधु०** ग । १०. **ततोऽपि** ग च । ११. **धर्मप्रतिपित्सुः** घ ङ । १२. **प्रतिपद्यमानकः** ख । १३. **०क्त्वोत्पत्तिव्याख्या** ख, **०क्त्वोत्पत्ति( त्ते? )र्व्याख्या** ग । १४. **०गुणनिर्जरा** ख ग ङ च । १५. **भीमो भीमसेनः, सत्या सत्यभामा एव०** ख । १६. **तदेव** ङ । १७. "**अपवर्ग** इति समाप्तिः ।" जै०वि०प० ।

शैलेश्यवस्थोऽसङ्ख्येय[1]गुणनिर्जरकः ।

तदेवं कर्मनिर्जरायै असङ्ख्येय[2]लोकाकाशप्रदेशप्रमाणनिष्पादितसंयमस्थानप्रचयोपात्तश्रेणिः सोत्तरोत्तरेषामसङ्ख्येयगुणा । उत्तरोत्तरप्रवर्धमानाध्यवसायकण्डकोपपत्तेरिति । कालस्तु तद्विपरीतोऽयोगिकेवलिन आरभ्य प्रतिलोमतया असङ्ख्येयगुणया श्रेण्या [3]नेयः । इदमुक्तं भवति—[4]यावता कालेन यावत्कर्माऽयोगिकेवली क्षपयति तावन्मात्रं कर्म [5]सयोगिकेवली सङ्ख्येयगुणेन कालेन क्षपयति एवं प्रतिलोमतया याव[6]द्धर्मं पिपृच्छिषुस्तावन्नेयमिति गाथाद्वयार्थः ॥२२४-२२५॥

एवमन्तरोक्तया नीत्या दर्शनवतः सफलानि तपो-ज्ञान-चरणान्यभिहितानि । [7]यदि पुनः केनचिदुपाधिना विदधाति ततः सफलत्वाभावः । कश्चासावुपाधिः ? तमाह—

**[8]आहार-उवहि-पूया-इड्ढीसु य गारवेसु [9]कइतवियं ।**
**एमेव बारस[10]विहे तवम्मि न हु [11]कइतवे समणो ॥२२६॥**

**आहार०** गाहा । आहारश्च उपधिश्च पूजा च ऋद्धिश्च आमर्षौषध्यादिका आहारोपधि-पूजर्द्धयस्तासु निमित्तभूतासु ज्ञान-चरणक्रियां करोति । तथा गारवेषु त्रिषु प्रतिबद्धो यत् करोति तत् कृत्रिममित्युच्यते । यथा [12]च ज्ञान-चरणयोराहाराद्यर्थमनुष्ठानं[13] कृत्रिमं सन्न फलवद्भवति एवं सबाह्याभ्यन्तरे द्वादशप्रकारे तपस्यपीति । न [14]च कृत्रिमानुष्ठायिनः श्रमणभावः, न चाश्रमणस्यानुष्ठानं गुणवदिति ॥२२६॥

---

१. **०गुणो निर्जरकः** ङ । २. **०लोकाकाशप्रमाणप्रतिपादितसंयम०** ख । ३. **ज्ञेयः** घ ङ च । ४. **यावन्मात्रकालानु( म )योगिकेवली गुणश्रेणीं रचयति ततः सङ्ख्येयगुणकालां सयो[ गि ]केवली रचयतीति एवं प्रतिलोमतया** ख, **यावत्कालेन** घ ङ च । ५. **सयोगी केवली** ङ । ६. **०द्धर्मपिपृच्छिषु०** ख । ७. "**यदि पुनः** इति दर्शनवानपि सन्" जै०वि०प० । ८. **आहार-इड्ढि-पूआ-उवहीसु य** ख ठ । ९. **कतितवियं** ख, **कयतवियं** ज । १०. **०विधे** ज । ११. **कतितवे** ख ज, **केयवं** ज । १२. **च** इति गप्रतौ न । १३. **०नं तन्न फलवद्भवति** ख । १४. **च** इति घपुस्तके नास्ति ।

तदेवं [1]निरुपाधेर्दर्शनवतस्तपो-ज्ञान-चरणानि सफलानीति स्थितम् । अतो दर्शने यतितव्यम् । दर्शनं च तत्त्वार्थश्रद्धानम् । तत्त्वं चोत्पन्नापगतकलङ्काशेषपदार्थसत्ताव्यापिज्ञानैस्तीर्थकृद्भिर्यदभाषि तदेव सूत्रानुगमायातेन सूत्रेण दर्शयति—

**[ सू०१३२ ] से बेमि—जे य अतीता जे य पडुप्पण्णा जे य आगमिस्सा अरहंता भगवंता ते सव्वे एवमाइक्खंति, एवं भासंति, एवं पण्णवेंति, एवं परूवेंति—सव्वे पाणा सव्वे भूता सव्वे जीवा सव्वे सत्ता ण हंतव्वा, ण अज्जावेतव्वा, ण परिघेत्तव्वा, ण परितावेयव्वा, ण उद्दवेयव्वा ।**

**एस धम्मे सुद्धे णितिए सासए समेच्च लोयं खेतण्णेहिं पवेदिते । तं जहा—उट्ठिएसु वा अणुट्ठिएसु वा, उवट्ठिएसु वा अणुवट्ठिएसु वा, उवरतदंडेसु वा अणुवरतदंडेसु वा, सोवधिएसु वा अणुवहिएसु वा, संजोगरएसु वा असंजोगरएसु वा ।**

[2]**से बेमी**त्यादि सूत्रम् । **गौतमस्वाम्याह** यथा—सोऽहं ब्रवीमि योऽहं [3]तीर्थकरवचनावगततत्त्वः श्रद्धेयवचन इति । यदि वा **शौद्धोदनि**[4]शिष्याभिमतक्षणिकत्वव्युदासेनाह—येन मया पूर्वमभाणि सोऽहम[5]द्यापि ब्रवीमि, नापरः । यदि वा सेशब्दस्तच्छब्दार्थे, यच्छ्रद्धाने सम्यक्त्वं भवति तदहं तत्त्वं ब्रवीमि । [6]ये **अतीताः** अतिक्रान्ताः, ये च **प्रत्युत्पन्नाः** वर्तमानकालभाविनः ये **चागामिन**स्त एवं प्ररूपयन्तीति सम्बन्धः ।

---

१. निरुपाधिदर्शन० ग च । २. से बेमि इत्यादि सूत्रम् । सोऽहं ख । ३. तीर्थङ्कर० ग । ४. ०शिक्षाभिमत० च । ५. ०मद्याभिब्रवीमि क । ६. ये आगामिन० ख ।

तत्रातिक्रान्तास्तीर्थकृतः कालस्यानादित्वाद्[1] अनन्ता अतिक्रान्ताः । अनागता अप्यनन्ताः, आगमिष्यत्कालस्यानन्तत्वात्[2] तेषां[3] सर्वदैव[4] भावादिति । वर्तमानतीर्थकृतां च प्रज्ञापकापेक्षयाऽनवस्थितत्वे सत्यप्युत्कृष्ट-जघन्यपदिन एव कथ्यन्ते । तत्रोत्कृष्टतः[5] समयक्षेत्रसम्भविनः सप्तत्युत्तरशतम्, तच्चैवम्—पञ्चस्वपि विदेहेषु प्रत्येकं द्वात्रिंशत्क्षेत्रात्मकत्वाद् एकैकस्मिन् द्वात्रिंशद् द्वात्रिंशत्, पञ्चस्वपि भरतेषु पञ्च, एवमैरावतेष्वपीति । तत्र द्वात्रिंशत् पञ्चभिर्गुणिता[6] षष्ट्युत्तरशतम्[7], भरतैरावतदशप्रक्षेपेण सप्तत्यधिकं शतमिति । जघन्यतस्तु विंशतिः, सा चैवम्—पञ्चस्वपि विदेहेषु[8] विदेहान्तर्महानद्युभयतटसद्भावात् तीर्थकृतां प्रत्येकं चत्वारः, ते च[9] पञ्चभिर्गुणिता विंशतिः, भरतैरावतयोस्त्वेकान्तसुखमादावभाव एवेति । अन्ये तु व्याचक्षते—मेरोः पूर्वा-ऽपरविदेहैकैकसद्भावाद्[10], महाविदेहे द्वावेव, ततः[11] पञ्चस्वपि दशैवेति, तथा च ते आहुः—

> **सत्तरसयमुक्कोसं[12] इयरे[13] दस समयखेत्तजिणमाणं[14] ।**
> **चोत्तीस पढमदीवे अणंतरऽद्धे[15] य ते दूणा[16] ॥ [ ]**

के इमे ?—**अर्हन्तः** अर्हन्ति पूजा-सत्कारादिकमिति, तथा ऐश्वर्याद्युपेता **भगवन्तः** । ते सर्व एव परप्रश्नावसरे एवमाचक्षते यदुत्तरत्र वक्ष्यते । वर्तमाननिर्देशस्योपलक्षणार्थत्वादिदमपि[17] द्रष्टव्यम्—एवमाचचक्षिरे एवमाख्यास्यन्ति । एवं सामान्यतः सदेव-मनुजायां परिषदि[18] **अर्धमागधया** सर्वसत्त्वस्व[19]-भाषानुगामिन्या भाषया भाषन्ते । एवं प्रकर्षेण संशीत्यपनोदायान्तेवासिनो जीवा-

---

१. ०त्वादियत्तामतिक्रान्ताः ख ग च । २. आगामिकालस्या० कप्रतिमृते । ३. ०त्वादिति । वर्तमानस्य च प्रज्ञापकापेक्षयाऽनवस्थितत्वे ख, ०त्वादिति । वर्तमानतीर्थकृतां प्रज्ञापका० च । ४. तेषां च सर्वदैव ग घ ङ । ५. तत्रोत्सर्गतः खपुस्तकं विना । ६. ०ता जाता षष्ट्यु० ख । ७. षष्ट्युत्तरं शतम् ग च । ८. महाविदेहेषु कप्रतेर्विना । ९. तेऽपि पञ्चभि० खप्रतिमृते । १०. ०विदेहयोरेकैक० ग । ११. ततः इति पाठः ग चप्रत्योरेव । १२. सत्तरिसय० ख । १३. इतरे च । १४. ०खित्त० ग । १५. "अणंतरद्धे य त( ते ) दूणा इति जम्बूद्वीपापेक्षया अनन्तरः धातु(त)कीखण्डः, अर्धं च पुष्करवरद्वीपार्धम्, तयोर्द्वयोरपि प्रथमद्वीपापेक्षया द्विगुणा भवन्ति, द्वयोरपि मिलिता १३६, प्रथमद्वीपप्रक्षेपे च १७०" जै०वि०प० । १६. दूण त्ति ख च, दुगुणा घ ङ । १७. ०णार्थमिदमेवमाचचक्षिरे त एवमाख्यास्यन्ति ख । १८. पर्षदि ख च । १९. ०स्वभाषया भाषन्ते ख ।

ऽजीवा-[१]ऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षपदार्थान् ज्ञापयन्ति **प्रज्ञापयन्ति**। एवं सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः, मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगा बन्धहेतवः, स्व-परभावेन सदसती, तत्त्वं सामान्य-विशेषात्मकमित्यादिना प्रकारेण **प्ररूपयन्ति**। एकार्थिकानि वैतानीति। किं तद् 'एवमाचक्षते' इति ? दर्शयति यथा–

**सर्वे प्राणाः** सर्व एव पृथिव्यप्-तेजो-वायु-वनस्पतयो द्वि-त्रि-चतुः-पञ्चेन्द्रियाश्च, इन्द्रिय-बलोच्छ्वास-निश्वासा-ऽऽयुष्कलक्षणप्राणधारणात् प्राणाः। तथा सर्वाणि भवन्ति भविष्यन्त्यभूवन्निति च भूतानि चतुर्दशभूतग्रामान्तः-पातीनि। एवं सर्व एव जीवन्ति जीविष्यन्ति अजीविषुरिति जीवाः नारक-तिर्यङ्-नरा-ऽमरलक्षणाश्चतुर्गतिकाः। तथा सर्व एव स्वकृतसाता-ऽसातोदयसुख-दुःखभाजः सत्त्वाः। एकार्था वैते शब्दाः, 'तत्त्वभेदपर्यायैः प्रतिपादनम्' इति कृत्वेति।

एते च[२] सर्वेऽपि प्राणिनः पर्यायशब्दावेदिता **न हन्तव्या** दण्ड-कशादिभिः, **नाज्ञापयितव्याः** प्रसह्याभियोगदानतः, **न परिग्राह्या** भृत्य-दास-दास्यादि-ममत्वपरिग्रहतः, **न परितापयितव्याः**[३] शारीर-मानस[४]पीडोत्पादनतः, **नापद्राव-यितव्याः** प्राणव्यपरोपणतः।

**एषः** अनन्तरोक्तः **धर्मः** दुर्गत्यर्गला-सुगतिसोपानदेश्यः। अस्य च प्रधानपुरुषार्थत्वाद् विशेषणं दर्शयति–**शुद्धः** पापानुबन्धरहितः, न **शाक्य**-[५]धिग्जातीयनामिवैकेन्द्रिय-पञ्चेन्द्रियवधानुमतिकलङ्काङ्कितः। तथा **नित्यः** [६]अप्रच्युतिरूपः [७]पञ्चस्वपि विदेहेषु सदाभवनात्। तथा **शाश्वतः** शाश्वतगति-हेतुत्वात्, यदि वा नित्यत्वात् शाश्वतः, [८]न तु नित्यं भूत्वा न भवति [९]भव्यत्ववत्, अभूत्वा च नित्यं भवति घटाभाववदिति, अयं तु त्रिकालावस्थायीति।

---

१. ०ऽऽस्त्रव० ग घ ङ, ०ऽऽश्रव-संवर-निर्जरा-बन्ध-मोक्ष० ख, ०ऽऽश्रव-संवर-बन्ध-निर्जरा० च। २. **च** इति गप्रतौ न। ३. ०**व्याः इति शारीर०** ख-चप्रती विना। ४. ०पीडोत्पादनैः, नापद्रापयितव्याः ख। ५. ०**धिग्जातीना०** कपुस्तकमृते। ६. **अप्रच्युतरूपः** क। ७. **पञ्चसु विदेहेषु** ख च। ८. "**न तु** इति कूटस्थनित्यतां निराचष्टे, नित्यमपि सोऽपि न नित्यः" जै०वि०प०। ९. **अभव्यत्ववत्** ङ।

अमुं च **लोकं** जन्तुलोकं दुःखसागरावगाढं **समेत्य** ज्ञात्वा तदुत्तरणाय **खेदज्ञैः** जन्तुदुःखपरिच्छेत्तृभिः **प्रवेदितः** प्रतिपादित इति। एतच्च **गौतमस्वामी** स्वमनीषिकापरिहारेण शिष्यमतिस्थैर्यार्थं बभाषे। [१]एनमेव सूत्रोक्तमर्थं **निर्युक्तिकारः** [२]सूत्रस्पर्शकेन गथाद्वयेन दर्शयति–

**जे जिणवरा [३]अतीता जे [४]संपइ जे [५]अणागये काले।**
**सव्वे वि ते अहिंसं [६]वदिंसु [७]वदिहिंति [८]य [९]वयेंति ॥२२७॥**
**छ प्पि य जीव[१०]निकाए णो वि [११]हणे णो वि आहणावेज्जा।**
**णो वि य [१२]अणुमन्नेज्जा सम्मत्तस्सेस निज्जु[१३]त्ती ॥२२८॥**

**जे [१४]जिणवरा०** गाहा। **छ प्पि य जीव[१५]निकाये०** गाहा। गाथाद्वयमपि कण्ठ्यम् ॥२२७-२२८॥ तीर्थकरोपदेशश्च परोपकारितया तत्स्वाभाव्यादेव प्रवर्तमानो भास्करोदय इव प्रबोध्यविशेषनिरपेक्षतया प्रवर्तते [इति?] **तद्यथे**त्यादिना दर्शयति–छ ॥

**तंजहा–उट्ठिएसु वा** इत्यादि। धर्मचरणायोद्यता **उत्थिताः** ज्ञान-दर्शन-चारित्रोद्योगवन्तः, तद्विपर्ययेणा**ऽनुत्थिताः**, तेषु निमित्तभूतेषु [१६]तानुद्दिश्य भगवता सर्ववेदिना त्रिजगत्पतिना धर्मः प्रवेदितः। एवं सर्वत्र लगयितव्यम्। यदि वा उत्थिता-ऽनुत्थितेषु [१७]द्रव्यतोऽपि निषण्णा-ऽनिषण्णेषु। तत्रैकादशसु गणधरेषूत्थितेष्वेव **वीरवर्धमानस्वामि**ना धर्मः प्रवेदितः। तथा **उपस्थिताः** धर्मं शुश्रूषवो जिघृक्षवो वा, तद्विपर्ययेणानुपस्थितास्तेष्विति, निमित्तसप्तमी चेयं यथा–चर्मणि द्वीपिनं हन्तीति। ननु च भावोपस्थितेषु [१८]**चिलातिपुत्रा**दिष्विव धर्मकथा

---

१. **एनमेव च** ख। २. **सूत्रसंस्पर्शकेन** ख घ ङ। ३. **अतीया** झ ञ ठ। ४. **संपति** ख ञ। ५. **अणागए** क-खपुस्तके विना, **अणागते** ख। ६. **वइंसु** ठ। ७. **वयिहिंति** ञ, **वइहिंति** ठ। ८. **वि** क, **व** छ। ९. **वदिंति** ख, **वयंति** छ ज झ ञ, **वदंति** ठ। १०. ०**निकाया** छ ज झ, ०**निकाये** ञ। ११. **हणइ णो वि याहणावेज्जा** ठ। १२. **अणुमण्णिज्जा** ख ठ। १३. ०**त्ती** ॥ **चतुर्थप्रथमोद्देशकनिर्युक्तिः** ॥ झ, ०**त्ती** ॥ ऽ (अ)० ४ उ० १॥ ठ ॥ १४. **जिणवर** गपुस्तकं विना। १५. ०**निकाए** च। १६. **तानुपदिश्य** ख। १७. **द्रव्यतोऽप्यनिषण्ण-निषण्णेषु** ख। १८. **चिलातिपुत्रादि०** ख।

युक्तिमती, अनुपस्थितेषु तु कं गुणं पुष्णाति ? अनुपस्थितेष्वपी**न्द्रनागा**दिषु विचित्रत्वात् कर्मपरिणतेः क्षयोपशमा[1]पादनाद् गुणवत्येवेति यत्किञ्चिदेतत् । प्राणिन [2]आत्मानं वा दण्डयतीति दण्डः, स च मनो-वाक्-कायलक्षणः, उपरतो दण्डो येषां ते तथा, तद्विपर्ययेणानुपरतदण्डाः, तेषूभयरूपेष्वपि, तत्रोपरतदण्डेषु तत्स्थैर्यगुणान्तराधानार्थं देशना, इतरेषु तूपरतदण्डत्वार्थमिति । उपधीयते सङ्गृह्यत इत्युपधिः, द्रव्यतो हिरण्यादिः, भावतो माया, सह उपधिना वर्तन्त इति **सोपधिकाः**, तद्विपर्ययेणानुपधिकाः, तेष्विति । संयोगः सम्बन्धः [3]पुत्र-कलत्र-मित्रादिजनितः तत्र रताः **संयोगरताः**, तद्विपर्ययेणैकत्वभावना[4]भाविता असंयोगरताः, तेष्विति ।

**[ सू०१३३ ] तच्चं चेतं तहा चेतं, अस्सिं चेतं पवुच्चति । तं आइत्तु ण णिहे, ण णिक्खिवे, जाणित्तु धम्मं जहा तहा ।**

**दिट्ठेहिं णिव्वेयं गच्छेज्जा । णो लोगस्सेसणं चरे ।**
**जस्स णत्थि इमा णाती अण्णा तस्स कतो सिया ।**
**दिट्ठं सुतं मयं विण्णायं जमेयं परिकहिज्जति ।**
**समेमाणा पलेमाणा पुणो पुणो जातिं पकप्पेंती ।**

**अहो य रातो य जतमाणे धीरे सया आगतपण्णाणे, पमत्ते बहिया पास । अप्पमत्ते सया परक्कमेज्जासि त्ति बेमि ।**

॥ सम्मत्तस्स पढमो उद्देसओ सम्मत्तो ॥

---

१. ०मापादानाद् क ग घ । २. आत्मानं दण्डयतीति वा दण्डः ख । ३. पुत्र-कलत्रादि० क, पुत्र-मित्र-कलत्रादि० ख । ४. ०भावित्वाद् असंयोग० च ।

तदेवमुभयरूपेष्वपि यद् भगवता[1] धर्मदेशनाऽकारि **तत्** तथ्यं सत्य**मेत**-दिति । **च**शब्दः नियमार्थः, तथ्यमेवैतद् भगवद्वचनम् । [2]यथाप्ररूपित-वस्तुसद्भावात् तथ्यता वचसो भवतीति अतो वाच्यमपि तथैवेति दर्शयति—**तथा चैत**द्वस्तु यथा भगवान् जगाद, यथा—सर्वे प्राणा न हन्तव्या इत्यादि । एवं सम्यग्दर्शनश्रद्धानं विधेयम् । एतच्च [3]**अस्मिन्नेव** मौनीन्द्रप्रवचने सम्यग्मोक्ष-मार्गविधायिनि समस्तदम्भ[4]प्रपञ्चोपरते प्रकर्षेणोच्यते **प्रोच्यत** इति, न तु यथा अन्यत्र 'न [5]हिंस्यात् सर्वभूतानि' इत्यभिधायान्यत्र वाक्ये यज्ञपशु[6]वधाभ्यनुज्ञानात् पूर्वोत्तरबाधेति ।

तदेवं सम्यक्त्वस्वरूपमभिधाय तदवाप्तौ यद् विधेयं तद् [7]दर्शयति—**तं** [8]**आइत्तु न** [9]**निहे** । तत् तत्त्वार्थ[10]श्रद्धानलक्षणं सम्यग्दर्शनम् आदाय गृहीत्वा [11]तत्कार्याकरणतः **न निहे** त्ति न गोपयेत् । तथाविधसंसर्गादि[12]निमित्तो-त्थापितमिथ्यात्वोऽपि जीवसामर्थ्यगुणाद् न त्यजेदपि, यथा वा **शैव-शाक्या**दीनां गृहीत्वा व्रतानि पुनरपि व्रतेश्वरयागादिविधिना गुरुसमीपे निक्षिप्योत्प्रव्रजनम् एवं गुर्वादेः सकाशादवाप्य सम्यग्दर्शनं न निक्षिपेत् न त्यजेत्, किं कृत्वा ? **यथा तथा**वस्थितं **धर्मं ज्ञात्वा** [13]श्रुतधर्म-चारित्रात्मकमवगम्य, वस्तूनां वा धर्मं स्वभावमवबुध्येति । तदवगमे तु किं चापरं कुर्यात् ? इत्याह—

[14]**दिट्ठेही**त्यादि । दृष्टैरिष्टा-ऽनिष्टरूपैर्निर्वेदं गच्छेत् विरागं कुर्यादित्यर्थः, तथाहि—शब्दैः श्रुतैः रसैरास्वादितैर्गन्धैराघ्रातैः स्पर्शैः स्पृष्टैः सद्भिरेवं भावयेद् यथा—शुभेतरता परिणामवशाद् भवतीत्यतः कस्तेषु रागो द्वेषो वा ? इति ।

किञ्च—**नो लोयस्स** इत्यादि । **लोकस्य** प्राणिगणस्य **एषणा** अन्वेषणा इष्टेषु शब्दादिषु प्रवृत्तिः, अनिष्टेषु [15]तु हेयबुद्धिः, तां **न** [16]**चरेत्** नाचरेन्न विदध्यात् ।

---

१. ०ता देशना० क च । २. यथास्थितवस्तु० क । ३. तस्मिन्नेव मौनीन्द्रे प्रवचने ख । ४. ०प्रबन्धोपरते घ ङ च । ५. हिंस्याद्भूतानि ख । ६. ०वधानुज्ञानात् ङ । ७. दर्शयितुमाह ख ग घ ङ । ८. आइत्तु इत्यादि । तत् ख । ९. निहे इत्यादि । तत् घ ङ । १०. ०श्रद्धानं सम्य० ख । ११. तत् कारणतः ख । १२. ०निमित्तोपस्थापित० ख । १३. श्रुतधर्मं चारित्रा० ङ च । १४. दिट्ठेहिं इत्यादि घ, दिट्ठेहि इत्यादि ङ । १५. च्च च । १६. चरेन्न विदध्यात् ग घ च ।

यस्य चैषा लोकैषणा नास्ति तस्यान्याप्यशस्ता[1] मतिर्नास्तीति दर्शयति—

**जस्स नत्थि** इत्यादि । यस्य मुमुक्षोः इमा ज्ञातिः लोकैषणाबुद्धिः नास्ति[2] इति न विद्यते तस्यान्या सावद्यारम्भप्रवृत्तिः कुतः स्यात् ? इदमुक्तं भवति—भोगेच्छारूपां लोकैषणां परिजिहीर्षोर्नैव सावद्यानुष्ठानप्रवृत्तिरुपजायते, तदर्थत्वात् तस्या इति । यदि वा इमा[3] अनन्तरोक्तत्वात् प्रत्यक्षा सम्यक्त्वज्ञातिः, प्राणिनो न हन्तव्या इति वा ज्ञातिः[4] यस्य न विद्यते तस्यान्या विवेकिनी बुद्धिः कुमार्गसावद्यानुष्ठानपरिहारद्वारेण[5] कुतः स्यात् ? शिष्यमतिस्थैर्यार्थमाह—

**दिट्ठमि**[6]**त्यादि** । यदेतन्मया परिकथ्यते तत् सर्वज्ञैः केवलज्ञानावलोकेन[7] **दृष्टम्**, तत् शुश्रूषुभिः **श्रुतम्**, लघुकर्मणां भव्यानां **मतम्**, ज्ञानावरणीयक्षयोपशमाद् विशेषेण ज्ञातं **विज्ञातम्** । अतो भवताऽपि सम्यक्त्वादिके मत्कथिते यत्नवता भवितव्यमिति[8] । ये पुनर्यथोक्तकारिणो न स्युः ते कथम्भूता[9] भवेयुः ? इत्याह—

**समेमाणा** इत्यादि । तस्मिन्नेव मनुष्यादिजन्मनि शाम्यन्तः[10] गार्ध्येना[11]त्यर्थमासेवां कुर्वन्तः, तथा **प्रलीयमानाः** मनोज्ञेन्द्रियार्थेषु पौनःपुण्येनैकेन्द्रिय[12]द्वीन्द्रियादिकां **जातिं प्रकल्पयन्ति** संसाराविच्छित्तिं विदधतीत्यर्थः ।

यद्येवमविदितवेद्याः साम्प्रतेक्षिणो यथाजन्मकृतरतय इन्द्रियार्थेषु प्रलीनाः[13] पौनःपुण्येन[14] जन्मादिकृतसन्धाना जन्तवस्ततः किं कर्तव्यम् ? इत्याह—

**अहो य** इत्यादि । अहश्च रात्रिं च **यतमान** एव यत्नवानेव मोक्षाध्वनि **धीरः**[15] परीषहोपसर्गाक्षोभ्यः[16] **सदा** सर्वकालम् **आगतं** स्वीकृतं **प्रज्ञानं** सदसद्विवेको यस्य स तथा । **प्रमत्तान्** संयतान् परतीर्थिकान् वा धर्माद् **बहि-**

---

१. ०न्याप्यप्रशस्ता क-खपुस्तके विना । २. नास्ति न विद्यते ख ग च । ३. इयं ग । ४. ज्ञातिः इति पाठः खप्रतेरेव । ५. ०परिहारेण घ । ६. दिट्ठं इत्यादि ख च । ७. ०ज्ञानालोकेन क । ८. भाव्यमिति ख च । ९. कथं भवेयुः क, किम्भूता भवेयुः ख च । १०. ०न्तः निशाम्यन्तः गा० ख घ ङ। ११. गार्ध्यं तात्पर्यमासेवां ग-चप्रती विना । १२. ०नैकेन्द्रियादिकां ग । १३. प्रलीयमानाः ग च । १४. ०न कृतजन्मादिसन्धाना ख च । १५. वीरः ग । १६. परीषहाक्षोभ्यः ख ।

र्व्यवस्थितान् **पश्य** । तांश्च तथाभूतान् दृष्ट्वा किं कुर्यात् ? इत्याह—

[1]**अप्पमत्ते** इत्यादि । **अप्रमत्तः** सन् निद्रा-विकथादिप्रमादरहितोऽक्षिनिमेषोन्मेषादावपि **सदोपयुक्तः** **पराक्रमेथाः** कर्मरिपून् मोक्षाध्वनि वा । **इतिः** [2]अधिकारसमाप्तौ । **ब्रवीमि** इति पूर्ववत् ।

**[3]सम्यक्त्वा[4]ध्ययनस्य प्रथमोद्देशकटीका परिसमाप्तेति ॥ छ ॥ छ ॥**

• • •

---

१. **अप्पमत्तेत्यादि** भ । २. **अधिकारपरिसमाप्तौ** ख ङ च । ३. **इति सम्यक्त्वाध्ययने प्रथमोद्देशकः परिसमाप्तः** ॥ छ ॥ ख-चप्रती ऋते । ४. **०ध्ययनप्रथमो०** च ।

**[ सू०१३४ ] जे आसवा ते परिस्सवा, जे परिस्सवा ते आसवा ।**

**जे अणासवा ते अपरिस्सवा, जे अपरिस्सवा ते अणासवा ।**

**एते य पए संबुज्झमाणे लोगं च आणाए अभिसमेच्चा पुढो पवेदितं आघाति णाणी इह माणवाणं संसारपडिवण्णाणं संबुज्झमाणाणं विण्णाणपत्ताणं ।**

**अट्टा वि संता अदुवा पमत्ता ।**

**अहासच्चमिणं ति बेमि ।**

**णाऽणागमो मच्चुमुहस्स अत्थि ।**

**इच्छापणीता वंकाणिकेया कालग्गहीता णिचये णिविट्ठा पुढो पुढो जाइं पकप्पेंति ।**

उक्तः प्रथमोद्देशकः । साम्प्रतं[1] द्वितीयव्याख्या प्रतन्यते । अस्य चायमभिसम्बन्धः—इह[2] अनन्तरोद्देशके सम्यग्वादः प्रतिपादितः । स च प्रत्यनीकमिथ्यावादव्युदासेनात्मलाभं[3] लभते । व्युदासश्च न परिज्ञानमन्तरेण[4], परिज्ञानं च न विचारमृते, अतो मिथ्यावादभूततीर्थिकमतविचारणायेदमुपक्रम्यते[5] । अनेन सम्बन्धेनायातस्यास्योद्देशकस्येदमादिसूत्रम्—**जे आसवा** इत्यादि ।

यदि वेह सम्यक्त्वमधिकृतम्, तच्च सप्तपदार्थश्रद्धानात्मकम् । तत्र मुमुक्षुणाऽवगतशस्त्रपरिज्ञा-जीवा-ऽजीवपदार्थेन संसार-मोक्षकारणे निर्णेतव्ये । तत्र संसारकारणमाश्रवः[6], तद्ग्रहणाच्च बन्ध-ग्रहणम् । मोक्षकारणं[7] तु निर्जरा

---

१. अधुना च, खप्रतौ पाठभङ्गः । २. इह इति क घ ङप्रतिषु नास्ति । ३. प्रत्यनीकान्यथावाद० क । ४. परिज्ञानमृते, परिज्ञानं च न विचारमन्तरेण, अतो ग्घ च । ५. ०विवारणायेद० ग । ६. ०मास्रवः घ ङ । ७. ०णं च निर्जरा तत्कारणं च संवर० ग ।

तद्ग्रहणाच्च संवरस्तत्कार्यभूतश्च मोक्षः सूचितो भवतीति । अत [1]आश्रव-निर्जरे संसार-मोक्षकारणभूते सम्यक्त्वविचारायाते दर्शयितुमाह—**जे आसवा** इत्यादि । **ये** इति सामान्यनिर्देशः । [2]आश्रवत्यष्टप्रकारं कर्म यैरारम्भैस्ते **[3]आश्रवाः** । [4]परिः समन्तात् [5]श्रवति गलति यैरनुष्ठानविशेषैस्ते **[6]परिश्रवाः** । य एवाश्रवाः कर्मबन्धस्थानानि त एव [7]परिश्रवाः कर्मनिर्जरा-स्पदानि । इदमुक्तं भवति—यानि इतर[8]जनाचरितानि स्रगङ्गनादीनि सुखकारणतया तानि कर्मबन्धहेतुत्वाद् [9]आश्रवाः, पुनस्तान्येव तत्त्वविदां विषयसुखपराङ्मुखानां निःसारतया संसारसरणिदेश्यानीति कृत्वा वैराग्यजनकानि, अतः [10]परिश्रवाः निर्जरास्थानानि । सर्ववस्तूनाम-नैकान्तिकतां [11]दर्शयितुं तदेव विपर्ययेणाह—

**जे [12]परिस्स[13]वा** इत्यादि । **य एव [14]परिश्रवाः** निर्जरास्थानानि अर्हत्-साधु-तपश्चरण-दशविधचक्रवालसामाचार्यनुष्ठानादीनि तान्येव [15]कर्मोदयावष्टब्ध-शुभाध्यवसायस्य दुर्गतिमार्गप्रवृत्तसार्थवाहस्य जन्तो[16]र्महाशातनावतः सातर्द्धि-रसगारवप्रवणस्य [17]आश्रवा भवन्ति पापोपादानकारणानि जायन्ते । इदमुक्तं भवति—यावन्ति कर्मनिर्जरार्थं संयमस्थानानि तद्बन्धनायासंयमस्थानान्यपि तावन्त्येव, उक्तं च—

**यथाप्रकारा यावन्तः, संसारावेशहेतवः ।**
**तावन्तस्तद्विपर्यासाद्, निर्वाणसुखहेतवः ॥** [ ]

तथाहि—राग-द्वेषवासितान्तःकरणस्य विषयसुखोन्मुखस्य दुष्टाशयत्वात् सर्वं संसाराय, पिचुमन्दरसवासितास्यस्य दुग्ध-शर्करादिकटुकत्वापत्तिवदिति, सम्यग्दृष्टेस्तु [18]विदितसंसारोदन्वतः न्यक्कृतविषयाभिलापस्य सर्वमशुचि दुःख-

---

१. **आस्रव०** घ ङ । २. **आस्रवत्य०** ग घ ङ । ३. **आस्रवाः** ग घ ङ । ४. **परि** च । ५. **स्रवति** घ ङ । ६. **परिस्रवाः । य एवास्रवाः** ग घ ङ । ७. **परिस्रवाः** ग घ ङ । ८. **०जनचरितानि** ख । ९. **आस्रवाः** ग घ ङ । १०. **परिस्रवाः** ग घ ङ । ११. **दर्शयितुं विपर्य०** ख, **दर्शयितुमेतदेव विपर्य०** ग घ ङ च । १२. **परिसवा** च । १३. **०वा ते इत्यादि** ख । १४. **परिस्रवाः** ग घ ङ । १५. **कर्मोदयादवष्टब्ध०** ख ग च । १६. **०र्महाशातनातः** ख ग च । १७. **आस्रवा** घ ङ । १८. **विज्ञातसंसारोदन्वतस्त्यक्तविषया०** च ।

कारणमिति च भावयतः सञ्जातसंवेग[1]स्येतरजनसंसारकारणमपि मोक्षायेति भावार्थः । पुनरेतदेव[2] गतप्रत्यागतसूत्रं सप्रतिषेधमाह—

**जे अणासवा** इत्यादि । प्रसज्यप्रतिषेधस्य[3] क्रियाप्रतिषेधपर्यवसानतया परिश्रवा[4] इत्यनेन सह सम्बन्धाभावात् पर्युदासोऽयम् । आश्रवेभ्योऽन्ये[5] अनाश्रवाः[6] व्रतविशेषाः तेऽपि कर्मोदयादशुभाध्यवसायिनो[7]ऽपरिश्रवाः[8] कर्मणः, **कोङ्कणार्य**[9]-प्रभृतीनामिवेति । तथा अपरिश्रवाः[10] पापोपादानकारणानि केनचिदुपाधिना प्रवचनोपकारादिना[11] क्रियमाणाः **कणवीरलताभ्रामकक्षुल्लक**[12]स्येव अनाश्रवाः[13] कर्मबन्धनानि न भवन्ति[14] ।

यदि वाऽऽश्रवन्ती**त्याश्रवाः**[15] पचाद्यच् । एवं परिश्रवन्तीति[16] **परिश्रवाः** । अत्र चतुर्भङ्गिका—तत्र मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगैर्य एव कर्मणां आश्रवाः[17] बन्धकाः त एवापरेषां[18] परिश्रवाः[19] निर्जरकाः, एते च प्रथमभङ्गपतिताः[20] सर्वेऽपि संसारिणश्चतुर्गतिकाः, सर्वेषां प्रतिक्षणमुभयसद्भावात् । तथा ये आश्रवास्तेऽपरिश्रवा[21] इति शून्योऽयं द्वितीयभङ्गकः, बन्धस्य शाटाविनाभावित्वात् । एवं येऽनाश्रवास्ते[22] परिश्रवाः, एते चायोगिकेवलिनस्तृतीयभङ्गपतिताः । चतुर्थ-भङ्गपतितास्तु सिद्धाः, तेषामनाश्रवत्वादपरिश्रवत्वाच्चेति[23] । अत्र चाद्यन्तभङ्गकौ सूत्रोपात्तौ, तदुपादाने च मध्योपादानस्यावश्यम्भावित्वाद् मध्यभङ्गकद्वयग्रहणं द्रष्टव्यमिति । यद्येवं ततः किम् ? इत्याह—

---

१. **०संवेगस्य तस्येतर०** ख । २. **पुनरेव गत०** ख । ३. **प्रसह्य प्रतिषे०** क ग च । ४. **परिस्रवा** ग घ ङ । ५. **आस्रवेभ्यो०** ग घ ङ । ६. **अनास्रवाः** ग घ ङ । ७. **कर्मोदयाशुभा०** क । ८. **०ऽपरिस्रवाः** ग घ ङ । ९. "**कोङ्कणार्य** इति यथा वृद्धः प्रव्रजितश्चिन्तयति वर्षाकालसमये दुती" जै०वि०प० । १०. **अपरिस्रवाः** ग घ ङ । ११. **प्रवचनोक्तप्रकरादिना** घ ङ । १२. **करवीर०** ख ग, १३. **अनास्रवाः** घ ङ । १४. **कर्मबन्धाय न भवन्ति** ख-चपुस्तके विना । १५. **वाऽऽस्रवन्तीत्यास्रवाः** ग घ ङ । १६. **परिस्रवन्तीति परिस्रवाः** ग घ ङ । १७. **आस्रवाः** घ ङ । १८. "**अपरेषाम्** इति पूर्वबद्धकर्मणाम्" जै०वि०प० । १९. **परिस्रवाः** ग घ ङ । २०. **०ताः संसारिण०** ख । २१. **आस्रवास्तेऽपरिस्रवा** ग घ ङ । २२. **येऽनास्रवास्ते परिस्रवाः** ग घ ङ । २३. **०मनास्रवत्वादपरिस्रवत्वाच्चेति** ग घ ङ ।

[१]**एते पए** इत्यादि । एतानि अनन्तरोक्तानि पद्यते गम्यते येभ्योऽर्थस्तानि पदानि, तद्यथा—ये आश्रवा इत्यादीनि । [२]परस्य चार्थावगत्यर्थं शब्दप्रयोगाद् एतत्पदवाच्या[३]नर्थांश्च **सम्यग्** अविपर्यासेन **बुध्यमानः** । तथा **लोकं** जन्तुगण[४]माश्रवद्वारायातेन कर्मणा बध्यमानं तपश्चरणादिना च मुच्यमानम् **आज्ञया** तीर्थकरप्रणीतागमानुसारेण **अभिसमेत्य** आभिमुख्येन सम्यक् परिच्छिद्य । चशब्दः भिन्नक्रमः । **पृथक् प्रवेदितं** चाभिसमेत्य पृथ[५]गाश्रवोपादानं निर्जरोपादानं चेति । एतच्च ज्ञात्वा को नाम धर्मचरणं प्रति नोद्यच्छेदिति ? कथं प्रवेदितम् ? इति [६]चेत् तदुच्यते—

[७]आश्रवस्तावत्—ज्ञानप्रत्यनीकतया ज्ञाननिह्नवेन ज्ञानान्तरायेण ज्ञानप्रद्वेषेण [८]ज्ञानात्याशातनया ज्ञानविसंवादेन ज्ञानावरणीयं कर्म बध्यते । एवं दर्शन-प्रत्यनीकतया यावद् दर्शनविसंवादेन दर्शनावरणीयं कर्म बध्यते । तथा प्राणिना[९]मनुकम्पनतया भूता[१०]नुकम्पनत[११]या जीवानुकम्पनतया सत्त्वानु[१२]कम्पनतया बहूनां प्राणिनामदुःखोत्पादनतया अशोचनतया अजूरणतया [१३]अपीडनतया अपरितापनतया सातावेदनीयं कर्म बध्यते, एतद्विपर्ययाच्च असातावेदनीयमिति । तथा अनन्तानुबन्ध्युत्कटतया तीव्रदर्शनमोहनीयतया प्रबलचारित्रमोहनीयसद्भावाद् मोहनीयं कर्म बध्यते । महारम्भतया महापरिग्रहतया पञ्चेन्द्रियवधात् [१४]कुणपाहारेण नरकायुष्कं बध्यते, मायावितया अनृतवादेन कूटतुला-कूटमानव्यवहारात् तिर्यगायुर्बध्यते, प्रकृतिविनीततया सानुक्रोशतया [१५]अमात्सर्याद् [१६]मनुष्यायुष्कम्, सरागसंयमेन देशविरत्या बालतपसा अकामनिर्जरया देवायुष्कमिति । कायर्जुतया भावर्जुतया भाषर्जुतया [१७]अविसंवादनयोगेन शुभनाम बध्यते, विपर्ययाच्च विपर्यय

---

१. एए इत्यादि ख । २. **परस्यार्थावगत्यर्थं** क । ३. **०नर्थान् सम्यग्** क । ४. **०मास्रव०** ग घ । ५. **०गास्रवो०** ग घ ङ । ६. **चेद् उच्यते** ख । ७. **आस्रव०** ग घ ङ । ८. **ज्ञान्याशातनया** ख । ९. **०मनुकम्पनया** क च । १०. **०नुकम्पनया** च । ११. **०या सत्त्वानु-कम्पनतया जीवानुकम्पनत्वेन बहूनां** ख । १२. **०कम्पनत्वेन बहूनां** ग घ ङ च । १३. **अपिण्डनतया** ख । १४. **कुणपाहाराद्** ख, **कुणिमाहारेण** ग घ, **कुणपहारेण** ङ । १५. **अमात्सर्यतया मानुष्यायुष्कम्** ख । १६. **मानुषायुष्कम्** च । १७. **अविसंवादनायोगेन** ख ।

इति । जति-कु[1]ल-बल-रूप-तपः-श्रुत-लाभैश्वर्यमदाभावाद् उच्चैर्गोत्रम्, जात्यादिमदात् परपरिवादाच्च नीचैर्गोत्रम् । दान-लाभ-भोगोपभोग-वीर्यान्तराय-विधानाद् आन्तरायिकं कर्म बध्यते । एते ह्या[2]श्रवाः । साम्प्रतं प[3]रिश्रवाः प्रतिपाद्यन्ते—अनशनादि सबाह्याभ्यन्तरं तप इत्यादि । एव[4]माश्रवका निर्जरकाः सभेदा जन्तवो वाच्याः, सर्वेऽपि च जीवादयः पदार्था मोक्षावसाना वाच्याः । एतानि च पदानि सम्बुध्यमानैस्तीर्थकर-गणधरैर्लोकमभिसमेत्य [5]पृथक् पृथक् प्रवेदितम् ।

अन्योऽपि तदाज्ञानुसारी चतुर्दशपूर्वविदादिः [6]सत्त्वहिताय परेभ्य आवेदयतीत्येतद्दर्शयितुमाह—

[7]**आघा** इत्यादि । ज्ञानं सकलपदार्थाविर्भावकं विद्यते यस्यासौ **ज्ञानी** । स **आख्याति** आचष्टे । **इह** इति प्रवचने । केषां ? **मानवानाम्,** सर्वसंवर-चारित्रार्हत्वात् तेषाम् । अथवोपलक्षणं चैतद्देवादीनाम् । तत्रापि [8]केवल्यादि-व्युदासाय विशेषणमाह—

**संसार** इत्यादि । संसारं चतुर्गतिलक्षणं प्रतिपन्नाः **संसारप्रतिपन्नाः** । तत्रापि ये धर्मं भोत्स्यन्ते ग्रहीष्यन्ते च **मुनिसुव्रतस्वामिघोटकदृष्टान्तेन** तेषामेवाख्यातीत्येतद्दर्शयति—**सम्बुध्यमानानां** यथोपदिष्टं धर्मं सम्यगवबुध्य-मानानाम्। छद्मस्थेन त्वज्ञातबुध्यमानेतरविशेषेण यादृग्भूतानां कथयित[9]व्यं तान् सूत्रेणैव दर्शयति—**विज्ञानप्राप्तानां** हिता-ऽहितप्राप्ति-परिहाराध्यवसायो विज्ञानम्, तत् प्राप्ता **विज्ञानप्राप्ताः**, समस्तपर्याप्तिभिः पर्याप्ताः संज्ञिन इत्यर्थः । **नागार्जुनीयास्तु** पठन्ति—

**[10]आघाइ धम्मं खलु [11]से जीवाणं, [12]तंजहा—संसारपडिवन्नाणं**

---

१. ०कुल-रूप० ग घ । २. ह्यास्रवाः ग घ ङ । ३. परिस्रवाः घ । ४. ०माश्रवनिर्जरकाः ख्र घ ङ च. ०मास्रवकनिर्जरकाः ग । ५. पृथक् प्रवेदितम् ग ङ । ६. सर्वहिताय ख । ७. अघा इत्यादि ख ग. आघाइ इत्यादि च । ८. केवलादि० ख्र । ९. ०व्यं तत् सूत्रे० घ ङ । १०. अघाइ ख । ११. स ख । १२. तं जहा इति पाठः चूर्णौ न ।

**[१]मणुस्सभवत्थाणं [२]आरंभविणईणं [४]दुक्खुव्वेयसुहेसगाणं [५]धम्म-सवण[६]गवे-सया[७]णं सुस्सूसमाणाणं पडिपुच्छमाणाणं विन्नाणपत्ताणं ।**

एतच्च प्रायो गतार्थमेव, नवरम् **आरम्भविनयिनाम्** इति **आरम्भविनयः** आरम्भाभावः स विद्यते येषामिति मत्वर्थीयः, तेषामिति ।

यथा च ज्ञानी धर्ममाचष्टे तथा दर्शयति—**अट्टा वि** इत्यादि । [८]विज्ञानप्राप्ता धर्मं कथ्यमानं कुतश्चिन्निमित्ताद् आर्ता अपि सन्तः **चिलातपुत्रा**दय इव, **अथवा प्रमत्ताः** विषयाभिष्वङ्गादिना **शालिभद्रा**दय इव, तथाविधकर्मक्षयोपशमापत्तेर्यथा प्रतिपद्यन्ते तथाऽऽचष्टे । यदि वा **आर्ताः** दुःखिनः, **प्रमत्ताः** सुखिनः, तेऽपि प्रतिपद्यन्ते [१०]धर्मं किं पुनरपरे ? । अथवा आर्ताः राग-द्वेषोदयेन, प्रमत्ताः विषयैः, ते च तीर्थिका गृहस्था वा संसारकान्तारं विशन्तः कथं[११]भवन्तो विज्ञातज्ञेयानां [१२]करुणास्पदा न राग-द्वेष-विषयाभिलाषोन्मूलनाय न प्रभवन्ति । एतच्चान्यथा मा मंस्था [१३]इति दर्शयितुमाह—

[१४]**अहासच्च**मित्यादि । [१५]**इदं** यद् मया कथितं कथ्यमानं च तद् **यथासत्यं** [१६]यथातथ्यमित्यर्थः । **इत्येतदहं ब्रवीमि** यथा—दुर्लभमवाप्य सम्यक्त्वं चारित्र-परिणामं वा प्रमादो न कार्यः । स्यात्—किमालम्ब्य प्रमादो न कार्यः ? तदाह—

[१७]**नाणागमो** इत्यादि । न ह्यनागमो मृत्योर्मुखस्य कस्यचिदपि संसारो-दरवर्तिनोऽस्तीति, उक्तं च—

---

१. **मणुसभवत्थाणं** घ ङ । २. **०णं आरंभपत्थाणं आरंभविणईणं** ग । ३. **आरंभट्ठियाणं** चूर्णौ । ४. **दुक्खुवेय०** क, **दुक्खुच्चेय०** ख, **दुक्खखय०** ग च । ५. **धम्मस्सवण०** ग च । ६. **०गवेसणयाणं** क । ७. **०णं निक्खित्तसत्थाणं सुस्सूस०** चूर्णौ । ८. **विज्ञानं प्राप्ता** च । ९. **चिलातीपुत्रादय** ग, **चिलातिपुत्रादय** घ ङ । १०. **धर्मं** इति क-गप्रत्योर्नास्ति । ११. **भवन्तां विज्ञात०** क ख विना । १२. **करुणास्पदानां** ग च । १३. **इत्यादि दर्शयितु०** घ ङ । १४. **अहासच्चं इत्यादि** ख च, । १५. **इदं मया यत् कथितं** ख । १६. **याथातथ्य०** घ । १७. **नाणागमे** ख च ।

वदत यदीह कश्चिदनुसन्ततसुखपरिभोगलालितः,
[१]प्रयतनशतपरोऽपि विगतव्यथमायुरवाप्तवान् नरः ।
न खलु नरः सुरौघसिद्धासुरकिन्नरनायकोऽपि यः,
सोऽपि कृतान्तदन्तकुलिशाक्रमणक्रशितो न नश्यति ॥ [ ]

तथोपायोऽपि मृत्युमुखप्रतिषेधस्य न कश्चिदस्तीति, उक्तं च—

नश्यति नौति याति वितनोति करोति रसायनक्रियाम्,
चरति गुरुव्रतानि विवराण्यपि विशति विशेषकातरः ।
तपति तपांसि खादति मितानि करोति च मन्त्रसाधनम्,
तदपि कृतान्तदन्तयन्त्रक्रकचक्रमणैर्विदार्यते ॥ [ ]

ये पुनर्विषयकषायाभिष्वङ्गात् प्रमत्ता धर्मं नावबुध्यन्ते ते किम्भूता भवन्ति ? इत्याह—**इच्छा** इत्यादि । इन्द्रिय-[२]मनोविषयानुकूला प्रवृत्तिरिहेच्छा । तया विषयाभिमुखमभिकर्मबन्धं संसाराभिमुखं वा प्रकर्षेण नीता **इच्छाप्रणीताः** । [३]ये चैवम्भूतास्ते **वंकानिकेताः** वङ्कस्य असंयमस्य [४]आ मर्यादया संयमावधिभूतया [५]निकेतभूताः आश्रया वङ्कानिकेताः । वङ्को वा निकेतो येषां ते [६]वङ्कनिकेताः, पूर्वपदस्य दीर्घत्वम् । ये चैवम्भूतास्ते **कालगृहीताः** कालेन मृत्युना गृहीताः कालगृहीताः, पौनःपुण्यमरणभाज इत्यर्थः । धर्मचरणाय वा गृहीतः अभिसन्धितः कालो यैस्ते कालगृहीताः, आहिताग्निदर्शनाद् आर्षत्वाद्वा निष्ठान्तस्य परनिपातः, तथाहि—पाश्चात्त्ये वयसि परुत्परारि वा अपत्यपरिणयनोत्तरकालं वा धर्मं करिष्याम इत्येवं गृहीतकालाः । ये चैवम्भूतास्ते निचये **निविष्टाः** निचये कर्मनिचये तदुपादाने वा सावद्यारम्भनिचये निविष्टाः अध्युपपन्नाः ।

ये चेच्छाप्रणीता वङ्कानिकेताः कालगृहीता निचये निविष्टास्ते तद्धर्माणः किमपरं कुर्वन्ति ? इति दर्शयितुमाह—**पुढो पुढो** इत्यादि[८] । **पृथक् पृथक्** एकेन्द्रिय-[७]द्वीन्द्रियादिकां **जातिमनेकशः प्रकल्पयन्ति** प्रकुर्वन्ति । पाठान्तरं वा—

---

१. **प्रयत्नशत०** ग च । २. **०मनोनुकूला** ख । ३. **ये एवम्भूता०** ख । ४. **आ** इति क-ग-चप्रतिपु नास्ति । ५. **निकेताः आश्रया** क । ६. **वङ्कानिकेताः** ख घ च । ७. **०द्वीन्द्रिय-त्रीन्द्रियादिकां** ख । ८. **०न्ति । पठ्यते च-एत्थ** ख च ।

**एत्थ मोहे पुणो पुणो**, अत्र अस्मिन् इच्छाप्रणीतादिके हृषीकानुकूले **मोहे**,[1] कर्मरूपे वा मोहे[2] निमग्नाः **पुनः पुन**स्तत् कुर्वन्ति[3] येन तदप्रच्युतिः स्यात् ।

तदप्रच्युतौ च किं स्यात् ? इत्याह—

**[ सू०१३५ ] इहमेगेसिं तत्थ तत्थ संथवो भवति । अहोववातिए फासे पडिसंवेदयंति । चिट्ठं कूरेहिं कम्मेहिं चिट्ठं परिविचिट्ठति । अचिट्ठं कूरेहिं कम्मेहिं णो चिट्ठं परिविचिट्ठति ।**

**एगे वदंति अदुवा वि णाणी, णाणी वदंति अदुवा वि एगे ।**

[4]**इहमेगेसि**मित्यादि । **इह** अस्मिंश्चतुर्दशरज्ज्वात्मके लोके **एकेषां** मिथ्यात्व-ऽविरति-प्रमाद-कषायवतां **तत्र तत्र** नरक[5]-तिर्यग्गत्यादिषु[6] यातनास्थानकेषु[7] **संस्तवः** परिचयो भूयो भूयो गमनाद् **भवति** ।

ततः किम् ? इत्याह—[8]**अहोववाइए** इत्यादि । त एवमिच्छया प्रणीतत्वाद् इन्द्रियवशगा-स्तद्वशत्वात्[9] तदनुकूलमाचरन्तो नरकादियातनास्थानजातसंस्तवाः तीर्थिका अप्युद्देशिकादि[10] निर्दोषमाचक्षाणाः **अधऔपपातिकान्** नरकादिभवान् **स्पर्शान्** दुःखानुभवान्[11] **प्रतिसंवेदयन्ति** अनुभवन्ति, तथाहि-**लोकायतिका** ब्रुवते—

**पिब खाद च[12] चारुलोचने !, यदतीतं वरगात्रि ! तन्न ते ।**
**न हि भीरु ! गतं निवर्तते, समुदयमात्रमिदं कलेवरम्[13] ॥ [ ]**

---

१. "मोहे अत रुव्यादिके" जे०वि०प० । २. मोहे इति खपुस्तके नास्ति । ३. कुर्वन्ति च । ४. इहमेगेसिं इत्यादि ख च । ५. नारक० ख । ६. ०ग्गत्यादियातना० ग । ७. ०स्थानेषु ख च । ८. अहोववाइय इत्यादि क ग, अहोववाइएत्यादि ख च । ९. ०स्तद्वशित्वात् कप्रतिमृते । १०. अप्यौद्देशिकादि च । ११. दुष्टान् भावात् (न्) प्रति० क । १२. च साधु शोभने ! यदतीतं ग चूर्णौ च । १३. कडेवरम् च ।

**वैशेषिका** अपि सावद्ययोगारम्भिणः, तथाहि ते भाषन्ते—

**अभिषेचनोपवास-ब्रह्मचर्य[1]-गुरुकुलवास-वानप्रस्थ-यज्ञ[2]-दान-मोक्षण[3]-दिग्-नक्षत्र-मन्त्र-काल[4]-नियमाः** । [ ] इत्यादि ।

अन्येऽपि सावद्ययोगानुष्ठायिनो[5]ऽनया दिशा वाच्याः । स्यात्—किं सर्वोऽपीच्छाप्रणीतादिर्यावत् तत्र [6]तत्र कृतसंस्तवोऽधऔपपातिकान् स्पर्शान् प्रतिसंवेदयति आहोस्वित् कश्चिदेव तद्योग्यकर्मकार्येवानुभवति ? न सर्व इति दर्शयति—

**चिट्ठ**मित्यादि । **चिट्ठं** भृशमत्यर्थं **क्रूरैः** वध-ब[7]न्धादिभिः **कर्मभिः** क्रियाभिः **चिट्ठ**मिति भृशमत्यर्थमेव विरूपां दशां वैतरणीतरणाऽसि-पत्र-[9]वनपत्रपाताभिघात-शाल्मलीवृक्षालिङ्गनादिजनितामनुभवं[10]स्तमतमादिस्थानेषु [11]परिवितिष्ठति । यस्तु नात्यर्थं हिंसादिभिः कर्मभिर्वर्तते सोऽत्यन्त-वेदनानिचितेष्वपि नरकेषु नोत्पद्यते ।

स्यात्—क एवं [12]वदन्ति ? [13]इत्याह—**एगे वयंती**त्यादि । **एके** चतुर्दश-पूर्वविदादयः **वदन्ति** ब्रुवते, **अथवापि ज्ञानी** वदति ज्ञानं सकलपदार्था-विर्भावकम् अस्यास्तीति ज्ञानी, स [14]चैतद् ब्रवीति । यद् दिव्यज्ञानी केवली भाषते श्रुतकेवलिनोऽपि तदेव भाषन्ते, यच्च [15]श्रुतके[16]वलिनो भाषन्ते निरावरण-ज्ञानिनोऽपि तदेव वदन्तीत्येतद् गतप्रत्यागतसूत्रेण दर्शयति—

**नाणी** इत्यादि । **ज्ञानिनः** केवलिनो यद् **वदन्ति अथवाऽपि एके** श्रुतकेवलिनो यद् वदन्ति तद् यथार्थभाषित्वादेकमेव, एकेषां सर्वार्थप्रत्यक्षत्वाद् अपरेषां तदुपदेशप्रवृत्तेरिति, वक्ष्यमाणेऽप्येकवाक्यतेति । तदाह—

---

१. ०**चर्य-वानप्रस्थ**० च, खप्रतौ पाठपतनमत्र । २. ०**यज्ञादान**० ग घ च । ३. ०**मोक्षणादिनक्षत्र**० क, **मोक्षणा-दिग्-नक्षत्र**० ग । ४. ०**कालविधिज्ञाः इत्यादि** ख । ५. *०ऽनयैव दिशा ख । ६. तत्र तत्कृतसंस्तवो० च । ७. ०बन्धनादिभिः ग । ८. ०मेवाधिरूपां* दशां ख । ९. ०**वनपत्राभिघात**० ख । १०. ०**स्तमस्तमादि**० ग घ । ११. **परितिष्ठति** ख ग । १२. **वदति** क-चप्रती विना । १३. **इत्यत आह** च । १४. **चैवं ब्रवीति** ग । १५. **श्रुतकेवली भाषते ज्ञानिनोऽपि तदेव** ख । १६. ०**केवलिनोऽपि भाषन्ते** च ।

**[ सू०१३६ ] आवंती केआवंती लोयंसि समणा य माहणा य पुढो विवादं वदंति से दिट्ठं च णे, सुयं च णे, मयं च णे, विण्णायं च णे, उड्ढं अहं तिरियं दिसासु सव्वतो सुपडिलेहितं च णे–'सव्वे पाणा सव्वे जीवा सव्वे भूता सव्वे सत्ता हंतव्वा, अज्जावेतव्वा, परिघेत्तव्वा, परितावेतव्वा, उद्दवेतव्वा । एत्थ वि जाणह णत्थेत्थ दोसो' अणारियवयणमेयं ।**

**आवंती**त्यादि । **आवंती**ति यावन्तः । [१]**केआवंती**ति केचन । [२]**लोके** मनुष्यलोके । **श्रमणाः** पाषण्डिकाः । **ब्राह्मणाः** द्विजातयः । **पृथक् पृथग्** विरुद्धो वादो **विवादस्तं वदन्ति** । एतदुक्तं भवति–यावन्तः केचन [३]परलोकं ज्ञीप्सवस्ते आत्मीयदर्शनानुरागितया पाराक्यं [४]दर्शनमपवदन्तो विवदन्ते, तथाहि– **भागवता** ब्रुवते–"पञ्चविंशतितत्त्वपरिज्ञानाद् मोक्षः, सर्वव्याप्यात्मा निष्क्रियो निर्गुणश्चैतन्यलक्षणः, निर्विशेषं [५]सामान्यं तत्त्वम्" इति । **वैशेषिका**स्तु भाषन्ते– "द्रव्यादिषट्पदार्थपरिज्ञानाद् मोक्षः, [६]समवायिज्ञानगुणेनेच्छाप्रयत्नद्वेषादिभिश्च *गुणैर्गुणवानात्मा, परस्परनिरपेक्षं सामान्य-विशेषात्मकं तत्त्वम्*" इति । **शाक्या**स्तु वदन्ति यथा–"[७]परलोकपथानु[८]याय्यात्मैव न विद्यते, *निःसामान्यं वस्तु क्षणिकं* च" इति । **मीमांसका**स्तु मोक्ष-सर्वज्ञाभावेन व्यवस्थिता इति । तथा **केषाञ्चित्** पृथिव्यादय एकेन्द्रिया जीवा न भवन्ति । **अपरे** वनस्पतीनामप्य-चेतनतामाहुः, तथा द्वीन्द्रियादीनामपि कृम्यादीनां न जन्तुस्वभावं प्रतिपद्यन्ते, [९]तद्भावे वा न तद्वधे बन्धोऽल्पबन्धता [१०]वेति, तथा हिंसायामपि भिन्नवाक्यता, तदुक्तम्–

---

१. **केआवंति त्ति केचन** च । २. **लोके** इति खपुस्तके न । ३. **परलोकज्ञीप्सव०** ङ। ४. **दर्शनमपवदन्ते तथाहि** ख । ५. **सामान्यतत्त्वम्** ख । ६. **समवायज्ञान०** क । ७. **परलोकानुया०** क-खपुस्तके ऋते । ८. **०याय्यात्मा न विद्यते** ख च । ९. **सद्भावे वा तद्वधेऽल्पबन्धता चेति** ख, **सद्भावे वा न** च । १०. **चेति** क ।

**[1]प्राणी [2]प्राणिज्ञानम्, घातकचित्तं च [3]तद्गता चेष्टा ।**
**प्राणैश्च विप्रयोगः पञ्चभिरापद्यते हिंसा ॥ [ ]**

इत्येवमादिक औद्देशिकपरिभोगा[4]भ्यनुज्ञादिकश्च विरुद्धो वादः स्वत एवाभ्यूह्यः । यदि वा [5]ब्राह्मण-श्रमणा धर्मविरुद्धं [6]वादं यद् वदन्ति तत् सूत्रेणैव दर्शयति—

**से दिट्ठं च [7]णे** इत्यादि यावत् **[8]नत्थित्थ [9]दोसो** । **से** त्ति तच्छब्दार्थे । यदहं वक्ष्ये तत् **दृष्टम्** उपलब्धं दिव्यज्ञानेनास्माभिरस्माकं वा सम्बन्धिना तीर्थकृताऽऽगमप्रणायकेन । **च**शब्दः उत्तरापेक्षया समुच्चयार्थः । **श्रुतं चा**ऽस्माभिर्गुर्वादेः सकाशात्, अस्मद्गुरुशिष्यैर्वा तदन्ते[10]वासिभिः । **मतम्** अभिमतं युक्तियुक्तत्वाद् अस्माकमस्मात्तीर्थकराणां वा । **विज्ञातं [11]च** तत्त्वभेदपर्यायैरस्माभिरस्म[12]त्तीर्थकरेण वा स्वतः, न परोपदेशदानेन । **[13]एतच्चोर्द्धा-ऽधस्तिर्यक्षु** दशस्वपि **दिक्षु सर्वतः** [14]सर्वैरपि प्रत्यक्षानुमानोपमानागमार्थापत्त्यादिभिः प्रकारैः **सुष्ठु प्रत्युपेक्षितं** च पर्यालोचि[15]तं च, मनःप्रणिधानादिना अस्माभिरस्मत्तीर्थकरेण वा । किं तत् ? इत्याह—

**सर्वे प्राणाः सर्वे जीवाः सर्वे भूताः सर्वे सत्त्वा हन्तव्या आज्ञापयितव्या परिग्रहीतव्या परितापयितव्या [16]अपद्रापयितव्याः । अत्रापि** धर्म[17]चिन्तायामप्येवं **जानीथ** यथा—**नास्त्यत्र** यागार्थं देवतोपयाचितकतया वा प्राणिहननादौ **दोषः** पापानुबन्ध इति । एवं यावन्तः केचन [18]पाषण्डिका औद्देशिकभोजिनो ब्राह्मणा वा धर्मविरुद्धं परलोकविरुद्धं [19]वा वादं भाषन्ते । अयं च [20]जीवोपमर्दकत्वात् पापानुबन्धी अनार्यप्रणीत [21]इति, आह च—**अणारिय** इत्यादि आराद्याताः सर्वहेयधर्मेभ्य इत्यार्याः, तद्विपर्यासाद् अनार्याः क्रूर-

---

१. **प्राणा** ग । २. **प्राणज्ञानं** ख । ३. "**तद्गता** घातगता" जै०वि०प० । ४. **०भ्यनुज्ञानादिकश्च** ख । ५. **ब्राह्मणाः** च । ६. **वादं** इति गप्रतौ न । ७. **णेत्यादि** क । ८. **णत्थेत्थ** क ग च । ९. **दोसो इत्यादि । से त्ति तच्छब्दार्थः** । ख, **दोसो त्ति । से त्ति** ग च । १०. **०वासिभिर्वा** । च । ११. **च** इति खपुस्तके नास्ति, **च भेदपर्यायै०** घ । १२. **०त्तीर्थकराणां वा** ख । १३. **एतच्चोर्ध्वा०** घ ङ । १४. **सर्वैः प्रत्यक्षा०** ख च । १५. **०तं मनःप्रणिधानेन अस्माभि०** ग । १६. **अपद्रावयितव्याः** ख च । १७. "**चिन्तायामपि** इति न केवलना(मा)रम्भादौ" जै०वि०प० । १८. **पाषण्डिशब्दका** ख । १९. **वा** इति गपुस्तके न । २०. **जीवोपमर्दकात्** ख । २१. **इत्याह-अणारिय** ख ।

कर्माणस्तेषां [1]प्राण्युपघातकारीदं **वचनम्** । [2]ये तु तथाभूता न ते किम्भूतं प्रज्ञापयन्ति ? इत्याह–

**[ सू०१३७ ] तत्थ जे ते आरिया ते एवं वदासी–से दुद्दिट्ठं च भे, दुस्सुयं च भे, दुम्मयं च भे, दुव्विण्णायं च भे, उड्ढं अहं तिरियं दिसासु सव्वतो दुप्पडिलेहितं च भे, जं णं तुब्भे एवं आयक्खह, एवं भासह, एवं पण्णवेह, एवं परूवेह–'सव्वे पाणा सव्वे भूता सव्वे जीवा सव्वे सत्ता हंतव्वा, अज्जावेतव्वा, परिघेत्तव्वा, परितावेयव्वा, उद्दवेतव्वा । एत्थ वि जाणह णत्थेत्थ दोसो ।' अणारियवयणमेयं ।**

[3]**तत्थ** इत्यादि । **तत्र** इति वाक्योपन्यासार्थे निर्धारणे वा । **ये ते आर्याः** देश-भाषा-चारित्रार्यास्त **एवमवादिषुः** [4]यथा–यत् तदनन्तरोक्तं **दुर्दृष्टमेतत्**, दुष्टं दृष्टं दुर्दृष्टम्, [5]**भे** युष्माभिर्युष्मत्तीर्थकरेण वा, एवं यावद् **दुष्प्रत्युपेक्षित**मिति । तदेवं दुर्दृष्टादिकं प्रतिपाद्य दु[6]ष्प्रज्ञापनानुवादद्वारेण तदभ्युपगमे दोषाविष्करणमाह–

[7]**जं णा**मित्यादि । **ण**मिति वाक्यालङ्कारे । यत् एतद्वक्ष्यमाणं यूयमेवमाचड्ढ्वमित्यादि यावद् अत्रापि यागोपहारादौ जानीथ यूयं [8]यथा नास्त्येव अत्र प्राण्युपमर्दानुष्ठाने दोषः पापानुबन्ध इति । तदेवं [9]परवादे दोषाविर्भावनेन धर्मविरुद्धतामाविर्भाव्य स्वमतवादमार्या आविर्भावयन्ति–

**[ सू०१३८ ] वयं पुण एवमाचिक्खामो, एवं भासामो, एवं पण्णवेमो, एवं परूवेमो–'सव्वे पाणा सव्वे**

---

१. **प्राणिघात०** ग । २. **ये तु न तथाभूता ते** ख । ३. **तत्थेत्यादि** ख । ४. **यथा-एतदनन्त०** ख, **यथा-तद् यदनन्त०** च । ५. **भे** इति गप्रतौ न । ६. "**प्रज्ञापनानुवाद** इति ब्रह्मणादिकृता (तां?) 'सव्वे भूया न हंतव्वा' इत्यादिकां परिवर्तमान इति" जै०वि०प० । ७. **जमित्यादि** क । ८. **यथा अस्त्येव** घ ङ । ९. **परिवादे** क ग ।

**भूता सव्वे जीवा सव्वे सत्ता ण हंतव्वा, ण अज्जावेतव्वा, ण परिघेत्तव्वा, ण परियावेयव्वा, ण उद्दवेतव्वा । एत्थ वि जाणह णत्थेत्थ दोसो ।' आरियवयणमेयं ।**

**वयमित्यादि**[1] । पुनःशब्दः पूर्वस्माद्विशेषमाह । वयं पुनर्यथा धर्मविरुद्धवादो न भवति तथा प्रज्ञापयाम इति । तान्येव पदानि सप्रतिषेधानि तु हन्तव्यादीनि यावद् न केवलमन्यत्र अस्मदीये वचने नास्ति दोषः, **अत्रापि** अधिकारे **जानीथ** यूयं यथा–**अत्र** हननादिप्रतिषेधविधौ **नास्ति दोषः** पापानुबन्धः, सावधारणत्वाद् वाक्यस्य नास्त्येव दोषः, प्राण्युपघातप्रतिषेधा**च्चार्यवचनमेतत्** । एवमुक्ते सति ते पाषण्डिका ऊचुः–भवदीयमार्यवचनमस्मदीयं त्वनार्यम् इत्येतन्निरन्तराः सुहृदः प्रत्येष्यन्ति, युक्तिविकलत्वात् । तदत्राचार्यो यथा परमतस्यानार्यता स्यात् तथा दिदर्शयिषुः स्ववाग्यन्त्रिता वादिनो न विचलयिष्यन्तीति[2] कृत्वा प्रत्येकमतप्रच्छनार्थमाह[3]–

**[ सू०१३९ ] पुव्वं णिकाय समयं पत्तेयं पुच्छिस्सामो– हं भो पावादुया ! किं भे सायं दुक्खं उताहु असायं ? समिता पडिवण्णे या वि एवं बूया– सव्वेसिं पाणाणं सव्वेसिं भूताणं सव्वेसिं जीवाणं सव्वेसिं सत्ताणं असायं अपरिणिव्वाणं महब्भयं दुक्खं ति त्ति बेमि ।**

**॥ सम्मत्तस्स बीओ उद्देसओ सम्मत्तो ॥**

**पुव्वमित्यादि** । पूर्वम् आदावेव **समयम्** आगमं यद् यदीयागमेऽभिहितं तत् **निकाच्य** व्यवस्थाप्य पुनस्तद्विरूपापादनेन परमतानार्यता प्रतिपाद्येति[4], अतस्तदेव परमतं प्रश्नयति, यदि वा पूर्वं प्राश्निकान् निकाच्य ततः पाषण्डिकान् प्रश्नयितुमाह–

---

१. **वयं इत्यादि** ख । २. **चलिष्यन्तीति** च । ३. **०प्रच्छनायाह पुव्वं इत्यादि** ख । ४. **प्रतिपादिता । अत०** ख ।

[1]**पत्तेय**मित्यादि । एकमेकं प्रति **प्रत्येकम् भोः प्रावादुकाः** ! भवतः प्रश्नयिष्यामि—**किं भे** युष्माकं **सातं** मनआह्लादकारि **दुःखम्** ? **उत असातं** मनःप्रतिकूलम् ? एवं पृष्टाः सन्तो यदि सात[2]मित्येवं ब्रूयुः ततः प्रत्यक्षागमलोकबाधा स्यात् । अथ असातमित्येवं ब्रूयुः ततः [3]**समिया**मिति सम्यक्**प्रतिपन्ना**स्तान् प्रावादुकान् स्ववाग्यन्त्रितान**प्येवं ब्रूयात्**—[4]**अपिः** सम्भावने, [5]सम्भाव्यते एतद्भणनं यथा—न केवलं भवतां दुःखमसातम् **सर्वेषा**मपि प्राणिनां **दुःखमसातं** मनसोऽनभिप्रेतम् **अपरिनिर्वाणम्** अनिर्वृतिरूपं **महद्भयं** दुःखमिति । एतत् परिगणय्य सर्वेऽपि प्राणिनो न हन्तव्या इत्यादि वाच्यम् । [6]तद्धनने च दोषः, यस्त्वदोषमाह तदनार्यवचनम् । **इतिः** [7]अधिकारपरिसमाप्तौ । **ब्रवी**मि इति पूर्ववत् ।

तदेवं प्रावादुकानां स्ववाग्नियन्त्रणयाऽनार्यता प्रतिपादिता । अत्रैव **राहगुप्त**मन्त्रिणा विदितागमसद्भावेन माध्यस्थ्यमवलम्बमानेन तीर्थिकपरीक्षाद्वारेण यथा निराकरणं चक्रे तथा **निर्युक्तिकारो** गाथाभिराचष्टे—

**[8]खुड्डुग पायसमासं धम्मकहं पि य [9]अजंपमाणेण ।**
**छन्नेण अन्नलिंगी परिच्छिया राहगुत्तेणं ॥२२९॥**

**खुड्डग पाय[10]समासमि**त्यादि । अनया गाथया सङ्क्षेपतः [11]सर्वं कथानकमावेदितम् । क्षुल्लकस्य पादसमासः गाथापादसङ्क्षेपः तम[12]जल्पता धर्मकथां च छन्नेन अप्रकटेन अन्यलिङ्गिनः प्रावादुकाः परीक्षिताः निरूपिताः **राहगुप्ते**न राहगुप्तनाम्ना मन्त्रिणेति गाथासमासार्थः ॥२२९॥ भावार्थस्तु कथनाकादवसेयस्तच्चेदम्—

[13]**चम्पा**यां नगर्यां **सिंहसेन**स्य राज्ञो **राहगुप्तो** [14]नाम महामन्त्री । स

---

१. **पत्तेयं इत्यादि** ख । २. **०मित्येव** ख । ३. **समियां सम्य०** ख, **समिया सम्य०** ग घ ङ च । ४. **अपि** क ग च । ५. **सम्भाव्यमेतद्भवनं** ख । ६. **तद्वधेन च** ग च । ७. **अधिकारसमाप्तौ** क-खप्रती विना । ८. **खुद्दग** ज । ९. **अजंपमाणेणं** ज । १०. **०समासं इत्यादि** ख । ११. **सर्वं** इति खप्रतौ न । १२. **०जल्पनाच्छन्नेन** ख । १३. "पाडलिपुत्तं णयरं । जियसत्तू राया । राहगुत्तो अमच्चो सावओ" चूर्णौ । १४. **नाम मन्त्री** ख ।

चार्हद्दर्शनभावितान्तःकरणो विज्ञात[१]सदसद्भावः । तत्र च कदाचिद् राजा-ऽऽस्थानस्थो धर्मविचारं [२]प्रस्तावयति । तत्र यो यस्याभिमतः स तं शोभनमुवाच । स च [३]तूष्णीम्भावं भजमानो राज्ञोक्तः—धर्मविचारं प्रति किमपि न ब्रूते भवान् ? [४]स त्वाह—किमेभिः पक्षपातवचोभिः ? [५]विमृशामः स्वत एव धर्मम्, परीक्षामहे तीर्थिकान् । इत्यभिधाय राजानुमत्या 'सकुंडलं वा [६]वयणं [७]न व'त्ति [८]अयं गाथापादो नगरमध्ये आललम्बे, [९]सम्पूर्णा तु गाथा भाण्डागारिता । नगर्यां चोद्घुष्टं यथा—य [१०]एनं गाथापादं पूरयिष्यति तस्य राजा यथेप्सितं दानं दास्यति, तद्भक्तश्च [११]भविष्यतीति । तं [१२]च गाथापादं सर्वेऽपि गृहीत्वा प्रावादुका [१३]निर्जग्मुः । [१४]पुनश्च सप्तमे[१५]ऽह्नि राजानमास्थानस्थमुपस्थिताः । तत्रादावेव परिव्राड् ब्रवीति—

**[१६]भिक्खं पविट्ठेण मएऽज्ज दिट्ठं, [१७]पमदामुहं कमल[१८]विसालणेत्तं ।**
**वक्खित्तचित्तेण न [१९]सुट्ठु णायं, सकुंडलं वा वयणं [२०]न व त्ति ॥२३०॥**

**[२१]भिक्खापविट्ठेण**त्यादि । सुगमा, नवरमपरिज्ञाने व्याक्षेपः कारण-मुपन्यस्तम्, न पुन[२२]र्वीतरागतेति पूर्वगाथाविसंवादादसौ तिरस्कृत्य [२३]निर्धाटितः । पुनस्तापसः पठति—

**फलोदएणं [२४]मि [२५]गिहं [२६]पविट्ठो, तत्थासणत्था [२७]पमदा [२८]मि दिट्ठा ।**
**वक्खित्तचित्तेण ण [२९]सुट्ठु णायं, सकुंडलं वा वयणं न व त्ति ॥२३१॥**

**[३०]फलोदयेण** इत्यादि । सुगमम्, पूर्ववत् ॥२३१॥ तदनन्तरं **शौद्धो-**

---

१. **०सदसद्भावः** ख। २. **प्रश्नयति** क, **प्रश्नयति स्म । तत्र** ग । ३. **तूष्णीभावं** ग च । ४. **स चाह** ख । ५. **विमर्शामः** कप्रतिमृते । ६. **वदणं** ख, **वदनं** ग घ ङ च । ७. **न वेत्ति** ख ङ । ८. **अयं च गाथापादो** क, **अयं श्लोकपादो** ग । ९. **सम्पूर्णश्लोकस्तु भाण्डागारितः** ग । १०. **एनं श्लोकपादं** ग । ११. **भविष्यति** । क घ ङ। १२. **च श्लोकपादं** ग । १३. **निजग्मुः** क । १४. **पुनः सप्तमे०** ख च । १५. **०ऽहनि** घ ङ। १६. **भिक्खप्पविट्ठेण मयेऽज्ज** ञ । १७. **पमुदामुहं** क, **पमयामुहं** ञ ठ । १८. **०विसालनित्तं** ठ । १९. **सुट्ठु दिट्ठं** ञ। २०. **न वेत्ति** ख ठ । २१. **भिक्खप्पविट्ठे०** ख ग च । २२. **०वीतरागत्वेनेति** क । २३. **निर्धारितः** गपुस्तकं विना । २४. **म्हि** ज ञ । २५. **गिहे** झ ञ । २६. **पविट्ठे** ज । २७. **पमया** ञ ठ । २८. **मे** झ ञ । २९. **सुट्ठु दिट्ठं** ञ । ३०. **फलोदएण** कप्रत्या विना ।

दनि[१]**शिष्यक** आह—

**[२]मालाविहारम्मि मएऽज्ज दिट्ठा, उवासिया कंचणभूसियंगी ।**
**वक्खित्तचित्तेण ण सुट्ठु नायं, सकुंडलं वा वयणं [३]नं व त्ति ॥२३२॥**

**माला[४]विहार** इत्यादि । पूर्ववत् ॥२३२॥ एवमनया दिशा सर्वेऽपि तीर्थिका वाच्याः । '[५]आर्हतस्तु पुनर्न कश्चिदागतः' इति राज्ञाऽभाणि । मन्त्रिणा त्वार्हतक्षुल्लकोऽप्येवम्भूतपरिणाम इत्येवं सम्प्रत्यय एषां स्यादित्यतो भिक्षार्थं प्रविष्टः प्रत्युषस्येव क्षुल्लकः समानीतः । तेनापि गाथापादं गृही[६]त्वा बभाषे, तद्यथा—

**खंतस्स दंतस्स जिइंदियस्स, अज्झप्प[७]जोगे गयमाणसस्स ।**
**किं मज्झ एएण [८]विचिंतिएण 'सकुंडलं वा वयणं [९]ण व ?' त्ति ॥२३३॥**

**[१०]खंतस्से**त्यादि । अत्र [११]च क्षान्त्यादिकमपरिज्ञाने कारणमुपन्यस्तम्, न पुनर्व्याक्षेपः इत्यतो [१२]गाथासंवादात् क्षान्ति-दम-जितेन्द्रियत्वा-ऽऽध्यात्म-योगाधिगतेश्च कारणाद् राज्ञो धर्मं प्रति भावोल्लासोऽभूत् । क्षुल्लकेन [१३]च धर्मप्रश्नोत्तरकालं [१४]पूर्वगृहीतशुष्केतरकर्दमगोलकद्वयं भित्तौ निक्षिप्य गमनमारेभे । पुनर्गच्छन् राज्ञोक्तः—किमिति भवान् धर्मं पृष्टोऽपि न कथयति ? स चावोचत्— हे मुग्ध ! ननु कथित एव धर्मो भवतः शुष्केतरगोलकदृष्टान्तेन । एतदेव गाथाद्वयेनाह—

**उल्लो [१५]सुक्को य [१६]दो छूढा, गोलया मट्टियामया ।**
**दो वि [१७]आवडिया [१८]कुंड्डे, जो [१९]उल्लो तत्थ लग्गती ॥२३४॥**

---

१. **शिष्यकः प्राह** ग च । २. **मालाविहारे मयि अज्ज दिट्ठा** ञ । ३. **न वेत्ति** ख । ४. ०**विहाणेत्यादि** ख, ०**विहारेत्यादि** च । ५. **आर्हतः क्षुल्लको०** खपुस्तके **विना** । ६. ०**त्वा गाथा बभाषे** घ ङ च, ०**त्वा श्लोकः बभाषे** ग । ७. ०**योगे गय०** ञ, ०**जोगेसु सा( स )माहियस्स** ख । ८. **विचिंतिएणं** ख ञ । ९. **न वेत्ति** ख ठ । १०. **खंतस्स इत्यादि** च । ११. **च** इति ख-चप्रत्योर्न । १२. **श्लोकसंवादात्** ग । १३. **च** इति खप्रतौ नास्ति । १४. **पूर्वं गृहीत०** क । १५. **सुक्खो** क-छपुस्तके विना । १६. **दु च्छूढा** क । १७. **यावडिया** झ । १८. **कुंडे** क । १९. **उल्लो सो य लग्गती** ख, **तुल्लो सो तत्थ लग्गती** छ, **उल्लो सोऽत्थ लग्गई** झ ठ, **उल्लो सो तत्थ लग्गती** ञ ।

**एवं लग्गंति दुम्मेहा, जे नरा कामलालसा ।**
**विरत्ता उ[1] ण लग्गंति, जहा से सुक्क[2]गोलए ॥२३५॥**

**उल्लो सुक्को** गाहा । **एवं लग्गंति** [3]गाहा । अयमत्र भावार्थः—ये ह्यङ्ग-प्रत्यङ्गनिरीक्षणव्यासङ्गात् कामिनीनां मुखं न पश्यन्ति तदभावे तु पश्यन्ति ते कामगृध्नुतया सार्द्राः [4]सार्द्रतया च संसारपङ्के कर्मकर्दमे वा लगन्ति । ये तु पुनः क्षान्त्यादिगुणोपेताः संसारसुखपराङ्मुखाः काष्ठमुनयस्ते शुष्कगोलकसन्निभा न क्वचिल्लगन्तीति गाथाद्वयार्[5]थः ॥२३४-२३५॥

**इति सम्यक्त्वाध्ययने द्वितीयोद्देशकः समाप्तः ॥ छ ॥ छ ॥**

• • •

---

१. **ण रज्जंति** ख । २. **०गोलओ ॥२३५॥ चतुर्थे द्वितीयः** झ, **०गोलए ॥२३५॥ चतु० ऽध्य० द्वि०उद्दे० निर्युक्तिः** ॥ ठ । ३. **गाथा** ग । ४. **सार्द्रत्वाच्च संसार०** ख च । ५. **०र्थः ॥छ॥ समाप्तश्चायं सम्यक्त्वाध्ययनद्वितीयोद्देशकः ॥छ॥** ख च ।

उक्तो द्वितीयोद्देशकः । साम्प्रतं तृतीय आरभ्यते । अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके परमतव्युदासद्वारेण सम्यक्त्वमविचलं प्रतिपादयता[1] तत्सहचरितं ज्ञानं तत्फलभूता च विरतिरभिहिता, सत्यपि चास्मिंस्त्रये न पूर्वोपात्तकर्मणो निरवद्यतपोऽनुष्ठानमन्तरेण क्षयो भवतीति, अतस्तदधुना प्रतिपाद्यत इति । अनेन सम्बन्धेनायातस्यास्योद्देशकस्यादिसूत्रम्—

**[ सू०१४० ] उवेहेणं बहिता य लोकं । से सव्वलोकंसि जे केइ विण्णू । अणुवियि पास णिक्खितदंडा जे केइ सत्ता पलियं चयंति णरा मुतच्चा धम्मविदु त्ति अंजू आरंभजं दुक्खमिणं ति णच्चा ।**

**एवमाहु सम्मत्तदंसिणो । ते सव्वे पावादिया दुक्खस्स कुसला परिण्णमुदाहरंति इति कम्मं परिण्णाय सव्वसो ।**

**उवेहे**[2] इत्यादि । योऽयमनन्तरं प्रतिपादितः पाषण्डिलोकः **एनं**[3] धर्माद् **बहिर्व्यवस्थितम् उपेक्षस्व** तदनुष्ठानं माऽनुमंस्थाः । **च**शब्दः अनुक्तसमुच्चयार्थः, [4]तदुपदेशमभिगमन-पर्युपासन-दान-संस्तवादिकं[5] च[6] मा कृथा इति । यः पाषण्डिलोकोपेक्षकः स कं गुणमवाप्नुयात् ? इत्याह—

**से सव्वलोए** इत्यादि । यः पाषण्डिलोकमनार्यवचनमवगम्य तदुपेक्षां विधत्ते **स सर्वस्मिन्**[7] **लोके ये** केचिद् विद्वांसस्तेभ्योऽग्रणीः विद्वत्तम इति । स्यात्—लोके केचन विद्वांसः सन्ति येभ्योऽधिकः स्यात् ? इत्यत आह—

**अणुवीइ** इत्यादि । ये केचन लोके **निक्षिप्तदण्डाः** निश्चयेन क्षिप्तः निक्षिप्तः परित्यक्तः काय-मनो-वाङ्मयः प्राण्युपघातकारी दण्डो यैस्ते विद्वांसो

---

१. **प्रतिपादितम् तत्सह०** ख । २. **उवेह इत्यादि** क च, **उवेहि इत्यादि** ग, **उवेहे णमित्यादि** घ ङ । ३. **एवं** क ग । ४. **तदुपदेशगमन०** क । ५. **०संस्तवनादिकं** ख च । ६. **च** इति ख-गप्रत्योर्न । ७. **०न् मनुष्यलोके ये** ख ग च ।

भवन्त्येव, एतद् [1]**अनुविचिन्त्य** पर्यालोच्य **पश्य** [2]अवगच्छ। के चोपरतदण्डाः ? इत्यत आह–

**जे केइ** इत्यादि । **ये केचन** अवगतधर्माणः **सत्त्वाः** प्राणिनः **पलितम्** इति कर्म तत् **त्यजन्ति,** ये चोपरतदण्डा भूत्वाऽष्टप्रकारं कर्म घ्नन्ति ते विद्वांसः इत्येतद् [3]अनुविचिन्त्य अक्षिनिमीलनेन पर्यालोच्य पश्य विवेकिन्या मत्याऽवधारय। के [4]पुनरशेषकर्मक्षयं कुर्वन्ति ? इत्यत आह–

[5]**नरा** इत्यादि । **नराः** मनुष्याः, त एवाशेषकर्मक्षयायालम्, नान्ये । तेऽपि न सर्वे, अपि तु **मृतार्चा,** मृतेव संस्काराभावाद् **अर्चा** शरीरं येषां ते तथा, निष्प्रतिकर्मशरीरा इत्यर्थः । यदि वा अर्चा तेजः, स च क्रोधः, स च कषायोपलक्षणार्थः, ततश्चायमर्थः–मृता विनष्टा अर्चा कषायरूपा येषां ते **मृतार्चाः** [6]अकषायिण इत्यर्थः । किञ्च–**धर्मं** श्रुत-चारित्राख्यं विदन्तीति **धर्मविदः । इति** हेतौ । यत एव धर्मविदोऽत एव **ऋजवः** कौटिल्यरहिताः ।

स्यादेतत्–किमालम्ब्यैतद्विधेयम् ? [7]इत्यत आह–**आरंभजमि**त्यादि । सावद्यक्रियानुष्ठानमारम्भः तस्माज्जातम् आरम्भजम् । किं तत् ? **दुःखम् । इदम्** इति सकलप्राणिप्रत्यक्षम्, [8]तथाहि–कृषिसेवावाणिज्याद्यारम्भप्रवृत्तो यत् शारीर-मानसं दुःखमनुभवति तद् वाचामगोचर इति अतः प्रत्यक्षाभिधायिना इदमा उक्तम् । **इतिः** उपप्रदर्शने, इत्येतदनुभवसिद्धं दुःखं ज्ञात्वा मृतार्चा [9]धर्मविद ऋजवश्च भवन्तीति ।

[10]एतच्च समस्तवेदिनो भाषन्त इति दर्शयति–[11]**एवमि**त्यादि । **एवं** पूर्वोक्तप्रकारेण **आहुः** उक्तवन्तः । के एवमाहुः ? समत्वदर्शिनः सम्यक्त्वदर्शिनः समस्तदर्शिनो वा, यदुद्देशकादेरारभ्योक्तं तदेवमूचुरित्यर्थः ।

[12]कस्मात् त एवमूचुः ? इत्याह–**ते सव्वे** इत्यादि । यस्मात् ते सर्वेऽपि

---

१. **अनुचिन्त्य** चपुस्तकं विना । २. **अवगच्छये( येः?)** ख । ३. **अनुचिन्त्य** ग । ४. **पुनः शेषकर्म०** च । ५. **नरे** गविना । ६. **निष्कषायिण इति यावत्** ख, **अकषायिण इति यावत्** च । ७. **इत्याह–आरंभज इत्यादि** ख च । ८. **०हि–कृषि-वाणिज्या०** ख, **०हि–सेवा-वाणिज्या०** घ । ९. **धर्मवेदिनः** ख । १०. **एतत् समस्त०** घ । ११. **एवं इत्यादि** ख च । १२. **कस्मात् तदूचुः** क ग, **कस्मात् ते ऊचुः** घ च, ङप्रतौ पाठभङ्गः ।

सर्वविदः **प्रावादिकाः** प्रकर्षेण आ[1] मर्यादया वदितुं शीलं येषां ते प्रावादिनः त एव प्रावादिकाः यथावस्थितार्थस्य प्रतिपादनाय[2] वावदूकाः, दुःखस्य शारीर-मानसलक्षणस्य तदुपादानस्य वा कर्मणः कुशलाः निपुणास्तदपनोदोपायवेदिनः सन्तस्ते सर्वेऽपि ज्ञपरिज्ञया परिज्ञाय हेयार्थस्य प्रत्याख्यानपरिज्ञामुदाहरन्ति । **इतिः** उपप्रदर्शने, इत्येवं पूर्वोक्तया नीत्या कर्मबन्ध-उदय-सत्कर्मताविधानतः परिज्ञाय सर्वशः सर्वैः प्रकारैः कुशलाः प्रत्याख्यानपरिज्ञामुदाहरन्ति । यदि वा मूलोत्तरप्रकृतिप्रकारैः सर्वैः परिज्ञायेति मूलप्रकारा अष्टौ, उत्तरप्रकृतिप्रकारा अष्टपञ्चाशदुत्तरं[3] शतम् । अथवा प्रकृति-स्थिति-अनुभाव-प्रदेशप्रकारैः । यदि वोदयप्रकारैर्बन्ध-सत्कर्मताकार्यभूतैरागामिबन्ध-सत्कर्मताकारणैश्च कर्म परिज्ञायेति । ते चामी उदयप्रकाराः, तद्यथा—

मूलप्रकृतीनां त्रीण्युदयस्थानानि—अष्टविधं सप्तविधं चतुर्विधमिति । तत्राष्टाऽपि कर्मप्रकृतीर्यौगपद्येन वेदयतोऽष्टविधम्, तच्च कालतोऽनादिक-मपर्यवसितमभव्यानाम्, भव्यानां त्वनादिसपर्यवसितं सादिसपर्यवसितं चेति । मोहनीयोपशमे क्षये वा सप्तविधम् । घातिक्षये चतुर्विधमिति ।

साम्प्रतमुत्तरप्रकृतीनामुदयस्थानान्युच्यन्ते—तत्र ज्ञानावरणीया-ऽन्तराययोः पञ्चप्रकारं एकमुदयस्थानम् ।

दर्शनावरणीयस्य द्वे—दर्शनचतुष्कस्योदयात् चत्वारि, अन्यतरनिद्रया सह पञ्च ।

वेदनीयस्य सामान्येनैकमुदयस्थानं सातमसातं वेति, विरोधाद् यौग-पद्योदयाभावः ।

मोहनीयस्य सामान्येन नवोदयस्थानानि, तद्यथा—दश १० नव ९ अष्टौ ८ सप्त ७ षड् ६ पञ्च ५ चत्वारि ४ द्वे २ एकं १ चेति । तत्र दश-मिथ्यात्वम् अनन्तानुबन्धी क्रोधोऽप्रत्याख्यानः प्रत्याख्यानावरणः सञ्ज्वलनश्चेत्येतत्

---

१. **आ** इति ख-गप्रत्योरेव । २. **प्रवचनाय** ख । ३. **०दुत्तरं च शतम्** ख ।

क्रोधचतुष्टयम्, एवं मानादिचतुष्टयमपि योज्यम्, अन्यतरो वेदः हास्य-रतियुग्मम् अरति-शोकयुग्मं वा भयं जुगुप्सा चेति । भय-जुगुप्सयोरन्यतराभावे नव ९ । द्वयाभावे अष्टौ ८ । अनन्तानुबन्ध्यभावे सप्त ७ । मिथ्यात्वाभावे षट् ६ । अप्रत्याख्यानोदयाभावे पञ्च ५ । प्रत्याख्यानावरणाभावे चत्वारि ४ । परिवर्तमानयुगलाभावे सञ्ज्वलनान्यतरवेदोदये सति द्वे २ । वेदाभावे एकमिति १।

आयुषोऽप्येकमेवोदयस्थानम्—चतुर्णामायुषामन्यतरदिति ।

नाम्नो द्वादशोदयस्थानानि, तद्यथा—विंशतिः २० एकविंशतिः २१ चतुर्विंशतिः २४ पञ्चविंशतिः २५ षड्विंशतिः २६ सप्तविंशतिः २७ अष्टाविंशतिः २८ एकोनत्रिंशत् २९ त्रिंशत् ३० एकत्रिंशत् ३१ नव ९ अष्टौ चेति ८। तत्र संसारस्थानां सयोगिनां जीवानां दशोदयस्थानानि नाम्नो भवन्ति, अयोगिनां तु चरमद्वयमिति । अत्र च द्वादश ध्रुवोदयाः कर्मप्रकृतयः, [1]तद्यथा—तैजस-कार्मणशरीरे वर्ण-गन्ध-रस-स्पर्शचतुष्टयम् अगुरुलघु स्थिरम् अस्थिरं शुभम् अशुभं निर्माणमिति । तत्र विंशतिरतीर्थकरकेवलिनः समुद्घातगतस्य कार्मण-शरीरयोगिनो भवति, तद्यथा—मनुष्यगतिः १ पञ्चेन्द्रियजातिः २ त्रसं ३ बादरं ४ [2]पर्याप्तकं ५ सुभगम् ६ आदेयं ७ यशःकीर्तिरिति ८ ध्रुवोदयसहिता विंशतिः २०। एकविंशत्यादीनि तूदयस्थानानि एकत्रिंशत्पर्यन्तानि जीव-[3]गुणस्थान-भेदादनेकभेदानि भवन्ति, तानि चेह ग्रन्थगौरवभयात् प्रत्येकं नोच्यन्त इति, अत एकैकभेदावेदनं क्रियते—तत्रैकविंशतिः गतिः १ जातिः २ आनुपूर्वी ३ त्रसं ४ बादरं ५ पर्याप्ता-[4]ऽपर्याप्तयोरन्यतरत् ६ सुभग-दुर्भगयोरन्यतरत् ७ आदेया-ऽनादेययोरन्यतरत् ८ यशःकीर्ति-अयशःकीर्त्योरन्यतरत् ९ एताश्च नव ध्रुवोदय-सहिता एकविंशतिः २१। चतुर्विंशतिस्तु तिर्यग्गतिः १ एकेन्द्रियजातिः २ औदारिकं ३ हुण्डसंस्थानम् ४ उपघातं ५ प्रत्येक-साधारणयोरन्यतरत् ६ स्थावरं ७ सूक्ष्म-बादरयोरन्यतरत् ८ दुर्भगम् ९ अनादेयम् १० [5]अपर्याप्तकं ११

१. **तद्यथा** इति खप्रतौ नास्ति । २. **पर्याप्तं** ग । ३. ०**गुणस्थानोदयभेदा**० ख । ४. ०**ऽपर्याप्तकयो**० ख ग । ५. **अपर्याप्तं** ग ।

यश:कीर्ति-अयश:कीर्त्योरन्यतरदिति १२। तत्रैवापर्याप्तकापनयने पर्याप्तक-पराघाताभ्यां प्रक्षिप्ताभ्यां पञ्चविंशतिः २५। षड्विंशतिस्तु [1]याऽसौ सयोगिकेवलिनो विंशतिरभिहिता सैवौदारिकशरीरा-ऽङ्गोपाङ्गद्वया-ऽन्यतरसंस्थाना-ऽऽद्यसंहनन-उपघात-प्रत्येकसहिता वेदितव्या मिश्रकाययोगे वर्तमानस्य २६। सैव तीर्थकरनामसहिता केवलिसमुद्घातवतो मिश्रकाययोगिन एव सप्तविंशतिः २७। [2]सैव प्रशस्तविहायोगतिसमन्विताऽष्टाविंशतिः २८। तत्र तीर्थकरनामापनयने उच्छ्वास-सुस्वर[3]-पराघातप्रक्षेपे सति त्रिंशद् भवति ३०। तत्र स्वरे निरुद्धे एकोनत्रिंशत् २९। सैव त्रिंशत् तीर्थकरनामसहिता एकत्रिंशत् ३१। नवोदयस्तु मनुष्यगतिः १ पञ्चेन्द्रियजातिः २ त्रसं ३ बादरं ४ पर्याप्तकं ५ सुभगम् ६ आदेयं ७ यश:कीर्तिः ८ तीर्थकरमिति ९, एता अयोगितीर्थकरकेवलिनः । एता एव तीर्थकरनामरहिता अष्टाविति ८।

गोत्रस्यैकमेव [4]सामान्येनोदयस्थानम्—उच्च-नीचयोरन्यतरत्, [5]यौगपद्येनोदयभावो नास्ति विरोधादिति ।

तदेवमुदयभेदैरनेकप्रकारतां कर्मणः परिज्ञाय प्रत्याख्यान परिज्ञामुदाहरन्तीति। यदि नाम [6]कर्मपरिज्ञामुदाहरन्ति ततः किं कार्यम् ? इत्याह—

**[ सू०१४१ ] इह आणाकंखी पंडिते अणिहे एगमप्पाणं सपेहाए धुणे सरीरं, कसेहि अप्पाणं, जरेहि अप्पाणं । जहा जुन्नाइं कट्ठाइं हव्ववाहो पमत्थति एवं अत्तसमाहिते अणिहे ।**

[7]इहेत्यादि । इह अस्मिन् प्रवचने आज्ञामाकाङ्क्षितुं शीलमस्येति

१. याऽसौ केवलिनो ख-चप्रती ऋते । २. सैव पराघात-उच्छ्वास-प्रशस्तविहायोगति-सुस्वरप्रकृतिषु प्रक्षिप्तास्वेकत्रिंशत् । सैव अतीर्थकरस्य त्रिंशत् । तस्यैव व( च ) स्वरे निरुद्धे एकोनत्रिंशत् । उच्छ्वासे निरुद्धे अष्टाविंशतिरिति । नवेदयस्तु ग । ३. ०र-यश:कीर्तिप्रक्षेपे क ख । ४. सामान्योदय० क घ ङ । ५. यौगपद्येनोदयाभावो विरोधादिति ख ग च । ६. कर्मप्रतिज्ञा० ख, कर्म प्रति परिज्ञा० च । ७. इह इत्यादि ग ङ ।

**आज्ञाकाङ्क्षी** सर्वज्ञोपदेशानुष्ठायी, यश्चैवम्भूतः स **पण्डितः** विदितवेद्यः **अस्निहो** भवति, स्निह्यते श्लिष्यतेऽष्टप्रकारेण कर्मणेति स्निहः, न स्निहोऽस्निहः। यदि वा स्निह्यतीति स्निहः रागवान् यो न तथा सोऽस्निहः, उपलक्षणार्थत्वाच्चास्य राग-द्वेषरहित इत्यर्थः । अथवा निश्चयेन हन्यत इति निहतः भावरिपुभिरिन्द्रिय-कषाय-कर्मभिः, यो न तथा सोऽनिहतः । **इह** प्रवचने **आज्ञाकाङ्क्षी पण्डितो** भावरिपुभि**रनिहतः**, नान्यत्र, यश्चानिहतः स परमार्थतः कर्मणः परिज्ञाता । यश्चैवम्भूतः स किं कुर्यात् ? इत्याह—

**एगमप्पाण**मित्यादि । सः अनिहतोऽस्निहो वाऽऽत्मानम् एकं धन-धान्य-हिरण्य-पुत्र-कलत्र-शरीरादिव्यतिरिक्तं **प्रेक्ष्य** पर्यालोच्य **धुनीयात् शरीरकम्**। सम्भावनायां लिङ् सर्वस्मादात्मानं व्यतिरिक्तं पश्यतः [1]सम्भाव्यत एव एतच्छरीरविधूननमिति । तच्च कुर्वता संसारस्वभावैकत्वभावनैवंरूपा [2]भावयितव्या—

**संसार एवायमनर्थसारः, कः कस्य कोऽत्र स्वजनः परो वा ? ।**
**सर्वे भ्रमन्तः स्वजनाः परे च, भवन्ति भूत्वा न भवन्ति भूयः ॥**
**विचिन्त्यमेतद्भवताऽहमेको, न मेऽस्ति कश्चित् पुरतो न पश्चात् ।**
**स्वकर्मभिर्भ्रान्तिरियं ममैव, अहं पुरस्तादहमेव पश्चात् ॥**
**सदैकोऽहं न मे कश्चिद्, नाहमन्यस्य कस्यचित् ।**
**न तं पश्यामि यस्याहं, नासौ भावीति यो मम ॥** [ ]

तथा—

**एकः प्रकुरुते कर्म, [3]भुनक्त्येकश्च तत्फलम् ।**
**[4]जायत्येको व्रजत्येकः, एको याति भवान्तरम् ॥** [ ] इत्यादि ।

किञ्च—**[5]कसेहि अप्पाणं जरेहि अप्पाणं,** परव्यतिरिक्त आत्मा शरीरं तत् कष्टतपश्चरणादिना कृशं कुरु । यदि वा **कष** कस्मै कर्मणे अलमित्येवं

---

१. **सम्भाव्यत एतच्छ०** क-घप्रती विना । २. **भावयितव्येति** कपुस्तकमृते । ३. **भुङ्क्ते एकश्च तत्फलम्** चूर्णौ । ४. **जायते एयते चैक, एको** घ, **जायते अयते चैक, एको** ङ, **जायत्येको म्रियत्येको( क ), एको** चूर्णौ । ५. **कस्से अप्पाणं** ख, **कसे अप्पाणं जरे अप्पाणं** ग ।

पर्यालोचय, यत् शक्नोषि तत्र [१]नियोजयेरित्यर्थः । तथा **जर** शरीरकं जरीकुरु तपसा तथा कुरु यथा [२]जराजीर्णमिव प्रतिभासते, विकृतिपरित्यागद्वारेणात्मानं निःसारता[३]मापादयेरित्यर्थः ।

[४]किमर्थमेतत् ? इति चेद् आह—**जहा** इत्यादि । **यथा जीर्णानि** निःसाराणि **काष्ठानि हव्यवाहः** हुतभुक् [५]**प्रमथ्नाति** शीघ्रं भस्मसात् करोति ।

दृष्टान्तं प्रदर्श्य [६]दार्ष्टान्तिकमाह—[७]**एवं अत्तसमाहिए । एवम्** अनन्तरोक्त-दृष्टान्तप्रकारेण आत्मना समाहितः **आत्मसमाहितः** ज्ञान-दर्शन-चारित्रोपयोगेन [८]सदोपयुक्त इत्यर्थः । आत्मा वा समाहितोऽस्येति आत्मसमाहितः, [९]सदा शुभव्यापारवानित्यर्थः, आहिताग्न्यादि-दर्शनाद् आर्षत्वाद् वा निष्ठान्तस्य परनिपातः, यदि वा प्राकृते पूर्वोत्तर-निपातोऽतन्त्रः, समाहितात्मेत्यर्थः । [१०]अस्निहः स्नेहरहितः संस्तपोऽग्निना कर्मकाष्ठं दहतीति भावार्थः । एतदेव दृष्टान्त-[११]दार्ष्टान्तिकगतमर्थं [१२]**निर्युक्तिकारो** गाथयोपसञ्जिघृक्षुराह—

**जह खलु [१३]झुसिरं [१४]कट्ठं सुचिरं [१५]सुक्खं लहुं डहइ अग्गी ।**
**तह खलु [१६]खवेंति कम्मं सम्मं [१७]चरणट्ठिया [१८]साहू ॥२३६॥**

**जह खलु झुसिरं** गाहा । गतार्था ॥२३६॥ अत्र चास्निहपदेन रागनिवृत्तिं विधाय द्वेषनिवृत्तिं विधित्सुराह—

## [ सू०१४२ ] विगिंच कोहं अविकंपमाणे इमं निरुद्धाउयं सपेहाए । दुक्खं च जाण अदुवाऽऽगेमस्सं । पुढो

---

१. नियोजयेदित्यर्थः घ-ङपुस्तके ऋते । २. जराजीर्णमिति ख ङ । ३. ०मापादयेदित्यर्थः क ग, ०मापादयेत्यर्थः ख च । ४. किमर्थमित्येतत् ? ख च । ५. प्राश्नाति ख । ६. दार्ष्टान्तिकं करोति—एवमंतसमाहिए ख । ७. एवमत्तसमाहिए च । ८. सदोपयोग क । ९. सदा इति चप्रतौ न । १०. अस्नेहः ख च । ११. ०दर्ष्टान्तिकमर्थं ग । १२. निर्युक्तिगाथयोप० ख । १३. सुसिरं क छ । १४. कट्ठं सुक्कं सुचिरं लहुं ञ । १५. सुक्कं ठ । १६. खविंति झ, खवंति ठ । १७. चरणे ठिआ ख, चरणे ठिया ज झ ञ । १८. साहू ॥२३६॥ कख ॥ क, साहू ॥२३६ ॥छ॥ चतुर्थे तृतीयः ॥ चतुर्थाध्ययननिर्युक्तिः ॥ झ, साहू ॥२३६॥ छ ॥ सम्मत्तस्स णिज्जुत्ती समत्ता ॥ ञ, साहू ॥ २३६॥ च०ऽध्य०उ० ३ निर्यु० ॥ चतुर्थोद्देशकस्य नास्ति ॥ समाप्ता च०ऽध्य०निर्युक्तिः ॥ ठ ।

**फासाइं च फासे । लोयं च पास विप्फंदमाणं ।**

**जे णिव्वुडा पावेहिं कम्मेहिं अणिदाणा ते वियाहिता । तम्हाऽतिविज्जो णो पडिसंजलेज्जासि त्ति बेमि ॥**

॥ सम्मत्तस्स तइओ उद्देसओ सम्मत्तो ॥

**विगिंच कोहमि**[1]त्यादि । कारणेऽकारणे वाऽतिक्रूराध्यवसायः क्रोधः तं[2] परित्यज । तस्य च कार्यं कम्पनम्, तत्प्रतिषेधं दर्शयति—**अविकम्पमानः** । किं [3]विगणय्यैतत् कुर्यात् ? इत्याह—

**इममि**[4]त्यादि । इदं मनुष्यत्वं **निरुद्धायुष्कं** निरुद्धं [5]परिगणितमायुष्कं **सम्प्रेक्ष्य** पर्यालोच्य क्रोधादिपरित्यागं विदध्यात् । किञ्च—

**दुक्खमि**त्यादि । [6]क्रोधाग्निना दन्दह्यमानस्य यद् मानसं **दुःख**मुत्पद्यते तद् **जानीहि,** तज्जनितकर्मविपाकापादितं चागामि **दुःखं** सम्प्रेक्ष्य क्रोधादिकं प्रत्याख्यानपरिज्ञया जानीहि [7]परित्यजेरित्यर्थः । आगामिदुःखस्वरूपमाह—

**पुढो** इत्यादि । **पृथक्**[8] सप्तनरकपृथिवीसम्भवशीतोष्णवेदना-कुम्भीपाकादियातनास्थानेषु **स्पर्शान्**[9] दुःखानि । **चः** समुच्चये, न केवलं क्रोधाध्मातस्तस्मिन्नेव क्षणे दुःखम[10]नुभवति आगामीनि पृथग् दुःखानि च स्पृशेत् अनुभवेत् । [11]तेन चातिदुःखेनापरोऽपि लोको दुःखित इत्येतदाह—

**लोयं च** इत्यादि । न केवलं क्रोधादिविपाकादात्मा दुःखान्यनुभवति **लोकं च** शारीर-मानसदुःखापन्नं **विस्पन्दमानम्** अस्वतन्त्रमितश्चेतश्च दुःख[12]प्रतीकाराय धावन्तं **पश्य** विवेकचक्षुषाऽवलोकय । ये त्वेवं न ते किम्भूता भवन्ति ? [13]इत्यत आह—

---

१. कोहं इत्यादि ख ग च । २. तं त्यजेत् क, तं त्यज ग । ३. विगणय्य तत् क । ४. इमं इत्यादि ख च । ५. परिगलित० च । ६. क्रोधापिना क, क्रोधादिना घ ङ च । ७. परित्यजेदित्यर्थः ख ग च । ८. पृथक् नरकपृथ्वी० ख । ९. स्पर्शदुःखानि ख । १०. ०मनुभवतीति घ । ११. तेन च दुःखेना० ख ग । १२. ०प्रतिकाराय ख । १३. इत्याह ख, अत आह ग ।

**जे निव्वुडा** इत्यादि । ये तीर्थकरोपदेशवासितान्तःकरणा विषय-कषायाग्न्युपशमात् **निर्वृताः** शीतीभूता **पापेषु कर्मसु अनिदानाः** निदानरहितास्ते परमसुखास्पदतया **व्याख्याताः**, औपशमिकसुखभाक्त्वेन प्रसिद्धा इत्यर्थः । यत एवं ततः किम् ? इत्याह–

**तम्हा** इत्यादि । यस्माद् राग-द्वेषाभिभूतो दुःखभाग् भवति तस्मात् **अतिविद्वान्** विदितागमसद्भावः सन्न **प्रतिसञ्ज्वलेः** [1]क्रोधाग्निना नात्मानं दीपयेः, कषायोपशमं [2]कुर्वित्यर्थः । **इतिः** [3]अधिकारपरिसमाप्तौ । **ब्रवीमि** इति पूर्ववत् ॥

**सम्यक्त्वाध्ययने तृतीयोद्देशकटीका [4]समाप्ता ॥ छ ॥ छ ॥**

• • •

१. **क्रोधाग्निनाऽऽत्मानं नोद्दीपयेः** ख च । २. **कुर्वीतेत्यर्थः** ख-चपुस्तके विना । ३. **अधिकारसमाप्तौ** ग घ ङ । ४. **परिसमाप्ता** ख च, **समाप्तेति** घ ङ ।

उक्तस्तृतीयोद्देशकः । साम्प्रतं चतुर्थ आरभ्यते । अस्य चायमभिसम्बन्धः—इहानन्तरोद्देशके निरवद्यं तपोऽभिहितम्, तच्चाविकलं सत्संयमव्य[1]वस्थितस्य भवतीत्यतः संयमप्रतिपादनाय चतुर्थोद्देशक इति । अनेन सम्बन्धेनायातस्यास्योद्देशकस्यादि सूत्रम्—

**[ सू०१४३ ] आवीलए पवीलए णिप्पीलए जहित्ता पुव्वसंजोगं हिच्चा उवसमं । तम्हा अविमणे वीरे सारए समिए सहिते सदा जते ।**

**दुरणुचरो मग्गो वीराणं अणियट्टगामीणं ।**

**विगिंच मंस-सोणितं ।**

**एस पुरिसे दविए वीरे आयाणिज्जे वियाहिते जे धुणाति समुस्सयं वसित्ता बंभचेरंसि ।**

[2]**आवीलए** इत्यादि । आङ् ईषदर्थे, ईषत् पीडयेत् अविकृष्टेन तपसा शरीरकम् **आपीडयेत्** । एतच्च प्रथमप्रव्रज्यावसरे । तत [3]ऊर्ध्वमधीतागमः परिणतार्थसद्भावः [4]सन् प्रकर्षेण विकृष्टतपसा पीडयेत् **प्रपीडयेत्** । पुनरध्यापितान्तेवासिवर्गः [5]सङ्क्रामितार्थसारः [6]शरीरं [7]तित्यक्षुर्मासा-ऽर्धमासक्षपणादिभिः शरीरं निश्चयेन पीडयेद् **निष्पीडयेत्** । स्यात्—कर्मक्षयार्थं तपोऽनुष्ठीयते, स च पूजा-लाभ-ख्यात्यर्थेन तपसा न भवत्यतो निरर्थक एव शरीरपीडनोपदेश इति, *अतोऽन्यथा व्याख्यायते—कर्मैव [8]कार्मणं शरीरं वा आपीडयेत् प्रपीडयेद् निष्पीडयेत्*, [9]अत्रापीषदर्थादिका प्रकर्षगतिरवसेया । यदि वा आपीडयेत् कर्म अपूर्वकरणादिकेषु सम्यग्दृष्ट्यादिषु गुणस्थानकेषु, ततोऽपूर्वकरणा-ऽनिवृत्ति-

---

१. ०स्थितस्याभवती० ग । २. **आवीलये** च । ३. **ऊर्द्ध०** ख ग ङ च । ४. **स च प्रकर्षेण** ख । ५. **सङ्क्रमिता०** क । ६. **शरीरतित्यक्षु०** ख । ७. **तितिक्षु०** ङ । ८. **कार्मणशरीरं** घ ङ च । ९. **तत्रापी०** घ ।

बादरयोः प्रपीडयेत्, सूक्ष्मसम्परायावस्थायां तु निष्पीडयेत् । अथवा आपीडनम् उपशमश्रेण्याम्, प्रपीडनं क्षपकश्रेण्याम्, निष्पीडनं तु शैलेश्यवस्थायामिति । किं कृत्वैतत् कुर्यात् ? इत्याह—

**जहित्ता**[१] इत्यादि । पूर्वः संयोगः **पूर्वसंयोगः** धन-धान्य-हिरण्य-पुत्र-कलत्रादिकृतस्तं त्यक्त्वा । यदि वा पूर्वः असंयमः अनादिभवाभ्यासात्, तेन संयोगः पूर्वसंयोगस्तं त्यक्त्वा, **आवीलये**दित्यादिसम्बन्धः । किञ्च—

**हिच्चा**[२] इत्यादि । **हि गतौ** [पा० धा० १२५८] इत्यस्मात् पूर्वकाले क्त्वा[३] **हित्वा** गत्वा, किं तत् ? **उपशमम्** इन्द्रिय-नोइन्द्रियजयरूपं संयमं वा गत्वा प्रतिपद्य, आपीडयेद् इति वर्तते । इदमुक्तं भवति—असंयमं त्यक्त्वा संयमं प्रतिपद्य तपश्चरणादिनाऽऽत्मानं कर्म वाऽऽपीडयेत् प्रपीडयेद् निष्पीडयेदिति । यतः कर्मापीडनार्थमुपशमप्रतिपत्तिस्तत्प्रतिपत्तौ चाविमनस्कतेत्याह—

**तम्हा** इत्यादि । यस्मात् कर्मक्षयायाऽसंयमपरित्यागः, तत्परित्यागे चावश्यम्भावी संयमः, तत्र च न चित्तवैमनस्यमिति, तस्माद् **अविमनाः** विगतं भोग-कषायादिषु अरतौ वा मनो यस्य स विमनाः, यो न तथा सोऽविमनाः, कोऽसौ ? **वीरः** कर्मविदारणसमर्थः । अविमनस्कत्वाच्च यत् स्यात् तद् आह—

**सारये**[४] इत्यादि । सुष्ठु आ जीवनमर्यादया संयमानुष्ठाने रतः **स्वारतः**, पञ्चभिः समितिभिः **समितः**, सह हितेन **सहितो** ज्ञानादिसमन्वितो[५] वा सहितः, **सदा** सर्वकालं सकृदारोपितसंयमभारः संस्तत्र **यतेत** यत्नवान् भवेदिति । किमर्थं पुनः[६] पौनःपुण्येन संयमानुष्ठानं प्रत्युपदेशो दीयते ? इत्याह—

**दुरनुचरो** इत्यादि । दुःखेनानुचर्यत इति **दुरनुचरः** । कोऽसौ ? **मार्गः** संयमानुष्ठानविधिः । केषां ? **वीराणाम्**[७] अप्रमत्तयतीनाम् । किम्भूतानाम् ? इत्याह—**अणियट्ट** इत्यादि अनिवर्तः मोक्षस्तत्र गन्तुं शीलं येषां ते तथा,

---

१. **चइत्ता** क । २. **हेच्चा** ख । ३. **क्त्वा गत्वा हित्वा** ख । ४. **सारए** ख, **सारएत्यादि** घ ङ । ५. **ज्ञानादिभि( भिः ) समन्वितो** घ । ६. **पुनः** इति खप्रतौ नास्ति । ७. **धीराणाम्** च, "अप्पणिज्जे य गुरुसु य बहुवयणं, तेण **वीराणं** सामिस्स मग्गो सव्वतित्थगराणं वा" चूर्णौ ।

तेषामिति। यथा च[1] तन्मार्गानुचरणं कृतं भवति तद् दर्शयति–

**विगिंच** इत्यादि । **मांस-शोणितं** दर्पकारि विकृष्टतपोऽनुष्ठानादिना **विवेचय** पृथक्कुरु, तद्ध्रासं विधेहीति यावत्, **एवं वीराणां** मार्गानुचरणं कृतं भवतीति भावः । यश्चैवम्भूतः स कं गुणमवाप्नुयात् ? इत्याह–

**एस** इत्यादि । **एषः** मांस-शोणितयोरपनेता, पुरि शयनात् **पुरुषः**, द्रवः संयमः स विद्यते यस्यासौ **द्रविकः** मत्वर्थीयष्ठन्, द्रव्यभूतो वा मुक्तिगमनयोग्यत्वात्, [2]कर्मरिपुविदारणसहिष्णुत्वाद् **वीर** इति । मांस-[3]शोणितापचयप्रतिपादनाच्च तदुत्तरेषामपि मेदआदीनामपचय उक्त एव द्रष्टव्यः, तद्भावभावित्वात् तेषामिति । किञ्च–

[4]**आयाणिज्जे** इत्यादि । स वीराणां मार्गं प्रतिपन्नः मांस-शोणितयोरपनेता मुमुक्षूणाम् **आदानीयः** ग्राह्य आदेयवचनश्च **व्याख्यात** इति । कश्चैवम्भूतः ? इत्याह–

**जे धुणाइ** इत्यादि । **ब्रह्मचर्ये** संयमे मदनपरित्यागे **वोषित्वा यः समुच्छ्रयं** [5]शरीरं कर्मोपचयं वा तपश्चरणादिना **धुनाति** कृशीकरोति स आदानीय इति विविधमाख्यातो **व्याख्यात** इति सम्बन्धः । उक्ता अप्रमत्ताः । तद्विधर्मिणस्तु प्रमत्तानभिधित्सुराह–

## [ सू०१४४ ] णेतेहिं पलिछिण्णेहिं आताणसोतगढिते बाले अव्वोच्छिण्णबंधणे अणभिक्कंतसंजोए ।

## तमंसि अविजाणओ आणाए लंभो णत्थि त्ति बेमि ।

[6]**णेत्तेहिं** इत्यादि । नयन्त्यर्थदेशम् अर्थक्रियासमर्थ[7]मर्थमाविर्भावयन्तीति नेत्राणि चक्षुरादीनीन्द्रियाणि तैः, [8]परिच्छिन्नैः [9]यथास्वविषयग्रहणं प्रति निरुद्धैः सद्भिरादानीयोऽपि भूत्वोषित्वा ब्रह्मचर्ये पुनर्मोहो[10]दयाद् **आदान**[11]**श्रोतोगृद्धः**

---

१. वा ग । २. **कर्मरिपुदारण०**क, **कर्मरिपुविदारणः** च । ३. **०शोणितापनयापादनाच्च** ग । ४. आयाणिजे क, आयाणिज्जा ख, आयाणिज्जेत्यादि ग । ५. **शरीरकं** घ ङ। ६. **णित्तेहिं** ग, **णेत्तेहि** घ, **णेतेहिं** ङ । ७. **०मर्थं वाविर्भाव०** ङ । ८. **पलिच्छिन्नैः** क । ९. **यथास्वं विषय०** क-खप्रती विना । १०. **०दयादान०** क ख घ । ११. **०स्रोतो०** ग घ ङ।

आदीयते सावद्यानुष्ठानेन स्वीक्रियते इत्यादानं कर्म संसारबीजभूतम्, तस्य [१]श्रोतांसि [२]इन्द्रियविषया मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगा वा तेषु **गृद्धः** अध्युपपन्नः स्यात् । कोऽसौ ? **बालः** अज्ञो राग-द्वेष-महामोहाभिभूतान्तःकरणः । यश्चादान[३]श्रोतोगृद्धः स किम्भूतः स्यात् ? इत्याह— **अव्वोच्छिन्न[४]बंधणे** इत्यादि । अव्यवच्छिन्नं जन्मशतानुवृत्ति बन्धनम् अष्टप्रकारं कर्म यस्य स तथा । किञ्च—**[५]अणभिक्कन्त** इत्यादि, **अनभिक्रा[६]न्तः** अनतिलङ्घितः **संयोगः** धन-धान्य-हिरण्य-पुत्र-कलत्रादिकृ[७]तोऽसंयमसंयोगो वा येनासा[८]वनभिक्रान्तसंयोगः, [९]तस्य चैवम्भूतस्येन्द्रियानुकूल्यरूपे मोहात्मके वा **तमसि** वर्तमानस्य, आत्महितं मोक्षोपायं वा**ऽविजानतः आज्ञायाः** तीर्थकरोपदेशस्य **[१०]लाभो नास्ति इति** एतदहं **[११]ब्रवीमी**ति तीर्थकरवचनोपलब्धसद्भाव इति । यदि वा आज्ञा बोधिः सम्यक्त्वम्, अस्ति[१२]शब्दश्च निपातस्त्रिकालविषयी, तेनायमर्थः—तस्यानभिक्रान्तसंयोगस्य भावतमसि वर्तमानस्य बोधिलाभो नासीन्नास्ति न भावीति । [१३]एतदेवाह—

**[ सू०१४५ ] जस्स णत्थि पुरे पच्छा मज्झे तस्स कुओ सिया ?**

**से हु पन्नाणमंते बुद्धे आरंभोवरए ।**

**सम्ममेतं ति पासहा ।**

**जेण बंधं वहं घोरं परितावं च दारुणं ।**

**पलिछिंदिय बाहिरगं च सोतं णिक्कम्मदंसी इह मच्चिएहिं ।**

**कम्मुणा सफलं दट्ठुं ततो णिज्जाति वेदवी ।**

---

१. स्त्रोतांसि ग घ ङ। २. इन्द्रियमिथ्यात्वा० क, इन्द्रियविषय-मिथ्यात्वा० घ ङ। ३. ०स्त्रोतो० घ ङ। ४. ०बंधणो ख च। ५. अणभिक्कंत कपुस्तकमृते। ६. ०न्तः नाभिलङ्घितः ख। ७. ०कृतो वाऽसंयम० ख। ८. ०वनतिलङ्घितः ख। ९. तस्यैवम्भूत० क ग। १०. लम्भो क। ११. ब्रवीमि तीर्थ० ख च। १२ ०शब्दश्चायं निपात० क-गप्रती ऋते। १३. एतदाह ख।

**जस्स** [१]**नत्थी**त्यादि, **यस्य** कस्यचिदविशेषितस्य कर्मादान[२]श्रोतोगृद्धस्य बालस्याव्यवच्छिन्नबन्धनस्यानभिक्रान्तसंयोगस्याज्ञानतमसि वर्तमानस्य **पुरा** पूर्वजन्मनि बोधिलाभो **नास्ति** सम्यक्त्वं नासीत्, **पश्चाद**पि एष्येऽपि जन्मनि न भावि, **मध्ये** मध्यजन्मनि **तस्य कुतः स्यात्** ? इति । एतदुक्तं भवति–यस्यैव पूर्वं बोधिलाभः संवृत्तो भविष्यति वा तस्यैव वर्तमानकाले भवति, येन हि सम्यक्त्व[३]मास्वादितं पुनर्मिथ्यात्वोदयात् [४]तत् प्रच्यवते [५]तस्यापार्धपुद्गलावर्ते[६]नापि कालेनावश्यं [७]तत्सद्भावात्, न ह्ययं सम्भवोऽस्ति–[८]प्रच्युतसम्यक्त्वस्य पुनरसम्भव एवेति । अथवा निरुद्धेन्द्रियोऽपि आदान[९]श्रोतोगृद्ध इत्युक्तः, तद्विपर्ययभूतस्य [१०]त्वतिक्रान्तसुखस्मरणमकुर्वतः आगामि च दिव्याङ्गनाभोगमनभिकाङ्क्षतो वर्तमानसुखाभिष्वङ्गोऽपि नैव स्यादित्येतद् दर्शयितुमाह–**जस्स नत्थि** इत्यादि । यस्य भोग[११]विपाकवेदिनः पूर्वभुक्तानुस्मृतिर्नास्ति, नापि पाश्चात्त्यकालभोगाभिलाषिता विद्यते, तस्य व्याधिचिकित्सारूपान् भोगान् भावयतः मध्ये वर्तमानकाले कुतो भोगेच्छा स्यात् ? [१२]मोहनीयोपशमान्नैव स्यादित्यर्थः । यस्य [१३]तु त्रिकालविषया भोगेच्छा निवृत्ता स किम्भूतः स्यात् ? इत्याह–

**से हु** इत्यादि । **हुः** यस्मादर्थे, यस्माद् निवृत्तभोगाभिलाषस्तस्मात् स प्रज्ञानवान् प्रकृष्टं ज्ञानं प्रज्ञानं जीवा-ऽजीवादिपरिच्छेत्तृ तद्विद्यते यस्यासौ **प्रज्ञानवान्** । यत एव प्रज्ञानवान् अत एव **बुद्धः** अवगततत्त्वः । यत एवम्भूतोऽत एवाह–**आरंभोवरए** सावद्यानुष्ठानमारम्भस्तस्मादुपरतः **आरम्भोपरतः** । एतच्चारम्भोपरमणं शोभनमिति दर्शयन्नाह–

[१४]**सम्मम**ित्यादि । यदिदं सावद्यारम्भोपरमणं सम्यगेतत् शोभनमेतत्, सम्यक्त्वकार्यत्वाद्वा [१५]सम्यक्त्वमे**तदिति** एवं **पश्यत** एवं गृह्णीत यूयमिति । किमित्यारम्भोपरमणं सम्यक् ? [१६]इति चेद्, आह–

---

१. **णत्थि इत्यादि** ख च । २. **०स्रोतो०** ग घ ङ । ३. **०मासादितं** ख च । ४. **तत्** इति नास्ति ख-गप्रत्योः । ५. **तस्योपार्ध०** कआदर्शमृते । ६. **०नावश्यं** ख । ७. **तद्भावात्** क । ८. **प्रच्युतस्य सम्य०** च । ९. **०स्रोतो०** ग घ ङ । १०. **त्वनिष्क्रान्त०** क घ । ११. **०विपाकाऽऽवेदिनः** क । १२. **मोहनीयस्योपशमा०** च । १३. गपुस्तके **तु** इति न । १४. **सममित्यादि** च । १५. **सम्यक्त्वमिति** ख । १६. **इति तदाह** क ।

**जेण** इत्यादि । **येन** कारणेन सावद्यारम्भप्रवृत्तो **बन्धं** निगडादिभिः **वधं** [१]कसादिभिः **घोरं** प्राणसंशयरूपं **परितापं** शारीर-मानसं **दारुणम्** असह्य-मवाप्नोति अत आरम्भोपरमणं सम्यग्भूतं [२]कुर्यात् । किं कृत्वा ? इत्याह—

[३]**पलिच्छिंदि** इत्यादि । [४]**परिच्छिन्द्य** अपनीय, किं तत् ? [५]**श्रोतः** पापोपादानम्, [६]तच्च बाह्यं धन-धान्य-हिरण्य-पुत्र-[७]कलत्रादिरूपं हिंसा[८]द्याश्रवद्वारात्मकं वा, **च**शब्दाद् आन्तरं च राग-द्वेषात्म[९]कं विषयपिपासारूपं चेति किञ्च—

**निक्कम्मदंसी** इत्यादि । निष्क्रान्तः कर्मणो निष्कर्मा मोक्षः संवरो वा, तं द्रष्टुं शीलमस्येति **निष्कर्मदर्शी । इह** इति संसारे मर्त्येषु मध्ये य एव निष्कर्मदर्शी स एव बाह्या-ऽऽभ्यन्तर[१०]श्रोतसश्छेत्तेति । स्यात्—[११]किमभिसन्धाय स बाह्या-ऽऽभ्यन्तरसंयोगस्य छेत्ता निष्कर्मदर्शी वा भवेत् ? इत्यत आह—

[१२]**कम्मुणा** इत्यादि । मिथ्यात्वा-ऽविरति-प्रमाद-कषाय-योगैः क्रियन्ते बध्यन्ते इति कर्माणि ज्ञानावरणीयादीनि तेषां सफलत्वं दृष्ट्वा । 'स' वा निष्कर्मदर्शी [१३]वेदविद्वा कर्मणां फलं दृष्ट्वा, तेषां [१४]च फलम्—ज्ञानावरणीयस्य ज्ञानावृतिः, दर्शनावरणस्य दर्शनाच्छादनम्, वेदनीयस्य विपाकोदयजनिता [१५]वेदनेत्यादि । ननु च न सर्वेषां कर्मणां [१६]विपाकोदयमिच्छन्ति प्रदेशानुभवस्यापि सद्भावात्, तपसा च [१७]क्षयोपपत्ते[१८]रित्यतः कथं कर्मणां सफलत्वम् ? नैष दोषः, नात्र प्रकारकात्स्न्र्यमभिप्रेतम्, अपि तु द्रव्यकात्स्न्र्यम्, तच्चास्त्येव, तथाहि—यद्यपि [१९]प्रतिबन्धव्यक्ति न विपाकोदयस्तथाप्यष्टानामपि कर्मणां सामान्येन सोऽस्त्येवेत्यतः कर्मणां सफलत्व[२०]मुपलभ्य ततः तस्मात् कर्मणस्तदुपा-

---

१. **कशादिभिः** ग ङ । २. **कुर्यादित्याह । किं** ख । ३. **पलिछिंदि** ख च । ४. **परिच्छिद्य** क ग । ५. **स्रोतः** घ ङ । ६. न वर्तते **तच्च बाह्यं** इति पाठः खपुस्तके । ७. **०कलत्रादि हिंसा०** ख । ८. **०द्यास्रव०** घ ङ । ९. **०कं च विषयपिपासा इत्यादि । किञ्च** ख । १०. **०स्रोतस०** ग घ । ११. **किमभिसन्ध्य स** ग विना । १२. **कम्मुणेत्यादि** ख । १३. **वेदविद्वान् कर्मणां** ख ग । १४. **च** इति खप्रतौ न । १५. **वेदना चेत्यादि** ख । १६. **०विपाकोदयः प्रदेशा०** ख ग । १७. **क्षयोपपत्तेः कथं** ख । १८. **०रित्येतत् कथं** क । १९. **प्रतिषेधं व्यनक्ति न विपाको०** ख । २०. **०मुपलभ्यते तस्मात्** घ ङ ।

दाना[1]दाश्रवाद्वा निश्चयेन याति निर्याति निर्गच्छति, तन्न विधत्त इति यावत् । कोऽसौ वेदवित् वेद्यते सकलं चरा-ऽचरमनेनेति वेदः आगमस्तं वेत्तीति वेदवित् सर्वज्ञोपदेश[2]वर्तीत्यर्थः । न [3]केवलस्य ममैवायमभिप्रायः, सर्वेषामेव तीर्थकराणामयमाशय इति दर्शयितुमाह—

**[ सू०१४६ ] जे खलु भो वीरा समिता सहिता सदा जता संथडदंसिणो आतोवरता अहा तहा लोगं उवेहमाणा पाईणं पडीणं दाहिणं उदीणं इति सच्चंसि परिविचिट्ठिंसु ।**

**साहिस्सामो णाणं वीराणं समिताणं सहिताणं सदा जताणं संथडदंसीण आतोवरताणं अहातहा लोकमुवेह-माणाणं—किमत्थि उवधी पासगस्स, ण विज्जति ? णत्थि त्ति बेमि ।**

॥ चउत्थमज्झयणं सम्मत्तं ॥

**जे खलु भो [4]वीरा** इत्यादि । यदि वा उक्तः सम्यग्वादो निरवद्यं तपश्चारित्रं च । अधुना तत्फलमुच्यते—

**[5]जे खलु** इत्यादि । **खलु**शब्दः वाक्यालङ्कारे, ये केचनातीता-ऽनागत-वर्तमानाः **भो** इत्यामन्त्रणे, **वीराः** कर्मविदारणसहिष्णवः, **[6]समिताः** समितिभिः, **सहिताः** ज्ञानादिभिः, **सदा [7]यताः** सत्संयमेन, **[8]संथडदंसिणो** त्ति निरन्तरदर्शिनः शुभा-ऽशुभस्य, **आत्मोपरताः** पापकर्मभ्यः, **यथातथा** अवस्थितं **लोकं** चतुर्दशरज्ज्वात्मकं [9]लोकं कर्मलोकं वो**पेक्षमाणाः** पश्यन्तः [10]सर्वासु प्राच्यादिषु

---

१. ०दास्रवाद्वा घ । २. ०वर्ती । न ख । ३. केवलमस्य ममैवा० क, केवलं ममैवा० घ ङ । ४. धीरा च । ५. जे य खलु ख । ६. समितिभिः समिताः ग । ७. यतास्तत्सम्भवे च संथड० ख । ८. संघड० घ ङ । ९. घ-ङ-चप्रतिषु लोकं इति नास्ति । १०. सर्वासु दिक्षु प्राच्यादिषु व्यव० ख ।

दिक्षु व्यवस्थिता इत्येवंप्रकाराः, सत्यम् [1]इति [2]ऋतं तपः संयमो वा तत्र [3]परिचितस्थिरे तस्थुः स्थितवन्तः, उपलक्षणार्थत्वात् त्रिकाल[4]विषयता द्रष्टव्या, तत्रातीते काले अनन्ता अपि सत्ये तस्थुः, वर्तमाने पञ्चदशसु कर्मभूमिषु सङ्ख्येयास्तिष्ठन्ति, अनागते अनन्ता अपि स्थास्यन्ति, तेषां चातीता-ऽनागत-वर्तमानानां सत्यवतां यद् **ज्ञानं** योऽभिप्रायस्तदहं कथयिष्यामि भवताम्, शृणुत यूयम् । किम्भूतानां तेषां ? [5]**वीराणा**मित्यादीनि विशेषणानि गतार्थानि । किम्भूतं ज्ञानम् ? [6]इति चेद् आह—'**किं** प्रश्ने, **अस्ति** विद्यते, कोऽसौ ? **उपाधिः** कर्मजनितं विशेषणम्, तद्यथा—नारकस्तैर्यग्यो[7]नः सुखी दुःखी सुभगो दुर्भगः पर्याप्तको[8]ऽपर्याप्तक इत्यादि, आहोस्विद् न विद्यते ? इति [9]परमतमाशङ्क्य [10]तं ऊचुः—**पश्यकस्य** सम्यग्वादादिकमर्थं पूर्वोपात्तं पश्यतीति पश्यः, स एव पश्यकः, [11]तस्य कर्मजनितोपाधिर्न विद्यते । इत्येतदनुसारेणाहमपि **ब्रवीमि,** न स्वमनीषिकयेति ॥

**गतः सूत्रानुगमः । तद्गतौ च समाप्तश्चतुर्थोद्देशकः नयविचारातिदेशात् ॥ समाप्तं सम्यक्त्वाध्ययनं [12]चतुर्थमिति ॥ [13]छ ॥**

● ● ●

---

१. इति इति ख-चप्रत्योर्न । २. **व्रतं** क घ ङ । ३. **परिचिते स्थिरे स्थित०** घ, **परिचिते तस्थुः स्थिरे स्थित०** ङ । ४. **०विषयतो द्रष्टव्याः**, ख । ५. **धीराणा०** च । ६. **इति** तदाह क । ७. **०नः सुभगो दुर्भगः सुखी दुःखी पर्या०** ख ग । ८. **०ऽपर्याप्त इत्यादि** क । ९. **परमाशङ्क्य** च । १०. **तं** इति कप्रतौ न । ११. **तदस्य** ख । १२. **चतुर्थमिति** इति खपुस्तके नास्ति । १३. ॥ **छ** ॥ **६२०** ॥ **छ** ॥ ग च, ॥ **छ** । **ग्रन्थाग्रम् ६२०** ॥ **छ** ॥ घ ङ।

# प्रथमं परिशिष्टम्

## आचाराङ्गसूत्रस्य शीलाचार्यविरचितवृत्तावुद्धृताः पाठाः


| उद्धृतः पाठः | पृ० |
|---|---|
| अकर्तरि च कारके..... [पा० ३।३।१९] | १७७ |
| अच्चाहारो न सहे.... | ३६२ |
| अज्ञानान्धाश्चटुलवनितापाङ्ग..... | २३९ |
| अज्ञानं खलु कष्टं..... | २४१ |
| अज्ञो जन्तुरनीशः..... | ३७ |
| अडइ वहुं वहइ भरं..... | २४३ |
| अणवरयगरुय.... | १६२ |
| अणसणमूणोयरिया..... | १० |
| अणिगूहियबलविरिओ..... | १० |
| अणुव्वयमहव्वएहिं..... | २०४ |
| अतर्कितोपस्थितमेव सर्वं..... | ३८ |
| अट्ठतेरस बारस..... | १४४ |
| अद भक्षणे [पा० धा० १०११] | २३१ |
| अद्धा जोगुक्कोसे..... | २१९ |
| अनुश्रेणि गतिः [तत्त्वार्थ० २।२७] | १५८ |
| अन्ने के पज्जाया..... | १४ |
| अन्ने केवलगम्म त्ति..... | १४ |
| अन्येष्वपि दृश्यते [पा० ३-२-१०१] | १४९ |
| अप्पं बायर मउयं..... | २०९ |
| अप्पग्गंथमहत्थं..... | २३ |
| अप्येकं मरणं कुर्यात् | ३६८ |
| अप्रच्युतानुत्पन्न.... | ४६ |
| अभिषेचनोपवासब्रह्मचर्यगुरुकुलवास... | ४०५ |
| अरहंतसिद्धचेइय..... | २०४ |
| अरहंतादिसु भत्ती..... | २०४ |
| अर्शआदिभ्योऽच् [पा० ५-२-१२७] | २१७ |
| अवमानात् परिभ्रंशाद्..... | २५४ |
| अवरेण पुव्वं किह.... | ३६५ |
| अवि अप्पणो वि देहम्मि.... | २९१ |
| असियसयं किरियाणं..... | ३५ |
| अस्संखाउ मणुस्सा..... | ५१ |
| आगासे गंगसोउव्व..... | २९३ |
| आत्मा सहैति मनसा..... | २२२ |
| आदौ प्रतिष्ठाधिगमे..... | ५६ |
| आयंकभयुव्विग्गो.... | १६३ |
| आयरियाणुन्नाए.... | १६२ |
| आराध्य भूपतिमवाप्य..... | २४६ |
| आर्यो देशः कुल-रूपसम्पदायुश्च..... | ५२ |
| आलस्समोहवन्ना..... | २३५ |
| आवस्सयस्स दसया... | १७९ |
| आ षोडशाद् भवेद् बालो..... | २२५ |
| आहारसरीरिंदिय..... | ६३ |
| आहारार्थं कर्म कुर्यादनिन्द्यं.... | ३६२ |
| इण् गतौ [पा० धा० १०४५] | २५६ |
| इदं तावत् करोम्यद्य..... | २९९ |
| इन्द्रियाणि न गुप्तानि..... | २४२ |
| उक्खणइ खणइ निहणइ..... | २१७ |
| उच्छ्वासावधयः प्राणाः..... | २२० |
| उद्देसे णिद्देसे य [आवश्यकनिर्युक्तौ गा० १३७]..... | ६ |
| उपयोगद्वयपरिवृत्ति..... | ९० |
| उर्मी यः स्वत एव मोहसलिलो..... | २७१ |
| उम्मग्गदेसओ मग्ग..... | २०४ |
| उववाएणं दोसुद्धकवाडेसु..... | १०३ |
| ऊसरदेसं दड्ढेल्लयं..... | ३८४ |
| एएहिं कारणेहिं..... | २३५ |
| एक एव हि भूतात्मा..... | ३७ |
| एकं हि चक्षुरमलं सहजो विवेकः..... | ८७ |
| एकं हि चक्षुरमलं सहजो विवेकः..... | २५६ |

एक: प्रकुरुते कर्म..... ४१९
एगदवियस्स जे अत्थ [सन्मतौ]..... ३७५
एगा कोडाकोडी..... १४५
एजृ कम्पने [पा० धा० २३४] १६१
एतानि दुर्लभानि..... ५२
एवं कर्माणि पुन:..... ५२
एवं भ्रमत: संसार..... ५२
एवं सव्वे वि णया..... १७१
एहि गच्छ पतोत्तिष्ठ..... २४७
कइ णं भंते जुम्मा पण्णत्ता..... २८
कइ णं भंते सण्णाओ पण्णत्ताओ..... २४
कइया वच्चइ सत्थो..... २१६
क: कण्टकानां प्रकरोति तैक्ष्ण्यं..... ३७
कट्ठेण कंटएण व.... १६४
कण्णसोक्खेहिं सद्देहिं..... १३२
कर्म योगनिमित्तं बध्यते..... ५३
कर्मानुभवदु:खित..... ५२
कहं णं भंते जीवा अट्ठ..... ३४८
काणो निमग्नविषमोन्नतदृष्टिरेक:..... २५७
काल: पचति भूतानि..... ३६
काले विणए बहुमाणे..... ९
किं एत्तो कट्ठयरं..... १९५
किं कतिविहं कस्स..... ६
किं थ तयं पम्हुट्ठं..... ४६
किं पुण अवसेसेहिं..... २१
कुलकोडिसयसहस्सा..... १४४
कृमिकुलचितं लालाक्लिन्नं..... २६४
केण ममेत्थुप्पत्ती..... ३६४
केनाञ्जितानि नयनानि.... ३७
केवली णं भंते..... २०९
क्षणु हिंसायाम् [पा०धा० १४६६] ३१९, ३२१
क्षितितलशयनं वा प्रान्तभैक्षाशनं वा..... २३८
गंधेसु य भद्दयपंतएसु..... ३११
गते प्रेमाबन्धे प्रणयबहुमाने..... २९३
गात्रं संकुचितं गतिर्विगलिता..... २२६
गुणानामेव दौर्जन्याद्..... १८५
गोला य असंखिज्जा..... १२६
चरणपडिवत्तिहेउं जेणियरे..... २
चरणपडिवत्तिहेउं धम्मा... २
चिन्ता गते भवति साध्वसम..... ३०१
चिरसंसिट्ठोऽसि मे गोयमा... ४५
चोइज्जंतमभिक्खं.... १६२
जइ पुण होज्ज... १६३
जइ सो वि निज्जरमओ.... २५३
जं अज्जिअं चरित्तं..... ३७३
जं अन्नाणी कम्मं खवेइ..... ३
जं जं करेइ तं तं..... २२७
जंबुद्दीवे दीवे..... १६२
जन्मजरामरणभयैरभिद्रुते [प्रशमरतौ]..... २२७
जरामरणदौर्गत्य..... २८५
जलरेणुपुढविपव्वय..... ११६
जह जह सुयमवगाहइ..... ९०
जह मत्थयसूईए..... १९३
जागरह णरा णिच्चं..... ३३२
जागरिआ धम्मीणं..... ३३२
जायतेयं न इच्छंति..... १०९
जायमाणस्स जं दुक्खं..... ३४५
जाव णं एस जीवे.... २०२
जाव णं भंते एस जीवे..... ४७
जियपरिसो जियनिद्दो..... ४
जीवन्नेव मृतोऽन्धो..... २५७
जीवे णं भंते कतिहिं ठाणेहिं..... १९३
जे इमे अज्जत्ताए समणा निग्गंथा..... ३७७
जे जत्तिया य हेऊ..... २८८
जो हेउवायपक्खंमि..... ३१९
ज्ञानं भूरि यथार्थवस्तुविषयं..... २४०
ज्ञानक्रियाभ्यां मोक्ष:..... ५७
ज्ञानैश्वर्यधनोपेतो..... ३१६

णायगम्मि हते संते..... ३४९
तकि कृच्छ्रजीवने [पा०धा० ११८] १६१
तज्ज्ञानमेव न भवति..... २३९
तणवोऽणब्भातिविगार.... ८६
तणसंथारनिसण्णो..... २३८
तत्थ णं जे ते पज्जत्तगा [प्रज्ञापनासूत्रे]..... ६१
तत्थ वि य जाइसंपन्नतादि..... ५१
तत्थासि गरुयसंवेग.... १६२
तत्थेव य निद्धवणं..... ३१७
तस्मात् प्रभृति ज्ञान..... ७४
तिङां तिङो भवन्ति २२०
तित्थयरो चउणाणी..... २१
तिथिपर्वोत्सवा: सर्वे..... २४५
तिन्नेव य गुत्तीओ..... १०
तिपृ तेपृ क्षरणार्थौ [पा०धा० ३६२-६३] २९४
तिव्वकसाओ बहुमोह..... २०४
तुम्ह वि कोइ पमादी... १६३
तुष्ट्यर्थमत्रमिह.... ५४
तैः कर्मभिः स जीवो..... ५२
दंड कवाडे मंथंतरे य
*[आवश्यकनिर्युक्तौ गा० ७५५]* १८३
दंडकससत्थरज्जु.....
[आवश्यनिर्युक्तौ गा० ७२५] २२०
दट्ठूणऽड्ढिविसेसे ते.... १६२
दव्वं पज्जवविजुयं..... १८२
दव्वायंकादंसी.... १६३
दशसूनासमं चक्री..... ३१७
दाराः परिभवकारा..... २५९
दिट्ठा सि कसेरुमइ..... २७७
दिव्यात् कामरतिसुखात्.....[प्रशमरतौ] १९
दुःखकरमकीर्तिकरं..... २५७
दुःखद्विट् सुखलिप्सुः.....[प्रशमरतौ] ३०७
दुःखप्रतिक्रियार्थं..... ५२
दुःखात्मकेषु विषयेषु..... २१०
दुःखार्तः सेवते कामान्..... ३००
दुप्पत्थिओ अमित्त..... ३६८
दृश्यं वस्तु परं न पश्यति..... १९२
देवा णं भंते सव्वे समवण्णा..... ३३७
देविंदचक्कवट्टित्तणाइं..... ५१
देसकुलजाइरुवी..... ४
दो ताहे पुव्वमए.... १६२
दो पुरिसा सरिसवया..... ११६
दोसा जेण निरुब्भंति..... २८७
द्रव्यं च भव्ये [पा० ५।३।१०४] ३१३
द्वे वाससी प्रवरयोषिदपायशुद्धा..... ५४
धर्मं चरतः साधो..... २७९
धर्मश्रुतिश्रवणमङ्गल..... २५७
धावेइ रोहणं तरइ सायरं..... २४३
नइवेगसमं चवलं च..... २२९
नणु सव्वनहपदेसा.... १४
ननु पुनरिदमतिदुर्लभ..... २२९
न मोहमतिवृत्य बन्ध..... ३४८
न य किंचि अणुण्णायं..... २८७
नयास्तव स्यात्पदसत्त्व..... १८२
*नरकेषु देवयोनिषु.....* ५२
न विभूषणमस्य युज्यते..... २२७
न शक्यं रूपमद्रष्टुं..... १३३
नश्यति नौति याति..... ४०३
न हि स्वतोऽसती..... १८१
नाणं किरियारहियं.... १३०
नातः परमहं मन्ये..... ३३०
नान्तर्मुहूर्तकालमतिवृत्य..... ९०
नामण धोयण वासण..... ९
नालस्सेणं समं सुक्खं..... ३३२
निक्खेवेगट्ठनिरुत्ति..... ४
निस्संकिय निक्कंखिय..... १०
पंचविहे आयारे जुत्तो..... ४
पंचिंदियतिरिएसुं..... ५१

| | |
|---|---|
| पक्खचउमासवच्छर..... | १९६ |
| पक्खित्तो जत्थ णरो.... | १६२ |
| पञ्चसु रक्ताः पञ्च विनष्टा..... | ३३४ |
| पडणीयमंतराइय..... | २०४ |
| पडुप्पन्नवणस्सइकाइयाणं..... | १०८ |
| पडुप्पन्नतसकाइया केवतिकालस्स..... | १४६ |
| पणुवीसं छव्वीसं च..... | १४४ |
| पयईए तणुकसाओ.... | २०४ |
| पाईणं पडिणं वावि..... | १०९ |
| पाणवहादीसु रत्तो..... | २०५ |
| पायच्छित्तं विणओ..... | १० |
| पासंडी य जहुत्ते.... | १६२ |
| पिंडेसण सेज्जरिया... | १३ |
| पिता रक्षति कौमारे..... | २२४ |
| पिब खाद च चारुलोचने..... | ४०४ |
| पुढविकाइया णं भंते..... | ६५ |
| पुढविदगअगणिमारुय..... | १४४ |
| पुढवीजलजलणमारुय..... | ५० |
| पुत्रकलत्रपरिग्रह..... | २१५ |
| पुत्रा मे भ्राता मे..... | २१५ |
| पुनरपि सहनीयो..... | २७२ |
| पुरुष एवेदं सर्वं..... | ३८ |
| पुव्विं चिय सिक्खविए.... | १६२ |
| प्रतिषेद्धप्रतिषेधौ..... | ४१ |
| प्रतिषेधयति समस्तं..... | २४ |
| प्रथमतरमथेदं चिन्तनीयं..... | २९३ |
| प्रथमे वयसि नाधीतं..... | २२३ |
| प्राणा द्वित्रिचतुः प्रोक्ताः..... | १५१ |
| प्राणी प्राणिज्ञानं..... | ४०७ |
| प्राक्षव्यो निर्यतिबला.... | ३७ |
| बंधाणुलोमया खलु..... | ११ |
| बध्नाति ततो बहुविध..... | ५२ |
| बलवानिन्द्रियग्रामः.... | २४० |
| बहुलं छन्दसि [पा० ७।४।७८] | २३१ |
| भवित्री भूतानां परिणति..... | २९४ |
| भावे कसायलोगो.... | १७९ |
| भुंजसु न ताव रिक्को..... | २१७ |
| भूयाणमेस माघाओ..... | १०९ |
| भूयाणुकंपवयजोगउज्जुओ..... | २०४ |
| भृत्येषु मन्त्रिषु सुतेषु मनोरमेषु..... | ५४ |
| मंसट्ठिरुहिरण्हारुवणद्ध..... | २९७ |
| मच्छा मणुआ य सत्तमिं..... | ३५७ |
| मणवयणकायवंको..... | २०४ |
| ममाहमिति चैष..... | २९० |
| मरिष्यामीति यद् दुःखं..... | १६४ |
| मांसेन पुष्यते मांसम्..... | २४५ |
| मायावलेहिगोमुत्ति..... | १९६ |
| माल्यम्लानिः कल्पवृक्षप्रकम्पः..... | ३३७ |
| मासैरष्टभिरह्ना च..... | २१६ |
| मिच्छद्दिट्ठी महारंभपरिग्गहो..... | २०४ |
| मुच्छा परिग्गहो.... | २९० |
| मुत्तपुरीसनिरोहे..... | २२० |
| यत्राकृतिस्तत्र गुणा वसन्ति..... | ५ |
| यत् स्वयमदुःखितं स्यात्..... | ९८ |
| यथाप्रकारा यावन्तः..... | ३९८ |
| यथेष्टविषयाः सात..... | ३४६ |
| यदि नामास्य कायस्य..... | २९७ |
| यल्लोके व्रीहियवं..... | २७६ |
| यावद् दृश्यं परस्तावद्..... | ३८ |
| योगनिरोधाद् भवसन्ततिक्षयः..... | १८८ |
| रक्तः शब्दे हरिणः स्पर्शे..... | ३३४ |
| रमइ विहवी विसेसे.... | २६२ |
| रागद्दोसकसाएहिं..... | ७३ |
| रागद्वेषवशाविद्धं..... | ३३५ |
| रागद्वेषाभिभूतत्वात्..... | २६५ |
| रूवेसु अ भद्दयपंतएसु..... | ३११ |
| लज्जां गुणौघजननीं..... | २९२ |
| लज्जा दया संजम बंभचेरं.... | ७६ |

लभ्यते लभ्यते साधुः..... २९०
लोकद्वयव्यसनवह्नि..... २५७
लोकृ दर्शने [पा०धा० ७६] १७७
वणस्सइकाइए णं भंते ! वणस्सइ..... १०८
वणस्सइकाइयाणं भंते केमहालिया..... १०९
वदत यदीह कश्चिदनुसंतत..... ४०३
वलिसन्ततमस्थि..... २२४
वारिदस्तृप्तिमाप्नोति..... ५५
वालुगाकवलो चेव..... २९३
विगलिंदिएसु दो दो..... ५०
विंगलिंदिएसु दो दो..... १४४
विचिन्त्यमेतद् भवताऽहमेको..... ४१९
विणया णाणं णाणाओ..... ४०
विणया णाणं णाणाओ..... १८८
विनयफलं शुश्रूषा..... १८८
विभव इति किं मदस्ते..... ३११
विरसरसियं रसंतो तो..... ३४५
विहवालेवनडिएहिं..... ४८
वीरभोग्या वसुन्धरा..... ५५
वृक्षादयोऽक्षाद्युपलब्धि..... १२२
व्यथ भय-चलनयोः [पा०धा० ७६४] ७४
शसु हिंसायाम् [पा०धा० ७२४] २१८
शाठ्यं ह्रीमति गण्यते..... १८५
शास्ता शास्त्रं शिष्यः..... ४१
शिशुमशिशुं कठोरमकठोर..... २६१
शिवमस्तु कुशास्त्राणां..... ३१५
श्रेयांसि बहुविघ्नानि..... २
संचारिमजंतगलंत..... २९७
संते य अविम्हइउं..... २५४
संवरफलं तपोबलमथ..... १८८
संसार एवायमनर्थसारः..... ४१९
सगुणमपगुणं वा..... २९४
सततानुबद्धमुक्तं..... ५२
सति धर्म्मिणि धर्म्माश्चिन्त्यन्ते ३४
सत्तरसयमुक्कोसं..... ३९०
सत्यं पिशाचाः स्म..... ३९
सदैकोऽहं न मे कश्चित्..... ४१९
सद्देसु अ भद्दयपावएसु..... ३११
सन्दिग्धेऽपि परे.... २६१
सम्प्राप्य मानुषत्वं..... २२९
सम्मूर्छन-गर्भ.... १५०
सरसो चंदणपंको..... ११
सर्वनिकृष्टो जीवस्य..... ७४
सर्वसुखान्यपि बहुशः..... २५३
सव्वत्थोवा बादरपुढविकाइया..... ६६
सव्वेसिं पि णयाणं..... १७१
सव्वोऽवि किसलओ खलु..... १२४
ससमयपरसमयविऊ..... ४
सहकलेवर खेदमचिन्तयन्..... २३२
साध्यं यथा कथञ्चित्..... २९१
सामण्णमणुचरंतस्स..... ३७३
सावज्जणवज्जाणं..... ३१८
सीयादी जोणीओ चउरासीती..... ५१
सुखदुःखे मनुजानां..... ५२
सुयइ य अयगरभूओ..... ३३२
सुयइ सुयंतस्स सुयं..... ३३२
सेढी सणाणदंसणपज्जाया..... १४
सेहो गए निवम्मी.... १६३
सोइंदियवसगे णं भंते ! जीवे किं बंधइ.....७३
सोउं सोवणकाले..... ३००
सोही य उज्जुयभूयस्य..... ८९
स्नानं मददर्पकरं.... १००, २८६
स्वकलत्रबालपुत्रक..... २५७
स्वतोऽन्यत इतस्ततो..... २२०
स्वभावतः प्रवृत्तानां..... ३७
स्वेच्छाविरचितशास्त्रैः..... २४१
हयं नाणं कियाहीणं..... १७१
हि गतौ [पा०धा० १२५८] ४२४
हीणभिण्णसरो दीणो..... ३४६
होऊण चक्कवट्टी..... २५४

# द्वितीयं परिशिष्टम्

## आचाराङ्गसूत्रसम्पादनोपयुक्तग्रन्थसंकेतादिसूचिः ।

| | | |
|---|---|---|
| आचा०नि० | = | आचाराङ्गनिर्युक्तिः |
| आव०नि० | = | आवश्यकनिर्युक्तिः |
| जीवस० | = | जीवसमासप्रकरणम् |
| | | ज्ञाताधर्मकथा |
| तत्त्वार्थ० | = | तत्त्वार्थसूत्रम् |
| दशवै० नि० | = | दशवैकालिकनिर्युक्तिः |
| निशी०पी०गा० | = | निशीथसूत्रपीठिकागाथा |
| | | नीतिशतकम् |
| पञ्चव० | = | पञ्चवस्तुकम् |
| पञ्चसं० | = | पञ्चसंग्रहः |
| पा० | = | पाणिनीयव्याकरणम् |
| पा०धा० | = | पाणिनीयो धातुपाठः |
| | | प्रज्ञापनासूत्रम् |
| प्रशम० गा० | – | प्रशमरतिगाथा |
| बृ०क०भा० | = | बृहत्कल्पसूत्रभाष्यम् |
| | | बृहत्स्वयम्भूस्तोत्रम् |
| | | मनुस्मृतिः |
| मी०श्लो०वा० | = | मीमांसाश्लोकवार्तिकम् |
| विशेषाव० भा० | = | विशेषावश्यकभाष्यम् |